In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 9

आचार्य पेन्ना मधुसूदनप्रणीतः

॥ लघुकृतिसङ्ग्रहः ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सहायकौ

डा. के वि सूर्यप्रकाशः

सहायकाचार्यः (संशोधनम्)

जोशि भरद्वाजः

संशोधकः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 9

आचार्य पेन्ना मधुसूदनप्रणीतः

॥ लघुकृतिसङ्ग्रहः ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सहायकौ

डा. के वि सूर्यप्रकाशः

सहायकाचार्यः (संशोधनम्)

जोशि भरद्वाजः

संशोधकः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 09

Laghukṛtisaṅgrahaḥ

of

Prof. Penna Madhusudan

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Laghukṛtisaṅgrahaḥ

of

Prof. Penna Madhusudan

ISBN – 978-81-969575-5-1

© Sanskrit Academy

Year	:	2024
Pages	:	xxii+368
Copies	:	300
Price	:	₹ 500

In Public domain. Digitization Muthulakshmi Research Academy
Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 09

Laghukṛtisaṅgrahaḥ

of

Mahākavi Prof. Pennā Madhusūdan

Sāhitya Akāḍamī Awardee, Śāstraratnākara,
Yuvavipaścit, Vācaspati, Madhubhāratī,

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor & Project Investigator
Prof. K. Neelakantham
Director

Co-Investigator
Dr. K V Suryaprakash
Assistant Professor (Research)
&
Joshi Bharadwaj

Sanskrit Academy
Adarsha Sanskrit Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University, Hyderabad – 500 007
2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 09

Laghukṛtisaṅgrahaḥ

of

Prof. Penna Madhusudan

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Laghukṛtisaṅgrahaḥ
of
Prof. Penna Madhusudan

ISBN – 978-81-969575-5-1

© Sanskrit Academy

Year	:	2024
Pages	:	xxii+368
Copies	:	300
Price	:	₹ 500

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

ओम् श्री गुरुभ्यो नमः

॥श्रीशङ्करभगवत्पादाः विजयन्ते॥

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते[1]॥

इत्युदघोषयत् दण्डिमहाकविः काव्यादर्शे। "सृष्टेः आरम्भात् शब्दाह्वयः ज्योतिः यदि न प्राकाशिष्यत तर्हि भुवनत्रयमपि गाढान्धकारे अवर्तिष्यत" इति दण्डिनः श्लोकस्यार्थः। यथा सूर्यादिज्योतिषाम् अभावे तमसा अवस्कन्दिताः पदार्थाः विलुप्ता इव भवन्ति तथा वाचाम् अभावे सर्वेऽपि ऐहिक-पारलौकिकाः व्यवहाराः विलुप्ताः भवेयुः इति भावः। परमात्मा सृष्टिकर्ता शब्दाख्यं ज्योतिं सृष्ट्वा लोकाय महान्तम् उपकारं कृतवान्। यदि शब्दो नाभविष्यत् तर्हि मानवानां कृते भावव्यक्तीकरणावकाश एव नाभविष्यत्। भावव्यक्तीकरणसाधनं नास्ति चेत् मानवाः पशुप्राया एव भवन्ति स्म। वेदवाङ्मयस्य, महापुरुषाणां च उपदेशान् श्रोतुम् अवगन्तुं जीवनं सुव्यवस्थितया यापयितुञ्च अवकाशं न अलप्स्यन्त। अतः मानवानां कृते सत्पथप्रदर्शकः, जीवनफलदायकः ज्योतिः शब्द एवेति दण्डिमहाकवेः अभिप्रायः। अनेनेदम् अवगन्तुं शक्यते यत् शब्दः सर्वथा उपदेशात्मकः एव भवति। अयञ्चोपदेशः विविधः भवति। वेदानाम् उपदेशः आज्ञेव, पुराणानाम् उपदेशः सुहृदुपदेश इव, काव्यानाम् उपदेशः सरसः, आह्लादजनकः, चित्ताकर्षकश्च भवतीति साहित्यशास्त्रप्रणेतारः स्पष्टयकुर्वन्[2]। अत एव कालिदासात्प्रभृति इदानीन्तनकाल-पर्यन्तं महाकवयः सहस्रशः काव्यानि सहृदयहृदयाह्लादकानि व्यरचयन् विरचयन्ति च।

---

1 काव्यादर्श प्रथमपरिच्छेदः -4

2 यद्वेदात्प्रभुसम्मितादधिगतं शब्दप्रधानाच्चिरम्
यच्चार्थप्रवणात् पुराणवचनादिष्टं सुहृत्सम्मितात्।
कान्तासम्मितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहा कुर्महे।। (प्रतापरुद्रायम् 1-8)

In Public domain. Digitization Muthulakshmi Research Academy

काव्यस्य उत्पत्तिः-

आदौ तावत् काव्यं कथं प्रवृत्तमिति विचिकित्सायां काव्यप्रवर्तकेषु भगवान् वाल्मीकिरेव आद्यः पुरुष इति प्रत्नमुत्तरम्। वाल्मीकिरेवादिकविः, तस्यैव च कृतिरादिकाव्यं श्रीमद्रामायणम्। काव्यमीमांसाकारस्य राजशेखरस्य मते तु पूर्वं शिवः ब्रह्मादीन्, ब्रह्मा च स्वशिष्यान् काव्यमुपदिदेश। ब्रह्मशिष्येषु कश्चित्काव्य-पुरुषोऽप्यासीत्। स एव काव्यपुरुषः लोके काव्यमादौ प्रसारयामास। काव्यप्रजापतिः काव्यपुरुषं विद्याप्रवर्तनाय प्रायुक्त। स काव्यपुरुषः दिव्येभ्यः काव्यविद्यास्नातकेभ्यः काव्यं सप्रपञ्चं प्रोवाच[3]।

'त्रयी वार्ता दण्डनीतयस्तिस्रो विद्याः' इति मनुमतानुसारिणः। 'आन्वीक्षिकी तयी वार्ता दण्डनीतयश्चतस्रो विद्याः' इति कौटिल्यः। 'पञ्चमी साहित्यविद्या' इति यायावरीयः। शब्दार्थयोः यथावत्सहभावेन विद्या साहित्यविद्या[4]। काव्यस्य शब्दार्थौ शरीरं, संस्कृतं मुखं, प्राकृतं बाहुः, जघनमपभ्रंशः, पैशाचं पादौ, उरोमिश्रम्। उक्तिचणं काव्यपुरुषस्य वचः, रस आत्मा, रोमाणि छन्दांसि, प्रश्नोत्तरप्रवह्लिकादिकं च वाक्केलिः[5]। काव्यपुरुषस्य स्त्री 'साहित्यविद्यावधूः' इति पदेन व्यपदिष्टा। काव्य-पुरुषोत्पत्तिसंबन्धिनी कथा कवेः राजशेखरस्य प्रतिभाप्रसूतेत्यवगन्तव्यम्।

काव्यस्य लक्षणानि –

'लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्' इति सामान्यं काव्यस्वरूपम्। विशेषलक्षणानि चेत्थम् - "इष्टार्थव्यवच्छिन्ना पदावली काव्यम्" इति दण्डी, "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति मम्मटः, "वाक्यं रसात्मकं काव्य"मिति विश्वनाथः, "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति जगन्नाथः, "काव्यं रसादिमद् वाक्यं श्रुतं सुखविशेषकृत्" इति शौद्धोदनिः, "निर्दोषं गुणवत्काव्यम् अलङ्कारैरलङ्कृतम्। रसात्मकं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति" इति भोजः, "निर्दोषा लक्षणवती सरीतिगुणगुम्फिता। सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्" इति जयदेवः, 'शब्दार्थौ सहितौ काव्यम्' इति भामहोद्भटरुद्रटानन्दवर्धनाः, "शब्दार्थौ

---

3 काव्यमीमांसा-प्रथमोऽध्यायः

4 काव्यमीमांसा-द्वितीयोऽध्यायः

5 काव्यमीमांसा-तृतीयोऽध्यायः

सहितौ वक्रकविव्यापारशालिनी। 'बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी" इति कुन्तकः, "काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते" इति वामनः। "साधुशब्दार्थसन्दर्भगुणालङ्कारभूषितम्। स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये" इति वाग्भटः, "गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ। गद्यपद्योभयमयं काव्यं काव्यविदो विदुः" इति विद्यानाथः, "शब्दार्थवपुस्तावत् काव्यम्" इति विद्याधरः, "सगुणालङ्कृतौ काव्यं पदार्थौ दोषवर्जितौ" इति धर्मसूरिः, "तत्र निर्दोषशब्दार्थगुणवत्त्वे सति स्फुटम्। गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम्" इत्यच्युतरायः, "काव्यं विशिष्टशब्दार्थ साहित्यसदलङ्कृति" इति क्षेमेन्द्रः, "गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावगौ। नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते" इति न्यायवागीशः। एवं काव्यस्य विविध-विद्वदुपज्ञानि विविधानि लक्षणानि समुल्लसन्ति ।

काव्योत्पादनहेतुः –

श्रुताभ्याससहिता प्रतिभा एव कवितां प्रति हेतुः। प्रतिभा च "नवनवोन्मेष-शालिनी प्रज्ञा"। श्रुताभ्यासप्रातिभेति समुदितास्त्रय एव पदार्था दण्डचक्रादिन्यायेन काव्यं प्रति हेतुरिति भावः। यथोक्तं काव्यप्रकाशे – "शक्तिर्निपुणता लोकशास्त्र-काव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे" इति। "काव्यनिर्माण-सामर्थ्यमेव प्रतिभा, सा च सहजोत्पाद्या" चेति रुद्रटेन काव्यालङ्कारेऽभिहितम्। अवहितं चित्तमभिनवपदार्थानप्रतिबन्धमुल्लिखति। **अभ्यासः काव्यकर्मणि व्यापार** इति जयमङ्गलः। तावुभौ अपि कवित्वबीजभूतां कार्यकल्पनीयां शक्तिमुत्तेजयतः। काव्ये सैव शक्तिरेव हेतुः। समाधिरान्तरो मानसिको व्यापारः। अभ्यासस्तु बाह्यः प्रयत्नः। प्रतिभादरिद्रस्य पदार्थसमूहः प्रत्यक्षोऽपि अप्रत्यक्षः। प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इव। श्रुतशब्देन मम्मटोक्तव्युत्पत्तिः एव ज्ञेया।

कविप्रकाराः –

सारस्वतः, आभ्यासिकः औपदेशिकश्चेति त्रिविधाः कवयः। **जन्मान्तर-संस्कारप्रवृत्तसरस्वतीको बुद्धिमान्** सारस्वतः। **इह जन्माऽभ्यासोद्भासितभारतीक आहार्यबुद्धिः** आभ्यासिकः। **उपदेशितदर्शितवाग्विभवो दुर्बुद्धिः** औपदेशिकः। **पूर्वः पूर्वः श्रेयान्** इति श्यामदेवः। **उत्कर्षः श्रेयान्** इति यायावरीयः। प्रतिभाव्युत्पत्तिमांश्च कवयिता कविरिति शब्दभाक्। स च त्रिधा - शास्त्रकविः, काव्यकविः शास्त्रकाव्य-

In Public domain. Digitization Muthulakshmi Research Academy

कविश्चेति। तेषामुत्तरोत्तरीयो गरीयान्' इति श्यामदेवः। 'न' इति यायावरीयः। शास्त्रकविः काव्ये रससम्पदो विच्छेदं जनयति। काव्यकविः शास्त्रीयपदार्थप्रणयने कठिनमप्यर्थं कथनवैलक्षण्येन शिथिलीकरोति। उभयकविस्तु शास्त्रकविकाव्य-कव्योर्वरीयान्। तुल्यप्रभावावेव शास्त्रकाव्यकवी। किन्तु उपजीव्योपजीवकत्वं परस्परं तयोः योग्यम्। यतः शास्त्रस्य संस्कारः काव्यं चारु करोति। काव्यसंस्कारोऽपि शास्त्रीयवाक्यस्य परिणतिसौष्ठवं सम्पादयति। यः शास्त्रं विधत्ते, यश्च शास्त्रे काव्यं संविधत्ते, योऽपि काव्ये शास्त्रार्थं निधत्ते इति त्रिधा शास्त्रकविः वरीवर्ति। काव्यकविः पुनरष्टधा - रचनाकविः, शब्दकविः, अर्थकविः, अलङ्कारकविः, उक्तिकविः, रसकविः, मार्गकविः, शास्त्रार्थकविरिति। शब्दकविः, नामकविः, आख्यातकविः, नामाख्यातो-भयकविरिति। केवलं संज्ञाशब्दं कवतेऽसौ नामकविः। तिङन्तं कवते स आख्यात-कविः। नामाख्याते उभे कवते सः नामाख्यातोभयकविः। अर्थमात्रम् अलङ्कारादि-शून्यं वर्णयति सोऽर्थकविः। शब्दालङ्कारार्थालङ्कारभेदेन अलङ्कारकविः द्विप्रकारः। 'उक्तिर्नाम यदि स्वार्थो भङ्ग्या भव्योऽभिधीयते। एवं रूपामुक्तिं षड्विधां वक्रोक्तिमेव कवते स उक्तिकविः। रसमेव कवतेऽसौ रसकविः। मार्ग्यन्तेऽन्वेष्यन्ते गुणा अस्मिन्निति मार्गो रीतिः। "विशिष्टा पदरचना रीतिः" "रीतिरात्मा काव्यस्य[6]" इत्यनेन वामनो रीतेः प्राधान्यं प्राकटयत्। तस्य मते वैदर्भी-गोडी-पाञ्चालीति तिस्रो रीतयः। रुद्रटमते लाटी रीतिरधिका वर्तते। महाराजस्य भोजस्य शृङ्गारप्रकाशे अवन्तीमागधीसहिताः पूर्वोक्ता रीतयः षड्रंख्याकाः। यः मार्गम् (रीतिम्) आश्रित्य काव्यं कुरुते स मार्गकविः। यः शास्त्रीयं पदार्थं कवते स शास्त्रार्थकविः।

कवेरवस्थाः –

कवेर्दश अवस्था भवन्ति। तत्र च बुद्धिमदाहार्यबुद्धयोः सप्त, तिस्रः औपदेशिकस्य। तद्यथा - काव्यविद्यास्नातकः, हृदयकविः, अन्यापदेशी, सेविता, घटमानः, महाकविः, कविराजः, आवेशिकः, अविच्छेदी, सङ्ग्रामयिता। काव्यविद्याः समाप्य स्नानकर्ता काव्यविद्यास्नातकव्यपदेश्यो भवति। यः स्वहृदय एव लज्जा-विनयादितः कवते निह्नुते च स हृदयकविः। यः स्वकीयमपि कवित्वं दोषा-

---

[6] काव्यालङ्कारसूत्रवृत्तिः

In Public domain. Digitization Muthulakshmi Research Academy

शङ्कयाऽन्यस्यैव कस्यचिदिति अपदेशं कृत्वा जनानां समक्षं पठति स अन्यापदेशी। यः प्राचीनानां कवीनां मध्ये अन्यतमस्य एकस्य भावं गृहीत्वा काव्यं कर्तुं प्रवर्तते असौ सेविता। यः शुद्धान् पदार्थरसभावादीन् सुघटयितुं जानाति, न तु ग्रन्थघटकीकरोति स घटमानः। यो गद्यपद्यान्यतरमथने दक्षः स महाकविः। यस्तु तत्र तत्र पैशाची-शौरसेनी-मागध्यादिभाषाविषये गद्य-पद्य-चम्पूप्रभृतिषु ग्रन्थेषु तस्मिंस्तस्मिंश्च श्रृङ्गारादिरसे रचनायां स्वाधीनः सः कविराजः। यः आवेशसमकालं मन्त्राद्युपदेश-वशात् लब्धसिद्धिः स आवेशिकः। यस्मिन्काले वाञ्छति तस्मिन्नेव काले प्रावाहिकं कवते असौ अविच्छेदी। कन्याकुमारी कामाख्यप्रभृतिषु सिद्धपीठेषु सिद्धमन्त्रः सन् वाग्देवीं सङ्क्रामयति स सङ्क्रामयिता ।

काव्यपाकः –

कः पुनरसौ पाकः? परिणाम इति मङ्गलः। "सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्। तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी"[7]। तथा "व्युत्पत्तिः सुप्तिङां या तु प्रोच्यते सा सुशब्दता'[8]। "सुपां तिङां च श्रवः प्रिया व्युत्पत्ति"रिति मङ्गलः। "पदनिवेश-निष्कम्पता" इत्याचार्याः। "आग्रहपरिग्रहादपि पदस्थैर्य-पर्यवसायस्तस्मात् पदानां परिवृत्तिवैमुख्यं पाकः" इति वामनीयाः। "इयमशक्तिर्न पुनः पाकः" इत्यवन्तिसुन्दरी। यदेकस्मिन्वस्तुनि महाकवीनामनेकोऽपि पाठः परिपाकवान् भवति, तस्माद्रसोचितशब्दार्थसूक्तिनिबन्धनः काव्यपाकः। यत्र पदानां परिवृत्त्यसहिष्णुता वर्तते तत्काव्यं पदपाकयुक्। यत्र गुणालङ्कारादीनां सुन्दरो रचनाक्रमः तत्काव्यं वाक्यपाकयुक्। "कार्यानुमेयतया यत्तच्छब्दनिवेद्यः परं पाकोऽभिधाविषयस्तत्सहृदयप्रसिद्धिसिद्ध एव व्यवहाराङ्गमसौ" इति यायावरीयः।

पाकप्रकाराः –

स च पाकः पौनःपुन्येन शीलयतः कविसमुदायस्य नवप्रकारोऽस्ति। काव्यं पिचुमन्दपाकं, बदरपाकं, मृद्वीकापाकं, वार्त्ताकपाकं, तिन्तिडीकपाकं, सहकारपाकं, क्रमुकपाकं, त्रपुसपाकं, नारिकेलपाकं भवति। तेषां नवपाकानां मध्ये त्रिकेषु प्रथमे

---

7 भामह ० 1- 14

8 सरस्वतीकण्ठाभरणम्

In Public domain. Digitization Muthulakshmi Research Academy

पिचुमन्द-वार्ताक-क्रमुकाणां पाकास्त्याज्याः। मध्यमा बदर-तिन्तिडीक-त्रपुसानां पाकाः संस्कृत्य ग्राह्याः। शेषाः मृद्वीका-सहकार-नारिकेलानां पाकाः स्वच्छन्दं ग्राह्याः। स्पष्टत्वेन प्रतिपत्तिरहितः पाकः कपित्थपाकः। आद्यन्तयोः अस्वादु पिचुमन्दपाकम्, आदावस्वादु परिणामे मध्यमं बदरपाकम्, आदावस्वादु परिणामे स्वादु मृद्वीकापाकम्, आदौ मध्यममन्ते चास्वादु वार्त्ताकपाकम्, आद्यन्तयोर्मध्यमं तिन्तिडीकपाकम्, आदौ मध्यममन्ते च स्वादु सहकारपाकम्, आदावुत्तममन्ते चास्वादु क्रमुकपाकम्, आदावुत्तममन्ते मध्यमं त्रपुसपाकम्, आद्यन्तयोः स्वादु नारिकेलपाकम्। पाक इव पाको यस्मिन्काव्ये तत्तत्काव्यं तत्तत्संज्ञकं भवतीति ।

एवम् एतत्सर्वाणि भरतमुनिम् आरभ्य भामह-दण्डि-वामन-आनन्दवर्धन-मम्मट-राजशेखर-विश्वनाथ-भोजराज-जयदेव-जगन्नाथ-विद्यानाथादिभिः प्रसिद्धैः आलङ्कारिकैः लक्षितानि विविधानि काव्यलक्षणान्यनुसृत्य आधुनिकेऽस्मिन् कालेऽपि नैके महान्तः कवयः अभिराजराजेन्द्रमिश्रः, राधावल्लभ त्रिपाठी, जि यस् आर् कृष्णमूर्तिः इत्यादयः नैके कविवरेण्या महाकाव्यानि लघुकाव्यानि, दृश्यकाव्यानि च विरचयन्तः सन्तः भारतीयकाव्यरचनासम्प्रदायस्य वैभवं पुष्णन्ति, साहित्यपिपासूनां कृते सुरुचिराय साधुकाव्यनिषेवणाय अवकाशं कल्पयन्ति, तेषां चित्तान्यावर्जयन्ति। तेष्वन्यतमः महाकविः पेन्ना मधुसूदनः।

महाकविः पेन्ना मधुसूदनः –

श्री पेन्ना नरसिंह शर्मा-श्रीमती भारती दम्पत्योः सुतोऽयं सुधीमणिः पेन्ना मधुसूदनः। तेलङ्गाणा राज्ये नल्लगोण्डप्रान्तस्थ नार्कट्-पल्ली इत्याख्यग्रामवास्ययम्। दशमीकक्ष्या पर्यन्तं स्वग्रामे साधारणविद्याम् अभ्यस्य ततः भगवत्याः सरस्वत्याः कटाक्षात् संस्कृतं, शास्त्राणि चाध्येतुं हैदराबाद् नगरे विद्यमानायां श्रीवेङ्कटेश्वर-उभयवेदान्तसंस्कृतकलाशालां प्राविवेश। तत्राचिरमेव विनयसम्पन्नोऽयं प्रथितयशसां प्रकाण्डपण्डितानां कृपापात्रो बभूव। तेषां सकाशे न्यायशास्त्रम् अधीत्य तेन शास्त्रेण सह व्याकरण-योग-साहित्यादिशास्त्रेष्वपि नैपुण्यमध्यगच्छत्। ततः यम् ए, यम् फिल, पि हेच् डी इत्याद्युपाधिप्राप्तये उस्मानिया विश्वविद्यालयं प्रविश्य तत्र सर्वास्वपि परीक्षासु सर्वप्रथमताम् अलभत। निरन्तराध्ययनतत्परोऽयं पण्डितः विद्याभ्यास-वेलायामेव गुरूणां सर्वेषां प्रशंसां प्रापत्। संस्कृतं, तेलुगु, आंग्लं, हिन्दी, मराठी,

जर्मन् इत्यादिभाषासु निपुणः मधुसूदनः महाराष्ट्रराज्ये कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये कञ्चित्कालं यावत् आभारी उपकुलपतिपदं निरवहत्। इदानीञ्च भारतीयतत्त्वशास्त्रविभागस्य सङ्कायाध्यक्षत्वं निर्वहति। शास्त्ररत्नाकरः, मधुभारती, युवविपश्चित्, उत्तमसंस्कृतपण्डितः, ओगेटि परीक्षित् शर्मा पुरस्कारः, मरिङ्गण्टि श्रीरङ्गाचार्यपुरस्कारः, श्रीभाष्यं विजयसारथिपुरस्कारः, केन्द्रीयसाहित्य अकाडमी पुरस्कारः इत्यादिभिः नैकैः सम्मानितः पेन्ना मधुसूदनः तिरुपतिस्थराष्ट्रीयसंस्कृत-विश्वविद्यालयात् विद्यावाचस्पतिं D.Litt. अपि प्राप्तवान्।

पेन्ना मधुसूदनस्य रचनानि -

शक्तिः, निपुणता, लोकशास्त्रकाव्याद्यवेक्षणं, काव्यज्ञानाम् असामान्य-पण्डितानां शिक्षणम्, काव्याध्ययनाभ्यासः इत्यादिभिर्विशेषैस्सर्वैर्युक्तः पेन्ना मधुसूदनः आदौ मुक्तकश्लोकान् रचयित्वा, ततः क्रमशः काव्यनिर्माणम् आरेभे। तस्य प्रथमं काव्यं मुद्गलचरितं पठित्वा गुरवः तमभ्यनन्दन्। प्रथमकाव्यशास्त्रप्रणेता भामहः स्वकाव्यालङ्कारे **काव्यं तु जायते जातु कस्यचित् प्रतिभावतः** इत्यवादीत्। ततश्च **प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मतः** इति भट्टतौतः, **अपूर्ववस्तु निर्माणक्षमा प्रज्ञा प्रतिभा** इति अभिनवगुप्ताचार्यः, **काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभा** इति पण्डितराज जगन्नाथश्चाब्रवीत्। एतादृशप्रतिभया सम्पन्नः कविवरः मधुसूदनः वसुधैव कुटुम्बकम्, नरमेधम्, योगसूत्रसारः इत्यादिविंशत्यधिकैः काव्यैः सह काव्यकण्ठचरितं, प्रज्ञा चाक्षुषम्, इति द्वे महाकाव्ये अप्यरचयत्। पञ्चदशाधिकानां ग्रन्थानां कृते तेलुगुभाषया आंग्लभाषया चानुवादं चकार। संस्कृत अकाडमीपक्षतः मुद्रापयितुं **तर्कभाषा, अर्थसङ्ग्रहः, अद्वैतसिद्धिः** इत्यादिग्रन्थानां कृते तेलुगुभाषया व्याख्यानं व्यरचयत्। अनेन संशोधितान् त्रिंशत्यधिकग्रन्थान् विविधाः संस्थाः मुद्रापयामसुः।

प्रस्तुतकाव्यसङ्ग्रहः –

ज्ञानेश्वरकृत–प्रसाददानम्, श्रीशारदास्तुतिः, देवीस्तुतिः, कृपाशतकम् श्रीज्ञानदेवकृतः हरिपाठः, लक्ष्मीसुप्रभातम्, चागदेव-पञ्चषष्टिः, श्रीगुरुवैभवम्, देवरातवैभवम्, आवेदनम्, तत्त्वसुषमा, नरमेधः, काकदूतम्, योगसूत्रसारः, गुलाबगीता, योगसारः, चन्द्रमौलीश्वरविजयम्, कादम्बरीकथासारः, मुद्गलचरितम्–रूपकम्, काव्यकण्ठो विजयते–रूपकम् इत्यादि काव्यानीतःपूर्वं विविधाभिः संस्थाभिः

In Public domain. Digitization Muthulakshmi Research Academy

पृथक् पृथक् मुद्रितानि, किन्तु एतेषु कानिचन नोपलभ्यन्ते। अनेके मित्राणि पण्डिताश्च मधुसूदनस्य पुस्तकानाम् उपलब्धिविषये पृच्छन्तीति कृत्वा यदि काव्यानि (महाकाव्यद्वयं विहाय) एकत्रीकृत्य मुद्रापयामश्चेत् साधु भवतीति अकाडम्याः अकडमिक् समावेशे विचार्य अनुमतिं सम्प्राप्तवन्तो वयम्। ततश्च महाकवेः पेन्ना मधुसूदनस्यानुमतिमपि सम्प्राप्य विंशति काव्यानां परिशीलनम् अकरवम्।

अस्य महाकवेः काव्येषु दर्शनपारद्रष्टृत्वम् काव्यसौष्ठवम्, शास्त्रैश्वर्यं च पदे पदे स्फुटितमस्ति। विद्या-ज्ञानानुभूति-श्रवण-मनन-चिन्तन-निदिध्यासन-साधना-सम्पन्नः मधुसूदनः नैकानि काव्यानि विरचयन् अस्माकं गौरवं वर्धयतीति हर्षप्रकर्षविषयः। पदे पदे अनिर्वचनीयां कामप्यभिख्यां बिभर्ति मधुसूदनस्य काव्यसम्पत्। एतस्य काव्यानि संस्कृतकाव्योद्यानवीथिषु मधुमधुरगन्धभरिताः लता इव महता सौरभेण संयोजिताः भवन्ति। विषयानुरूपा भाषा अनवद्या रसानुरोधि च छन्दः, निर्दोषमित्येतद्वैशिष्ट्यं काव्यानामेतेषां कवेर्बिभर्ति सर्वत्र। सुमनोहराणि काव्यान्येतानि न केवलं पुष्णन्ति मधुसूदनस्य वैदुष्यम् अपितु तस्य सहृदयत्वं चाविष्कुर्वन्ति। साहित्यसौन्दर्यमण्डितेषु काव्येषु न केवलं कवेः कल्पनाः समुच्छलन्ति अपि तु राष्ट्रम्प्रति, समाजम्प्रति, महनीयानां चरितम्प्रति हार्दिकः अतुल्यः सद्भावः यथार्थं समुदेति। किमधिकं मधुभारती इत्याख्योपाधिना सत्कृतस्य भारतीपुत्रस्य पेन्ना मधुसूदनस्य काव्यसङ्ग्रहोऽयं सहृदयानां हृदये पदं निदधातु, संस्कृत काव्याध्ययनानुरागिणां कृते आनन्ददायको भवत्विति काङ्क्षामहे ।

कृतज्ञताञ्जलिः – विंशति काव्यात्मकः काव्यसङ्ग्रहोऽयम् अकाडमीपक्षतः मुद्रापयितुम् अङ्गीकृतवते शास्त्ररत्नाकरः, मधुभारती, युवविपश्चित् विद्यावाचस्पतिः इत्यादिभिः नैकैरुपाधिभिः पुरस्कृताय महाकवये अस्मत्सुहृन्मणये पेन्ना मधुसूदनाय धन्यवादान् वितरामि।

काव्यसङ्ग्रहोऽयं मया सह सम्यक् अध्ययनं कृत्वा सुष्ठु परिशील्य सावधानं पुनरवलोक्य प्रकाशनाय सिद्धम् अकरोत् चिरजीवी युवसंशोधकः जोशी भरद्वाजः। तस्मै शुभाशिषः। मया सह विशिष्टग्रन्थपुनर्मुद्रणायोजनायां कार्यं कुर्वाणाय सहायकाचार्याय डा के वि सूर्यप्रकाशाय, अपि च अस्माकम् उपनिदेशिकायै

In Public domain. Digitization Muthulakshmi Research Academy

सहाचार्यायै डा के वरलक्ष्म्यै, सहायकाचार्याय डा. जोषि सन्तोषकुमाराय शुभाभिनन्दनानि। अपि च अकाडमीकार्यालयीयगणस्य सहायस्तु न विस्मरणीयः। तेभ्यः सर्वेभ्यः शुभाभिनन्दनानि।

संस्कृतपरिषदे आदर्शशोधसंस्थात्वं कल्पयित्वा पुनर्जीवनमन्वग्रहीत् नवदेहलीस्थ केन्द्रीयसंस्कृतविश्वविद्यालयः। विश्वविद्यालयस्य कुलपतिवर्याः माननीयाः आचार्य श्रीनिवास वर्खेडी महाशयाः, कुलसचिवाः आचार्याः गायत्री मुरलीकृष्ण महाशयाः, विश्वविद्यालये आदर्शसंस्थानां निदेशकाः आचार्याः मधुकेश्वर भट्ट महाशयाः संशोधने, ग्रन्थानां मुद्रणे, विविधसंस्कृतकक्ष्याणां कार्यक्रमाणां निर्वहणे च सर्वथा अस्मान् प्रेरयन्ति। अष्टादशी परियोजनायाम् अकाडम्याः कृते विशिष्टग्रन्थपुनर्मुद्रणं कर्तुम् अवकाशं कल्पितवन्तः एते महानुभावाः। तेभ्यः सश्रद्धं प्रणामाञ्जलिं निवेदयामि। अपि च उस्मानिया विश्वविद्यालयस्य उपकुलपतिवर्येभ्यः (आभारि) सततम् अस्मान् प्रचोदयितृभ्यः श्री दानकिशोर् IAS वर्येभ्यः, कुलसचिवेभ्यः आचार्य पि. लक्ष्मीनारायणवर्येभ्यः धन्यवादान् वितरामि।

काव्यसङ्ग्रहममुं समुचितरीत्या समये मुद्रणं कृतवद्भ्यः विद्यानगरस्थ कर्षक् आर्ट् प्रिंटर्स् महाशयेभ्यः धन्यवादान् वितरामि।

सुधीजनविधेयः
आचार्यः के नीलकण्ठः
निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

राष्ट्रपतिसम्मानित-महामहोपाध्याय
प्रो. अभिराजराजेन्द्रमिश्र
पूर्वकुलपतिः, पद्मश्री

CC-0. In Public domain. Digitized by Muthulakshmi Research Academy

Mahamahopadhyaya
Prof. Abhiraj Rajendra Mishra
Ex. Vice Chancellor, Padmasri

नान्दीवाक्

देववाण्यां सन्त्येव बहवः काव्यप्रकाराः – केचनातिप्रसिद्धाः सुबहुप्रयुक्ताः समुद्धृताः केचनाल्पप्रसिद्धाश्च। ते चाग्निपुराण-काव्यादर्श-साहित्यदर्पण-ध्वन्यालोक-सरस्वतीकण्ठाभरणादिषु सुखेन द्रष्टुं शक्याः। मुक्तकं प्रबन्धश्चेत्यादिमः प्रकारः। उभयोर्मध्येऽपि युग्मक-सान्दानितक-कलापक-कुलकाख्यानि समायान्ति। ततश्च शतक-द्विशती-त्रिशती-पञ्चशती-सप्तशती-साहस्रीतिकाव्यानां क्रमः। ध्वनिकारः पर्यायबन्धादिकं, दर्पणकारश्च कोशकाव्यादिकं नवमुपदिशति। एवमेव गद्यभेदाश्चापि आख्यान-कथानिकाप्रभृतयः। चम्पूप्रकाराश्चापि नैके विश्वनाथेनोक्ताः। पश्चाच्च पृथक्कविकृतानां विविधाभिप्रायाणां काव्यानां संकलनधोरण्यपि समुदियाय दशमशतके खैस्ते, यत्र सुभाषितरत्नकोश-सदुक्तिकर्णामृत-शार्ङ्गधरपद्धति-सुभाषिता-वली-सूक्तिमुक्तावली-प्रसन्नसाहित्यरत्नाकर-सुभाषितसुधानिधि-प्रस्तावरत्नाकर-सूक्तिमालिकादिग्रन्था महीयन्ते परःसहस्रकवि परिचायका अमृतातिशायिपद्य-कदम्बकाश्रयाश्च। अहो नु शेवधिः मल्लिकाक्षवाहिन्याः! नाम्नाऽपि ज्ञातुं न क्षमते कोऽपि, का कथा पारायणस्यऽनुशीलनपरिशीलनयोर्वा? तदनया भूमिकयाऽहं परिचाययामि पेन्नाऽन्वयभास्करं कविं मन्मित्रं मधुसूदनं यो हि लब्धसाहित्याकादमी-पुरस्कारत्वात् नान्तर्जवनिकास्थः। तदुपज्ञानामपि सप्तदशलघुकाव्यानां कश्चित् बृहत्तमः संग्रहः प्रकाश्यते यत्र विलसन्ति विविधाः कृतयः तिलोत्तमाश्चाऽपि वटबृहत्तमाश्चापि। इतः प्रागपि पण्डितराजलघुकाव्यानां (आर्येन्द्रशर्मणा), अभिनव-लघुकाव्यानां (डा. रमाकान्तपाण्डेयेन), क्षेमेन्द्रलघुकाव्यानां (निर्णयसागरेण), भट्टमथुरानाशास्त्रि-जगन्नाथपाठक-रामचन्द्रुडु-लघुकाव्यानां संग्रहाः प्रकाशिता-स्तिष्ठन्त्येव।

वस्तुतः महाकवीनां लघुकाव्यानामेकत्र संकलनमवाप्य पाठकस्य चित्तोन्माथिगवेषणश्रमो वार्यते, आकांक्षितार्थसिद्धिश्च जायते संप्राप्तमधुकोशस्य कान्तारचरस्येव अन्यथा चरतश्चैव तस्य जीवनं व्यतियाति।

In Public domain. Digitization Muthulakshmi Research Academy

एवं तत्तत्कवीनां लघुकाव्यसंग्रहपरम्पराऽपि प्राक्तनकाव्यप्रकाराणामेव वंशप्रशस्तिमाधत्ते। मयाऽपि नाम वृत्तगीतोभयप्रतिपादकं बृहत्संकलनं कल्पवल्लीति गीतगङ्गागोमुखञ्चेति सम्पाद्य साहित्यपाथोनिधिमन्थनाभिधं काव्यसंकलनं पुरस्कृतं यस्मिन् विंशत्येकविंशतिखैस्ताब्दयोः प्रायशः सार्धसहस्रकवितल्लजानां दशसहस्राणि पद्यानि विविधाभिप्रायाणि संकलितानि वर्तन्ते। ग्रन्थत्रयमिदं नाम साहित्याकादम्या प्रकाशितं प्रकाश्यते च।

प्रकृतमनुसरामस्तावत्। सरस्वतीदत्तवरप्रसादस्य मधुसूदनस्य विषये किं ब्रवीमि? नहि कस्तूरिकागन्धः शपथेन विभाव्यते। ग्रन्थिपर्णप्रणयिनः कस्तूरिकामृगस्येव तस्य काप्यन्यैव प्रकृतिः। तेन श्रुतेन यत्नेन चोपासिता वाक्। तत एव तत्कवितायां विलसत्यनन्यसाधारणो विच्छित्तिविलासः। नम्रता, प्रियभाषणं, समन्वयः, सदाचारः विश्वदृष्टिश्चेति पञ्च चिह्नानि मया धीमतां पठितानि। तानि सम्भूयाऽविनाभावेन तिष्ठन्ति भद्रव्यक्तित्वमण्डिते मधुसूदने। मधुसूदनस्य कवित्वं स्फटिकनिर्मलं हृद्याऽनवद्यञ्चेत्यत्र न काऽपि संशीतिः।

अत्र संकलितानि तत्काव्यानि विविधानि। स्तोत्रमित्येकं (प्रसाददान-शारदाष्टकद्वयम्), शतकमित्यपरं (कृपाशतकम्), गुरुवैभवाभिधा पञ्चाशिका, चाङ्गदेवाख्या सप्ततिका, सप्ताध्यायात्मिका च श्रीगुलाबगीता, काव्यकण्ठाभिध-मेकाङ्करूपकम्। कादम्बरीकथासारश्चाऽपि सुललितगद्यप्रबन्धाश्रितोऽत्र विलसति।

पेन्नामधुसूदनस्य काव्यानां परिसंख्यया को नु लाभः? अनन्वयत्वमेव तत्र द्रष्टव्यम्। नवाभिप्रायगवेषणधियां पाठकानामभिरुचिं सम्यग्भावयन्तः भूभूषणो-द्भूतये प्रभावविशदास्ते समुदिताः स्वावतरणलक्ष्यं साधु सदर्थयन्ति। तस्मिन्नतितरां रमते बन्धुत्वम्मे!

मन्ये विविधप्रसूनग्रन्थितग्रैवेयकमिदं समर्प्य जनन्यै शारदायै ते ते लप्स्यन्ते तदमोघाशीश्चयम्।

सप्रणयम्

मिश्रोऽभिराजेन्द्रः पद्मश्रीः

In Public domain. Digitization Muthulakshmi Research Academy

INTRODUCTION

At the outset, I feel highly obliged to place on record my heartfelt thanks to respected **Prof. Neelakantham sir** for his generous move in accepting this collection of my works for publication. But for his kind gesture, this work would not have seen the light of the day. I am always indebted to him, a great soul indeed. I am also greatly indebted to Mahamahopadhyaaya Padmasri acharya Abhiraj Rajendra Mishra the great author of many kavyas in sanskrit, for blessing me with his नान्दीवाक्.

This collection contains some of my small works written in a period of about 25 years on various occasions. Some of these were published in leading Sanskrit magazines and other media. These can be broadly classified in the following categories:

1. महाकाव्यानि (Mahakavya)

There are 03 Mahakavya in verse form.

- काव्यकण्ठचरितम् (21 सर्गात्मकम्)
- प्रज्ञाचाक्षुषम् (11 सर्गात्मकम्)
- चन्द्रमौलीश्वरविजयम् (14 सर्गात्मकम्)

2.लघुकाव्यानि (Short poems)

There are about 14 small works in verse form written on various occasions.

- ज्ञानेश्वरकृत–प्रसाददानम् (9 श्लोकाः, अप्रकाशितम्)
- श्रीशारदास्तुतिः (8 श्लोकाः, अप्रकाशिता)
- देवीस्तुतिः (14 श्लोकाः, अप्रकाशिताः)
- कृपाशतकम् (100 श्लोकाः, अप्रकाशितम्)
- श्रीज्ञानदेवकृतः हरिपाठः (118 श्लोकाः, अप्रकाशितः)
- लक्ष्मीसुप्रभातम् (ध्वनिमुद्रिका-29 श्लोकाः, टैम्स् कम्पनीतः प्रकाशितम्)
- चागदेव-पञ्चषष्टिः (65 श्लोकाः, संस्कृतसंवादपत्रिका, दिल्ली)

In Public domain. Digitization Muthulakshmi Research Academy

- श्रीगुरुवैभवम्- काव्यम् (52 श्लोकाः, काव्यकण्ठचरित-महाकाव्यम्)
- देवरातवैभवम्- काव्यम्(103 श्लोकाः, संस्कृतसंवादपत्रिका, दिल्ली)
- आवेदनम्- काव्यम् (54 श्लोकाः, अर्वाचीनसंस्कृतपत्रिका, दिल्ली)
- तत्त्वसुषमा- काव्यम् (132 श्लोकाः, संस्कृतभवितव्यम्, नागपूरतः)
- नरमेधः - काव्यम् (32 श्लोकाः, अर्वाचीनसंस्कृतपत्रिका, दिल्ली)
- गुलाबगीता (317 श्लोकाः, प्रज्ञाचाक्षुषनामक-महाकाव्यम्)
- काकदूतम्- काव्यम् (51 श्लोकाः, संस्कृतसंवादपत्रिका, दिल्ली)

3.Short plays रूपकाणि

- मुद्गलचरितम् – रूपकम् (35 श्लोकाः, संस्कृतभारतीपत्रिका, हैदराबाद्)
- काव्यकण्ठो विजयते–रूपकम् (61 श्लोकाः, गुञ्जारवपत्रिका, अहमदनगरम्)

4. Prose गद्यम्

- कादम्बरीकथासारः (गद्यम्, अप्रकाशितम्)

5. Shastra treatises शास्त्रनिब्धाः

- योगसूत्रसारः (225 श्लोकाः, संस्कृतपरिषद्, हैदराबाद्)
- योगसारः (560 श्लोकाः, संस्कृतविश्वविद्यालयः रामटेक)

I would like to thank the respected Editors of the following reputed magazines who encouraged my creative writing:

1. Arvachina sanskrutam, New Delhi
2. Sanskrit Samvid, New Delhi
3. Gunjaravam, Ahmednagar, Maharashtra
4. Sanskrit Bhavitavyam, Nagpur, Maharashtra
5. Sanskritbharati, Hyderabad, Telangana

I would also like to thank the following Sanskrit scholars who had worked on my works for their research degree:

1. Dr. Roshan Bhagat[1], Asst.Prof. In Sanskrit, Sangamaner, MS.

[1] Dr. Roshan Bhagat got the degree of PhD in Sanskrit from Deccan College.

In Public domain. Digitization Muthulakshmi Research Academy

2. Dr. Rajendra Meshram[2], Asst. Ragistrar, KKSU, Maharashtra
3. Dr. Rupali Chaudhary[3], Amaravati University, Maharashtra
4. Ku. Amruta Awale[4], KKSU, Ramtek, maharashtra

Two more students, one from RSU, Agartala Campus and one from Tirupati are working on my other works for the degree of PhD in Sanskrit. The following is a brief about each of my works:

महाकाव्यम्-

Out of my three Mahakavya, Two Mahakavya (**Kavyakantha charitam and Prajnachakshusham**[5]) were published already and are not included in this. The prestigious **Central Sahitya Academy Award** for the year 2019 was awarded for Prajachakshusham.

चन्द्रमौलीश्वरविजयम्–काव्यम् (539 श्लोकाः)

Only one recent poem with the title **'चन्द्रमौलीश्वरविजयम्'** is being published under this head in this book. This is biographical in nature depicting the life of a less known Yogi of the 19th century from Telangana. There are 14 cantos in this poem.

This poem depicts the spiritual journey of Chandramulishwara, a Yogi who had several Yogic accomplishments and had led a very high spiritual life. This

---

[2] **Dr. Rajendra Meshram** got the degree of PhD in Sanskrit from K. Kalidas Sanskrit University, MS.

[3] **Dr. Rupali Chaudhary** got PhD for her work on my career and works, from Amaravati University, MS.

[4] Ku. Amruta Awale has registered for PhD in KKSU on my Sanskrit Jnaneshwari.

[5] **Kavykantha Charitam** was published by Chinmaya International Research Foundation, Keral in the year 2011. **Prajnachakshusham** was published by New Bharatiya Book Corporation, New Delhi in 2015.

In Public domain. Digitization Muthulakshmi Research Academy

was composed in 2024 as a token of my deep respect for this great spiritual guru of our family.

लघुकाव्यानि

ज्ञानेश्वरकृत–प्रसाददानम् (9 श्लोकाः-अप्रकाशितम्)

This small poem in nine Sanskrit verses is the Sanskrit rendering of the Marathi Pasayadan of Maharashtra saint Jnanadev. This was written in Gwalior, when I was staying in local Dattamandir to deliver lectures in Marathi on Saint Gulabrao Maharaj. Even today, this is chanted almost in every house in Maharashtra.

श्रीशारदास्तुतिः (8 श्लोकाः -अप्रकाशिता)

This is an excerpt from my Mahakavya Kavyakantha Charitam in the praise of Goddess Saraswati. This was written in the year 2009.

देवीस्तुतिः (14 श्लोकाः-अप्रकाशिताः)

This is a small unpublished poem on Goddess Shakti in 14 Sanskrit verses. This was written in the year 2012.

कृपाशतकम् (100 श्लोकाः-अप्रकाशितम्)

This is an unpublished poem on Goddess Gayatri in 100 Sanskrit verses. This was written in the year 2007. After completing the first 50 verses, I told my Guru Shri. K. Ramanujacharya, who happened to be in Nagpur for a refresher course, that I composed fifty verses, then he immediately encouraged me to make it a hundred. I composed the later 50 in a day. This is also narrated in the 51st verse. Each verse praises the Goddess Gayatri and thanks her for whatever she has given in this life. The poet believes that it is the result of his intense devotion that has made wonders in this life.

श्रीज्ञानदेवकृतः हरिपाठः (118 श्लोकाः-अप्रकाशितः)

This is a small unpublished Sanskrit rendering of the Marathi Haripatha of saint Jnanadeva, in 118 Sanskrit verses. This was written in Gwalior, when I was staying in local Dattamandir to deliver lectures in Marathi on Saint Gulabrao Maharaj. Even today, this is chanted almost in every house in Maharashtra. This is a small poem on devotion to Srihari.

चागदेव-पञ्चषष्टिः (65 श्लोकाःसंस्कृतसंवादपत्रिका, दिल्ली)

This is a small unpublished Sanskrit rendering of the Marathi text of saint Jnanadeva, in 65 Sanskrit verses. . This was also written in Gwalior. Even today, this is chanted almost in every house in Maharashtra. This is a small poem on cardinal doctrines of varkari tradition of Maharashtra based on the Adviata of Shankaracharya.

लक्ष्मीसुप्रभातम् -ध्वनिमुद्रिका- (29 श्लोकाःटैम्स् कम्पनीतः प्रकाशितम्)

This poem in 29 verses was written on demand for the Times Music Company. It is in the praise of Mahalakshmi written on the lines of Venkateshwara Suprabhatam.

श्रीगुरुवैभवम्- काव्यम् (52 श्लोकाःकाव्यकण्ठचरितमहाकाव्यम्)

This is an excerpt from my Mahakavya Kavyakantha Charitam in the praise of Guru in general and Ramana Maharashi in particular. This was written in the year 2009.

देवरातवैभवम्- काव्यम् (103 श्लोकाःसंस्कृतसंवादपत्रिका, दिल्ली)

This is a short poem in 103 verses on the life of Shri. Devarata Maharshi, an accomplished saint of the last century. This was written in the year 2015.

आवेदनम्- काव्यम् (54 श्लोकाःअर्वाचीनसंस्कृतपत्रिका, दिल्ली)

This is a poem in 54 verses eulogizing the Goddess Gayatri. This was written in the year 2007. Each verse praises

In Public domain. Digitization Muthulakshmi Research Academy

the Goddess Gayatri and thanks her for whatever she has given in this life. The poet believes that it is the result of his intense devotion that has made wonders in this life. This was written in 2007.

तत्त्वसुषमा- काव्यम् (132 श्लोकाः संस्कृतभवितव्यम्, नागपूरतः)

This poem in 132 verses is philosophical in nature that depicts the lamentation of a spiritual seeker, his prayer and the answer from the Divine Energy. There are three parts as Poorva Bhag, Uttara Bhag and the Uttama Bhag. This poem contains a small description of each darshan. This was written in 2016.

नरमेधः - काव्यम् (32 श्लोकाःअर्वाचीनसंस्कृतपत्रिका, दिल्ली)

This poem is a result of poet's spontaneous reaction to the terrorist attack on WTC, America in the year 2001. The gory incident moved many humans into tears.

गुलाबगीता (317 श्लोकाःप्रज्ञाचाक्षुषनामक-महाकाव्यम्)

This is a poem compiling the cardinal doctrines of Saint Gulabram Maharaj of Maharashtra appended to my Mahakavya. In seven cantos this poem discusses the various theories of Indian Philosophy like Karma, Dhyana, Jnana, Bhakti and other. The supremacy of Bhakti is established in this.

काकदूतम्- काव्यम् (51 श्लोकाःसंस्कृतसंवादपत्रिका, दिल्ली)

This poem in 51 verses was written on demand from Dr. Manju Themdev (Now, Dr. Manju Channe, Asst. Professor, CSU, Agartala) who had requested the poet to write a poem on this theme. The spiritual anguish of a person and the reply from the divine energy are described here in the form of a dialogue between the devotee and the master.

रूपकाणि

मुद्गलचरितम् – रूपकम् (35 श्लोकाःसंस्कृतभारतीपत्रिका हैदराबाद्)

This was the first Sanskrit work of the poet in the form of a play. In four scenes, this play depicts the life incident of Sage Mudgala who led a very pious life in the service of the good people. The sage lives on the grains collected from the local fields as left over. He never thinks of amassing wealth for himself or for his family.

काव्यकण्ठो विजयते–रूपकम् (61 श्लोकाःगुञ्जारवपत्रिका अहमदनगरम्)

This play in Sanskrit describes the historical event in the life of Kavyakantha Ganapatimuni, known for his extraordinary scholarship in various shastras. The incident, in which he engages in a heated argument with kavisarvabhauma Ambikadatta Vyas in Navadveep, is the central theme of this poem. The argument continued in extempore verse form and remained as one of the finest examples of excellent poetry.

गद्यम्

कादम्बरीकथासारः (गद्यम् अप्रकाशितम्)

This is a condensed version of the great Kadambari of Mahakavi Banabhatta. The poet had thought of making the story available in simple Sanskrit, not marring the beauty of the classical poem. Avoiding the long descriptions, this poem retains the main story line facilitating an easy understanding of the long story.

शास्त्रनिबन्धाः

योगसूत्रसारः (225 श्लोकाःसंस्कृतपरिषद्, हैदराबाद्)

This small treatise in 225 verses with own gloss on them, is an explanation of the Yoga sutra, Bhashya and some important commentaries on both the sutra and Bhashya. This was written during poet's college days and was published

In Public domain. Digitization Muthulakshmi Research Academy

later in the Sanskrit Academy Journal, Hyderabad. Though it was written in verse form only, a short gloss was added later on the instruction of M.M.Prof. Pullla Ramachandrudu. It was published in 1997.

योगसारः (560 श्लोकाःसंस्कृतविश्वविद्यालयः रामटेक)

This text in 560 verses was written in the year 2020 to be published in the covetous 100 publications during the centenary celebrations of AIOC, Nagpur session. This was prepared in a month and was published as one of the prestigious AIOC publications. In this text, each sutra is explained in verse form drawing necessary points from the bhashya, Tattvavaisharadi, vartika, Yogasiddhanta chandrika and other. Efforts are made to simplify the technical terms in the verses. This is an enlarged version of the previous.

This collection comprises of the original compositions only. The translations[6] from Sanskrit to English, to Marathi and to Telugu are not included in this.

Prof. Penna Madhusudan
Professor & Dean, Faculty of Indian Philosophy and Culture
Director, Research Programs and Publications,
Kalidas Sanskrit University, Ramtek,

[6] Total number of translations is 22; Sanskrit to Telugu 10; Sanskrit to English 10; Marathi to Sanskrit 2;

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूचिका

क्र.सं	विषयः	श्लो.सं	पृ.सं
	प्रस्तावना – आचार्यः के नीलकण्ठः		i
	नान्दीवाक् – आचार्यः अभिराजराजेन्द्र मिश्रः		xi
	Introduction		xii
1	ज्ञानेश्वरकृत–प्रसाददानम्,	9	1
2	श्रीशारदास्तुतिः	8	2
3	देवीस्तुतिः	14	4
4	कृपाशतकम्	100	7
5	श्रीज्ञानदेवकृतः हरिपाठः	118	16
6	लक्ष्मीसुप्रभातम् (ध्वनिमुद्रिका)	29	28
7	चागदेव-पञ्चषष्टिः	65	33
8	श्रीगुरुवैभवम्- काव्यम्	52	39
9	देवरातवैभवम्- काव्यम्	103	48
10	आवेदनम्- काव्यम्	54	57
11	तत्त्वसुषमा- काव्यम्	132	66
12	नरमेधः - काव्यम्	32	87
13	काकदूतम्- काव्यम्	51	90
14	योगसूत्रसारः	225	98
15	गुलाबगीता	317	128
16	योगसारः	560	159
17	चन्द्रमौलीश्वरविजयम् -काव्यम्	539	234
18	कादम्बरीकथासारः	गद्यम्	297
19	मुद्गलचरितम् – रूपकम्	35	339
20	काव्यकण्ठो विजयते–रूपकम्	61	353

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानेश्वरकृत–प्रसाददानम्

अथ विश्वात्मको देवो वाग्यज्ञेन प्रतुष्यतु।
तुष्टो मह्यं ददात्वेतत् प्रसाददानमुत्तमम् ॥१॥

दुष्टानां वक्रता यातु सत्कर्मरुचिरेधताम् ।
सर्वेषां प्राणिनां मैत्री वर्धतां च परस्परम् ॥२॥

दुरितानां तमो यातु धर्मभानुरुदेतु च ।
अभीष्टं सकलं तत्तत् लभन्तां प्राणिनस्तथा ॥३॥

सदा चेश्वरनिष्ठानां सर्वशुभाभिवर्षिणाम्।
लसतात् संगतिः क्षेमा प्राणिनां भुवि नित्यशः ॥४॥

चलत्कल्पतरोर्ये वै वनकल्पा मनीषिणः ।
जीवच्चिन्तामणेर्ग्रामास्तथा नदत्सुधार्णवाः ॥५॥

कलंकरहिताश्चन्द्रा शीतलादित्यसन्निभाः ।
सर्वेषां तादृशं लोके भवन्तु सर्वदा प्रियाः ॥६॥

किं बहुनाथ सौख्येन त्रिलोकी पूर्णतां गता ।
भूत्वाखण्डितमाद्यन्तम् पुरुषं सेवता सदा ॥७॥

विशिष्य तादृशां लोके एतद्ग्रन्थोपजीविनां ।
दृष्टादृष्टफलं पूर्णं लभ्यतां लीलयैव च ॥८॥

प्रसन्नः सद्गुरुर्भूत्वा तथास्त्विति तमूचिवान् ।
तदा सद्गुरुवाक्येन ज्ञानेश्वरोऽभवत् सुखी ॥९॥

इति श्रीमधुसूदन पेन्ना रचितं ज्ञानेश्वरकृतप्रसाददानं समाप्तम्

***

In Public domain. Digitization Muthulakshmi Research Academy

श्रीशारदास्तुतिः

परे निर्मले शुद्धबोधप्रदीप्ते
मदीयान्तरङ्गे विराजस्व मातः ।
पदं निर्मलं ते सदा मेऽस्तु चित्ते
न काङ्क्षे परं किञ्चिदन्यत् सुतुच्छम् ॥ १ ॥

सुधाधारयाऽप्लाविता मेऽद्य वाणी
चिदम्बोधिवीचिप्रतिष्ठां प्रविन्ताम् ।
सिता मातृमन्दस्मिताभासिता सा
मिताऽपीश्वरीं तां मिमीतां ह्यनन्ताम् ॥ २ ॥

नभोमण्डलाद्भूमितापापनोदो
यथा सत्वरं वर्षतीहाभ्रवृन्दः ।
तथा प्रातिभाच्चिन्निधेः पापनोदः
सदा वर्षताच्छब्दरत्नाम्बुवाहः ॥ ३ ॥

विधुर्ज्योत्स्नया मालती सौरभेण
पिको नूत्नचूताङ्कुरास्वादनेन ।
यथा भाति सत्येन विज्ञस्य चित्तं
तथा शब्दरत्नैर्हि मे भातु भाषा ॥ ४ ॥

हयेन्द्रं स्ववेगेन संस्मारयन्ती
नदीवाद्रितुङ्गाद् भुवं संपतन्ती ।
स्फुटं शब्दरत्नैर्विभान्ती स्फुरन्ती
ममास्याद् विलस्याद् सदा भारतीभा ॥ ५ ॥

निदाघार्कतापार्तिनाशं विधित्सु
र्यथा मेघवृन्दः प्रवर्षेत् कृपालुः ।
तथा मामकीना जनार्तिं जिघांसुः
शुभा भारती सुप्रसन्ना विलस्यात् ॥ ६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अहङ्कारभावप्रणाशे स्वयं या
हृदन्तर्विभान्ती स्वयं दर्शितात्मा ।
स्थितप्रज्ञतां व्यञ्जयेदिन्दुभासा
शुभा भारती सुप्रसन्ना विलस्यात् ॥ ७॥

मनो बाह्यवृत्तेर्निगृह्यात्मदृष्ट्या
हृदन्तः शुचिर्मार्गमाणो जनो याम् ।
समष्टेरहंरूपिणीं विन्दते सा
शुभा भारती सुप्रसन्ना विलस्यात् ॥ ८ ॥

इति श्रीमधुसूदन पेन्ना रचिता श्रीशारदास्तुतिः समाप्ता

***

In Public domain. Digitization Muthulakshmi Research Academy

देवीस्तुतिः

अनुपमगुणसिन्धुर्भक्तभासां निदानं
वदनकमललीलानिर्जितश्रीनिधाना ।
अतुलितमहिमा या नित्यबोधात्मिका च
हृदयमधिवसेन्मे सर्वदा सैव माता ॥१॥

ललितमधुरहासा लीलया या विजित्य
नतजनहृदयानि स्वेच्छया संविभाति ।
त्रिभुवनघनकीर्तिः सुन्दरी विश्वबिन्दुः
हृदयमधिवसेन्मे सर्वदा सैव माता ॥२॥

वदनकमलमध्ये पद्मयुग्माभनेत्रे
विलसति मृदुरोचिर्भक्तसंतापहर्त्री ।
रुचिरदशनभासा भक्तचित्तं प्रविश्य
विहितसुखनिवासा तत्र बाभातु माता ॥३॥

क्षणमपि तव रूपं यस्य चित्ते विभायात्
कथमिह नुतभाग्यो बन्धभाक् दृश्यतेऽत्र।
सपदि निहतपापः पुण्यभाजा स मूर्ध्नि
चिरमतिसुखितः सन् राजते पुण्यपात्रम् ॥४॥

कुसुमनिकरमध्ये वृक्षपूगेऽथ नद्यां
दिनकरकिरणेषु क्षीणपापेऽपि नित्यम् ।
शिशुमृदुमधुहासे भृङ्गनादेऽथ माता
विलसति नुतनामा सैव कारुण्यसिन्धुः ॥५॥

अथ मधु वदने ते नेत्रयोरम्ब वाण्यां
मृदुमधुदरहासे संनिवेशेऽथ गत्याम् ।
प्रणिहितवरमुद्रे हस्तपद्मे विलासे
स्रवति हि सततं तन्मेऽस्तु नित्यं शरण्यम् ॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

विविधविषयपूगं प्राप्य मूढोऽत्र जीवः
स्वनिहितचितितत्त्वं ज्ञातुमीष्टे न मातः ।
यदि तव करुणा स्यात् चक्षुरुन्मीलितं सत्
त्रिभुवनवररूपं द्रष्टुमीशो भवेत्ते ॥७॥

प्रतिदिनमधुधारापूर्णवाणी ममास्यात्
बुधजनहृदयानां मोहिनी प्रादुरस्तु ।
हृदयकलुषमेषा नाशयन्ती जनानां
मम जनिफलमायं संविधत्तां मदम्ब ॥८॥

प्रतिदिनमतुलाभां जीवनस्यैकलाभं
विकसितकमलाक्षीं मन्दहासोज्ज्वलास्याम् ।
विनिहितवरहस्तां मातरं कोमलाङ्गी
हृदयकुहरमध्ये पूजयेऽनन्यभक्तः ॥९॥

दिनकरकरगुप्ता चन्द्रभासामवित्री
तुहिनकिरणरूपा विश्वसन्धायिनी या ।
जगति विनतलोकं पातुमादत्तदीक्षा
सकरुणमविनयं मां पातु माता मदीया ॥१०॥

हृदयकुहरमध्ये स्वर्णसिंहासने त्वां
मुदुतमकमलेऽहं संनिवेश्याथ वन्दे ।
भव भवभयहर्त्री भक्तचित्ताब्जभानुः
कुरु मम हृदयं त्वन्नामरक्तं नितान्तम् ॥११॥

क्षणमपि यदि मातुः सौख्यमङ्कस्य नष्टं
शिशुरतितुदितः सन् रोदिति स्वैरमम्ब ।
सकरुणमभिगम्य प्रेमराशिस्तु माता
सपदि तनुजदुःखं स्पर्शमात्रेण हन्ति ॥१२॥

In Public domain. Digitization Muthulakshmi Research Academy

भवगतबहुभेदं नूनमालोक्य दुःखी
चरणकमलमूलं संश्रितस्तेऽहमम्ब ।
विनिहतभवभेदं शाश्वताद्वैततत्त्वं
मम मनसि सदा त्वं रक्ष भक्तस्य वर्ये ॥ १३ ॥

मकरविकटदंष्ट्रामध्यवर्तीदमम्ब
कमलललिततन्तुप्राभवं नारजन्म ।
अत इदमधुना मे प्रार्थनं पादमूले
निहितमतुलतेजोराशिरीक्षस्व मातः ॥ १४ ॥

इति श्रीमधुसूदन पेन्ना रचिता देवीस्तुतिः समाप्ता

***

In Public domain. Digitization Muthulakshmi Research Academy

यस्या बलेनाहमनन्ततत्त्वं जिज्ञासमानोऽस्मि सदैव मातः ।
तज्ज्ञानलेशाच्च सुखेन वर्ते सा ते कृपा मामवतात् सदाऽम्ब ॥ १ ॥

जन्मस्थिती मृत्युपदं तथेदं विचिन्तयन् कालमनैषमम्ब ।
यस्या बलेनेदमभूत् सुशक्यं सा ते कृपा मामवतात् सदाऽम्ब ॥ २ ॥

यत्राविशन्मे हृदयं च शास्त्रे तद्गूढतत्त्वप्रविवेकि जातम् ।
यस्या ऋते शक्यमिदं न लोके सा ते कृपा मामवतात् सदाऽम्ब ॥ ३ ॥

प्राणं विना जीवनमेव लोके शक्यं यथा नैव तथैव मातः ।
यस्या ऋते नास्ति मदीयबुद्धिः सा ते कृपा मामवतात् सदाऽम्ब ॥ ४ ॥

पुष्पेषु सौन्दर्यसौगन्ध्यहेतु र्या कारणं चास्ति मधुप्रवाहे ।
या स्पन्दमाना सकलं बिभर्ति सा ते कृपा मामवतात् सदाऽम्ब ॥ ५ ॥

या ते मुखे नेत्रयुगे कराब्जे तथा कटाक्षे विलसत्यजस्रम् ।
या च स्थितौ ते गमनेऽपि पूर्णा सा ते कृपा मामवतात् सदाऽम्ब ॥ ६ ॥

त्वत्संनिवेशेऽथ हि मन्दहासे नतोद्दिधीर्षा स्फरतीह मातः ।
या मूढनेत्रस्य मृदुप्रकाशः सा ते कृपा मामवतात् सदाऽम्ब ॥ ७ ॥

संस्कारवह्नौ लघु पच्यमानाः यया गृहीता मनुजाः नितान्तम् ।
शीताम्बुधौ मज्जनमाप्नुवन्ति सा ते कृपा मामवतात् सदाऽम्ब ॥ ८ ॥

या मे बलं कीर्तिरथ प्रतिष्ठा धनं च सौभाग्यविशेष एवम् ।
या ज्ञानविज्ञाननिदानमग्र्यं सा ते कृपा मामवतात् सदाऽम्ब ॥ ९ ॥

कः पूर्वमासं कुत आगतोऽहं यायां पुनः कुत्र न वेद्धि तत्त्वम् ।
यस्या बलेनाहमवाप्तविद्यः सा ते कृपा मामवतात् सदाऽम्ब ॥ १० ॥

जन्मस्थिती वेत्तुमहं प्रवृत्तो यथा हि काचिल्लवणस्य मूर्तिः ।
जले निमग्ना, मम संततिर्या सा ते कृपा मामवतात् सदाम्ब ॥ ११ ॥

माध्वीं यया वाचमवाप्य लोके सौहार्दसारं तनवानि नित्यम्।
त्वन्नामगाने च निमग्नचित्तः सा ते कृपा मामवतात् सदाऽम्ब ॥ १२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

लक्ष्मीर्मुखे वाचि सरस्वती ते शक्तिस्तथा गात्रगताऽस्ति सत्यम् ।
त्वामेवमिष्टां कलये ययाऽहं सा ते कृपा मामवतात् सदाऽम्ब ॥ १३ ॥

त्वन्नामगाने मम मानमास्यं त्वद्रूपलावण्यविलोकनेऽक्षि
त्वच्चिन्तनेऽहं निरतो ययैवं सा ते कृपा मामवतात् सदाऽम्ब ॥ १४ ॥

त्वन्नामगानं मम नित्यकर्म तदेव काम्यं मम सर्वदैव ।
नैमित्तिकं कर्म रसानुभूति र्यया कृपा सा तव रक्षतान्माम् ॥ १५ ॥

जाग्रद्दशायां तव नामगानं स्वप्ने तथा दर्शनमम्ब दिव्यम् ।
यया भवेन्मे तव भा सुषुप्तौ सा ते कृपा मामवतात् सदाऽम्ब ॥ १६ ॥

गुरुं निमित्तं तु विधाय लोके मूढं नरं या विदधाति विज्ञम् ।
द्वे भूमिके या हि सदा विधत्ते सा ते कृपा मामवतात् सदाऽम्ब ॥ १७ ॥

काव्यात्मना या हृदये कवीनां बोधात्मना ज्ञानिमनःसु भायात् ।
शान्त्यात्मना योगिमनःसु चैव सा ते कृपा मामवतात् सदाऽम्ब ॥ १८ ॥

आदौ ययाऽहं जगतो नितान्तं निस्सारतां बोधित आसमम्ब ।
देहो विनाशीति च बोधितोऽहं सा ते कृपा मामवतात् सदैव ॥ १९ ॥

भीतोऽहमादौ मरणान्नितान्तं दिवानिशं शोकपरीतचित्तः ।
यस्या बलेनोद्धृत आसमम्ब सा ते कृपा मामवतात् सदैव ॥ २० ॥

देहे विनष्टेऽपि न मेऽस्ति मृत्यु र्न मे जरा नापि पृथग्विकाराः ।
इत्थं यया ज्ञातमभूत्तदग्रे सा ते कृपा मामवतात् सदाऽम्ब ॥ २१ ॥

योगाख्यशस्त्रं ह्यबलाय मह्यं दत्त्वा तमो नाशितमेव पूर्णम् ।
यया ततो निर्भयता प्रदत्ता सा ते कृपा मामवतात् सदाऽम्ब ॥ २२ ॥

ये योगिनः शान्तपदं प्रपन्ना स्तेषां चरित्राणि पुरो निधाय ।
या जीवनं मेऽनयदग्रमार्गे सा ते कृपा मामवतात् सदाऽम्ब ॥ २३ ॥

संस्कारपूगं सुनिरुद्धमादौ श्रेयःपथे या सुचिरं विधाय।
पश्चात् स्वयं तानवबोध्य तुष्टा सा ते कृपा मामवतात् सदाऽम्ब ॥ २४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

यस्याः स्वयं योगपथे प्रविष्टः पश्चात् क्रमेणाहमधीतविद्यः ।
निःसारभावानवगम्य विज्ञः सा त कृपा मामवतात् सदाऽम्ब ॥२५॥

संस्कारपङ्के जननान्तराप्ते सीदन्तमार्तं तव भक्तमेतम् ।
सच्चिन्तनेनेह यया ह्यरक्षः सा ते कृपा मामवतात् सदाऽम्ब ॥२६॥

दुर्बोधपूर्णे विविधैर्विचारैः शास्त्रे महारण्यनिभे ययाऽहम् ।
मन्दोऽपि मन्दं सुचिरं हि नीतः सा ते कृपा मामवतात् सदाऽम्ब ॥२७॥

कालुष्यमग्ने जगतीह भक्ते बोधात्मकं स्वच्छजलं प्रदाय ।
या शुद्धचित्तं विदधाति नित्यं सा ते कृपा मामवतात् सदाऽम्ब ॥२८॥

शाब्दं महो दिव्यमदाद्धि याऽदौ पश्चान्मनोबोधसुधां विशिष्टाम् ।
पश्चाच्छनैः स्वानुभवं प्रदत्ते सा ते कृपा मामवतात् सदाऽम्ब ॥२९॥

कामादिदोषेषु मदीयचित्ते जातेषु या नाम तव प्रदद्यात् ।
स्वच्छं मनः कर्तुमजस्रमेवं सा ते कृपा मामवतात् सदाऽम्ब ॥३०॥

मद्भावनामन्दिरगर्भगेहे भावासने त्वां भवबन्धहर्त्रीम् ।
भक्त्या प्रतिष्ठाप्य सदा भजेऽहं सा ते कृपा मामवतात् सदाऽम्ब ॥३१॥

त्वं ज्ञानिनं भक्तवरं करोषि तं योगिवर्यं च मुदा मदम्ब ।
त्वन्नामराज्ये सकलं सुशक्यं यस्याः बलात् सा ह्यवतात् सदा माम् ॥३२॥

न कर्म बन्धाय तथैव विद्या तन्त्रं च योगश्च परे च मार्गाः ।
सर्वे यया साम्यमथ व्रजेयुः सा ते कृपा मामवतात् सदाऽम्ब ॥३३॥

मद्देहवल्लीस्थिरदण्डरूपा मद्बोधभाभास्कररूपिणी या ।
या चानुभूतिं प्रददाति मह्यं सा ते कृपा मामवतात् सदाऽम्ब ॥३४॥

यद् ब्रह्मदृष्ट्या जगदस्ति मिथ्या तज्जीवदृष्ट्या ननु सत्यमेव ।
जीवो यया सत्यपदं प्रयाति सा ते कृपा मामवतात् सदाऽम्ब ॥३५॥

निःसारदेहे प्रवितत्य पूर्णा तत्सारहेतुर्विलसत्यजस्रम् ।
पश्चात् समाजस्य हिते नियुङ्क्ते सा ते कृपा मामवतात् सदाऽम्ब ॥३६॥

निःशब्दरूपाऽपि च शब्दजालं संव्याप्य विश्वं प्रकटी करोति ।
एकाऽपि वैविध्यमथ व्यनक्ति सा ते कृपा मामवतात् सदाऽम्ब ॥३७॥

अर्थात्मना शब्दततिं स्वशक्त्या योजीव्य शब्दैरभिधीयमाना ।
शब्दार्थबोधत्रितयं बिभर्ति सा ते कृपा मामवतात् सदाऽम्ब ॥३८॥

येऽज्ञानिनस्तत्त्वपथे प्रवृत्ता स्त्वत्तत्त्वविज्ञानविधौ विमूढाः ।
यामाश्रिताः सत्यपदं प्रजग्मुः सा ते कृपा मामवतात् सदाऽम्ब ॥३९॥

शब्दा यतस्त्वां प्रति निर्दिशन्ति जीवन्ति तेनैव न चान्यथा ते ।
अन्यत् पुरस्कृत्य यदि प्रवृत्ताः संमोहनायैव भवन्ति लोके ॥४०॥

प्रबोधितः सत्यमिदं ययाऽहं तारुण्यमूढोऽपि विदग्धमानी ।
दयासमुद्रा हृदि नित्यमुद्रा सा ते कृपा मामवतात् सदाऽम्ब ॥४१॥

लोभादिषु स्वान्तगतेषु तूर्णं कस्मायिदं हीति करोतु पृच्छाम् ।
इत्थं यया बोधित आसमम्ब सा ते कृपा मामवतात् सदैव ॥४२॥

त्वत्तत्त्वबोधो हि परात्मविद्या भक्तिः परा त्वद्गुणरक्तिरेव ।
त्वं योग इत्येव यया ह्यबोधम् सा ते कृपा मामवतात् सदाऽम्ब ॥४३॥

काले त्वनन्ते परमत्र जातः पूर्वापरज्ञानविमूढचेताः।
ययाऽभवं त्वत्पदरक्तचित्तः सा ते कृपा मामवतात् सदाऽम्ब ॥४४॥

त्वन्नामभानूदयदीधितिर्मे चित्ताब्जबोधेऽभवदत्र हेतुः ।
तदस्य सौम्नध्यवितानमूलं भवे भवे मे भवतात् भवार्तौ ॥४५॥

नालप्स्यतेदं यदि नाम मातुर्गतिर्मदीया विषमाऽभविष्यत् ।
लक्ष्याच्च्युतोऽहं न यया त्वदीया सा मां कृपाऽर्तं ह्यवतात् सदाम्ब ॥४६॥

मोक्षोऽक्षमेनाक्षनिवर्तनादौ शक्यो न चाप्तुं श्रुतिवाक्ययोगात् ।
सत्यं मदीयाक्षनिवर्तनेन मातः कृपा ते कुरुतात् प्रसिद्धम् ॥४७॥

मुक्तिर्विरक्तिर्यदि शास्त्रसिद्धा त्वद्भक्तवर्येण न कांक्ष्यते सा ।
त्वन्नामरक्तिर्भवतात् सदैव मुक्तेरपि श्रेयसि नामरक्तिः ॥४८॥

In Public domain. Digitization Muthulakshmi Research Academy

मुक्तोऽहमेवं यदि नामगानात् प्रवञ्चितस्तर्हि ममास्तु जन्म ।
परं वरेण्या प्रतिजन्म भक्ति स्त्वत्पादपद्माहितमानसत्वम् ॥४९॥

मद्भावनातः किमियं परार्था कृपा जगन्मातुरनन्तशक्तेः ।
यद्वा कृपाया मम भावनेत्थ मास्था न मे तत्र कृपा तवास्तु ॥५०॥

गुर्वाज्ञा गुर्वाज्ञयेदं शतकं चिकीर्षुः पुनः प्रवृत्तोऽस्मि कृपाभिसन्धौ ।
गुरोर्मुखेनेदमथादिशद् या सा ते कृपा मामवतात् सदाऽम्ब॥५१॥

वृत्त्यन्तरे मे मनसो विनष्टे देदीप्यमाना प्रविभाति मूर्तिः ।
मातुर्यया शक्यमिदं व्यधायि सा ते कृपा मामवतात् सदाऽम्ब ॥५२॥

शास्त्रौघतत्त्वार्थविधानबोध प्रमूढबुद्धिं समुदाहरन्ती ।
सत्यान्न मे गोपयते परा या सा ते कृपा मामवतात् सदाऽम्ब ॥५३॥

वायुस्स्वयं प्राणगतिं प्रपद्य जीवात्मनाऽन्तश्चरतीह नित्यम् ।
तस्मिंश्च मोहं मम या निहन्यात् सा ते कृपा मामवतात् सदाऽम्ब ॥५४॥

तपोनिमग्नेषु विविक्तदेशे स्वयं मुनीन्द्रेषु तदीयचित्ते ।
या सर्वदा भाति सदात्मनाऽर्घ्या सा ते कृपा मामवतात् सदाऽम्ब ॥५५॥

गृहीतमात्रे तव नामधेये यद्गात्ररोमाञ्चमिहाप्नुवन्ति ।
त्वद्भक्तवर्याः सततं ययैवं सा ते कृपा मामवतात् सदाऽम्ब ॥५६॥

दूरे स्थिता बाह्यमुखेन्द्रियाणां तत्पुण्यपाकं तु निरीक्षमाणा ।
आवृत्तबुद्धेर्हृदि भासते या सा ते कृपा मामवतात् सदाऽम्ब ॥५७॥

अन्तर्मुखी वृत्तिरिहात्मनीना सर्वेन्द्रियाणां विरतप्रवृत्तौ ।
प्रदीयतेऽसौ हि ययाऽस्मदर्थं सा ते कृपा मामवतात् सदाऽम्ब ॥५८॥

समुद्दिधीर्षाभवबन्धनात् ते या सर्वदायास्त्वनपायिनी च ।
स्वयं विमृग्यैव सदोद्धरेद्या सा ते कृपा मामवतात् सदाऽम्ब ॥५९॥

त्वां देवदेवस्य कृपाविशेषं गृणन्ति केचिन्न पृथक्पदार्थम् ।
ययैव ते ते ह्यनुकम्पनीयाः सा ते कृपा मामवतात् सदाऽम्ब ॥६०॥

ज्ञाने हि केचित् कतिचिच्च भक्तौ ध्याने परे मोहमिहाप्नुवन्ति ।
साकल्यबोधं प्रददाति या नः सा ते कृपा मामवतात् सदाऽम्ब ॥ ६१ ॥

नूनं विरोधो न कदापि तत्त्वे बोधे तु वर्वर्ति सदाऽज्ञबुद्धेः ।
मिथो विरोधं परिहृत्य याऽव्यात् सा ते कृपा मामवतात् सदाऽम्ब ॥ ६२ ॥

कमप्यविज्ञाय कथं नुरक्तिर्भवेन्नृणां सत्यमिदं तु बोध्यम् ।
रक्तिं विना तन्मयता च शक्या भवेत्कथं बोध्यमिदं भवद्भिः ॥ ६३ ॥

ज्ञाते परेशस्य गुणौघतत्त्वे भक्तिःस्वयं जायत एव तस्मिन् ।
तत्पृष्टतो ध्यानमथास्ति शक्यं या भेदहानौ खलु तन्मयत्वम् ॥ ६४ ॥

कृषीवलः कश्चिदिहार्थसिद्ध्यै क्षेत्रं विशोध्यैव तु बीजवापम् ।
कुर्यात् यथा या कुरुतेतथाऽन्तः सा ते कृपा मामवतात् सदाऽम्ब ॥ ६५ ॥

पूर्वार्जितं पापविशोधनं या नूनं पुरस्कृत्य प्रवर्ततेऽत्र ।
पश्चाद् गुणावापविधौ परार्था सा ते कृपा मामवतात् सदाऽम्ब ॥ ६६ ॥

तुषामनिष्कास्य कथं नु धान्य मादेयमत्रौदनकार्यहेतोः ।
दोषापहानिः क्रियते ययैवं सा ते कृपा मामवतात् सदाऽम्ब ॥ ६७ ॥

दोषापहानावहमर्थबोधो भायाच्च मेघापगमे यथाऽर्कः ।
दोषप्रहाणाय समर्च्यते या सा ते कृपा मामवतात् सदाऽम्ब ॥ ६८ ॥

दोषापहानिस्थिरतात्मबोधे संपादनीया सततं प्रयत्नात् ।
यत्नःस शक्यो हि ययैव भक्ते सा ते कृपा मामवतात् सदाऽम्ब ॥ ६९ ॥

लोके विरुद्धांशविलोकनेऽयं यत्नः किमर्थं क्रियते सुविज्ञैः ।
ज्ञेयार्थसाक्षात्करणे प्रवृत्ति र्भवेद्यया सा ह्यवतात् सदा माम् ॥ ७० ॥

श्रीशङ्कराचार्ययतीन्द्रवाक्यस्फुटार्थबोधप्रविवेकमूढाः ।
अज्ञातमिथ्यात्व विधा भ्रमन्ति सा ते कृपा मामवतात् सदाऽम्ब ॥ ७१ ॥

मिथ्येति कार्यात्मतयैव सर्वं सा कार्यता विश्वविधौ च हेतुः ।
यया हि मिथ्याविरहो भवेन्मे सा ते कृपा मामवतात् सदाऽम्ब ॥ ७२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

मिथ्यास्वरूपस्य निरूपणे ये केचित्प्रयत्नं विदधत्यजस्रम् ।
ब्रह्मानुभूतौ निरता भवेयु स्ते नूनमित्थं दययाम्ब पश्य ॥७३॥

रज्जावहिज्ञानमिहास्ति मिथ्या रज्जुस्वरूपावगमस्तु सत्यम् ।
रज्जुं यथा ज्ञातुमहं समर्थो भवेयमंब क्रियतां तथैव ॥७४॥

सर्पभ्रमं मे पुरुषायुषेण व्याख्याय विद्वान् किमहं कृतार्थः ।
सत्यार्थबोधे मम मानसं या कुर्यात् समर्थं मयि सा प्रवर्ष्या॥७५॥

ज्ञातेऽपि सत्ये नहि तत्र चित्तं नन्देत्तदा तेन किंमत्र वेद्यम् ।
साक्षात्कृतिस्तस्य यया भवेन्मे सा ते कृपा मामवतात् सदाऽम्ब ॥७६॥

तादात्म्यमाहुर्यदि शास्त्रिवर्याः अद्वैतमेवं भवतात् सदा मे ।
योगेऽथ भक्तौ सति चात्मबोधे तादृक् कृपा ते ह्यवतात् सदा माम् ॥७७॥

ध्येयैक्यनामा यदि योग एको ज्ञानं च वेद्यैक्यमिहोपदिष्टम् ।
भक्तिश्च तादात्म्यरसः सदा मे तादात्म्यमेवास्तु मदम्ब नित्यम् ॥७८॥

कृपाविहीनस्य मतिस्तु भिन्ना साम्यात्मकं योगमिहाप्नुयाद्वा ।
अतः कृपा तेऽस्तु सुधोपमा मे यां प्राप्य भीतो न भवामि मृत्योः ॥७९॥

साम्ये मनो मेऽस्तु विकारजाते भ्रान्तं न चोच्चावचभेदजाले ।
भवेद्यया शक्यमिदं तदर्थे सा ते कृपा मामवतात् सदाऽम्ब ॥८०॥

ब्रह्मैव सर्वं यदि वीक्षितव्यं किं मिथ्यया तत्त्वमिदं विभाव्यम् ।
ब्रह्मात्मभावापगमे तु मिथ्या तद्भिन्नतत्त्वे तु विभावनीया ॥८१॥

ब्रह्मस्वरूपं श्रुतितोऽवगत्य वेदानुकूलेन च तर्कयित्वा ।
तस्यात्मभावानुभवे प्रयत्वं त्रिधा हि पन्थाः परिकीर्तितोऽत्र ॥८२॥

योग्यो गुरुर्मानवरूपधारी शब्दात्मको वाऽथ विचाररूपः ।
मोहं विनाश्याथ हिते नियुङ्क्ते माहात्म्यमेतद् गदितं गुरोर्वै ॥८३॥

वायुर्यथा भिन्न इहैक एव स्वयं हि वर्णात्मकतां प्रपन्नः ।
अन्तर्गतान् सर्वरसान् व्यनक्ति जीवात्मकत्वं प्रतिपद्यतेऽत्र ॥८४॥

In Public domain. Digitization Muthulakshmi Research Academy

चैतन्यमेकं खलु भेदजाते संव्याप्य तत्तल्लसतीह पूर्णम् ।
तत्त्वस्य भानं हृदि मे यया स्यात् तादृकृपा ते भवतात् सदा मे ॥८५॥

सर्वं यदि ब्रह्म तदा तु मूर्तौ भवेत् सदा ब्रह्मविभावना मे।
मूर्तेरभावेऽपि च साम्ययोगो विरुध्यते नैव तदात्मकत्वात् ॥८६॥

अहं यतः कर्मविशेषबद्धस्ततो न कर्मादि विहातुमीहे।
परं त्वदीयं भवतात् सदा तत्तादृक् कृपा मामवतात् सदाम्ब ॥८७॥

पूर्वापरौ ज्ञातुमहं न शक्तो मध्येऽनुरक्तो मम पूर्वदोषैः ।
दोषानपाकृत्य हिते नियुञ्ज्यात् सा ते कृपा मामवतात् सदाऽम्ब ॥८८॥

अक्षाहृतं विश्वमिहोपजीव्य नानाविधं चित्तविभावनं मे ।
जातं यया नाशितमेव मातस्तादृक् कृपा मामवतात सदैव ॥८९॥

विद्यामविद्यां कथमत्र मातस्तमोऽवलोकेय दिवाऽर्ककान्तौ ।
तस्मान्न मे तामसलोकनेच्छा त्वत्कान्तिदर्शी तु बुभूषुरस्मि ॥९०॥

नित्यं कृते कर्मणि चित्तशुद्धौ न कर्मदोषेण विलिप्यते ना ।
ततो मनो ज्ञानसमर्थमग्रे योगाय शक्तं चिरशान्तिमेति ॥९१॥

दुर्मेधसां भक्तिरितीयमुक्तिः साध्वी न शास्त्रे गदिताऽपि नैव ।
ज्ञानात् परा भक्तिरिति स्वबुद्ध्या विचिन्वतामार्यवराः यथार्थम् ॥९२॥

अज्ञानतो भक्तिरसंभवैव ज्ञानं गुणानां परमेशितुः स्यात्।
सामान्यबोधे परमेशभक्तिस्तस्याः महेशस्य कृपावतारः ॥९३॥

कृपाविशेषेण समाधिलाभे ऋतम्भरा जायत एव बुद्धिः ।
सा सत्यरूपा खलु मोक्षहेतुः सुधेति शास्त्रे गदितात्मविज्ञैः ॥९४॥

मुक्तोऽपि योगी यदि देहधारी जीवन्विमुक्तो गदितोऽत्र शास्त्रे ।
देहे विनिष्टे स तु पूर्णमुक्तः कैवल्यमाप्नोति समत्वरूपम् ॥९५॥

मुक्तिर्यदि त्वद्गुणविस्मृतिः स्यात् त्वन्नामबोधोऽपि भवेन्न तत्र ।
कांक्षे न मुक्तिं मम जन्म वर्ये त्वन्नामगानं भवतात् सदा मे ॥९६॥

In Public domain. Digitization Muthulakshmi Research Academy

मज्जन्मनः श्रेय इदं मदम्ब यत्तावकं नाम हृदि स्थितं मे ।
बाल्यात् त्वयानायि मदीयचित्तं तत्तावकीनं भवतात् सदैव ॥९७॥

गुणाग्रणीनां सरणिं प्रपित्सु र्बालोऽहमेवं प्रलपामि मूढः ।
मातस्त्वमत्यन्तकृपालयाऽसि त्वत्संमुखे स्तोत्रमिदं गृणीयाम् ॥९८॥

कृपैव ते मे शतकात्मनाद्य व्यक्ताऽभवत्तेन तवास्तु तुष्टिः ।
नूनं शिशूनां भणितिः प्रसूनां संमोदहेतुर्भवतीति जाने ॥९९॥

स्मितेन यस्याः जगदेतदञ्जसा वशीकृतं न्यक्कृतचन्द्ररोचिषा ।
तदेव बाभातु हृदीडितप्रभं तमः प्रकाण्डस्फुटनाशविक्रमम्॥ १००॥

इति श्रीमधुसूदनपेन्नारचितं कृपाशतकं समाप्तम्

***

In Public domain. Digitization Muthulakshmi Research Academy

श्रीज्ञानदेवकृतः हरिपाठः

(संस्कृतरूपान्तरम्)

१

देवदेवस्य हि द्वारे क्षणमात्रञ्च तिष्ठतः ।
चतस्रः साधिता नूनं सालोक्यादिकमुक्तयः ॥ १ ॥

हरिरिति सदा भक्त्या भजतो भक्तिभावतः ।
पुण्यस्य गणना केन क्रियतां भुवनत्रये ॥ २ ॥

संसारे वर्तमानेन कार्या जिह्वा हरिप्रिया ।
एवं जोघुष्यते स्थित्वा वेदशास्त्रादिभिः सदा ॥ ३ ॥

वदति ज्ञानदेवोऽत्र पुरा पाण्डवमन्दिरे ।
एवं हि द्वारकाधीशः इतिव्यासप्रमाणतः ॥ ४ ॥

२

वेदचतुष्टये विद्धि षट् शास्त्रनिचयेऽपि च ।
अष्टादशपुराणेषु हरिरेकः प्रगीयते ॥ ५ ॥

लोके दधि मथित्वैव नवनीतमवाप्यते ।
तथा प्राप्नुहि गोविन्दं हित्वा व्यर्थाः कथाः पथः ॥ ६ ॥

एको हरिर्महानात्मा समो जीवेशयोः सदा ।
अतो दुर्गममार्गेषु मोघं मा धेहि मानसम् ॥ ७ ॥

वदति ज्ञानदेवो मे पाठस्तन्नामकीर्तनम् ।
हरिर्मम तु वैकुण्ठः पूर्णः सर्वत्र दृश्यते ॥ ८ ॥

३

त्रैगुण्यं सर्वथाऽसारं सारः सर्वस्य निर्गुणः ।
सारासारविचारोऽयं हरिपाठोऽस्ति तत्त्वतः ॥ ९ ॥

सगुणं निर्गुणञ्चेति गुणानां हि प्रकारकौ ।
परात्मश्रीहरिम् त्यक्त्वा मोघं मा ते मनो गमत् ॥ १० ॥

In Public domain. Digitization Muthulakshmi Research Academy

अव्यक्तं यन्निराकारं यच्चाकारविवर्जितम् ।
चराचरं यतः सर्वं तदेकं भज सर्वथा ॥ ११ ॥

वदति ज्ञानदेवो मे रामकृष्णो मनस्यथ ।
नाम धारयतश्चित्ते पुण्यं भवति शाश्वतम् ॥ १२ ॥

४

भावं विना क्वचिद्भक्तिं विना भक्तिञ्च मुक्तताम् ।
बलं विना तथा शक्तिं लोके न प्रतिपादयेत् ॥ १३ ॥
पसन्ना देवताः लोके भवेयुः सत्वरं कथम् ।
अतोऽनीहः प्रशान्तः सन् विनायासो भवात्मवान् ॥ १४ ॥
सायासं हि प्रपञ्चे त्वं संक्लिश्नासि दिवानिशम् ।
किमाश्रित्य कुतो वाऽपि हरिं न भजसे परम् ॥ १५ ॥
वदति ज्ञानदेवोऽद्धा सदा हरिजपादिह ।
सर्वे बन्धाः प्रपञ्चस्य भिद्येरन् नान्यथा भुवि ॥ १६ ॥

५

योगयागविधिभ्योऽपि भवन्ति नेह सिद्धयः ।
योगादिदाम्भिका धर्माः व्यर्था सर्वे ह्युपाधयः ॥ १७ ॥

भावं विना न देवोऽत्र ज्ञेयोऽस्ति नात्र संशयः ।
विनाऽपि सद्गुरुं लोके स्वानुभूतिः कथं भवेत् ॥ १८ ॥

तपो विना यथा दैवं विना दानं च तत्फलम् ।
गुह्यं विना हितं लोके को वा ब्रूयात् प्रियं तथा ॥ १९ ॥

वदति ज्ञानदेवोऽत्र दृष्टान्ताद् वो वदाम्यहम् ।
साधूनां संगतिं हित्वा नान्योपायोऽस्ति मुक्तये ॥ २० ॥

६

साधूनामात्मबोधेन स्वरूपावस्थितिर्भवेत् ।
अहङ्कारविहीनः स स्वानुभूत्यैव राजते ॥ २१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

कर्पूरवर्तिका दीप्ता प्रज्वाल्य ज्योतिरग्रतः ।
तत्रैव च लयं प्राप्ता यथा संदृश्यते भुवि ॥२२ ॥

मोक्षकाले समायाते पक्के भाग्योदये तथा ।
साधुमुद्राङ्कितो भक्तो भाति शान्तो हरौ स्वयम् ॥२३ ॥

वदति ज्ञानदेवोऽत्र रुचिर्मे साधुसंगतौ ।
जङ्गमे स्थावरे स्वान्तः सर्वत्र हरिदर्शनम् ॥२४ ॥

७

पापानि पर्वतायन्ते ह्यभक्ताचरितानि हि ।
अभेद्यानि सदा तानि तिष्ठन्ति वज्रलेपवत् ॥२५ ॥

हरिभक्तिम् विना लोके ह्यभक्ताः पतिताः स्मृताः ।
नूनं दैवहतास्ते ये भजन्ते न हरिं क्वचित् ॥२६ ॥

अनन्तमपभाषन्ते वाचालाः ये तु दुर्जनाः ।
कथं ते प्राप्नुयुर्देवं दयालुमपि वल्लभम् ॥२७ ॥

ज्ञानदेवो वदत्येवं देवः प्रमाणमुत्तमम् ।
य आस्ते सर्वभूतेषु रममाणः परात्परः ॥२८ ॥

८

साधूनां सङ्गतिं श्रित्वा मनोयोगेन सत्पथे ।
श्रीपतिः प्राप्यतां पन्थाः परो नान्योऽस्ति भूतले ॥२९ ॥

वाचा श्रीरामकृष्णस्य जप आत्माऽस्ति जीविनाम् ।
रामनाम्नो जपो नित्यं स्वरूपं श्रीशिवस्य च ॥३० ॥

एकतत्त्वस्य नामास्ति साधनं यज्जपात् सदा ।
द्वैतस्य बन्धनं लोके कदाऽपि नैव विद्यते ॥३१ ॥

नामामृतरसास्वादो वैष्णवानां हि शेवधिः ।
योगिनान्तु रसास्वादः केवलं देहधारणे ॥३२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रह्लादे सत्वरोच्चारो नाम्नः प्राप्यत बाल्यतः ।
उद्धवस्य स्वयं देवो जातः समुपदेशकः ॥ ३३ ॥

ज्ञानदेवो वदत्यद्धा नामास्ति सुलभं भुवि ।
अन्यथा दुर्लभो देव इत्थं जानन्ति केचन ॥ ३४ ॥

९

रामकृष्णपदे पूते न लग्नं मानसं यदि ।
तस्य ज्ञानं जपश्चापि व्यर्थमित्येव बुध्यताम् ॥ ३५ ॥

प्राप्तजन्माऽपि दौर्भाग्यात् नाद्वयं तत्त्वमाश्रितः ।
कथं वा प्राप्नुयान्मूढः रामकृष्णपदं परम् ॥ ३६ ॥

द्वैतविध्वंसनार्थं यो न गुरोर्ज्ञानमाप्तवान् ।
कथं वा संप्रवर्तेत स नरो नामकीर्तने ॥ ३७ ॥

वदति ज्ञानदेवोऽत्र सगुणं ध्यानमुत्तमम् ।
नामसंकीर्तनात् सद्यः प्रपञ्चो याति सल्लयम् ॥ ३८ ॥

१०

त्रिवेणीसंगमाद्येषु नानातीर्थेषु मज्जनम् ।
व्यर्थमेव भवेच्चित्ते श्रीहरेर्नाम नास्ति चेत् ॥ ३९ ॥

विमुखो हरिनाम्नो ना पापिष्ठः सर्वथा स्मृतः ।
श्रीगोविन्दं विना तस्य रक्षणे सक्षमोऽस्ति कः ॥ ४० ॥

पुराणप्रथितं तत्त्वं पुरा वाल्मीकिरूचिवान्।
त्रिलोकोद्धरणे दक्षं श्रीहरेर्नाम केवलम् ॥ ४१ ॥

वदति ज्ञानदेवोत्र श्रीहरेर्नामकीर्तनात् ।
सान्वयं च कुलं कृत्स्नं पवित्रं जायते ध्रुवम् ॥ ४२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

११

नामसंकीर्तनाल्लोके श्रीहरेः सर्वदा नृणाम् ।
अनन्तपापराशीनां क्षणेनैव लयो भवेत् ॥४३ ॥

तृणेन संगते वह्नौ सारूप्यं खलु जायते।
तथा नाम जपन्मर्त्यः सारूप्यं श्रीहरेर्लभेत् ॥४४ ॥

श्रीहरेर्नामसंकीर्तिमन्त्रस्यैतत् परं बलम् ।
एतन्मन्त्रभयेनैव भूतबाधा न जायते ॥४५ ॥

वदति ज्ञानदेवोऽत्र समर्थोऽस्ति प्रियो हरिः ।
वेदान्तानां परे तस्य सामर्थ्यं वागगोचरम् ॥४६ ॥

१२

नियमांश्च विना भक्तिं सिद्धांस्तीर्थव्रतादिकान् ।
सर्वानपि विजानीथ व्यर्थानुपाधिरूपिणः ॥४७ ॥

भक्त्यैव स हरिर्ज्ञेयो न ज्ञेयो ह्यन्यथा भुवि ।
भक्तिमात्रसुसंलभ्यः करामलकवद्धरिः ॥४८ ॥

रसे भूमिगते शक्त्या तदर्थं च परिश्रमाः ।
सर्वेऽपि व्यर्थतां यान्ति न तत्र सफलः श्रमः ॥४९ ॥

वदति ज्ञानदेवोऽत्र नाथो निवृत्तिनामकः ।
दयया श्रीहरि देवम् हस्तसात् कृतवान्मम ॥५० ॥

१३

समाधिः सर्वदा लभ्यो हरेरद्वैतभावनात् ।
न स लभ्यो हरिर्देवो द्वैतमात्राश्रयात् क्वचित् ॥५१ ॥

समाधिरेव सद्बुद्धेर्वैभवं नाऽन्यदल्पकम् ।
एको नः श्रीहरिः सिद्धिर्यत्र सर्वाश्च सिद्धयः ॥५२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ऋद्धयः सिद्धयः सर्वाः निधयश्चाप्युपाधयः ।
भक्तिहीनस्य सर्वाऽपि सिद्धिर्व्यर्थैव भूतले ॥५३ ॥

वदति ज्ञानदेवोऽत्र समाधौ संरतोऽस्म्यहम् ।
यतो हि सर्वकालेषु चिन्तनं क्रियते हरेः ॥५४ ॥

१४

नित्यं नियमतो भक्त्या यश्चापि हरिपाठकः ।
स न संस्पृश्यते भक्तः कलिकालेन जीवने ॥५५ ॥

राम कृष्णेति तन्नाम तपसां राशिरुत्तमः ।
अग्रे स पापकार्पासं क्षणाद् दहति सञ्चितम् ॥५६ ॥

हरिर्हरिर्हरिश्चेति मन्त्रः शिवस्य पावनः ।
तं वाचा वदतां नित्यं मोक्षस्तु सुलभो नृणाम् ॥५७ ॥

वदति ज्ञानदेवोऽत्र नारायणजपेन हि ।
संप्राप्तोऽस्मि निजस्थानं योगिनामपि दुर्लभम् ॥५८ ॥

१५

नामाद्वैतं हरेर्नूनं नामान्यद् द्वैतमेव नु ।
अद्वैतन्तु तथा नाम्नो जानन्ति विरला भुवि ॥५९ ॥

समबुद्धीक्षिते भक्त्या सर्वत्र च समो हरिः ।
नामोच्चारणात् तस्य सर्वं शमादि साधितम् ॥६० ॥

चराचरशरीरेषु श्रीराम एक एव हि ।
यथा सर्वप्रकाशोऽर्कः सर्वत्र समवस्थितः ॥६१ ॥

वदति ज्ञानदेवोऽत्र हरिपाठोस्ति मे हृदि ।
अतो ह्यतीतजन्मभ्यो मुक्तोऽहं भवबन्धनात् ॥६२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६

राम कृष्णेति तन्नाम वक्तुं च सुलभं नृणाम् ।
तथापि विरला लोके नामोच्चारणनिष्ठिताः ॥ ६३ ॥

राम कृष्णेति नाम्नैव साधिता चोन्मनी दशा ।
तया च साधिताः सर्वाः सिद्धयो नः श्रमं विना ॥ ६४ ॥

सिद्धयो बुद्धयो धर्मा हरिपाठेन ते गताः ।
साधूनां संगतौ नूनं प्रपञ्चो लयमेष्यति ॥ ६५ ॥

वदति ज्ञानदेवोऽत्र रामकृष्णो हृदि स्थितः ।
तेन सर्वा दिशो व्याप्ता आत्मारामेण सर्वदा ॥ ६६ ॥

१७

कीर्तिं श्रीहरिनाम्नो यो गायेन्मुखेन सर्वदा ।
नामसंकीर्तनाद् देहः पवित्रस्तस्य जायते ॥ ६७ ॥

सामर्थ्यं तपसस्तस्य देहे संततमूर्जितम् ।
नामधारी चिरञ्जीवी कल्पकोटिषु नन्दति ॥ ६८ ॥

माता पिता तथा भ्राता सर्वेऽपि गोत्रबान्धवाः ।
स्वयं श्रीविष्णुरूपास्ते भूत्वा नन्दन्ति शाश्वतम् ॥ ६९ ॥

वदति ज्ञानदेवोऽत्र गूढं ज्ञानं प्रकाशितम् ।
न्यस्तं निवृत्तिनाथेन हस्ते हस्ते मेऽद्य कृपालुना ॥ ७० ॥

१८

हरिवंशपुराणञ्च श्रीहरेर्नामकीर्तनम् ।
ऋते हरेर्न चान्यत्र सौजन्यं विद्यते भुवि ॥ ७१ ॥

एतैस्त्रिभिर्नरो लोके वैकुण्ठं याति शाश्वतम् ।
तैरेव साध्यते सर्वं फलं तीर्थाटनोद्भवम् ॥ ७२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

मनोमार्गेण गन्ता तु स्यान्नरः फलवञ्चितः ।
हरिपाठेन चित्तस्य स्थैर्यं प्राप्तः स भाग्यवान् ॥७३ ॥

वदति ज्ञानदेवोऽत्र हरिनाम्नि परा रुचिः ।
सर्वदा रामकृष्णस्य मानसे प्रीति रुत्तमा ॥ ७४ ॥

१९

वेदशास्त्रप्रमाणाच्च श्रुतीनां वचनात्तथा ।
एको नारायणः सारस्तन्नाम जप्यतां सदा ॥७५ ॥

जपस्तपः क्रिया कर्म धर्माश्च नियमाहः परे।
विना नाम जपं सर्वे व्यर्था भवन्ति भूतले ॥७६ ॥

हरिनाम जपन्तस्तु तत्रैव लयभाजिनः ।
सुमनः कलिकालीनभृङ्गवत् तत्र शाश्वतम् ॥७७ ॥

वदति ज्ञानदेवोऽत्र तन्नाममन्त्रशास्त्रतः ।
तद्गोत्रं तत्कुलञ्चाऽपि यमो न स्पृशति क्वचित् ॥७८ ॥

२०

नाम तत्कीर्तनञ्चेति वैष्णवानां द्वयं परम् ।
अनन्तकोटिपापानां नाशो भवति कीर्तनात् ॥७९ ॥

अनन्तजन्मनां सिद्धं तपस्तन्नामकीर्तनम् ।
सुलभं हरिनामैव सर्वमार्गेषु सुन्दरम् ॥८० ॥

योग-याग-क्रिया-धर्माधर्माश्च मायिका मताः ।
सर्वेषामन्ततोऽनन्ते हरिपाठे लयो भवेत् ॥८१ ॥

वदति ज्ञानदेवोऽत्र यज्ञ याग – क्रियादिकम् ।
सर्वञ्च श्रीहरेर्नाम तद्दते नान्यदस्ति नः ॥८२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१

कालसमययोर्बन्धो नैवास्ति नामकीर्तने ।
श्रोतुर्वक्तुश्च पक्षं तदुद्धारयति कीर्तनम् ॥ ८३ ॥

हरणं सर्वदोषाणां नामेदं रामकृष्णयोः ।
सर्वेषां जडजीवानां हरिरेकस्तारको मतः ॥ ८४ ॥

सार्थक्यं खलु जिह्वायाः हरिनामानुकीर्तनात् ।
सौभाग्यं तस्य जीवस्य न केनाप्युपमीयते ॥ ८५ ॥

वदत् ज्ञानदेवोऽत्र हरिपाठः सुसाधितः ।
पूर्वजानां च वैकुण्ठमार्गो हि सुलभो हितः ॥ ८६ ॥

२२

नित्यसंकीर्तने लग्नाः प्राणिनोऽत्र सुदुर्लभाः ।
लक्ष्मीधवः स्वयं तेषां समीपे नित्यमास्थितः ॥ ८७ ॥

नारायण हरे देव नारायण हरे मम ।
इति कीर्तयतां गेहे भक्तिर्मुक्तिश्चतुर्विधा ॥ ८८ ॥

हरिनाम विना जन्म नरकायैव निश्चयात् ।
तादृशाः प्राणिनो नूनं यमस्यातिथयः स्मृताः ॥ ८९ ॥

वदति ज्ञानदेवोऽत्र निवृत्तिनाथबोधितम् ।
गगनाच्च परं नाम् श्रीहरेः केवलं परम् ॥ ९० ॥

२३

सप्त पञ्च त्रयश्चान्यद् दशकं संगतं तथा ।
एकतत्त्वं हरिः साक्षात्पञ्चविंशतितत्त्वकः ॥ ९१ ॥

विलक्षणं परं नाम सर्वमार्गेषु चोत्तमम् ।
नामसंकीर्तने कष्टं मनागपि न विद्यते ॥ ९२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पूरकप्राणगत्या योऽजपाजप इतीर्यते ।
तत्रापि निश्चयो नाम्नो भवत्येवेति सद्वचः ॥९३ ॥

वदति ज्ञानदेवोऽत्र व्यर्थं नामऋते जनुः ।
रामकृष्णाश्रितो नूनमुत्क्रान्तो मार्गमन्ततः ॥ ९४ ॥

२४

जपस्तपः क्रिया कर्म धर्माश्च नियमास्तथा ।
सर्वेष्वपि सदा शुद्धो रामभावो भवेत् सताम् ॥९५ ॥

भावोऽयं नैव संत्याज्यः त्याज्यस्तु संशयः सदा ।
रामकृष्णेति साटोपं सर्वैर्जोघुष्यतामथ ॥ ९६ ॥

जातिर्वित्तञ्च गोत्रञ्च कुलं शीलञ्च निष्फलम् ।
भावयुक्तैः सदा सर्वैः सत्वरं कीर्त्यतां हरिः ॥ ९७ ॥

वदति ज्ञानदेवोऽत्र रामकृष्णो हृदि स्थितः ।
रामकृष्णस्तथा ध्याने वैकुण्ठं मे गृहीकृतम् ॥९८ ॥

२५

विद्याऽविद्ये न विद्येते श्रीहरौ परदैवते ।
नामसंकीर्तनाद् विष्णोः सदैव मोक्षभाग् जनः ॥९९ ॥

नारायण हरे देव इत्येवम् कीर्तनात् नरे ।
कलिकालकृताः दोषाः न कुर्वन्ति क्वचित् पदम् ॥१०० ॥

श्रुतयोऽपि च मूकत्वं भजन्ते यत्परे पदे ।
जानीयुस्तत् कथं स्थानं पामराः जीवजन्तवः ॥१०१ ॥

वदति ज्ञानदेवोऽत्र फलं नारायणोऽस्ति मे ।
कीर्तनादस्य सर्वत्र वैकुण्ठोऽयं स्वयं स्थितः ॥१०२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

२६

एकतत्त्वं मनो मे त्वं दृढं धारय नाम तत् ।
करुणाब्धिर्हरिस्तस्मात् स्वकृपां त्वयि वर्षति ॥ १०३ ॥

जानन्तु नाम लोकेऽस्मिन् सुलभं रामकृष्णयोः ।
तदेव जप्यतां वाचा सगद्गदस्वरेण च ॥ १०४ ॥

नाम्नोऽपि तत्त्वमन्यद्धि लोकेऽस्मिन् नास्ति किञ्चन ।
मोघं मा गमतान्येषु जना मार्गेषु वक्रिषु ॥ १०५ ॥

वदति ज्ञानदेवोऽत्र मौन्यन्तर्जपमालया ।
श्रीहरि हृदये धृत्वा जाजपीमि निरन्तरम् ॥ १०६ ॥

२७

नाम्नोऽस्य सौख्यमाधुर्यं सर्वशास्त्रेषु चर्चितम् ।
क्षणार्धमपि तस्माद् भो न भाव्यं नामवर्जितैः ॥ १०७ ॥

मिथ्यात्मा सर्वसंसारो रज्जुसर्पभ्रमात्मकः ।
ऋते हि श्रीहरेर्लोके यातायातं न भिद्यते ॥ १०८ ॥

नामसंकीर्तनान्मन्त्रात् पापकोटिः प्रणश्यति ।
रामकृष्णे हि संकल्पं धृत्वा त्वं शान्तिमान् भव ॥ १०९ ॥

निजवृत्तिं जहीहि त्वं मायाञ्च विजहीहि ते ।
मा भूस्त्वमिन्द्रियाणां भो वशवर्ती कदाचन ॥ ११० ॥

तीर्थेषु व्रतदानेषु भव नित्यं प्रवृत्तिमान् ।
दयाशान्त्यादिभिर्निष्ठा हरौ भवतु ते गुणैः ॥ १११ ॥

वदति ज्ञानदेवोऽत्र श्रीनिवृत्तिः प्रमाणकम् ।
संजीवनसमाधिर्मे हरिपाठोऽयमुत्तमः ॥ ११२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

२८

अष्टाविंशत्यभङ्गानां हरिपाठोऽयमादरात् ।
रचितो ज्ञानदेवेन विश्वासेन कृतात्मना ॥ ११३ ॥

इन्द्रायणीनदीतीरे नित्यञ्च हरिपाठतः ।
अधिकारी पुमान् भूत्वा सर्वथा क्षेममश्नुते॥ ११४ ॥

स्वस्थचित्तः पुमान् भक्त्या सदा चैकाग्रम्मानसः ।
सोल्लासेन हृदा नित्यं नामकीर्तनमाचरेत् ॥ ११५ ॥

प्राणनिर्याणकालेऽपि दुष्काले सङ्कटेऽप्यथ ।
अन्तर्बहिश्च संव्याप्य रक्षिष्यति हरिः स्वयम् ॥ ११६ ॥

साधुभिः सज्जनैरेतत् साक्षात्कृतमिहादरात् ।
तरेयुर्वा कथं लोके ह्यलसा मन्दबुद्धयः ॥ ११७ ॥

गुरोर्निवृत्तिनाथस्य प्रेमपूर्णं वचोऽमृतम् ।
संप्राप्य ज्ञानदेवोऽथ सहसा तोषमीयिवान् ॥ ११८ ॥

इति श्रीज्ञानदेवकृतस्य हरिपाठस्य पेनामधुसूदनकृतसंस्कृतरूपान्तरं समाप्तम्

***

In Public domain. Digitization Muthulakshmi Research Academy

लक्ष्मीसुप्रभातम्

गानम्– **Shri. Suresh Wadkar, Sau. Anuradha Podval**

संगीतम्– **Shri. Shaliesh Dani,** Nagpur, रचनाकालः 2018, **Times Music Spiritual** (available on Youtube)

मातः प्रसन्नवदनाम्बुजनिर्जिताब्जे
क्षेराब्धिजे सकललोकपवित्रमूर्ते ।
आर्तप्रपन्नजनवन्दितपादमपद्मे
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १ ॥

सद्योविकासिकुसुमेषु सुगन्धमत्ताः
गायन्ति मातरमितं भ्रमरा यशस्ते ।
तन्मञ्जुनादपरिबोधितदेवदेवि
स्नात्वाऽमलः सुरगजः सुरदीर्घिकायां
शुण्डोधृताब्जविलसद्वदनेन तूर्णं
संतिष्ठते गृहमुखे तव भक्तवर्यः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २ ॥

शोभां तवैव वदनस्य सदा नवीनां
संप्राप्य भानुरिह लोकतमः प्रहन्ता ।
प्राचीं दिशं भजति सोऽपि तवैव भक्तः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ ३ ॥

पद्मानि सन्ति रुचिराणि मनोहराणि
वायुस्तथा वहति मन्दगतिः प्रभाते ।
चेतोहरीह् सुषमा प्रकृतेस्तवेयं
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ ४ ॥

पूर्वाद्रिसानुशिखराग्रमधिष्ठितोऽयं
भानुः क्षणं लसति देवि शुभप्रकाशः ।
त्वन्मूर्ध्नि राजितकिरीटमणिप्रकाशः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ ५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

त्वद्दर्शनार्थमभियान्ति सुरेन्द्रमुख्याः
देवास्त्वदीयपदपङ्कजदत्तचित्ताः ।
आयोज्य तान् लससि कर्मचये त्वमेव
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ ६ ॥

प्रत्यग्रपुष्पनिचयं स्वकरैर्गृहीत्वा
त्वत्पूजनाय मनुजा धृतशुभ्रवस्त्राः ।
आयान्ति मन्दिरमितस्तव भक्तियुक्ताः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ ७ ॥

पद्मप्रिये रुचिरपद्ममुखि स्मितास्ये
पद्मालये विजितपद्मविभे कृतज्ञे ।
त्वं पाहि नूनमनिशं जनतां भयार्तैः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ ८ ॥

अम्ब त्वमेव जगतः स्थितिमारिरिक्षुः
नित्योदिता लससि शाश्वतधर्मगोप्त्रि ।
त्वामाश्रिता जहति दुःखचयं हि भक्ताः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥९ ॥

मातर्मदीयहृदये सदयं वसाना
मज्जीवनं हि कुरु सार्थकमात्मदीप्त्या ।
त्वामाश्रितो भवति नैव विपद्भयार्तः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १० ॥

त्वं श्रीहरेर्हृदयमेव सदा श्रिताऽसि
प्रीतिं ततो वहसि लोकहिताय मातः ।
तत्प्रेममूर्तिरभयं सदयं तनोषि
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ ११ ॥

प्रेमप्रफुल्लनयनाब्जनिरीक्षणेन
क्षेमं तनोषि जगतां दयया दयाब्धे ।

In Public domain. Digitization Muthulakshmi Research Academy

वात्सल्यमूर्तिरसि सन्ततलोकमातः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १२ ॥

त्वन्नेत्रभानुसुविकासितपद्मकल्पो
भानुश्चकास्ति गगने सततप्रकाशः ।
नित्यं नभः कमलिनीजलमध्यभागे
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १३ ॥

मन्दस्मिताङ्कुरविभाकमनीयशोभश्
चन्द्रो विभाति रुचिरो नभसि प्रदीतः ।
त्वन्मन्दहास इव भाति हि चन्द्रिकेयं
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १४ ॥

त्वन्निर्मलेषु हृदयेषु सदैव रूढा
तत्सम्पदं च सकलां द्विगुणां करोषि ।
सम्प्रन्नता त्वमसि मङ्गलदेवि मातः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १५ ॥

आजन्मनः सकललोकविशिष्टवाञ्छाः
संपूर्य मोक्षमपि देवि त्वमेव दत्से ।
त्वाश्रितोऽस्मि वरदायिनि लोकमातः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १६ ॥

नारायणस्य परिपूर्णमहःस्वरूपे
नारायणप्रियतरे कुरु मां कृतार्थम् ।
त्वं श्रीहरिप्रियतमासि तदीयचित्ता
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १७ ॥

नेत्राञ्चलप्रणयवर्षणमत्तचोत्तो
नारायणस्तव सदा रमते हृदब्जे ।
तत्प्रेममूर्तिरसि देवि सदैव मातः
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १८ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पश्यात्र देवि मुनिलोकमभिप्रपन्नं
श्रीसूक्तमन्त्रजपकोटिपवित्रचित्तम् ।
आयान्तमुग्रतपसं तव भक्तिपूतं
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ १९ ॥

पृथ्वी जलं तपनवायुनभांसि चापि
त्वाम्श्रितानि खलु कर्मसु शक्तिकानि ।
सर्वं तवैव महिमेति श्रुतिः समीट्टे
श्रीदेवि लक्ष्मि सततं भवतात् प्रभातम् ॥ २० ॥

श्रुत्यन्तमूर्ध्नि नतमानसपद्मपूगे
फुलारविन्दनिचये च शिशोश्चहासे ।
त्वं निर्मले वससि देवि सदैव चित्ते
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २१ ॥

मातः सदैव वससीह परे त्रिलोके
धान्ये तथैव विजये स्वपराक्रमाप्ते
ज्ञाने च शान्तिसहिते परिपूर्णरूपे
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २२ ॥

सायन्तने वससि निर्मलगोसमूहे
वत्सप्रिये शिशुषु दोहनकर्मसक्ते ।
दुग्धेऽपि गोरिह सदा परिपोषरूपा
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥२३ ॥

त्वं पन्नुतेषु परिरम्यशिखिस्थलेषु
पुष्पाधिकेषु निबिडेषु वनस्थलेषु ।
मन्दाकिनीषु तटिनीषु जलस्थलेषु
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्राणादिसंयमपरेषु सदा हृदन्ते
नारायणस्मृतिपरेषु च मानवेषु ।
मातः सदा लससि बोधमहःप्ररूपा
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २५ ॥

त्वामाश्रितो जगति पुण्यफलं समस्तं
संप्राप्नुते तदनु मोक्षपदं प्रविन्ते ।
त्वामाश्रितश्च मधुसूदनमाश्रितः सन्
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २६ ॥

सप्रस्त्यहो मनुजबुद्धिरतीव दुष्टा
सम्पत्फलाय कुरुते खलु दुष्टयत्नान् ।
संस्कार्य तांश्च जनानीह समुद्धरेस्त्वम्
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २७ ॥

न त्वां विना जननि जन्मफलं जगत्यां
संप्राप्नुयाम सकलं विकलाः स्वशक्त्या ।
तस्मात् त्वमेव परिपाहि दयां कुरुष्व
श्रीदेवि लक्ष्मि भवतात् तव सुप्रभातम् ॥ २८ ॥

मधुमथनकटाक्षप्रेमभाण्डाररूपा
सकलविमलसंपद्वृद्धिरूपा च लक्ष्मीः ।
लसतु मम हृदब्जे पूर्णबोधात्मना च
दिशतु च भुवि सर्वं योग्यमात्यन्तिकं च ॥ २९ ॥

इति श्रीमधुसूदनपेन्नारचितं

लक्ष्मीसुप्रभातम्

समाप्तम्

***

In Public domain. Digitization Muthulakshmi Research Academy

श्रीज्ञानदेवकृता

चागदेव-पञ्चषष्टिः

(दिल्लीतःसंस्कृतसंवादपत्रिकायां प्रकाशितम् संस्कृतरूपान्तरम्)

स्वस्त्यस्तु श्रीवटेशाय यद्गूढे भासते जगत्।
अभिव्यक्ते पुनस्तस्मिन् भासो नाशमवाप्नुते ॥१॥

यथा यथा तदुद्-व्यक्तिर्जगल्लोपस्तथा तथा ।
तस्मिन् गूढे जगद्भासो गूढ-व्यक्त्योः परे परः ॥२॥

सर्वदा स बहुत्वेऽप्यविकार्येव हि तिष्ठति ।
आत्मा न किञ्चिदप्यस्ति तथापि सर्वरूपधृक् ॥३॥

स्वर्णत्वेऽहीयमाने हि सुवर्णभूषणं यथा ।
अविकारिणि चैतन्ये तथेदं भासते जगत्॥४॥

कल्लोलकञ्चुकेऽप्यब्धिर्न च्यवति स्वरूपतः।
तथैव जगदाभासेऽप्यात्मा नित्यस्वरूपवान्॥५ ॥

परमाणुसमूहस्य पृथ्वीदृष्ट्या न भिन्नता ।
विश्वस्फूर्त्या तथैवात्माऽप्यलुप्तात्मत्ववान् कदा॥६॥

कलानां विस्तरात् ग्लावो न लोपोऽस्ति कथञ्चन।
जातेषु विस्फुलिङ्गेषु नाऽग्निरनग्नितां व्रजेत् ॥७॥

अतो द्रष्टृत्व-दृश्यत्वे उभे आविद्यके इति।
नाहं पश्यामि तत्त्वेन स्वतः सिद्धे उभे अपि ॥८॥

वस्त्रन्तु नाममात्रेण वस्तुतः सन्ति तन्तवः ।
मृत्तिकायां यथा भाति मृद्भाण्डो रूपभेदतः ॥९॥

द्रष्टा दृश्यमिति द्वन्द्वं दृवात्र भासते तथा ।
दृग्रूपं ज्ञानमेवात्र द्रष्टृ-दृश्यत्वमाप्नुते ॥१०॥

नामतोऽलङ्कृतिर्भिन्ना सुवर्णे भासते यथा ।
बाह्यावयवसंयोगादवयवी तथैव हि॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

आशिवात् पृथिवीलोकं यावद् द्रव्याणि तत्त्वतः ।
संविदैव प्रकाश्यन्ते सर्वाण्यपि समानतः ॥ १२ ॥

भित्तिचित्रमसद् भाति वस्तुतो भित्तिकैव सा ।
तथैव जगदाकारे संविदेका प्रकाशते ॥ १३ ॥

गुडस्य गुलिकाकारे गुडत्वस्य न साऽकृतिः ।
तथैव जगदाकारे संविदो नाऽकृतिर्जगत् ॥ १४ ॥

संपुटितं यथा वस्त्रं संपुटितमिवोल्लसेत्।
तथैव संविदेकाऽपि विश्वाकारेण भासते॥ १५ ॥

न लिप्ता सुखदुःखाभ्यामनेकाकारतां भजेत्।
संवित्तु स्वोन्मुखी नित्यमात्मानमात्मना भजेत्॥ १६ ॥

सांमुख्यं दृश्यमित्युक्तं संविदो द्रष्टृता ततः ।
प्रतिबिम्बमपेक्ष्यैव बिम्बस्य बिम्बता खलु ॥ १७ ॥

स्वस्यैव सा स्वयं गर्भे दृश्यत्वोल्लासिनी परा।
द्रष्टा दृश्यं तथा दृष्टिरित्येतां त्रिपुटीं वहेत् ॥ १८ ॥

तन्तूनां संपुटौ किञ्चित् तन्तुभिन्नं न विद्यते।
त्रिपुट्याञ्च तथा संवित् त्रित्वाभावेऽपि भासते॥ १९ ॥

दर्पणस्य निमित्तेन स्वस्यैव मुखमीक्ष्यते।
तथाऽपि व्यर्थभावः स्यादन्यद् दृष्टमिति ध्रुवम् ॥ २० ॥

अनापद्य स्वयं भेदं संविद्धि भासते त्रिधा।
इदं हि वेद्यमत्यन्तं सुप्रसिद्धोपपत्तिभिः॥ २१ ॥

दृश्यस्यास्य तु विस्तारो द्रष्टृता जगतो मता।
अनयोरन्तरा भेद-दृष्टिः प्रकुण्ठिता भवेत् ॥ २२ ॥

दृश्याभावे किमर्थं वा दृष्टिरुत्पद्यतां कुतः।
द्रष्टृत्वञ्चापि सापेक्षं कुत उत्पद्यतां पुनः॥ २३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

दृश्यस्योन्मेषणे दृष्टि-द्रष्टृत्वोन्मेषणं सदा ।
दृश्यत्वे विलयं प्राप्ते क्व द्रष्टा क्व च दृश्यता ॥२४॥

त्रिपुटीलयतस्तत्र संविदेकैव भासते।
दृश्यादित्रितयं भ्रान्तिः सत्यमेकत्वमेव हि॥२५॥

दर्पणे दर्शनात् पूर्वं पश्चाच्च मुखमेव सत्।
दर्पणे दर्शनादेव किमन्यत् तत्र जायते॥२६॥

द्रक्ष्यामीति यदा पश्येत् भासेत दर्शनं तदा।
परन्तु दृष्टियोगेन तत्राऽस्माकं भ्रमोऽभवत् ॥२७॥

दृश्येऽतो दृश्यमानेऽपि विवेकाद् द्रष्टृ-दृश्ययोः।
अहन्तु संविदस्मीति सुखं भावयत स्थिरम्॥२८॥

ध्वनिः पृथक् तु वाद्येभ्यः काष्ठेभ्यश्चानलः पृथक्।
तथा सर्वविशेषेभ्यः संविदेका पृथग् गता ॥२९॥

अनिर्वाच्यमविज्ञेयं सत्यं तत् शाश्वतं मतम्।
सत्तामात्रमिति ज्ञेयं सत्तामात्रं न चान्यथा ॥३०॥

स्वयञ्च दृष्टिसंयुक्तं नाऽक्षि स्वस्येक्षणे क्षमम्।
तथाऽत्मा ज्ञानरूपोऽपि नात्मानं वेदितुं क्षमः ॥३१॥

आत्मनो ज्ञानरूपत्वान्न तत्राज्ञानकल्पना।
तथैव ज्ञानरूपस्य ज्ञानञ्च कीदृशं भवेत्॥३२॥

मौनमेवात्र वक्तृ स्यात्-असर्वः सर्वतां व्रजेत् ।
अकिञ्चिदप्यभूत्वा ना किञ्चित्वलाभमाप्नुयात्॥३३॥

नानावबोधसंबन्धसत्यतैकाश्रिता मता।
यथा नाना-तरङ्गानां मालिका सलिलाश्रिता ॥३४॥

दृश्यत्वशून्यतायान्तु दृष्टिमात्रमुदच्यते।
आस्तां तदात्मना ह्यात्माऽत्ममात्रोऽवशिष्यते॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

अभूत्वा कस्यचित् तत् सत् चिद् भूत्वाऽथ प्रकाशते ।
असंबद्धश्च केनापि तद् भुङ्क्ते सर्वमेव वा ॥ ३६ ॥

कर्पूरलेशवत् त्वञ्च वटेशस्य सुतोऽसि भो।
चांगदेवावयोरात्मा न भिन्नः परमात्मनः ॥ ३७ ॥

वदति ज्ञानदेवोऽत्र भाषणश्रवणं तव ।
कराग्रेण कराग्रस्य नूनमालिङ्गनात्मकम् ॥ ३८ ॥

वचसा श्रवणं वाग्भिः स्वादेनास्वादना स्वयम् ।
प्रकाशेन प्रकाशस्य संदर्शनात्मकं भवेत् ॥ ३९ ॥

स्वर्णस्य निकषः स्वर्णं मुखस्य दर्पणो मुखम् ।
यथा तथैव संवादश्चक्रपाणेऽथ नाविह ॥ ४० ॥

माधुर्येण हि माधुर्य-स्तुतौ मुखे न माति किम्।
परस्परं महाप्रीतिरावयोस्तादृशी परा ॥ ४१ ॥

सखे ते मेलनोत्कण्ठी जीवोऽयं प्रतिवीक्षते।
सिद्धप्राये भवेद् विघ्नो मेलने नावितीह भीः ॥ ४२ ॥

यदा ते रूपदिदृक्षुर्मनो मे रूपधृक् तदा।
हीयेत दर्शनञ्चेति भावना जायते हृदि ॥ ४३ ॥

कल्पनाऽकल्पने वाण्यवाणी क्रियाऽक्रिये तथा ।
एतद् द्वन्द्वं स्वरूपे ते नैव स्फुरति किञ्चन ॥ ४४ ॥

चांगदेव स्वरूपे ते कर्तृताऽकर्तृते न हि ।
इतश्च किमु वक्तव्यं नाहंभावोऽपि विद्यते ॥ ४५ ॥

जले संमिश्र्य तन्मूलं दिदृक्षुर्लवणो यथा ।
स्वयं विशीर्यते शीघ्रं पुनस्तन्मापनं कुतः ॥ ४६ ॥

तथैवात्मस्वरूपं ते दिदृक्षोरहमेव न ।
तत्तत्र कल्पना कुत्र कथं वा क्रियतां त्वमः ॥ ४७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

दिदृक्षुर्जागरे निद्रां द्रष्टृतामेव सोज्झति।
त्वामालोक्य तथैवाहं नष्टाहंप्रत्ययोऽधुना ॥४८॥

अन्धकारस्य स्थाने तु प्रकाशो नैव विद्यते।
अहमस्मीति बोधोऽपि न क्वचिन्नाशमाप्नुयात् ॥४९॥

तथैव त्वां मिलित्वा मेऽहमस्त्वमश्च नष्टता।
नष्टप्राये द्वयेऽप्येकं मेलनं शिष्यते पुनः॥५०॥

नेत्रस्थाने तथा दृष्टे नेत्रं हि चित्रितं भवेत् ।
कौतुकाद् वीक्षमाणेनाविकार्यात्मैव दृश्यते ॥५१॥

कल्पनोत्थानकालेऽपि दृष्टेरनुत्थितेस्तथा ।
आवयोर्मेलनं शुद्धमहं-त्वं-भावने विना॥५२॥

अहं त्वमिति चोपाधी विहाय मेलनं कृतम्।
अनुवादः कृतस्तस्य बहुधैव विमृश्य नौ ॥५३॥

आस्वाद्य व्याजतो यद्वद् रुचेरास्वादने श्रमः।
दर्पणव्याजतः किंवा द्रष्टैवात्मानमीक्षते॥५४॥

अप्रमेयप्रमेयैश्च तथा मौनाक्षरैर्युतः।
निगूढार्थस्य संवादो मेलनस्य कृतो मया ॥५५॥

एतद्व्याजेन जानीहि नूनमात्मानमात्मना ।
दीपत्वमविहायैव दीप आत्मानमीक्षते ॥५६॥

कृते तथैव संवादे ज्ञानदृष्टिः प्रजायते।
तदैवात्मा सदा शान्तो मिलत्यात्मानमात्मनि॥५७॥

एकार्णवत्वसंप्राप्त-प्रलयोदकसंनिभः ।
सर्वोपाधिविनिर्मुक्तो भव केवल आत्मवान् ॥५८॥

वदति ज्ञानदेवस्ते सच्चिदानन्दरूपता ।
नामरूपविनिर्मुक्ता तस्यामानन्दवान् भव॥५९॥

In Public domain. Digitization Muthulakshmi Research Academy

चाङ्गदेव क्रमेण त्वं सम्पन्नो ज्ञानसम्पदा ।
तद्-वेद्यवेदकातीते त्वं तिष्ठसि परे पदे ॥ ६० ॥

चांगदेव! तव व्याजान्निवृत्तिर्जननीहृदा ।
स्वानुभूत्याख्यखाद्यं मे मधुरं प्रेमतोऽददात् ॥ ६१ ॥

ज्ञानेशश्चांगदेवश्च चक्षुष्मद्दर्पणाविव ।
परस्परं यदेक्षेते भेदो मूकोऽभवत् तदा ॥ ६२ ॥

तथैव यः पुमानेतान् श्लोकान् दर्पणयेत् सुधीः ।
स नूनमात्मरूपेण तिष्ठन् सुखमवाप्नुयात् ॥ ६३ ॥

न ज्ञेया ह्यसतः सत्ता न ज्ञेया दृश्य-दृश्यता ।
सद् यत् तत् सर्वदाऽज्ञेयं परं तद् भाव्यमन्ततः ॥ ६४ ॥

यथा निद्रां विना निद्रा जागर्या जागरां विना।
तथा मे रचनेतीह ज्ञानदेवोऽब्रवीन्मुदा ॥ ६५ ॥

इति श्रीज्ञानदेवविरचित-चागदेवपञ्चषष्टेः
पेन्नामधुसूदनविरचितसंस्कृतरूपान्तरम्
सम्पन्नम्

In Public domain. Digitization Muthulakshmi Research Academy

श्रीगुरुवैभवम्

(काव्यकण्ठचरितमहाकाव्ये श्रीरमणस्तवनम्)

बोधस्वप्नसुषुप्तिरूपविविधस्थित्यन्तरालस्फुर-
चैतन्यात्मकमात्मदेवमनिशं ध्यायामि चित्ते गुरुम् ।
तद् ध्यानाप्तविशिष्टशब्दरचनो यज्ञं परं वाङ्मयं
विज्ञानां विदधामि संमुखमहं तेषां मनस्तुष्टये ॥ १ ॥

भाग्यं भारतदेशवास एव परमं तत्रापि शान्तं स्थलं
तत्राप्यन्यविमोहशून्यसुजनासङ्गः पवित्रः परः ।
तत्साङ्गत्यसुधाम्बुधौ प्रतिदिनं मज्जज्जनाः केचन
देवा भूमिमवातरन्निव भुवो भूषायिताः पावनाः ॥२॥

तादृक्साधुजनेषु दिव्यचरितो मौनी परेशो विभु-
र्नित्यानित्यविवेकबोधवशतो यश्चिन्मयो योगिराट् ।
अद्वैतं निजजीवने हि परमं योऽदर्शयल्लीलया
गण्यः प्रागरुणाचले हि रमणो सोऽयं परश्चिद्घनः ॥ ३ ॥

बाल्ये क्रीडनलोलुपो न रमणो नाप्यन्यचिन्तापरो
नित्यं केवलमात्मयोगपरमो ध्यानस्थितो नान्यभुक् ।
शून्ये किञ्चन तत्त्वमात्मजनुषो हेतुं तु मृग्यन् सदा
बालः सन्नपि बोधवैभववशाद् भाति स्म संन्यासिवत् ॥४।

भूनाथेश्वरदैवतस्य परमे नेत्रोत्सवे वर्तिते
तद्रात्रौ जननीजनिं हि रमणो धन्यां चिकीर्षुर्मुदा ।
तस्या गर्भनिमित्तमाप्य धरणीं संपावयन् लीलया
लेभे जन्म महोत्तमं सुरनुतं स्वेच्छावशात् स्वीकृतम् ॥५॥

सान्ध्यं कर्म विधाय गर्भनिलयाद्देवं समस्ताः जनाः
ग्रामे सर्वजनावलोकनकृते नीत्वा परिक्रम्य च ।
पश्चाद् गर्भगृहान्तरं प्रति यदा नेतुं प्रयत्नं व्यधु-
र्देवो गोपुरदेश एव तु तदा स्थाणुत्वमापद्यत ॥ ६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

भाग्योदर्कमिवाथ तत्र सहसा वाताः प्रसन्ना ववुः
वृक्षाः फुल्लसुगन्धिपुष्पनिबिडा नम्रा बभूवुस्तदा ।
सर्वास्वेव दिशासु कान्तिरतुला जाता प्रसन्ना तदा
द्वैतध्वंसकतत्त्वमेव भुवनेऽद्वैतात्मनाऽजायत ।।७।।

जातस्यास्य तु बालकस्य वपुषस्तेजोविशेषावृतिं
प्रज्ञाचक्षुरपि स्वभाग्यवशतः काचित्तदा ऽवैक्षत ।
नेत्रे सत्यपि बुद्धिमान्द्यनिहताः यद्-दर्शने न क्षमाः
वीक्ष्येदं खलु भाग्यमेव सहसा मुक्ताऽभवत् सा तदा ॥ ८ ॥

बाल्ये तस्य पिता जगाम दिविषद्धामाप्य दैही रुजं
तातस्तेऽत इहैक एव सततं साक्षान्महेशः परः ।
मातेत्थं समुपादिदेश तनयं लोकेशहस्तेऽर्पितं
यो लोकान् सृजतीह तस्य किमिदं भाराय तत्पालनम् ।९।।

काले गच्छति बालकोऽपि नितरां वैराग्ययुक्तो भवन्
मातुश्चित्तविलोलाहेतुरभवत्ताते महेशे रतः ।
भ्राता ह्यस्य कदाचिदादिशदमुं दातुं स्वविद्यालये
शुल्कं, तद्दिन एव गेहविमुखो बालो गृहान्निर्ययौ ॥ १० ॥

तेनालेखि तदा स्वपत्रमुखतो भावः स्वहृत्संस्थितो
यन्मात्रा खलु बोधितोऽहमधुना गेहाद् बहिः प्रस्थितः।
तच्छोधार्थमितो ममेदमधुना प्रस्थानमात्मार्थदं
तस्मिन् मे निहितं हितं यत इदं शोच्यं न कर्मैव मे ॥ ११ ॥

तत्पश्चान्निजरक्षकं भवभयप्रध्वंसकं शङ्करं
दिव्याण्णगिरिरूपिणं करुणया भक्तार्तिविध्वंसकम् ।
ज्ञात्वाऽगत्य गिरेर्गुहासु वसतिं कुर्वंस्तपोवाञ्छया
श्रीरामन् निजपूर्वपुण्यवशतो जीवन्विमुक्तो बभौ ॥ १२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

कोऽहं केन समागतोऽस्मि धरणीं यायां पुनः कुत्र च
क्षेमः कुत्र ममास्ति तस्य परमः को वाऽप्युपायो भवेत् ।
देहादिस्थिरभावनां मम मनः प्राप्नोत् कुतः प्रेरितं
सेत्थं मोक्षपरायणो हि रमणो ध्यानैकचित्तोऽभवत्॥ १३॥

ध्याने कालविभावना व्यपगता लीनं मनो बह्मणि
क्षेत्रात् क्षेत्रविदो वियोगवशतो नासीद् बहिश्चित्तता ।
संतापत्रयपीडितेऽपि नितरां देहे न तस्य व्यथा
मासांस्त्रीन् स समाहितमना इत्थं निनायोर्ध्वधीः ॥ १४ ॥

तस्मिन्नित्थमनाहते हितमतौ कालोऽद्रवद्वेगतः
कालाहेः फणसंहतिं नखततिर्व्यानक् तदा चायता।
दीर्घाः कृष्णशिरोरुहाः कृतिमतः कालव्यतीतेः क्रमं
व्यञ्जन्तः प्रचकाशिरे स्थिरमतेर्देहोऽपि कार्श्यं गतः॥ १५॥

कालेनात्तसमाधिपाकबलतो बुद्धा यथार्थं तदा
कालेनैव स चोदितः पुनरहो व्युत्थानमाप क्षणात् ।
व्युत्थानं खलु मानवस्य जनतापीडार्थमालोक्यते
मुक्तानां तु तदेव सर्वजनतामोक्षस्य हेतुर्भवेत् ॥ १६॥

साक्षात्कृत्य परात्मनो हि विभुतां स्वात्मानमेव प्रधीर्
मौनं सत्यमितीह लोकपुरतः प्राचीकटल्लीलया ।
तस्मान्मौनवशाद्धि सर्वजनता तं मौनिराजं सदा
मौनस्वामिनमाह्वयत् स्वहृदये संधाय भक्त्या परम्।।१७।।

संप्राप्तो गिरितल्लजं वरयतिस्तुष्टः स्वभाग्ये तदा
भेजे दिव्यगुहां विरूपनयाभिख्यां प्रशान्तां शुभाम् ।
तत्पश्चान्निजरूपभोगपरमो तत्रैव कालं नयन्
लोकानां भवबन्धनाशनचणः साक्षान्महेशो बभौ ॥ १८।।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिंस्तत्र समागते यतिवरे तत्रत्यदुष्टाः जनाः
स्पर्धापूरितमानसाः कलिसुतास्तं भीषयन्तः स्थिताः ।
प्रातः कालविभाकरोदय इह प्राण्यार्तिनाशाय वै
काकाः केवलरूक्षशब्दनिचयैर्निन्दन्ति चेत् किं भवेत्॥ १९॥

शब्दं मौनसमाधिशस्त्रबलतो निर्जित्य शान्तः स्वयं
रेजे बह्मसरूप एव हृदयं जित्वाऽपि तेषां द्विषाम् ।
तत्पश्चाद् गिरिकन्दरेषु वसतां चित्तं समेषां जयन्
तेषां चित्तविशोधनैककलितं स्थानं तदाऽलब्ध सः॥ २०॥

वाग्देवीं तु परामपि स्थिरतरां प्राप्योर्ध्वमानन्दथुं
पश्यन्तीं प्रणयेन योगिहृदये भान्तीं प्रणम्याग्रतः ।
योगिस्वान्तसुमध्यमां शुभरुचिं प्राप्यापि वाचं सता
तुर्या तेन हि वैखरी सुविजिता यस्यां जनो मुह्यति ॥ २१ ॥

तेनाधायि चतुर्थवाङ्मनसि तच्छान्ते परब्रह्मणि
ज्ञानेनैव शनैश्च शान्तमपि तन्नीतं महाब्रह्मणि ।
आत्मोपाधिविशेषशून्य इति तज्ज्ञानं समासादितं
तेन प्रापि तथा स्थितिर्विगतभीर्जीवन्विमुक्तस्य वै ॥ २२ ॥

देहेषु प्रसरन्महाचितिकलां योगेन वेद्यां तदा
साक्षात्कारमहासने निजहृदः संस्थाप्य योगीश्वरः ।
भावाभावसमुत्थभावनिचयव्यालोग्रदंष्ट्राङ्कुरं
चिच्छेद स्फुटदीधितिस्तदनु सा तस्मिंश्चकाशे चितिः॥ २३॥

दुःखोत्तप्तजनार्तिनाशनधिया योगीश्वरः स्वेच्छया
चक्रे वासमथारुणाचलगुहागेहेषु रक्तिं विना ।
दुःखस्य स्वमनोऽस्ति कारणमिह स्वैरं चलन्मानव
त्वं मृग्यैतदितो हि मूलमनिशं तस्यैव बुद्ध्या दृढम् ॥ २४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

कोऽहं स्फूर्तिरियं कुतः प्रभवति ज्ञाता कथं ज्ञातता
नैरन्तर्यमिदं कुरुष्व मननं दुःखं ततो नश्यति ।
भीरोश्चित्तविकार एव सततं भूतं यथा दर्शयेत्
चित्तं दुःखसमूहमेव सततं लोके तथा दर्शयेत् ॥ २५ ॥

दुःखं नास्ति सुखं च नास्ति परमं चैतन्यमेवात्र सत्
तच्चैतन्यविलास एष विविधो लोकभ्रमो मूलतः ।
यो भ्रान्तः सुतरां ततश्च गुरुतः प्राप्नोति बोधं परं
योऽभ्रान्तस्तत एव तस्य न गुरोरावश्यकत्वं भवेत् ॥ २६ ॥

आचार्यो ह्यहमेव सत्यमनिशं बुद्ध्वा वदामीतरान्
शिष्योऽहं हृदि सत्यबोधकलने मौनं मदीयो गुरुः ।
देहो बुद्बुदसत्यरूप इतरन् नास्त्येव भेदात्मकं
भेदो यद्यपि बाह्यबोधविषयो ह्यद्वैतमेवान्तिमम् ॥ २७ ॥

आत्मन्येवमशेषभेदविरहे ज्ञाते भवेन्नो भ्रम
स्तेनाखण्डमनन्तमद्वयसुखं बह्मैव भायाद् हृदि ।
तत्पश्चान्निजबोधगोचरमितश्चैतन्यरूपं लसे
ज्जीवन्मुक्तिमथाप्य योगबलतो मुक्तिं विदेहामियात् ॥ २८ ॥

इत्थं जीवनसारमेव लघुभिर्वाङ्मौक्तिकैःसारविल्
लोकेभ्यः करुणापरीतहृदयस्तेने स्वयं मौनिराट् ।
वृक्षः प्रांशुरिवाचलः स जनतातापादिनाशाय वै
तस्थौ पूर्णकृपावतार इतरत् त्यक्त्वा गिरौ सद्गुरुः ॥ २९ ॥

सोऽहंभावनिबद्धपूर्णमनसा योगी शरीरं वहन्
रागद्वेषविहीनधीरहृदयो मुक्तोऽस्ति जीवन् बुधः ।
तत्सांगत्यसुधारसं प्रतिदिनं धन्या लभन्ते हि ये
ते संसारमहाहिघोरदशनान्मुक्ता भवन्ति ध्रुवम् ॥ ३० ॥

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

अद्वैतं पुरुषाकृतिं हि परमं लब्ध्वा समेषां पुरो
राजत् कावरुणाचले श्रुतिशिरोभूषायिते पर्वते ।
द्वैतेऽद्वैतमिहैव सुन्दरतमं साक्षात्कृतेर्गोचरम्
शक्यं कर्तुमितीव बोधयति तन्मौनेन शान्त्यापि च ॥३१॥

तेजःपुञ्जविशेषदिव्यमहिमा लोकैर्यदा वीक्षित
श्चित्ते कश्चन विभ्रमोऽपि जनुषं लेभे जनानां तदा ।
कर्णाकर्णिकयैव योगिविषये श्रुत्वा जनाः सत्वरं
प्रातिष्ठन्त तदीयदर्शननिधिं प्राप्तुं स्वयं सङ्गताः ॥३२॥

आदित्यः किमयं परन्तु मृदवः सन्त्यस्य शीतांशवो
ग्लौश्चेन्नैव विभाति किन्तु दिवसे तेजोविशेषावृतः ।
नेत्राभ्यां मधुवर्षतीव भुवने जीमूतवद् दृश्यते
नूनं सर्वविलक्षणोऽयमधुना मोक्षाय नो राजते ॥३३॥

प्रध्वंसाप्रतियोगितत्त्वमधुना पुंभावमाप्यान्तिके
बद्धानुग्रहहेतवेऽत्र सुतरां देहे विभात्यस्थिरे ।
इत्थं पण्डितमण्डलीषु सततं तद्दिव्यभावाञ्चिता
चर्चाऽजायत मौनियोगिविषये गेहेषु वीथीषु च ॥ ३४ ॥

साजात्यं ह्यचले निवासवशतो जातं मुनौ पूर्णतस्
तेनादर्शि निजाचलत्वमतुलं द्वन्द्वात्मके विश्वके ।
इत्थं पामरनागरैश्च गदितं वाक्यं नभोमण्डले
व्याप्तं सन्नवबोधबीजकरणं नूनं बभूव स्थिरम् ॥ ३५ ॥

वेदान्तेषु विनिश्चितं श्रुतिशिरः सिद्धान्तसारायितं
श्रीमद्भारतसंहितासुकथितं पौराणिकं रूपधृक् ।
योगीन्द्रैरनुभूय दिव्यवचसा प्रावर्षि यच्चामृतं
तद्वाभाति पुरःस्वयं रमणभारूपेण दिव्यं महः ॥३६॥

In Public domain. Digitization Muthulakshmi Research Academy

निश्चित्यैवमथारुणाद्रिनिलयं बोधैकरूपं गुरुं
द्रष्टुं सन्निधिमीश्वरं हि रमणं प्रातिष्ठत ज्ञानिराट् ।
जन्मोच्छेदनमार्गवेदिनममुं दृष्ट्वा परानन्दतो
गातुं प्रारभतास्य दिव्यवपुषो माहात्म्यमेवं बुधः ॥३७॥

एकं सन्निगमेषु पूर्वमुनिभिर्भिन्नाभिधानैसदा
गीतं वेदमुखं महोपनिषदां तत्त्वं च यत् कीर्तितम् ।
श्रीरामायणगानहेतुरपि यच्छ्रीभारतान्तर्लसत्
तत्तेजो रमणात्मकं हि रमणः सोऽयं मदीयो गुरुः ॥३८॥

यद् व्याप्नोति सदा स्वयं गतभिदं सर्वास्ववस्थासु च
बोधस्वप्नसुषुप्तिरूपकलितास्वेवं तुरीय भवत् ।
संप्रज्ञातसमाधिगोचरमिदं भायाद् गुणैरञ्चितं
साक्षात् सर्वगुणादिकैर्विरहितं तन्मे ह्ययं सद्गुरुः ॥३९ ॥

यत् सूते जगदेतदन्यकरणापेक्षां विना स्वेच्छया
सृष्टं यत्पुनरिच्छयैव नियतं पाति क्रियारूपतः ।
स्वस्मिन् यत् पुनरेव विश्वमखिलं संहृत्य धत्ते चिरं
ब्रह्मोपेन्द्रशिवादिनामकलितं तन्मे ह्ययं सद्गुरुः ॥ ४० ।।

व्याप्तं यत्परमाणुषु स्थिरगतिं प्राप्योर्जितं मूलतः
सूक्ष्मं सन्महदादिभूतनिचयव्यक्तौ महत्कारणम् ।
जीवाजीवविशेषकार्यरचनायोगे सदा व्यापृतं
स्पन्दक्षोभसदोदितेति गदितं तन्मे ह्ययं सद्गुरुः ॥४१॥

साक्षात् श्रीमधुसूदनः करुणया पार्थाय गोतां पुरा
छान्दोग्ये च तथारुणिः श्रुतिशिरः सारं सुतायोत्तमम् ।
धर्मो वा नचिकेतसे शुभमतिं तत्त्वार्थसंधायिनीं
भूत्वा यत् समुपादिदेश परमं तन्मे ह्ययं सद्गुरुः ॥४२॥

CC-0. In Public Domain. Digitization Muthulakshmi Research Academy

देहभ्रेषनिमेषकालकलनापर्यन्तमेव स्वयं
यन्त्रं विद्युदिव स्वशक्तिवशतो यच्चालयत्यन्ततः ।
यस्यैव स्फुरणं मनः परिणतेर्वाक्कर्मरूपात्मकं
ज्ञाताज्ञेयमितीह भाति यदहो तन्मे ह्ययं सद्गुरुः ॥४३॥

कन्दादूर्ध्वमधिष्ठिता पदमियं ज्ञानैकरूपा परा
पश्यन्ती मुनिमानसैकविषयश्चोत्स्पन्दमाना शिवा ।
चित्ताख्यां ननु मध्यमैव लभते हार्दं पदं सर्पती
व्यक्ता या शुभवैखरीव मुखतः सा मे ह्ययं सद्गुरुः ॥४४॥

चित्तेषु स्वयमेव विष्णुरिव यो व्यापी जनानां मुनि
र्ब्रह्मेव स्थिरशं सदा वितनुते सूते शुभानां ततिम् ।
साक्षाच्छङ्करवन्निहन्ति वृजिनं जन्मान्तरासञ्चितं
त्रैमूर्तं भजमान एष भगवान् दिष्ट्या हि मे सद्गुरुः ।।४५ ॥

भासा भास्कर एव शीतकिरण: प्रह्लादनेन स्वयं
क्षान्त्या भूधरवर्य एष करुणापूर्णस्तु वारां निधिः ।
वेदो मानवरूपधारणमिषाद् राराजते वा चलन्
सद्यो मुक्तिफलाय भाति रमणः सोऽयं मदीयो गुरुः॥४६॥

वाणी मौनमुपाश्रिता गतभिदा यत्सन्निधौ राजते
चाञ्चल्यं च विहाय विष्णुदयिता देदीप्यते यन्मुखे ।
गौरी गौरवमाप्य यस्य सविधे शक्त्युन्मुखी शोभते
ब्रह्मख्यं सुविराजते जगति यत् तन्मे ह्ययं सद्गुरुः ॥४७।।

चन्द्रे कान्तिमथाचले हि गुरुतां गंभीरतां सागरे
पुष्पे सुन्दरतां तथैव मृदुतां माधुर्यमेवं गुडे ।
धाता भिन्नपदेषु तेषु रुचिरं सृष्टवाऽपि नानन्दितः
तत्साकल्यपदं ससर्ज तदयं साक्षात्पुरः सद्गुरुः ॥४८ ।।

In Public domain. Digitization Muthulakshmi Research Academy

योगे तीव्रमुपाश्रिते प्रतिदिनं कालादू बहोर्निष्ठया
यद्वा भक्तिविपाकतः परिणते चित्ते सदा निर्मले।
प्राप्यं यत् पदमस्ति वर्यमतुलं यद्वै तपस्याफलं
मूर्तीभूय पुरश्चकास्ति तदहो तन्मे ह्ययं सद्गुरुः ॥४९॥

नित्यं तं प्रति मे समाहितमनो याहि स्वयं पूर्णतो
वीक्षेथां कमनीयरूपमपि तन्नेत्रे मदीये सदा ।
जिह्वे तद्गुणगानमेव सततं पुण्यं विधेहि प्रियं
येन स्यान्मम जीवनस्य गरिमा सोऽयं मदीयो गुरुः ॥५०॥

यद्वाचो निचयं परार्थपरमं श्रुत्वैव वेदास्तथा
वेदान्ताः स्वयमेव भक्तितरसा सर्वाणि शास्त्राणि च ।
तिष्ठन्ति स्थिरवासमाप्य रमणप्रोक्ते सुवाक्यामृते
यं शृण्वन्ति सुरोत्तमाः प्रतिदिनं सोऽयं मदीयो गुरुः ॥ ५१॥

आचार्यो मम शेवधिर्गुरुरयं मत्पुण्यपाकःस्वय-
माचार्यो मम जीवनस्य शरणं सेव्यं तदीयं पदम् ।
आचार्यो मम बोधरूपनयनं ह्याचार्यनिघ्ना तनुः
श्रीमत्तस्य वचः सदैव विमलं सोऽयं पुरो राजते ॥५२ ॥

इति श्रीमधुसूदनपेन्नारचितं
श्रीगुरुवैभवं समाप्तम्

***

In Public domain. Digitization Muthulakshmi Research Academy

देवरातवैभवम्

(दिल्लीतः संस्कृतसंवादपत्रिकायां प्रकाशितम्)

या देवी बोधरूपेण मद्बुद्धिमधितस्थुषी ।
सदा मां प्रेरयेद् वाचा तया तामेव संस्तुवे ॥ १ ॥

ध्याने ब्रह्मसमत्वमाप्य परमां शान्तिञ्च लब्ध्वा ततो
वाग्देवीचरणारविन्दकुसुमं विन्यस्य देहं पुरा।
गङ्गानिर्झरसंनिपातसदृशं वाचो विलासं परं
संप्राप्योत्तमकीर्तिमापुरमरा धन्या मुनीन्द्रा भुवि ॥ २ ॥

व्यर्थस्वार्थविचिन्तनेन हृदयं दुष्टं न तेषां ततः
स्वात्मैवेदमभूत् सदा शमवतां तेषां समस्तं जगत्।
तस्मात् ब्रह्मविलक्षणं जगदिदं नोद्भाति सल्लक्षणं
येषां ते खलु भूषणानि जगतां जीवन्विमुक्ता नराः ॥ ३ ॥

प्राचीनान् मुनिराज एव गुणवान् वृत्त्या प्रवृत्त्या च यान्
आवाह्यात्मनि जीवतीव सततं योऽभान्मुनीन्द्रो भुवि ।
तस्योदात्तगुणान्वितस्य चरितं ज्ञेयं समस्तैर्नरै-
रित्यालोच्य करोमि काव्यरचनाबुद्धिं न गर्वेण भो॥ ४ ॥

देवरातमौनिराज-जीवनं सुनिर्मलं
देवभाषया महद् गातुमेवमुत्सहे।
व्यक्त-धर्म-शून्य-दिव्य-तत्त्वबोधने हि मे
सच्चरित्रमेव दिव्यसाधनं महद् धनम्॥ ५ ॥

गोकर्णभूमिर्भुवनेऽतिरम्या धन्या सतां जन्मफलेन दिव्या ।
नित्योदितैर्नैगमशब्दपूगैः संपाविता राजति भारतेऽस्मिन्॥ ६ ॥

मखैरसंख्यैर्नियतं प्रतप्ता व्रतं सदेषाऽचरतीव भाति ।
अत्रत्यजीवाद्यततिर्मखैर्हि नित्यादृता धूमलतेव भाति ॥ ७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

मन्त्रोच्चरद्भूमिसुराः प्रकामं शाब्दं महो व्योमनि दीपयन्ति ।
गोकर्णदेशोऽपि सुकर्णमाप्य स्पष्टाक्षरं तच्छृणुतेऽतिरम्यम्॥ ८॥

गृहे गृहे नैगमिका नगर्यामस्यां पुनन्तो भुवनं विभान्ति।
सत्कीचका मारुतसूक्तपूर्णा सोत्कर्ण-कर्णोत्पलतां व्रजन्ति। ॥ ९॥

राराज्यमाना नगरी बुधेन्द्रैर्बृहस्पतीभैरमरावतीव।
कल्पैरनल्पैस्तरुभिर्विभान्ती नाकं न कं देशमियं विदध्यात् ॥ १०॥

आपाण्डुराभा श्रुतिधर्मराजा पूर्णाऽर्जुनैर्वृक्षगणैर्न भीमा
गोकर्णभूमिर्नकुलैर्विकीर्णा चित्राद्भुताभा सह देवभूमिः ॥ ११॥

मौनीन्द्रवर्यैर्धृतराष्ट्रकान्तिः श्रिताऽप्यनेकैः शकुनीशवृन्दैः।
गोकर्णभूर्भारतसारभूता चकास्ति लोकोत्तरकान्तियुक्ता ॥ १२॥

यज्ञेषु दीक्षानिरतैरयत्नं प्रोच्चारिता वज्रसमानमन्त्राः ।
तत्रत्यलोकान् पवितुं समर्थाः कर्णेषु पीयुषमिव स्रवन्ति ॥ १३॥

मातुः पृथिव्याः प्रथिमानमेषा व्यातन्वती मन्त्रपवित्रशब्दैः।
गोकर्णभूमिर्विततता पृथिव्यां तद्दक्षिणे दक्षिणकर्णतुल्या॥ १४॥

तत्कर्णभूषायितविप्रगेहेष्वनन्यसाधारणकीर्तियुक्तः ।
कश्चित् कुटुम्बः श्रुतिमात्रबुद्धिर्वसन् विरेजे विरतान्यबुद्धिः ॥ १५॥

वंशः पवित्रः खलु कौशिकानां परम्पराप्राप्तयशोधनोऽधनी ।
यज्ञोप्तबीजाप्तफलादनेन स्वजीवनं धन्यतमं चकार ॥ १६॥

सुगन्धवज्जातिसुमोदितात्मा जज्ञे महाँस्तत्र गुणाब्धिरेकः।
विघ्नेश्वरार्यः कलिदोषनाशं कर्तुं स्ववेदप्रभयाऽभयार्थम् ॥ १७॥

तत्पुत्ररूपेण महाविभूतिर्नित्याऽपि जज्ञे सकला हि काचित्।
तं देवरातं पितरौ वदन्तौ कार्तज्ञ्यभावं हृदये व्यधत्ताम्॥ १८॥

भिन्नेषु सर्वत्र यथैकसूत्रं विभ्राजतेऽद्वैतमिहोत्तमं यत्।
तदेव तस्मिन् निलयेऽद्वितीयं तत्त्वं विरेजे नररूपमाप्य ॥ १९॥

In Public domain. Digitization Muthulakshmi Research Academy

वेदाङ्गगोष्ठी निगमान्तचर्चा स्मार्तार्थसंपिण्डनशास्त्रचर्चा ।
बभूव नित्यं भगवत्समर्चा तदीयगेहे रुचमावहन्ती ॥२०॥

माता तदीया हितमात्रचित्ता वित्ता चतुर्भिः पुरुषार्थकैः सा ।
पुत्रं स्वधर्मे विनियोजयन्ती सन्तोषमाप्नोत् स्वहितं विदन्ती ॥२१॥

ब्रह्माधिकारं समवाप्य बालः गायत्रविद्याविरजो बभूव।
काले प्रसूः कालवशेन पुत्रं विहाय नाकं सुमुखी जगाम॥२२॥

कृशानुतेजा निशितस्वभावो बालोऽपि गूढान् विषयान् विवेद ।
सद्योऽपि जातो न जहाति वह्निर्ज्वलत्स्वभावं भुवनेषु रूढम्॥२३॥

पितुः सकाशात् विधिवत् स शास्त्राण्यधीत्य सर्वाण्यपि गर्वहीनः ।
माधुर्यपूर्णं फलमाप्य धन्यो ननन्द पुंस्कोकिलवत् स्वभाग्ये॥२४॥

श्रीकृष्णभट्टो निगमार्थवेत्ता तं पाठयामास ऋगर्थसारम्।
श्रीरामदासाख्यगुरुः कृपाब्धिरपाठयत्तत्त्वरहस्यमेतम्॥२५॥

बलवन्तरावो हठयोगवेत्ता तं बोधयामास विशिष्टयोगम्।
तेनात्मबोधोन्मुखतामवाप्य प्रीतो बभावात्मनि देवरातः ॥२६॥

टेम्बेमहाराजकृपाविशेषात् पश्चाद्विशिष्टं समवाप बोधम्।
स सर्वदा ध्यानपरीतचित्तो दध्यौ महेशं जनुषो हिताय ॥२७॥

क्वचित् पुरं दिव्यविभूतिरेका श्रीकाव्यकण्ठाग्रगणेशनाम्नी ।
एयाय चैत्तं वृजिनं निहन्तुं व्याख्यानगङ्गामतनोत् सदर्थाम् ॥२८॥

तंश्रीगुरुं शास्त्रविदं गणेशं सोऽमंस्त विज्ञो मुनिदेवरातः ।
श्रीकाव्यकण्ठस्य पवित्रपादौ भक्त्या शरण्यौ शरणं जगाम ॥२९॥

स दृष्टिपातं गणपो विवेद श्रद्धां तदीयां निशितां मनीषाम् ।
तेजोविशेषञ्च ततो महात्मा तं पाठयामास श्रुते रहस्यम्॥३०॥

अद्वैतवेदान्तनिगूढतत्त्वं तदीयचित्ते सहसा प्रविष्टम् ।
क्षणेन स ब्रह्ममयं समस्तं साक्षाच्चकारात्र जगत् समस्तम्॥३१॥

In Public domain. Digitization Muthulakshmi Research Academy

वाशिष्ठगोत्रोद्भवमौनिवर्यो बभूव योगी गणपो विशिष्टः।
स मन्त्रदीक्षापरमोऽभिरामो बभौ कलेश्चोपरमोऽपि तस्मिन् ॥३२॥

एनः प्रजानां निशितामलाभिर्वाग्भिः प्रधीशः परिहर्तुमैष्ट।
गोभिर्धुरत्नं जगतां तमिस्त्रां निराचिकीर्षुर्भुवमाजगाम ॥३३॥

सर्वेन्द्रियाणां गतिमात्मधृत्या निरुध्य चित्तं च वशे विधाय।
आत्मानमेवात्मबलेन धीमान् प्रविष्ट आसीद्यमिनां वरेण्यः ॥३४॥

तदा विलीनं मन एकरूपे संविन्मये केवलचित्स्वरूपे ।
भूमेरधस्तात्प्रवहज्जलौघो भित्त्वा हि काले बहिरेति वेगात् ॥३५॥

काले च पक्के हृदये प्रसुप्ता प्रोत्तस्थुषी काचन दिव्यशक्तिः।
दण्डाहता नागवधूर्यथोच्चैः प्रसारयेत् स्वं फणजालमग्रे ॥३६॥

तथा तदीयोग्रतपोविपाके प्राणाहता शक्तिरनूनवेगा।
कन्दात् समुत्थाय विवेश तूर्णं मूर्धानमापूर्य तनुं स्वभासा॥३७॥

विवेद तां कुण्डलिनीतिशक्तिं तन्त्रादिशास्त्रेषु विशिष्टाम्।
ततः परं तस्य सुवर्णशक्तिः संवर्धिताऽसीत् परमेशभक्तिः ॥३८॥

तस्मात् दिनात् काचन दिव्यशक्तिस्ततान योगीन्द्रतनौ प्रणुन्ना।
बाणो यथोग्रो धनुषः प्रयातो लक्ष्योन्मुखो याति समिद्धतेजाः ॥३९॥

नवेन्दुभासा प्रविभासमानो बालोऽपि योगी विरराज भूत्या।
ग्रीष्मे प्रचण्डांशुततिर्विभास्वान् बालोऽपि तेजस्वितया विभाति ॥४०॥

क्वचिन्महेन्द्राद्रिगुहासु योगी ध्यानस्थिरः केवल आस मौनी ।
श्रीकाव्यकण्ठं गुरुमेत्य विज्ञो योगाय भक्त्या सदयं ययाचे ॥४१॥

तं केवलं मानसमन्दिरे मे निधाय योगाय प्रवर्तितोऽस्मि ।
स एव मे योगबलस्य हेतुः स एव दद्यात् फलमस्य तूर्णम् ॥४२॥

इत्थं विनिश्चित्य गुरोः पुरस्तात् पद्मासनस्थो निमिमील नेत्रे ।
तदा प्रलीने करणप्रवेगे मनोऽपि शीघ्रं हि बभूव नष्टम् ॥४३॥

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

संविद् द्युरत्नेन तदा समाधौ द्वैतान्धकारे सहसा विदीर्णे
तपःफलं प्राक्तनपुण्यरूपं योगात्मनाऽसीन्मुनिदैवराते॥ ४४॥

अस्तीतिनिर्देष्टुमशक्यतत्त्वं नास्तीति नैव प्रतिषेध्यरूपम्।
तस्मादनिर्वाच्यमितीह वेद्यं द्वैतं तदाऽभूत् क्रमशो विशीर्णम्॥ ४५॥

नाहं न मे नैवमिदं द्वितीयं चैतन्यमेकं गतसर्वभेदम्।
स्फुरत्स्वभासं सततोदितं च व्याप्यत्वहीनं गगनोपमञ्च ॥ ४६॥

नासीत्तदा कालभिदा न देशः स्वपूर्णरूपेण रराज तेजः ।
तदात्मतेजः कथितं महद्भिर्वेदान्तविद्भिस्त्वपवर्गरूपम् ॥ ४७॥

तदात्मभासा प्रविभासमानो वसन्महेन्द्राद्रिशिरः प्रदेशे।
भाति स्म लोकोत्तरभानयोगात् नभोविताने स शशीव मौनी ॥ ४८॥

स देवरातोऽद्रिशिखाप्रदेशे ब्रह्मेव रेजे निगमान्तशब्दे ।
योगीन्द्रवाचीव सदर्थतत्त्वं महेन्द्रमूर्ध्नि प्रबभौ स योगी ॥ ४९॥

दिवा द्वितीयो रविरद्रिमूर्ध्नि प्रभाति किं शीतलकान्तियुक्तः ।
रात्रौ तथा पर्वतमस्तकाग्रे द्वितीयचन्द्रः प्रविभाति किं नु ॥ ५०॥

दूराज्ज्वलद्वह्निसमं हि तेजो वीक्ष्याद्रिगर्भोत्थमिवाग्निपुञ्जम् ।
कालान्तकं कालसमं प्रजास्तु शशङ्किरे पर्वतभेदमारात्॥ ५१॥

गर्भात्तदद्रेरमितानलाभं तेजो विनिर्गत्य शिरः प्रदेशे।
तिष्ठत् समस्तं जगदेव शीतं पाटीरगन्धैर्वचसां करोति ॥ ५२॥

माहेन्द्रमूर्ध्नदमपारतेजः प्रकाशमानं भुवि नित्यतत्त्वम् ।
ऐन्द्रं महत्तत्त्वमनन्तवीर्यं संस्मारयत्यत्र वचोविलासैः ॥ ५३॥

वर्षास्वपीदं शमितं न तेजो धाराप्रपातैर्वचसां समेषाम्।
चित्रे स्वयं शामयतीह दुःखं तत्त्वं महत् लोकगतिं न याति ॥ ५४॥

वज्रायुधं पर्वतमस्तकाग्रे चकास्ति किं पापविनाशनार्थम्।
दूरादमुं वीक्ष्य जनास्तदेत्थं शकोत्थवाक्यं त्विदमूचिवांसः ॥ ५५॥

In Public domain. Digitization Muthulakshmi Research Academy

सदोदितार्कप्रभयाऽस्य देशे निशा न जाता किमु तत्प्रजानाम्।
निद्रासुखं तेऽपि विहाय लोका दिवानिशं ते प्रययुर्मुनीन्द्रम्॥५६॥

दिवैव भास्वान् प्रचकास्ति दीप्तो निशासु नैवास्ति तदीयबिम्बम् ।
दिवानिशं केवलमत्र देशे विभाति भानुर्भवतापहारी॥५७॥

तस्मिंस्तथा भाति गिरेः प्रदेशे प्रजाः प्रसन्नात्मसुखे ननन्दुः।
ज्ञानोदये कुत्र तमः प्रभावो जाड्यं क्व सूर्ये तपतीह चण्डे ॥५८॥

तस्मिंस्तथा काञ्चनराजतीस्ताः प्रदर्शयत्येव गतो हि कालः।
क्वचित्तदग्रे गुरुरात्मदीपः समाधिमग्नश्चिरमास शान्तः ॥५९॥

व्युत्थानतां प्राप्य गुरुर्महात्मा शिष्याननाब्जं चिरमालुलोके ।
समाधि-सौख्याब्धिगतं प्रसन्नं तद् वीक्ष्य विज्ञः प्रियमाननन्द ॥६०॥

अन्ते वसन्तं प्रियमात्मशिष्यं दूरेऽपि सन्तं जगदान्ध्यतस्तम्।
प्रेम्णा निरीक्ष्याथ गुरोः प्रकाम मानन्दपूर्णं हृदयं बभूव॥६१॥

तं वीक्ष्य शिष्यं गुरुमात्मबोधे हर्षातिरेकोऽभवद् गुरोस्तु ।
स्वभागधेयं पुरतो विराजत् मत्वा गुरुर्हर्षगुरुर्बभूव ॥६२॥

तस्मिंस्तथा पश्यति शिष्यवक्त्रं चित्रं महज्जातमथास्य साक्षात्।
समाधिमग्नस्य मुखारविन्दात् शिष्यस्य शब्दाः सहसा निरीयुः ॥६३॥

आकर्ण्य शब्दान् सहसा निरीहो वेगोत्थितोऽभूद् गुरुरात्मदर्शी
शिष्यान्तिकं प्राप्य तदीयशब्दान् शुश्राव धीमान् गुरुरेकबोधी॥६४॥

आश्चर्यमासीन्ननु शब्दशैली वेदार्षिवाचं प्रतिबिम्बयन्ती ।
कलौ युगे मन्त्रविदं नवीनं प्राचीकटन्नूलयुगस्य मूलम् ॥६५॥

चित्वा स्वयं कञ्चन योगिवर्यं वाग्देवता नन्दति तस्य चित्ते ।
तथैव संप्राप्य हि देवरातं वाणी प्रसन्ना विरराज शुद्धा ॥६६॥

आकाशमध्ये विचरन् सदैव वायुर्यथा कीचकमाप्य कञ्चित् ।
व्यनक्ति माधुर्यरसप्रवाहं तथैव तं शुद्धमतिं हि वेदः ॥६७॥

In Public domain. Digitization Muthulakshmi Research Academy

त एव शब्दाः स च देहयष्टिः स एव कालः स च योगमार्गः ।
कथं वृणीते मुनिराजमेवं वाग्देवता तस्य तपः प्रसन्ना ॥ ६८॥

आचक्षते भाग्यमिति प्रजा यत् दैवीं कृपां चापि वदन्ति विज्ञाः ।
कालप्रभावं निगदन्ति यत् तत् तदाऽविरासीन्मुनिराजवक्त्रात्॥ ६९॥

रत्नानि कर्णाभरणायितानि वचांसि संप्राप्य गुरुर्महात्मा।
तत्तत्त्ववेत्ता प्रजहर्ष मौनी शिष्यस्य भाग्येऽभिननन्द तूर्णम् ॥ ७०॥

शब्दान् ततस्तान् सहसा ग्रहीतुं गुरुः प्रयत्नं विदधेऽर्थवन्तम् ।
स एव यत्नः सफलो बभूव ग्रन्थात्मना लोकहिताय काले ॥ ७१॥

ततः स्वयं शान्तवचःप्रवाहे निर्वृष्टजीमूतरुचिः स योगी।
बभौ पुनर्ब्रह्मणि लीनचित्तो नन्दन् पुनश्चात्मविलासमात्रे॥ ७२॥

काले तथाऽयं परिणामशून्यः कैवल्यभागीयपदं समाप्नोत् ।
पुनः स्वयं कर्मविशेषयोगे व्युत्थानचित्तो मुनिराड् बभूव ॥ ७३॥

ततः परं वीक्ष्य गुरोर्मुखाब्जं फुल्लं तदाऽसीत् हृदयं प्रकामम्।
तदीयवाचा प्रसरत्प्रमादो बभूव तूर्णं मुनिदेवरातः॥ ७४॥

प्रेम्णा महेशेन वचः प्ररोहे मदीयदेहः करणीकृतो नु।
तृणायमानस्य ममाद्य जन्तोर्व्यनक्ति तद्भाग्यफलं विशिष्टम्॥ ७५॥

व्यातन्वदात्मप्रसरन्मयूखो देहो ममायं खलु धन्यधन्यः ।
नास्त्यन्यदाप्तव्यमितोऽपि लोके महर्षिसंदर्शितमार्गभाजा॥ ७६॥

इत्थं विनिश्चित्य गुरोः पदाब्जे विन्यस्य देहं मुनिदेवरातः।
रोमाञ्चफुल्लं तनुरूपपुष्पं तस्मै समर्प्याथ कृती बभूव॥ ७७॥

गुरोर्मुखाच्छिष्यमनः प्रपन्नो मन्त्रस्तु साफल्यमवाप तत्र ।
जीमूतगर्भात् समवाप्य शुक्तिं सन्मौक्तिकं जात इवोदबिन्दुः॥ ७८॥

स्वशिष्यभाग्योदयमीक्षमाणो गुरुस्तदा मोदपरीतचित्तः ।
धन्योऽयमिन्दीवरवक्त्रकान्तिः शिष्यः स्वयं वेद विशेषवेदी॥ ७९॥

In Public domain. Digitization Muthulakshmi Research Academy

इतः परं जन्म जगद्धिताय स्वयं भवेदस्य कृतार्थता च।
इत्थं विचार्यात्मरसप्रमोदी स काव्यकण्ठो गुरुराननन्द ॥८०॥

अप्राप्तशब्दो मुनिराजभाग्यं वाचां परस्तात् खलु विद्यमानम् ।
गुरुर्महान् शिष्यमथ प्रपद्य व्यानक् परिष्वङ्गमुखेन भावम् ॥८१॥

ततः स्वभाग्योदयफुल्लचित्तो निनाय कालं मुनिदेवरातः।
शिष्योपशिष्यादिमुखप्रवृद्धा वाणी तदीया विललास शुद्धा॥८२॥

संस्थाप्य संस्थां निगमार्थविज्ञो वेदार्थतत्त्वं विततान लोके ।
वेदार्षितेज किरणैः प्रपूर्णां वाणीं वितेने भुवनस्य भूत्यै ॥८३॥

क्वचित्तदाऽश्रावि यशो विशिष्टं शुद्धं महर्षे रमणस्य तेन
अण्णामलै दिव्यगुहासु ब्रह्म मनुष्यरूपे चरतीति लोके ॥८४॥

पश्यन् सदा पश्यति नैव किञ्चित् शृण्वन् पुनर्नैव शृणोति शब्दम्।
नन्दन् सदा चात्मनि निर्विकल्पे निर्लिप्त एको भवतीह मौनी ॥८५॥

तद्दर्शनं जन्मफलं व्यनक्ति क्षेमङ्करं लोकतमोविनाशि।
इत्थं विचार्यात्महिताय तूर्णं जगाम चाण्णागिरिमेव पूतम् ॥८६॥

तत् प्राप्य तीर्थं मुनिदेवरातो जहर्ष भाग्ये रमणस्य रूपे ।
ततः परं ध्यानविशेषमग्नस्तत्त्वार्थदर्शी सततं बभूव ॥ ८७॥

इन्द्रः परात्मा जगतां नियन्ता वेदेषु सत्यं प्रतिपादितं तत्।
पौराणिका विष्णुशिवादयोऽपि प्रपूज्यमाना गुणतां व्रजन्ति ॥८८॥

ज्ञातस्य तत्त्वस्य यथार्थतायाः प्रमाणमेकं प्रवदन्ति सन्तः ।
ध्यानानुभूतिः परमा मुनीनां प्रमाणमेतत् स्थिरतत्त्वबोधे ॥८९॥

वेदान्ततत्त्वं समवाप्य शाब्दं युक्त्या विनिश्चित्य तदीयसारम्।
ततः परं ध्यानबलेन योगी तदेव साक्षात्कुरुतात् विशुद्धम् ॥९०॥

यत्तत्त्वमस्यां विततं जगत्यां तदीशतत्त्वं विनिगम्य बुद्ध्या।
ईशा हि वास्यं जगदीशसृष्टं त्यागेन भोगं श्रुतिराह योग्यम्॥९१॥

In Public domain. Digitization Muthulakshmi Research Academy

न भेदबुद्धिः प्रभवेन्नराणां न मोहहेतुर्भवताज्जगच्च।
यमादि-योगाङ्गबलेन जन्तोर्मनो विशुद्धं भवतीह नूनम् ॥९२॥

भेदप्रकाराः बहवो जगत्यां न भेदबुद्धिर्जगतो हिताय ।
शनैः शनैर्भेदधियं विहाय स्थिरो भवेत् केवल एव योगी ॥९३॥

एतां स्थितिं प्राप्य ततश्च योगी निरन्तरं तत्र रमेत युक्तः ।
ततो गुणाः प्रेमदयादिकाः हि समुद्भवन्त्येव तदीयचित्ते॥९४॥

निःस्वार्थबुद्धिः करुणा ह्यहिंसा दया च मौनञ्च समत्वमेवम्।
भक्तिः परेशे स्वयमेव जाता भवन्ति सर्वे स्वयमेव योग्ये ॥९५॥

यज्ञो नराणां विधिवत् कृतो हि कृतज्ञतां वक्ति पुरः सुराणाम्।
श्रद्धासमिद्यज्ञकृतो जगत्यामनागसो यज्ञफलं सदुक्तम् ॥९६॥

न कर्म मोक्षाय च शङ्करोक्तं मिथ्याभिमानेन कृतं हि वेद्यम्।
आज्ञानभानं विहितं सुकर्म प्रहापयेन्मोहचयं नराणाम् ॥९७॥

ज्ञानं पुनश्चात्मविनिश्चयेन दृब्धं भवेन्मोक्षफलस्य हेतुः ।
भक्तिर्दृतेः कारणमस्ति वेद्या ततः स्वयं सर्वफलप्रसूतिः ॥९८॥

वेदान्तवाक्यैर्विदितेऽपि तत्त्वे साक्षात्कृतिर्नैव भवेद् विशिष्टा ।
ध्यानं ततः सेव्यमितः प्रजाभिः पारोक्ष्यदोषं प्रहिणोति योगः ॥९९॥

एवं त्रिधा योगगतिं विजानन् साक्षात्कृतिं विन्दति योगिवर्यः ।
ततः स बन्धाद् विमुच्यते हि कैवल्यभागीयपदं च विन्ते ॥१००॥

धानुष्कहस्ताद् विनिमुक्तबाणो यात्येव वेगोच्चलितः पुरस्तात् ।
नष्टे तु वेगे पततीह बाणस्तथैव संस्कारबलेन देहः ॥१०१॥

एवं विजानाति नरो य एकं तत्त्वं ततः शान्तमना भवेद्धि ।
निर्मुच्यते पूर्णतयैव बन्धाद् ब्रह्मैव सर्वत्र समीक्षमाणः॥१०२॥

इत्थं विचारामृतमत्र लोके वितत्य धन्यो मुनिदेवरातः।
काले तु पक्के तनुपुष्पमत्र स्वयं जहौ ब्रह्म बभूव चान्ते ॥१०३॥

॥इति श्रीमधुसूदनपेन्नारचितं देवरातवैभवं समाप्तम्॥

In Public domain. Digitization Muthulakshmi Research Academy

आवेदनम्

(दिल्लीतः अर्वाचीनसंस्कृतपत्रिकायां प्रकाशितम्)

प्रावृटकाल-पयोद-मध्यविलसद्विद्युत्प्रभाभास्वरा
गर्जन्मेघ-निनाद-धीरगहना नृत्यच्छिखण्डिस्वरा।
नूनं डिम्भविलासहासमधुरा विद्वन्मनोजित्वरी
गायत्री ननु मोद-शान्तितपसां स्थाने सदा संस्थिता ॥१॥

प्रातःकाल-विभाकरस्य रुचिरे बिम्बेऽस्ति माता सदा
वैकालीन-नभस्यमोघवचना सन्ध्येव राराज्यते ।
सद्विद्वज्जन-पुण्यवृत्ति-कलितां जिह्वां समध्यषुषी
व्यक्ता सा मधुमास - दिव्य- सुषमा प्रत्यक्षमालोक्यते ॥२॥

विश्वामित्र-महर्षि-दिव्यतपसां स्फष्ठं तदेषा फलं
तज्जिह्वाग्रमधिष्ठिता जनहिते चित्तं दधाना स्वयम् ।
गायत्रीति हि दिव्यनाम परमां शान्तिं प्रदत्ते सदा
नित्यं तस्य जपेन नश्यति भयं व्याधेर्यमस्यापि वा ॥ ३ ॥

मुक्ताहार-विशेष-भूषणयुता शुभाभ्रभासां निधिः
स्वर्णाभा सकलाङ्गरागरुचिरा तत्त्वार्थवर्णात्मिका ।
रेवातीरनिवासिनीति विबुधैरेकाग्रबुद्ध्या स्तुता
माता मामक भक्तिभाव-भरिता चित्ते हि जागर्तु सा ॥ ४ ॥

पञ्चास्या सकलागमेषु विनुता पद्मालयायाः सखी
हस्तैस्सा दशभिर्हि यन्त्रनिलया धत्ते सुशस्त्रादिकम् ।
शङ्खं चक्रमथाब्जयुग्ममममलं माता दधाना सदा
भक्तेभ्यः प्रददाति पुण्यमभयं चायुश्च सौख्यान्वितम् ॥५॥

गायत्रीतिजपेन घोरनरकान्मुक्तिर्भवेन्निश्चिता
संसाराख्य-महाबिले प्रपतितानुद्धर्तुमेषा गतिः ।
मातुर्दिव्यममोघनाम जनता सश्रद्धमादाय हि
पीयूषाम्बुधिमज्जनेन परमां शान्ति सदैवाप्नुते ॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

मातस्तावक-दिव्यनाम सततं स्वान्ते निदिध्यासतो
जिह्वा मे मम पुण्यशेषबलतो दिव्यासनं त्वं कुरु ।
पापौघं परिनाश्य बुद्धिमनघे पुण्यां विधेहीति मे
मातर्नित्यमनन्ययुक्तमनसा त्वामेवमभ्यर्थये ॥७॥

लोकान् पाति गभस्तिभिर्दिनमणिः शुभ्रां वितन्वन् रुचिं
शीतांशुः सुखमातनोति विमलैर्लोके स्वकीयैः करैः ।
वायुर्वाति दिवानिशं सुरभिलः पृथ्वी स्वमार्गे स्थिता
सर्वं त्वन्नियमानुवर्ति सततं धार्या तवाज्ञा परा ॥८॥

गायन्तं बुधभक्तलोकमखिलं संत्रायसे सर्वथा
गायत्रीति यतः प्रशस्तविभवे संकीर्त्यसे पण्डितैः ।
प्राणान् पासि गयान् सदेति विमलं ते नाम विश्वे श्रुतं
सावित्रीति च दिव्यनाम परमं धत्सेऽर्थवत् त्वं सदा ॥ ९ ॥

मुद्राधिष्ठितशक्तिरूपिणि सदा भक्ताय दत्से मुदं
भद्रं त्वं वितनोषि पापमखिलं दग्ध्वा स्वभक्तस्य हि ।
मूकः सन्नपि वाग्झरीविलसितं प्राप्नोति ते लीलया
वाग्ग्मी चेदपि गर्वितस्तु सकलो मूकायतेऽभक्तितः ॥१०॥

दिव्यं त्वन्नयनारविन्दयुगलं भक्तस्य शंवर्षुकं
कारुण्यामृतसेकनैकविदितं सर्वार्थसंदायकम्।
शय्योत्थायमिहैव यस्तु परमं मातुः स्मरेत् नाम तत्
तस्मै दास्यसि बोध-मोद-युगलं दग्ध्वा हि कर्माखिलम्॥ ११ ॥

दर्शं दर्शमतीव मोदविवशो मातुर्मुखं मङ्गलं
पायं पायमतीव मोहभरितो मातुः सुनामामृतम् ।
स्मारं स्मारममोघशक्तिमपि तां मातुः पदान्निःसृतां
नेयं मे खलु शेषभूतमपि तन्मातुः पदे जीवनम् ॥ १२॥

मद्भाग्यानि पचेलिमानि सुतरां जातानि भक्त्या तव
तृप्ति मे जननं च तज्जनयते येनास्मि ते सेवकः ।

In Public domain. Digitization Muthulakshmi Research Academy

कांक्षे नाहमितोऽधिकं भवतु मे भक्तिस्त्वदंघ्रौ सदा
त्वत्पादाम्बुज-माधुरीमभिलषन् भृङ्गायमाणोऽस्म्यहम्॥ १३॥

प्रत्यूहानल-शान्तिकर्मणि सदा मेघायसे त्वं ध्रुवम्
भक्तानामतिदुःखनाशनविधौ चन्द्रायसे प्रत्यहम्।
अज्ञानं त्वमपास्य बोधकिरणैर्विद्योतसे सूर्यवत्
कैवल्याख्यलताप्रवर्धनपरा ज्ञानाम्बुभिः सर्वदा ॥ १४॥

वाणी या व्यवहारहेतुरखिला सा मातृनिःश्वासजा
लक्ष्मीर्वैभवलक्ष्मणा सुविदिता मातुः सुतेजोऽभिधा ।
दुर्गा या जगतीं सदा कलयते सा मातृशक्तिः परा
नाम्ना केवलमत्र काचन भिदा नास्त्येव मातुः परम् ॥ १५॥

लोको जीवनमृत्युवह्निपतितो दन्दह्यमानश्चिरं
क्रन्दत्यम्ब पदारविन्दयुगलं द्रष्टुं न शक्तस्तव ।
वत्सो यद्यपि दुग्धपानविमुखो माता स्वमातुर्हृदा
दुग्धं पाययतीह तं भुवि यथा पाह्यम्ब लोकं तथा ॥ १६ ॥

ओङ्काराहितविश्वमेतदखिलं त्वय्येव संलीयते
ओङ्कारं तव शुद्धरूपमिति यो जानाति तत्त्वं हृदा ।
तस्याहंयुमपास्य भक्तिममलां दत्त्वा च मातः सदा
त्वं तं भक्तिशिरोमणिं प्रकुरुषे दत्से च नैजं पदम् ॥ १७॥

माता शारद-मेघ-शुद्ध-धवला माता मदीयं धनं
माता सन्तत-ताप-दुःखशमने ज्योत्स्ना परा शीतला ।
मातुः पादयुगीनमेव सततं चित्तं भवेन्मङ्गलं
माता मेऽस्तु समस्तवस्तुनिचयः स्याद्वा न वा किं फलम् ॥ १८॥

सन्देहाच्चपलत्व-दोषवशतस्त्वत्सत्त्वनङ्गीकृतं
मूढत्वं विविधा हि कार्यनिरतिश्चास्थायुकं जीवनम् ।
हेतुं तं सकलागमार्थनिहिते संभावयन्ती जनं
पङ्काद् वत्समिवोद्धरेः करुणाया संसार-वारांनिधेः ॥ १९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वोऽपीश्वरि जन्तुरस्ति यदि ते भावेन संचोदितः
आज्ञापाशवशेन सर्वमपि ते यद्यस्ति नूनं चलम् ।
पापे चामितरक्तिरस्ति भवजे पङ्के निमग्ना वयं
तत्तत्कर्म किमर्थमेवमहितं कुर्मस्तदाचक्ष्व नः ॥२०॥

एका त्वं यदि नास्ति शक्तिरितरा त्वन्निघ्नमेतज्जगत्
कर्त्री त्वं भुवनस्य पालनपरा हर्त्रीति चालप्यसे ।
किंवा कारणमस्मदीयचरिते पापिष्ठवित्ते सदा
ज्ञात्वा पुण्यमपीह पापमतयो मातः किमर्थं वयम् ॥२१॥

वाग्रूपेण च दृश्यमानमखिलं वैविध्यपूर्णं जगत्
त्वय्येवास्ति तथैव केवलमहं स्तुत्यादिकं संदधे ।
आर्तत्राणपरायणेति भवतीं शंसन्ति भक्ताः सदा
प्रार्तोऽहं तव पादयोश्च पतितः सा वागमोघा भवेत् ।।२२॥

कस्मादागतमत्र केन विधिना किं कार्यमत्रास्ति मे
यायां कुत्र पुनश्च कुत्र जननं को वा मदीयः प्रभुः।
मामेवं त्वतिमूढबुद्धिमिव कः संसृज्य नंदेद् भृशं
जाने नाहमिदं हि भक्तिभरितो जाने तु मातुः पदम् ॥२३॥

क्रीडां केचन संगिरन्ति मुनयः सृष्टिं त्वदीयां परां
केचित् शक्तिमितीह देवि विविधं संचक्षते मानवाः ।
पुंस्त्रीभेदविमोहपङ्कपतिताश्चातुर्यवन्तः सदा
मीमांसामिह भिन्नवद् विदधते सद्वस्तु माता परा ॥ २४ ॥

सांख्यं केचन संगिरन्ति परमं कैवल्यहेतुं बुधाः
योगं केचन तर्कशास्त्रमिति सद् वैशेषिकाख्यं परे ।
वेदान्तादि-विशेष-वाक्यजनितं ज्ञानं समाचक्षते
कर्मान्ये खलु नाकरूपफलदं माता परं सा परा ॥२५॥

अम्ब त्वं खलु मोहसिन्धुपतितानुद्धर्तुमेका गतिः
कारुणदिह पद्मकोमलकरं दत्वा सुमन्दस्मिता ।

In Public domain. Digitization Muthulakshmi Research Academy

चित्रं तेन मुहुर्मुहुर्बत वयं सम्मोहिता इत्यमुं
तुभ्यं वेदयितुं च नैजममले भावं वयं न क्षमाः ॥२६॥

देहः शाश्वत-भोगसाधनमतो देही तु नास्त्येव सः
लोकः केवलपाञ्चभौतिक इतो नास्त्येव लोकान्तरम् ।
इत्यज्ञान-तमोवशाद् बहुविधं जल्पन्त्यहो दुर्जना
अज्ञानाध्यमपाकरोषि सततं त्वं भक्तवात्सल्यतः ॥ २७ ॥

कामः क्रीडति कोप एष बलवान् सर्वेषु राराज्यते
लोभो नृत्यति मोह एव परमः सर्वत्र जंगम्यते ।
निर्हेतुर्मदवारणश्च सकलं संपीड्य नर्दत्यसौ
मात्सर्यं ननु राज्यमेव कुरुते कुत्रास्ति नामापि ते ॥२८॥

विद्या केवलवस्तुमात्रकथनं वित्तं च सर्वेप्सितं
धर्मश्छांदस-विप्रलोक-विदितो मोघं सदा सेव्यते ।
सत्यं नास्ति पुरोऽस्ति वस्तु यदहो तत् सत्यमेवास्त्वति
मिथ्याजल्पनकेलिलोलनपराः नृत्यन्त्यमी दुर्जनाः ।।२९।।

शास्त्रं केवल-छान्दसाय परमो वेदोऽपि मूर्खाय वा
सन्ध्यावन्दन-सूर्यदेवनमनं सर्वं तु दर्मेधसे।
इत्यालोचन-भेद-भिन्नमतयो मूर्खास्तु जल्पन्त्यहो
धर्मं स्थापयितुं सदेव भुवने संस्कार्य तानुद्धर ॥ ३० ॥

भक्तः केवल पर्ववासरमसौ स्मृत्वा समर्च्याऽपि वा
स्वाभीष्टं प्रकटीकरोति कुरुते चित्तं न शुद्धं खलु ।
विद्वाँश्चापि मृथा-कथाकथनता-संतृप्तचित्तो ननु
क्षान्तिं चोपदिशत्यहो प्रतिदिनं कुट्यां तु कोपी सदा ॥३१॥

देवद्र्यङ्गपि देवतादिषु परां भक्तिं विधत्ते परं
हेतुः कश्चन लौकिकेतरपरः संभाति तस्मिन् भृशम्।
स्वर्गं वाऽथ महेन्द्र भोग-निलयं मोक्षं परं वांछति
नो चेत् पापमहीध्रनाशमचिरात् त्वत्तः सदा कांक्षते ॥३२॥

In Public domain. Digitization Muthulakshmi Research Academy

शाक्ताः केचल नित्यभोगमथवा वित्तं तु संप्रेप्सवो
यं कंचित् पुरुषाधमं धृतपदाः सम्प्रार्थ्य शक्त्या ततः ।
नृत्यन्तीह मुदा सदा पुनरमी वित्ते हि दत्तेक्षणाः
शाक्तत्वं पुनरेव दर्शितामिदं शक्तिः परा देवता ॥३३॥

श्रद्धाधीनमना विगर्हितमिदं जह्यात् विरक्तो जगत्
चित्त-व्याघ्र-सुतीक्ष्ण-दृष्टिपतितां बुद्धिं च रक्षेत् सदा ।
योगाङ्गादि-विशेष-साधन-बलात् तत्त्वे सदा चिन्तिते
जेतुं शक्यमदीन-बुद्धिवशतश्चित्तं नं विध्यन्तरात् ॥३४॥

कालेऽस्मिन् नव-भाव-बोध-पटुता संक्षीयते सर्वथा
धर्मः पूणविनाशमेति मनुजाः धर्मेण हीनाः सदा ।
वित्तोपार्जन-चुञ्चवश्च सकलां वित्तिं तृणायन्त्यमी
कारुण्यं जनतासु नष्टमिह तत् सौहार्दभावो गतः ॥३५॥

बुद्धिर्मे खलु निश्चिनोति सकलं स्वान्तं च सङ्कल्पयेत्
प्राणश्चापि सदागतिर्मम सुखं सर्वं च सम्पादितम्।
देहो मेऽस्ति हि कम्र एव तव किं गेहं न नाकायते
सर्वोऽप्येवमिहास्ति चिन्तनपटुः ज्ञानं खपुष्पायते ॥ ३६॥

मूढोऽहं विविधा च बुद्धिरिति मे नत्वा च संप्रार्थये
हस्तं मे कृपयाऽवलंम्ब्य जगतः पाह्यम्ब दीनं जनम् ।
पादो मे स्स्खलतीह दुर्गमतरे मार्गेऽतिकष्टैर्युते
नामग्राहमिहागता तव जनं संतारय श्रद्धया ॥३७॥

अव्यक्तेति कथं नु भक्तिसुलभे त्वं कथ्यसे पण्डितै-
र्नासि तवं किमपूर्व-पाटल-रुचिष्वाफल्ल-पुष्पेषु हि ।
किं वा प्रेम-सुधा-रसाम्बुधिधनेष्वेकाग्रचित्तेषु वा
व्यक्ताऽव्यक्ततया परीक्ष्य सकलं मोक्षं प्रदत्से ध्रुवम् ॥३८॥

लोकस्तावक-दिव्यनाम जपतात् स्वाभीष्टमाप्नोतु च
विद्यातत्त्व-गवेषणे हि विबुधो मोमुद्यतां शाश्वतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

भक्तः शुद्धमतिस्तु देवि सततं सुस्मूर्षतान्नाम ते
मद्बुद्धिश्च लभेत शान्तिपदवीं मातस्त्वदीये पदे ॥३९॥

मात्सर्यं क्षयमेतु भक्तिवशतश्चित्तेषु तेऽनुग्रहात्
सर्वोऽप्यन्यहिते स्वतः प्रयततां संभूय शंभावुकः ।
दभ्रं सौख्यमपास्य सर्वजनता वाञ्छेत् पदं स्थायुकं
योगः कर्मसु कौशलं भुवि सदा संचीयतां मानवैः ॥४०॥

सर्वाङ्गीण-रुचिं दधातु सकला स्फूर्तिं मनोः सन्तति
र्ज्ञानाच्छक्तिरितीदमेव सततं सर्वैरनुष्ठीयताम् ।
चित्तस्यैव निरोधतस्तु सकलं विज्ञानलभ्यं तथा
मातुर्नाम निधीयतां हृदि सदा तेनाप्यतां चिन्तितम् ॥४१॥

मन्दोऽहं सुखभोगरूपमदिरां संपीय मोहं गतः
पादौ मे न हि सत्यमार्ग-गमने शक्तावमू दुर्बलौ ।
मोहान्धो हितवेदवाक्यबधिरो नात्स्यन्दालम्बनं
प्रज्ञारूपिणि देहि बोधनयनं मह्यं कृपापूरिते ॥ ४२ ॥

नीरूपामपि रूपकल्पनवशात् रूपेण संकल्प्य वै
चित्ते केवल-भक्ति-भावभरिते दत्त्वा महार्घासनम् ।
चैत्तं ते हि समर्पयामि सकलं पुष्पादिकं भक्तितः
शश्वत्तत्र वसान्यभोगगणना नात्स्येव मे मानसे ॥४३॥

भक्त्याऽवेशित-चित्तमेव जननी-पादार्पणार्थं पदं
तस्या दर्शन-लालस्य मनसः क्षोभैव चावाहनम् ।
अर्घ्यं पाद्यमथार्तिभावजनितं नेत्राम्बु नान्यज्जलं
भावा मे हृदि मातृदर्शनवशान्नित्योदिता ते सुमम् ॥४४॥

नैवेद्यं ममकार-भाव-रहितं देव्यै समस्तं जगत्
देवीदर्शनदीपिता हि धिषणा नीराजनार्चा सदा ।
सद्बोधाञ्चितमानसं सुविमलं देव्यै तु मान्त्रं सुमं
सर्वं यन्मम देहहेतु-विहितं तत्ते भवेदर्चनम् ॥४५॥

In Public domain. Digitization Muthulakshmi Research Academy

वन्दे देवसुजितां विविधवाग्वैचित्र्यरूपां परां
व्यक्ताव्यक्त-महोर्मि-मध्यपतितान् पान्तीं सुधारूपिणीम् ।
हर्त्रीं मोहमहान्धकारपटलं ज्ञानैकरूपां शिवां
वन्दे भक्तजनार्तिनाशनचणां धीनामवित्रीं सदा ॥४६॥

मोहाहेर्गरुडायितं भवभयप्रध्वंसखड्गायित-
मज्ञानान्धमहाद्रुमस्य दलने नित्यं कुठारायितम् ।
भक्तानां हृदयारविन्दमधुपं तन्मुक्तिमार्गायितं
गायत्र्याः प्रणमामि संततमहं तेजस्वि मातुर्मुखम् ॥४७॥

इत्थं निर्मलमानसेन जननीं संप्रार्थ्य सर्वेश्वरी
तस्याः पादयुगं हि पूर्णमनसा संचिन्तयेद् युक्तधीः ।
चित्तं तेन निरुध्यते सपदि तत् नैवान्यमार्गश्रमः
पुत्रं दुष्टमपीह मातृहृदयं संत्रायते ह्यन्वहम् ॥४८॥

नेदं केवलयज्ञ-दान-फलितं सद्योगसिद्धिर्न वा
देहायास-विधान-शुष्कतपसः सिद्धं न वा सञ्चितम् ।
नास्त्येतद् भवहेतुजात-जनितं पूर्वार्जितं वा सुकृत्
त्वत्कारुण्य-विशेष-पाक इह वै मातस्तवाराधनम् ॥४९॥

चित्ताधान-विधान-लीनमपि मे चित्तं न शुद्धं तथा-
प्यन्तर्ध्वान्तमपास्य दिव्यचरिता वाग्दीपदीप्तिं ददौ ।
इत्येतन्मम जीवनस्य परमं सार्थक्यमालोक्य सद्
विद्यारूप-विशेष-शक्तिकलितं वन्दे जनन्याः पदम् ॥५०॥

स्मितेन यस्याः जगदेतदञ्जसा
वशीकृतं न्यकृतचन्द्ररोचिषा ।
स्मितं तदीयं हृदयेस्तु सुन्दरं
तमः प्रकाण्ड-स्फुटनाश-विक्रमम् ॥५१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

नमामि मनसा यां तां नमामि वचसाऽहिताम् ।
न च मामितरा बुद्धिर्नयेदन्यत्र शङ्करि ॥५२॥

श्रीगायत्रीप्रसादेनैतदावेदननामकम् ।
स्तोत्रं लघु महादेव्या मधुसूदननिर्गतम् ॥५३॥

नृसिंहशर्मा जनकोऽस्ति वन्द्यो माता तथा पुण्यद-भारती मे।
कनिष्ठपुत्रो मधुसूदनोऽहं तयोः पदद्वन्द्वमथ स्मरामि ॥५४॥

॥ इति श्रीमधुसूदनपेन्नारचितं आवेदनं समाप्तम्॥

***

In Public domain. Digitization Muthulakshmi Research Academy

तत्त्वसुषमा

(नागपूरतः संस्कृतभवितव्ये प्रकाशितकाव्यम्)

पूर्वभागः

या पूर्णात्मा प्रकटिततनुर्भक्ततापापनोदं
कर्तुं नित्यं विलसति विभा शब्दसौन्दर्यरूपा।
संक्रीडन्ती विविधगतिभिर्मोदमाना नितान्तं
सा बोधाभा हृदयकमले मामके नित्यमस्तु ॥१॥

लोके केचित् कठिनतपसा जन्मसार्थक्यमाप्तुं
कृत्वा यत्नान् जनिफलमिह प्राप्नुवन्ति स्थिरं शम्।
अन्ये तावत् मलिनमतयः सन्दिहानाः स्वबोधे
रत्नं हस्ते स्थितमपि शिलां मन्यमानाः रुदन्ति ॥२॥

कश्चित् तादृग गहनविषयं दर्शनं स्वप्रयत्नात्
ज्ञातुं बुध्याऽकुरुत निरतं यत्नमेकान्तवासी ।
मोघैर्यत्नैर्विकलमनसा शास्त्रबोधे प्रवृत्तो
नाप्नोच्छास्त्रप्रथितविषयं शब्दजाले विमूढः ॥३॥

तस्माद् दुःखाद् विकलकरणः संश्रितो दीनतां सः
दुःखाच्छित्त्यै खलु गुरुवरं प्रार्थयामास भक्त्या ।
दुःखोद्रेका मनुजहृदयं क्षालयत्यञ्जसेति
ज्ञात्वाऽऽचार्यः परमकरुणो बोधयामास शिष्यम् ॥४॥

शास्त्रौघात् त्वं विचिनु भविकं जन्मसार्थक्यहेतो
नीरात् क्षीरं प्रियमपि यथा स्वीकरोतीह हंसः ।
नाभ्यस्तं चेद् बहु गुरुमुखान्नैवहानिर्भवेत्ते
किन्तु क्षेमङ्करविषयकं विद्धि तूर्णं हि शास्त्रम् ॥५॥

मूलं हित्वा जगति मनुजाः सर्वदा भिन्नशाखाः
मूलाभासे शतमपि पुनः कुर्वते मोघयत्नान् ।

In Public domain. Digitization Muthulakshmi Research Academy

त्यक्त्वा सर्पं प्रविततफणं लौकिका दण्डहस्ता-
श्छायासर्पप्रहरणपरा हासपात्रं भवन्ति ॥६॥

धानुष्कश्चेन्नयनविषयं लक्ष्यमारादुपेक्ष्य
लक्ष्यच्छायां यदि हि जलगां वारणैः संप्रविध्येत् ।
धानुष्कत्वं विफलमिति किं तद्विदो लक्ष्यविज्ञा
न ब्रूयुस्तं विनिहतमतिं साधुलक्ष्यप्रमत्तम् ॥७॥

तस्माद् विज्ञो भवति सततं लक्ष्यवेद्धा नितान्तं
हित्वा चान्यान् कृतविमलधीरल्पसारान् विशोध्य।
साक्षाल्लुब्धो न भवति सदा नारिकेलस्य सारो
यावद् बाह्यं न हि विगलति स्पष्टमाच्छादनं तत् ॥८॥

एवं शास्त्रं कलुषितधियां नारिकेलाभमास्ते
येषां बुद्धिः पदजटिलतां नालमुल्लङ्घितुं हि ।
यत्नं कृत्वा परमधिकधीप्राभवं प्राप्य तेऽपि
शास्त्रं ज्ञातुं विविधविषयं शक्नुवन्ति प्रकृष्टम् ॥९॥

शास्त्रं सर्वं भवति धिषणा-शोधनार्थं नराणां
शब्दास्तावत् प्रणिहितधियां कुर्वते बुद्धिशुद्धिम् ।
शाब्दे जाले यदि भवति मनो लग्नमत्यन्तमूढं
तस्मिन् गूढं न हि कलयति श्रेष्ठतत्त्वं सुसूक्ष्मम् ॥१०॥

योगं श्रित्वां मनसि विततः वृत्तिधाराः विशोध्य
संप्रज्ञातं तदनु परमं प्राप्य निर्बीजमग्र्यम्।
शान्तिं लब्ध्वा मनसि निरतं योगयुक् शास्त्रतत्त्वं
ज्ञातुं शक्तो भवति विमलं सोऽयमारादुपायः ॥११॥

नोचेन्नित्यं गुरुपदतले चित्तमाधाय शास्त्रं
श्रद्धापूर्णो गुरुमुखसुमात् सम्यगाकर्णयेद्वा।
शाब्दं ज्योतिर्ज्वलति न चिराच्चैत्तमोहं विनिघ्नत्
शास्त्राभ्यासे मृदुतममतिः संश्रयेदेतदेव ॥१२॥

In Public domain. Digitization Muthulakshmi Research Academy

शाब्दं तेजो हृदयपटले स्थायुकं यस्य तस्य
चित्तं शब्दान् विगलितमलं संस्करोत्यर्थबोधे ।
तस्माच्छब्दाः समुदितबलाः स्वार्थबोधे समर्थाः
नूनं तत्त्वं मनसि सहसा व्यञ्जयन्ति स्वशक्त्या ॥ १३ ॥

इत्थं शिष्यं प्रमुदितमनाश्चोदयित्वा सदर्थे
भद्रं ते स्यादिति च वचनं प्रेमपूर्णं जगाद ।
निर्वृष्टाम्बुर्जलधर इव स्पष्टभासां निधानम्
शान्तो जातस्तदनु स गुरुः शिष्यदीक्षां विजानन् ॥ १४ ॥

आचार्योक्तं प्रतिपदमधुस्रावि शिष्यो निशम्य
नैर्मल्यं धीगतमभिनवं स्पष्टमैक्षिष्ट तूर्णम् ।
कार्तज्यं स्वं सपदि गुरवे भक्तिनम्रो निवेद्य
ध्याने स्वां जीवनसफलतां ज्ञातुकामो बभूव ॥ १५ ॥

एकान्तेऽसावभिमततमं दैवतं पूजयित्वा
रुद्ध्वा सर्वं करणनिचयं प्राणवेगं नियम्य ।
दीक्षाबद्धो विमलमनसा तत्त्वबोधैकचित्त-
स्तस्थौ शान्तस्तरुरिव महान् वायुशून्ये प्रदेशे ॥ १६ ॥

अभ्यस्येत्थं सुनियतमतिर्योगमानन्दकन्दं
श्रद्धापूर्णः कतिपयदिनान्यात्मदीप्तौ निनाय ।
मासे याते ह्यधिकरुचिरा तस्य बुद्धिर्बभूव
यस्यामात्मोन्नतिरिति वचः शास्त्रसिद्धं प्रसिद्धम् ॥ १७ ॥

ध्याने पक्के सकलकरणेष्वात्मनिष्ठेषु तस्य
श्वासोच्छ्वासौ नियतगतिकौ नाममात्रत्वमाप्तौ ।
बुद्धिर्दीप्ता गहनविषयान् गाहितुं सा समर्था
जाता केनाप्यमितबलिना प्रेरिता तत्त्वबोधे ॥ १८ ॥

तस्मिन् काले महितदिवसे ह्येकदा ध्यानमग्ने
तस्मिन् काचिद् मधुरमधुरा भारती संप्रबुद्धा ।

In Public domain. Digitization Muthulakshmi Research Academy

संस्काराणां परिणतिफलं प्राक्तनानां शुभानां
वाणी शीघ्रं भगवति चिर प्रार्थनारूपमाप ॥१९॥

सर्वव्याप्तं परमसुखदं दैवमात्मीयमन्तः
साक्षादक्ष्णां विषयमचिरात्प्राप्य मोमुद्यमानः ।
तन्माहात्म्य-स्मरण-विवशो नाप्य वाणीं समर्थां
स्वस्थोऽस्वस्थः कतिचिदनयत् स क्षणानक्षमः सन् ॥२०॥

पश्चान्मन्दोज्ज्वलहसितभा-भासितं सुन्दरास्यं
वीक्ष्यात्यन्तं मुदितमनसा दैवपादं प्रपन्नः ।
संवाह्यादौ चरणकमलं धन्यतामात्मनः सः
सम्भाव्यान्ते मृदुतमवचाः संजगादात्मनीनम् ॥२१॥

स्वामिन् शुद्धे हृदयकमले मामके नित्यवासं
कर्तुं साक्षादवनिमधुना ह्यागतो भक्तिबद्धः ।
त्वं नूनं मे हृदयमधनं दर्शनोत्थं निवार्य
निर्बाधं सद् विमलकलनं संप्रदातुं समर्थः ॥२२॥

केयं सृष्टिर्जगति विविधा किंफला भासतेऽसौ
किं जीवोऽयं परिणतिरथो भूतजातस्य नित्या ।
किं ज्ञानं तद् भवति च कुतो ज्ञायते केन देव
कस्मान्मोक्षः सकलविपदो मानवानां भवेद्वै ॥२३॥

लोके तत्तत् स्वमतिकलितं सत्यमित्यूहमानाः
भ्रान्ताः भ्रान्तावितरमनुजान् मज्जयन्तः प्रकामम्।
संदृश्यन्ते कथमिह नु ते वेदितव्या धरण्यां
सत्यं प्राप्यं कथमिति महद् दुःखमाप्नोमि देव ॥२४॥

यस्मादायुस्तरलतरलं बुद्बुदाभं तडिद्वत्
तस्मादेवं त्वरितगतिना भावनीयं नरेण ।
नोचेन्मृत्योः भयदकरयोः पीडितः सन् नरोऽयं
पश्चात्तापं व्रजति नितरां जीवनस्यान्तकाले ॥ २५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

दीर्घायुश्चेद् भवति विविधैर्व्याधिभिर्ग्रस्यमानो
वृद्धे देहे विकलकरणो नाप्नुयात् तत्त्वबोधम् ।
तस्माद् देहेन्द्रियविकलताप्राप्तितः पूर्वमेव
प्राप्तव्या मे जनिसफलता तीव्रयत्नेन तूर्णम् ॥ २६ ॥

एवं यत्नं विदधति मयि स्पीततां प्राप्य शङ्काः
तस्मिंस्तस्मिन् मतिकलुषतां संनिदध्युर्नितान्तम् ।
तस्मात् तत्त्वात् प्रतिहतमतिर्भ्रष्टलक्ष्यश्च्युतार्थो
भ्रामं भ्राम दिशि दिशि पुना रोदिमि स्वान्तरेव ॥ २७ ॥

आत्मा नास्तीत्यभिदधति वै नास्तिकाश्चारुवाच
स्तस्मान्मोक्षादिकमपि वृथा कल्पिते मन्वते ते ।
मोक्षाभावे जगति करणैर्भुज्यतां सर्वमेव
नाप्रत्यक्षं प्रमितिकरणं संभवेदित्थमाहुः ।।२८।।

पृथ्वी वायुर्जलमपि महानग्निरेते हि सृष्टौ
भूतान्याहुः परिणतिदशामाप्तवन्तीति लोके।
तत्सङ्गोत्था चितिरत इतो नास्ति कश्चित् परात्मा
स्याच्चेद् दृश्यो भवतु न हि चेत् नास्ति तादृक् पदार्थः ॥ २९ ॥

इत्थं तेषां मतमपि महल्लोकविस्तारमाप्य
गेहे गेहे विलसतितरां सर्वदा बद्धमूलम् ।
तस्य भ्राता भवति सुतरां तत्त्वबोधे प्रमूढो
नाश्यन्त्वात्मानमभिमनुते बुद्धिशक्तिं प्रतीयन् ॥ ३० ॥

सर्वं शून्यं कलयति परो वाच्यताबाह्यवर्ति
ज्ञानादन्यन्न हि कलयति क्षोदनार्हं च कश्चित् ।
कश्चिद् ब्रूते क्षणिकमिदमित्यन्तरालोच्य विश्वं
शश्वद् भिन्नं विदधति मतं मानवास्तर्कसिद्धम् ॥ ३१ ॥

कश्चिन्निष्ठादिपरिकलितं मन्यते जीवनार्थं
दीक्षाव्रातैर्भवति मनुजस्त्वार्हतत्त्वे च योग्यः ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्माद् देहो विविधनियमैर्वश्यतां नीयते चेत्
शुद्धो जीवो जनिसफलतां प्राप्नुयात् तूर्णमेव ॥३२॥

केषाञ्चिद्वै प्रकृतिपुरुषौ सर्गमूलं सुयुक्तौ
तत्संयोगात् प्रकृतिगुणतो जायते बुद्धिरादौ ।
तस्याः बुद्धेर्भवति च पुनर्मोहमूलं समेषां
सोऽहङ्कारस्तदनु करणान्यादिभूतानि चापि ॥३३॥

एषा सृष्टिर्गुणपरिणतिर्मन्यते सांख्यशास्त्रे
बुद्धेर्योगाद् भवति पुरुषे बुद्धिधर्माधिरोपः ।
धर्मारोपात् च पुरुषगता सर्वभावा विभान्ति
तस्माद् दुःखी सुखयुत इति भ्रम्यते जीवकेन ।।३४।।

ज्ञात्वा धर्मान् पृथगिति तयोः सम्यगभ्यासयोगा
दध्यारोपं न भजति नरः केवलः शान्त आस्ते ।
इत्याहुस्ते पुरुषजननं सार्थकं कर्तुमत्र
क्षेमः शास्त्रादिति जगदिदं बोधयन्तः स्वबुद्ध्या ॥३५॥

तत्त्वज्ञानं भवति पुरुषे ध्यानयोगेन चेति
श्रेष्ठं शास्त्रं ह्यभिदधति सद् राजयोगप्रवीणाः ।
वृत्तीः सर्वाः मनस इह ये संनिरोद्धुं समर्था
स्तेषां योगः सफल इति ते निश्चितार्थं ब्रवन्ति ॥३६॥

आत्मादीनां प्रमितिबलतो मानवो दुःखपूगान्-
मुक्तो नूनं भवति न परं साधनं मोक्षमार्गे ।
तस्मान्न्यायं मननपदवीं गौतमीयाः ब्रुवन्तो
सत्तर्कास्त्रं निदधति पुरो दुःखमूलं प्रहातुम् ॥३७॥

काणादानां मतमपि तथा न्यायसाम्यं भजित्वा
ज्ञानान्मोक्षं वदति परमं दुःखहानिस्वरूपम् ।
यागादीनां विहितकरणाज्जायतेऽद्धा त्वपूर्वं
तस्मात् कामानभिमततमानाप्नुवन्तीह लोके ॥३८॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं कर्माखिलभविकसम्प्राप्तिहेतुर्नराणां
मीमांसायामभिदधति तद् वैधकर्मप्रवीणाः ।
कर्मार्थेयं तनुरिति तथा निश्चितार्थं वदन्तो
लोकं कर्माभिमुखमतः कुर्वते शर्मणे ते ॥३९॥

व्यासः साक्षाद् यदुपतिरतो लोकरक्षैकदीक्षो
वेदान्तार्थं स्वमतिमथनात् सम्यगाविश्चकार ।
बह्मैवैकं लसति परमं ज्ञेयमत्यन्तभक्त्या
तस्मान्मोक्षो भवति न परं साधनं चेत्युवाच ॥४०॥

सत्यं ब्रह्मेत्यखिलनिगमा निश्चितं यद् ब्रुवन्ति
तस्मान्मिथ्या जगदिति मतं शाङ्कराः संगिरन्ति ।
जीवो नान्यो भवति विमलाद् ब्रह्मणो ज्ञेयमेतज्
ज्ञात्वा ब्रह्मस्थितिमपि नरो विन्दते नित्यसिद्धाम् ॥४१॥

तत्सिद्धान्ते भवति परमं निर्गुणं ब्रह्म सत्यं
भक्तिः कर्माप्यखिलकरणं ज्ञानसिद्ध्यर्थमेव ।
विश्वाभासो मनसि वितता बद्धमूला ह्यविद्या
तस्याः नाशे जगदपि तथा नाशमाप्नोति तूर्णम् ॥४२॥

न स्वीकार्यं मतमिदमिति द्वैतिनस्तर्कयुक्ताः
धिक्कृत्यैतत् जगदधिपतिं वासुदेवं भजन्ति ।
सत्यं विश्वं विविधमपि तत् पञ्चधा भेदयुक्तं
भक्त्याराध्यं भवति सगुणं ब्रह्मकृष्णाभिधं हि ॥४३॥

नाद्दत्यैतत् परमपुरुषं श्रीयुतं वासुदेवं
श्रीमन्नारायणपदयुगं संश्रिता वैष्णवाश्च ।
तत्त्वानि त्रीण्यपरपदवीलाञ्छितानीति चोक्त्वा
भक्त्या लभ्यं परमपुरुषं मन्वते सत्प्रपत्त्या ॥४४॥

एवं भक्तिं कतिचिदपरे ज्ञानमन्ये च कर्म
ध्यानं केचित् परिकलितधिया मोक्षहेतुं ब्रुवन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वेषां यन्मतमपि तथा तर्कशुद्धं विभाति
स्थैर्यं तस्मात् मनसि गलितं जायते मोक्षमार्गे ॥४५॥

यस्मात् स्रष्टा सकलजगतो रक्षिता त्वं तथान्ते
संहर्तापि प्रियजनमनः पद्मभानुर्महेशः ।
त्वामुज्झित्वा क इह भुवने सर्वविज्ञानमूलं
शङ्कापङ्कं विमलधिषणावारिभिः क्षालयेन्नः ॥४६॥

तस्मात् त्वां मे हृदयकमले पूजयाम्यात्मदीपं
ज्ञानान्ध्यं त्वं प्रहिणु किरणैः शुद्धबोधप्रभासैः ।
तत्त्वं ज्ञानं भवति सुतरां तत्त्वतो नास्ति भिन्नं
तत् तत्त्वं त्वं विलस हृदये सर्वशङ्का निवार्य ॥४७॥

अज्ञातं चेद् भवति महती नष्टिरित्याह वेदो
ज्ञातव्यं तत् कथमपि पुनर्मृत्युचक्रं बिभङ्क्तुम्।
मृत्योर्मृत्युं व्रजति मनुजो भेदबुद्ध्येति वेदो
ब्रह्मज्ञानी भवति परमं ब्रह्म चेत्याह सत्यम् ॥४८॥

त्वय्यध्यस्तं जगदिदमिति प्रोच्यते तत्त्वविद्भिः
किन्त्वध्यासः किमधिकरणो ज्ञायते नैव मोहात्।
ज्ञानं शुद्धं कथमिह भवेन्निर्विकल्पं पृथिव्यां
त्वज्ज्ञानं स्याद् सविषयमिह स्फारबुद्धेर्विचारे ॥४९॥

यावज्ज्ञानं तव न भवति स्थैर्यमात्मा न विन्देत्
साक्षात्कारे तव च महती प्रीतिरात्मन्युदीयात्।
ज्ञानाद् भक्तिः परमसुखदा भाविता तत्त्वविद्भि
स्तस्माद् याचे प्रहिणु मम भो मानसस्थं विमोहम् ॥५०॥

इत्थं भक्त्या मुकुलितकरो गद्गदार्तस्वरोऽयं
देवं नत्वा प्रशमितवचास्तन्मुखं द्रष्टुमैष्ट ।
यो लोकानां प्रणिधिविषयो नित्यरक्षैकदीक्षः
किं भक्तानां स्वविषयतमो नाशयेद् नैव देवः ॥५१॥

In public domain. Digitization Muthulakshmi Research Academy

उत्तरभागः

देवः पद्मं तदनु शशिनं राजमानास्यशोभस्
तत्तच्छोभातिशयवहानूर्जयन् संजहास ।
तावन्मात्रे सकलभुवनोद्दीप्तिगर्वोऽपि भानोः
साकं लोकप्रचिततमसा शीर्णतां तूर्णमाप ॥५२॥

शुद्धज्ञानोदयगिरिवरो यस्य काटाक्ष्यक्लेशा-
न्मूढो लोके भवति सहसा भक्तिमाश्रित्य शुद्धम्।
स्वः सम्राजो हसितममलं तस्य निःस्पर्धतेजः
स्वर्गङ्गाया रुचिरलहरीश्वेतिमानं जिगाय ॥५३॥

भक्तं प्रेम्णा परमकरुणापूर्णचित्तो विलोक्य
शास्त्रैर्भिन्नैर्गदितगहनं तत्त्वमाख्यातुकामः ।
नाडीः सर्वाः मधुरवचसोत्तेजयन् तस्य देवः
शास्त्रार्थं तं करतलगतं बोधयामास शिष्यम् ॥५४॥

एषा शङ्का हृदयमथनी बाधते त्वा नितान्तं
शास्त्रज्ञानग्रहणविषये मोक्षलाभे महोग्रा।
यानुद्धर्तुं भवति हृदये मामके तीव्रवाञ्छा
शङ्कां तेषां मनसि निदधे पूर्वसंस्काररुपाम् ॥५५॥

शङ्काग्रस्ताः कथमपि सुखं नाप्युवन्तः प्रकामं
तत्तन्मार्गान् स्वमतिकलितानाश्रयन्त्येव लोके।
तस्मात् भाग्ये फलति न चिरात् मार्गमासाद्य योग्यं
शङ्कानद्यास्तरणकुशला मोक्षसौख्यं लभन्ते ॥५६॥

नेयं शङ्का ग्रसतु हृदयं केवलं चोदयन्ती
लक्ष्याभावे मृदुतममनो भ्रामयन्ती च मोहात् ।
तस्माच्छङ्का प्रविशति यदा ते मनस्त्वं तदैव
शङ्कापङ्कापगमपरमो यत्नवान् सर्वदा स्याः ॥५७॥

In Public domain. Digitization Muthulakshmi Research Academy

एवं शास्त्रग्रहणपरमे मानसे ते सदर्थं
ज्ञानं शीघ्रं ह्यवतरति सुत त्राणमस्माद् भवेत्ते।
श्रद्धायुक्तः शृणु ममवचस्ते हितार्थं वदामि
प्रेष्ठस्त्वं मे भवसि हि यतो ज्ञानमाप्तुं तवेच्छा ॥५८॥

सृष्टिः

विश्वं व्याप्तं नयनविषयं भाति यावद् विचित्रं
दैव्याः शक्तेरतुलकलनावीचिरेतद्धि विद्धि ।
स्थूलात् सूक्ष्मं व्रजतु तव धीः सूक्ष्मतर्केण वत्स
स्पष्टं सृष्टेः क्रमगहनतां ज्ञास्यसि त्वं चिरेण ॥५९॥

सर्वं विश्वे ह्यणुततिरिति ज्ञातवांश्चेत्तदानीं
तेषां धर्माः क्रमश इह ते बुद्धिरूढाः भवेयुः ।
धर्मज्ञाने तव हि न चिराद्विश्ववैचित्र्यहेतु
र्दैवी शक्तिर्भवति धिषणासन्तता नास्ति शङ्का ॥६०॥

कीटाः खेटास्तनुतमतनुभृज्जीवकोटिश्च वत्स
वृक्षा वल्ल्यः सलिलमथवा मानवा वानरा वा ।
एकस्याणोर्बहुविधमुखं दर्शयन्तोऽथ विश्वे
शाक्तं क्षेत्रं जगदिति सदा बोधयन्ति स्थिरार्थम् ॥६१॥

कस्माज्जातो ह्यणुरिति पुनश्चिन्तिते गूढतत्त्वे
तस्यान्तस्ते विलसति मिथः शक्तिरुग्रा नटन्ती ।
सैषा शक्तिः प्रकटितकला भाति विश्वात्मनैवं
शक्तेर्लीलां कलय रमणीं विश्वसौन्दर्यरूपाम् ॥६२॥

हेतौ ज्ञातेऽपि च तव मतिर्नाप्य संतोषमन्तः
पृच्छेत्तस्याप्यनुपमगतेरर्थरूपं सदैव ।
कस्मान्नित्यं ह्यणुततिगतिः कस्य लीलाविनोदः
कस्यानन्दो विलसति सदा जीवरूपेण चेति ॥६३॥

Public domain. Digitization Muthulakshmi Research Academy

ज्ञातुं योग्यं जगति यदिदं भौतिकं त्वाणवं सत्
ज्ञाता शक्तिर्विमलचिदिति ज्ञायतां सूक्ष्मबुद्ध्या ।
विश्वं ज्ञानं भवति सदृशं ज्ञानहानौ न विश्वं
विश्वे नष्टे भवतु च कथं तस्य भानं कदापि ॥ ६४॥

विज्ञातारं कथमपि भवान् नैव शक्नोति वेत्तुम्
सर्वं यस्माद् भवति विदितं तत्कथं ज्ञायतां भो ।
इत्थं प्राहस्फुटतरवचः सत्तपःपुण्यपाकम्
आलोक्यान्तर्गहनगहनं वैदिकर्षिर्महात्मा ॥ ६५॥

दूरे ताराः ग्रहततिरपि ज्योतिषां संचयोऽपि ति ।
स्पष्टं दृष्ट्वा हृदयकुहरे मूलहेतोर्बुभुत्सा ।
नूनं जाता भवति विदुषां पूर्वसंस्कारदार्ढ्याद्
विश्वं वेत्तुं प्रभवति मुनिर्योगशक्त्योपदृब्धः ॥ ६६॥

यावद् भोग्यं कलयसि जगत्तावदेतद् विचित्रं
बुद्ध्यारूढं नयनविषयो मोहयेन्मूढबुद्धिम् ।
भोगेच्छा स्यात् प्रथमकरणं विश्ववैचित्र्यमूलं
याऽणून् व्यूढान् स्वरचितबलान् सङ्गतान् संविधत्ते ॥ ६७॥

आकाशेऽस्मिन् प्रथममनिलो जातवेदाः परस्तात्
तस्मादापस्तदनु धरणी व्यक्ततामाप्तवन्तः ।
आकाशोऽतो ब्रह्म परमं हीति वेदोक्तवाक्यं
यस्मात् सर्वं भवति चरमे लीनमाकाशानाम्नि ।।६८।।

जीवाः यूयं विविधतनुषु प्राप्य जन्मात्र नूनं
कार्मं तत्तत् फलमपि मनाङ् मानसं संप्रभुज्य ।
एतत् सत्यं भवति चरमं चेति विश्वस्य भूयो
भूयो मृत्योर्भवथ वशगाः सत्यमार्गात् प्रमत्ताः ॥ ६९॥

मां जानीथ स्फुटतममहः केवलं सर्वहेतुं
यं श्रित्वेदं जगदविकलं स्पन्दते सर्वदैव ।

In Public domain. Digitization Muthulakshmi Research Academy

दैवीं सत्तां श्रयथ परमां निर्मलां शान्तरूपां
चैत्तं मोहं त्यजथ विततं रूढमध्यासदार्ढ्यात् ॥७०॥

सृष्टेर्मूलं किमिति मनुजास्तत्त्वजिज्ञासयैह
प्रौढज्ञानाधिगमनविधौ कुर्वतेऽखर्वयत्नान् ।
केचित्तत्त्वेन सह भवितुं ह्येकतापूर्णसिद्धाः
ध्यानस्थैर्याहितविमलभावासनाश्चिन्वते च ॥७१॥

केचिद् भक्तेर्मधुरिमरताः प्रेममार्गं भजन्ते
केचित् कर्माखिलफलवहं मन्वते कर्ममार्गे ।
एवं भिन्नोऽपिच कुशलधीसेवितो मोक्षमार्गो
नूनं लक्ष्यं गमयितुमलं नैव शङ्काऽत्र कार्या ॥७२॥

एषा सृष्टिर्जगति विविधप्राणिनां मोक्षणार्थं
यस्माज्जीवा विविधजनुषां चक्रमध्ये भ्रमन्तः
तत्संस्कारोपचितफलदैः कर्मभिर्नुद्यमानाः
स्वात्मज्ञानात् तमसि विहते मुक्तिभाजो भवन्ति ॥७३॥

याऽहं देहे स्फुरति सततं भावना निर्विशेषा
सा नैव स्यात् परिणतिरथो भूतजातस्य वत्स ।
देहेनाथो करणततिना मानसेनाथवास्याः
प्राणैरैक्यं भवति सततं तेन तद्रूपमस्याः ।।७४।।

सेयं देहो न भवति यतो देहधृद् भावनेयं
धृत्वा सेत्थं करणनिचयं भिद्यते चेन्द्रियेभ्यः ।
भिन्ना हीयं भवति मनसो यत् सुषुप्तौ न दृष्टं
प्राणाः पञ्चाप्यनवरततः पोषयन्त्येवमेताम् ।।७५।।

शुद्धज्ञानं करणजनितं नैव, यस्माद् विनाशि
स्यादेतस्माद् विषयरहितं शुद्धमेतत् सदैव ।
एतद् भिन्नेन्द्रियगणगतं व्यज्यमानं परस्तात्
भिन्नामाख्यां भजति सततं ह्येकमेवान्ततोऽदः ॥७६॥

 domain. Digitization Muthulakshmi Research Academy

ज्ञानं केचित् परमविभु मद्रूपमित्यामनन्ति
जीवस्येदं गुण इति परे स्वं मतं स्थापयन्ति ।
रूपं वा स्याद् गुण इह न मे भेदलेशोऽपि यस्मात्
ज्ञानान्मुक्तिर्भवति सुलभा नान्यमार्गेण वत्स ॥७७॥

ज्ञातव्योऽहं विपुलमहिमा यादृशो यश्च यावान्
तेनात्यन्तं द्रवति हृदये भक्तिनिष्ठा हि शक्या ।
पश्चात् कर्मप्रचयमनुयन् लिप्यते नैव तेन
ध्यानं श्रेष्ठं मयि च विलयो सर्वभेदापहानौ ॥७८॥

आत्मा नास्तीत्यभिदधति ये नास्तिकाश्चारुवाच
स्तेन ग्राह्याः कलिहतधियो बुद्धिशक्तिं श्रिताश्च ।
काले प्राप्ते विकसितधियो योग्यतामाप्य तेऽपि
ज्ञानं मत्तः प्रभवति परं चेति जानन्ति सत्यम् ।।७९।।

आत्मा नास्तीत्यभिवदति यश्चिन्तनं नैव कुर्वन्
प्रत्याचष्टे कथमिति परां स्वात्मसत्तां विजानन् ।
अर्थं ज्ञात्वा प्रतिपदमपि क्षीणशङ्कः स्वयं सः
न ब्रूयात्तत् स्वमतिकलितं ह्यात्मतत्त्वं विजानन् ॥८०॥

प्रत्यक्षं मे प्रमितिकरणं नान्यदस्तीति वादो
न ग्राह्यः स्यात् पदजनितधीरूपतां संश्रयन् सः ।
आकाशाख्ये महति सकलं विश्वमेतद् विभाति
प्रत्याख्येयः कथमिह महान् सोऽपि चाकाशनामा ॥८१॥

तस्माद् बुद्धेः परिणतिमिमां विद्धि तत्तन्मताख्यां
चार्वाकाद्या भवति लसिता सेयमूर्ध्वाभिवक्त्रा ।
तस्माद् ज्ञात्वा कुसुमरुचिरां बुद्धिमेतां क्रमेण
ज्ञानारोहप्रचितधिषणस्त्वग्रयायी भव त्वम् ॥८२॥

आत्मा नष्टो भवति भुवने चेति वाचो ब्रुवाण
स्तत्तत्काले ह्यहमिति सदा भासमानं स्वरूपम् ।

In Public domain. Digitization Muthulakshmi Research Academy

त्यक्त्वोपाधीन् निरुपममहंप्रत्ययं वीक्षते चेत्
नष्टो ह्यात्मेतिवचन विषं नोद्वमेद् बुद्धियुक्तः ।।८३।।

शून्यं तत्त्वं वदतु मतिमान् शून्यबुद्ध्या प्रपश्यन्
विज्ञानं वा कथयतु परं सर्वमेतत् स्वबुद्धिः ।
शून्यं मत्त्वा कथमिह नराः प्राप्नुयुः शान्तिमग्र्यां
विज्ञानं चेद् भवतु भुवनं ज्ञानरूपं यतो हि ॥८४॥

विज्ञानेन क्षणिकमपि ये ज्ञातुमीशाः सुविज्ञाः
अन्ते शून्यं परमिति वचो ब्रूयुरेतन्न चित्रम्
एतन्मात्रे मतिकलुषिता नैव योग्या नराणां
तत्त्वज्ञाने विविधमनुजाः यत्नवन्तो भवन्ति ॥८५॥

आदौ भेदास्तदनु गलितस्पष्टभेदं जगद्धि
विज्ञानाख्यं लसति नितरां तत्परं शून्यमेव ।
एवं दृष्टे परिणतिविधां विद्धि लोकायतां भो
दृष्टिर्भिन्ना भवति परमं तत्त्वमस्त्येकमेव ॥८६॥

आत्माधीनां कलयति समां कश्चिदेतां हि सृष्टिं
तस्मादात्मोद्धरणविधौ यत्नवान् सर्वदाऽस्ते ।
तीक्ष्णैस्तैस्तैर्व्रतविततिभिः शोध्यते यस्य देह
स्तेनात्यन्तं भवति विमलस्तस्य चात्मा क्रमेण ॥८७॥

कामादीनां प्रबलतरसा वासनाः बद्धमूलाः
लक्ष्याद् दूरे परिहतधियं जीवमुद्वेजयन्ति ।
तस्मात्तासां प्रहननविधौ निष्ठया सेव्यमानाः
काले पक्वाः विहितनियमाः श्रेष्ठतां संव्रजन्ति ॥८८॥

बाह्यं तत्त्वं प्रकृतिरिति ये दृश्यजातं विशिष्य
द्रष्टा शुद्धो लसति पुरुषश्चेति सिद्धान्तमाहुः ।
सांख्यं तेषां मतमपि मनाग् दोषयुक्तं न भाव्यं
सृष्टिर्भिन्ना गुणततिकृता प्रोच्यते साङ्ख्यविद्भिः ॥८९॥

In Public domain. Digitization Muthulakshmi Research Academy

बुद्धिस्तावत्पुरुषमभितस्तत्प्रभाप्राप्तवृत्ति
भोगं तस्मै विविधकरणैः संप्रदत्ते सदैव ।
तस्याः हाने न खलु भविता भोगलेशोऽपि कश्चित्
मोक्षः सोऽयं प्रथितमहिमा वासनानां विनाशः ॥९०॥

बुद्धेस्तांस्तान् प्रजहि सततं वासनोत्थान् हि दोषान्
दोषापाये भवति विमला बुद्धिरत्यन्तमेव ।
पश्चात्तस्यां विमलमुकुरे बिम्बवत् सर्वतत्त्वं
भाति स्पष्टं जनिफलमिह द्योतयत् साधकानाम् ॥९१॥

बुद्धिश्चेतो मन इति महत्-तत्त्वमित्यत्र तत्तत्
कार्यं दृष्ट्वा बहुविधमिति प्रोच्यते साङ्ख्यशास्त्रे ।
सर्वा ह्येषा गुणपरिणतिर्मोक्षमुद्दिश्य यस्मात्
नित्योद्युक्ता पुरुषमभितो बुद्धिनिष्ठां भजस्व ॥९२॥

ज्ञानं बुद्धौ भवति विमलात् सन्निधेः पौरुषाद्धि
बुद्धेर्योगात् प्रतिफलति यज्जीवके स्पष्टभासम्।
एवं युक्तौ मतिपुरुषकौ दृश्य-द्रष्टृत्वसंज्ञां
लब्ध्वा सृष्टेः परमरचनां चालयन्तौ रमेते ॥९३॥

ज्ञानाज्ञाने च रतिविरती बुद्धिसाम्राज्यमेव
धर्माधर्मावपि च भवतो बुद्धितो जायमानौ ।
अज्ञानान्ध्यं जनयति ततो बुद्धिरेवात्र लोके
ज्ञानालोकप्रणिहततमः स्तोममेषा विधत्ते ॥९४॥

आत्मानं यो महति तपसि स्पष्टमीक्षेत विज्ञः
बुद्धेरात्मा पृथगिति ततो वेत्ति तत्त्वं नितान्तम् ।
आत्मा बुद्धेर्गुणपरिणतेर्नाप्नुते यत्प्रभावं
कैवल्याख्यां व्रजति परमां संस्थितिं योगयुक्तः ॥९५॥

पश्चानूनं व्रजति वदति स्पष्टबोधाञ्चितः सन्
पश्यत्यन्यान् हसति मनसा तिष्ठति क्षीणवृत्तिः ।

In Public domain. Digitization Muthulakshmi Research Academy

यावत्पातं लसति तनुभृत् पूर्वसंस्कारवेगात्
पश्चाद् देहं त्यजति विमलो लीलया कालकेलौ ॥९६॥

साक्षात्कारः परिणतधियां शास्त्ररूपं बिभर्ति
तस्मात् शास्त्रं भवतु भवतो मानदण्डो मुमुक्षोः ।
श्रद्धादीप्ते मनसि सहसा शास्त्रदीपप्रकाशो
रारज्यान्ते मनसि विततं हन्तिमोहं नराणाम् ॥९७॥

साङ्ख्ये प्रोक्तं प्रकृतिपुरुषौ सृष्टिमूलं सुयुक्तौ
तत्पार्थक्यस्फुटतममहो ज्ञानमेवास्ति शस्त्रम्।
यस्यां बुद्धौ प्रकृतिकलना नोपरक्ता तदानीं
कैवल्यं तत् विमलपुरुषे सत्यरूपं सदर्थम् ॥९८॥

सर्वेषां तन्न भवति नृणां जन्मना केवलेन
मोहो बुद्धिं कलुषयति तां च्छादयित्वा स्वरूपम् ।
तस्मान्मोहप्रणिहतधियां नैव् मोक्षो दवीयान्
नष्टे मोहे लसति सततं स्वात्मदीपो नितान्तम् ॥९९॥

कस्माज्ज्ञानं पुरुषहृदये जायते नैव साक्षा-
ज्ज्ञात्वा चान्ये कलुषितधियो दृश्यमानाः किमर्थम्।
इत्थं चिन्ता ग्रसति यदि ते मानसं तद्धि विद्धि
तत्तज्जन्माञ्चितपृथुबलाः वासनास्तत्र हेतुः ॥१००॥

चित्ते रूढास्त्वणुतरकलावासनाः सर्वसृष्टिं
बुद्ध्यारूढां कलयितुमलं वैपरीत्येन नित्यम्।
एवञ्चोच्चावचजगति ताः बन्धने पातयन्त्यो
मोक्षेप्सुं तं स्वहितकलनाद् वञ्चयन्ति प्रकामम् ॥१०१॥

यावच्चित्तं प्रगुणितबला वासनाः संभवन्ति
नष्टे चित्ते तदनु सहसा नष्टमूलाः भवन्ति ।
तस्माच्चित्तं प्रयतनशतैर्नष्टरूपं विधेहि
स्थैर्यं यस्माद् भवति नियतं चेतनाख्ये स्वरूपे ॥१०२॥

In Public domain. Digitization Muthulakshmi Research Academy

अष्टाङ्गाख्यां भज नियमतो योगमन्तर्मुखःसन्
बाह्येऽन्तस्त्वं भव सुविमलस्तेन दीप्ता भवेद्धीः ।
प्राणायामान् यमनियमकान् धारणाध्यानमार्गान्
प्रत्याहारान् कलय सततं श्रद्धया मोक्षमार्गे ॥ १०३ ॥

एकाग्रे स्वे मनसि विमले ध्येयतादात्म्यभाजि
स्थैर्यं नूनं करतलगतं साधकस्यात्मसिद्धौ ।
प्राणे वायौ चलति तरसा स्पन्दते चित्तबीजं
तस्मात् प्राणं नियतगतिकं योगमार्गेन कुर्याः ॥ १०४ ॥

पश्चाद् द्रष्टा त्वमिह हृदये सन्ततोत्थां नवीना
मानन्दाब्धेरुदितलहरीं पूर्णदेहे सरन्तीम् ।
एषा दिव्याह्यमृतपदवी स्पष्टसोपानकल्पा
बाह्यालम्बान भवति ततः सन्तता सन्ततं ते ॥ १०५ ॥

योगश्चित्तप्रखरपदवीः संनिरुध्यात्मरूपे
स्थातुं शस्तः परमदयया योगिदत्तो ह्युपायः ।
योगे मार्गे प्रविशति यः पूर्वपुण्यप्रणुन्न
स्तस्यात्यन्तं करतलगतः सर्वदुःखप्रणाशः ॥ १०६ ॥

तस्माच्चिन्तां जहिहि तरसा लक्ष्यसिद्ध्यै यतस्व
प्रोच्चैः शङ्काः प्रहिणु हृदयान्मोहमूलास्त्वरेण ।
नान्यच्छस्त्रं भवदहनहुतिविधौ योगतुल्यं कदाचित्
पूर्णात्मानं प्रकटयति यो मोहनाशेन नूनम् ॥ १०७ ॥

तत्त्वज्ञानन्त्वभिदधति ये गौतमीयेऽपि तन्त्रे
दुःखोच्छित्त्यै करणमिति तत् पाक्षिकं सत्यमेव ।
तर्काभ्यासे पटुतरमतिः शान्तिमाप्तुं न शक्तो
नूनं तस्मात् कलिहतगतिर्मोक्षमार्गेऽसमर्थः ॥ १०८ ॥

तत्तच्छास्त्रेष्वभिमततमं युक्तिजालं प्रसार्य
विस्पष्टार्थं गहनविषयं पण्डिताः कर्तुमीशाः ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मादादौ प्रतिपदगतं मानवं दोषजातं
विज्ञातुं तद् भवति करणं न्यायशास्त्रं प्रसिद्धम् ॥ १०९॥

भिन्नार्थानां विविधमनुजैः शास्त्रनाम्ना कृतानां
शब्दानां यद् भवति सहजं मानवं दोषजातम् ।
तस्योच्छित्त्यै प्रथमकरणं न्यायशास्त्रं भवेद्वा
तेनोन्मूढो भवति यदि ना नाप्नुते मोक्षद्वा ॥ ११०॥

काणादोत्थं ह्यपरमपि यद् भाति वैशेषिकाख्यं
शास्त्रं सूक्ष्मं गहनविषयं भौतिकं लोकरूढम्।
मोक्षे मार्गे न भवति तत् साधनं तर्कमूलं
ज्ञेयं सत्यं प्रतिपदमपि स्थैर्यमाप्तुं स्वरूपे ।।१११।।

मीमांसाख्ये महति भुवने शास्त्रवर्ये प्रसिद्धे
कर्मात्यन्तं महितमिति यत् सत्यमुक्तं बुधेन्द्रैः ।
तस्यार्थं त्वं निशितमतिना विद्धि सिद्धान्तरूपं
श्रद्धाराद्धं हृदयमलिनं हन्ति कर्माचिरेण ॥ ११२॥

सर्वेषां यन्मुकुटलसितं शास्त्रमद्वैतरत्नं
वेदान्तेषु स्फुटपदचयैः कीर्तितं तत् शृणुष्व ।
एकं सत्यं कलयति नरे नूनमाविर्भवेद् यत्
भेदापाये स्वयमपि परं भाति चाद्वैतरत्नम् ॥ ११३॥

ज्ञानस्यापि स्थिरफलमिति स्फष्टमुक्तं महद्भि
र्ध्याने साक्षात्कृतमपि हि यच्छब्दतो नैव वित्तम् ।
अद्वैतं तद् भवजलनिधौ मज्जतो मानवौघान्
त्रातुं शक्तं हृदयनिहितं श्रद्धया सेवमानम् ।।११४॥

द्वैतं सर्वं मनसि मलिने कल्पितं माययैव
ज्ञानान्माया भवति विमलान्नाशिता सा यदैव ।
अद्वैतात्मा विलसति तदा निर्विशेषः स्फुटाभः
तं सेवध्वं हृदयकमले मानवाः भक्तियुक्ताः ॥ ११५।।

In public domain. Digitization Muthulakshmi Research Academy

नूनं सत्यं हृदयमलिनान्नाप्नुते स्थयैभूमिं
भिन्नार्थेषु भ्रममपि जनाः प्राप्नुवन्तो भवन्ति ।
तस्मात् सत्याकलनसरणिं बोधयन्तः परेऽपि
द्वैताद्वैताद्यभिनवगतीर्दृष्टवन्तो हि ते ते ॥ ११६ ॥

यावज्जीवं जगदपि भवेत् सत्यमित्येव सत्यं
प्रोक्तं तैस्तैर्न भवति कदाप्यर्थबोधे तु हेयम् ।
सत्यं नो चेद् विविधनिगमा वर्णयेयुः किमर्थं
सत्यं नो चेद् भगवति कथं भक्तिभावो भवेत्ते ॥ ११७ ॥

तस्मात् सत्यं जगदपि तथा मन्यतां कार्यकाले
यावज्ज्ञानं भवतु च जगत् सत्यमित्येव सत्यम् ।
यस्य ज्ञानं भवति हि यदा तस्य सत्यत्वमस्तु
ब्रह्मज्ञाने भवति तदपि स्पष्टमेवास्तु सत्यम् ॥ ११८ ॥

यावद्भानं करणनिचयैः स्वीकृतं तत्तु सत्यं
तस्मिन् काले, तदनु च पुनर्नश्यमानं न सत्यम् ।
एवं सत्याकलनसरणौ निश्चितायां हि सत्यं
ब्रह्मात्यन्तं न तदितरदित्यर्थबोधो भवेत्ते ॥ ११९ ॥

यत्सत्यत्वे हृदयनिहिते लक्ष्यसिद्धिर्नराणां
तत्सत्यत्वं भवतु विहितं शास्त्रवृन्दैर्न चान्यत्।
सर्पभ्रान्तौ किमहिकलनातत्परा मानवास्ते
रज्जुज्ञाने व्यपगतभया नासते किं मनुष्याः ॥ १२० ॥

कोऽसौ सर्पः प्रविततफणः किं भवेद् दंशनेन
स्थैर्यं धृत्वा करणनिचयं त्वौषधं गृह्यतां भो ।
इत्थं कश्चिद् वदति मनुजो रज्जुमात्रे हि दृष्टे
नूनं मूढः स्वयमपि जनान् क्लेशयन् निन्द्यते सः ॥ १२१ ॥

एवं विद्याकलनमतयो मार्गनष्टा इवान्धाः
विद्वांसोऽपि स्फुटतरमहो मोहमावर्णयन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्माद् यस्मिन् हृदयकलनान्मोक्षमाहुर्बुधेन्द्रा
स्तस्मिन् ब्रह्मण्यविरतमहानन्दरूपे रमस्व ॥ १२२॥

त्यक्त्वा मोहं भज नरहरिं स्वात्मरूपं प्रशान्तं
यस्मिंश्चित्ते विशति सहसा भेदजातं प्रणष्टम् ।
आनन्दोऽहं न हि करणजं दुःखमित्याकलय्य
नित्यानन्दे भव विलसितो भेदपूगं प्रहिण्वन् ॥ १२३॥

विष्णुब्रह्मा सकलजगतां शङ्करो वासुदेवः
कृष्णो रामो विकटविपदां नाशको वा महेशः ।
रूद्रादित्यौ तदितरसुरा सर्व एवार्थतस्ते
शब्दा ब्रह्मत्वभिदधति ते मङ्गलात्मान एव ॥ १२४॥

लक्ष्मीर्विष्णुप्रियतमसती शारदा ब्रह्मपत्नी
शर्वाणी वा शिवहृदयरसा मङ्गलानां निदानम् ।
सर्वा एताः सकलभुवनव्याप्तशक्तेर्विकासः
प्रेष्ठं ब्रह्माभिनयति तथा विश्वरूपं सदैव ॥ १२५॥

इत्थं नित्यं कलय हृदये सत्यनिष्ठो नितान्तं
स्वान्तं शान्तं भवति न पुनस्ताम्यसे दुःखपूगैः ।
कर्मद्वारा मनसि विततं दोषजातं विनाश्य
ज्ञानान्मोक्षं कलयितुमलं भक्तियुक्तो मनुष्यः ॥ १२६॥

शब्दार्थानां विविधसरणी मुह्यमाना मनुष्याः
सत्यं शब्दैः स्फुरणविकलै व्यञ्जयेयुः कथं वा ।
तस्मात् सत्याकलनकरणं शब्दरूपं हि शास्त्रं
ज्ञात्वा शीघ्रं त्यज हृदयतो भक्तियुक्तो महेशे ॥ १२७॥

आदिश्येत्थं परमकरुणासिन्धुरूपे महेशे
भक्तायान्तर्हितवति दयास्वीकृते शब्दतत्त्वे ।
भिन्नाः सर्वे तदनु हृदयग्रन्थयस्तूर्णमेव
स्पष्टं शान्तं हृदयमभवद् भक्तवर्यस्य नूनम् ॥ १२८॥

In Public domain. Digitization Muthulakshmi Research Academy

कीदृक्पुण्यं मम हि पितरौ किं कियद् वा विशिष्टं
संपाद्यान्ते मनुजभुवने जन्म मे दृष्टवन्तौ ।
तस्मादीशो मम जनिफलं हस्तसात् संविधाय
शास्त्रार्थं मे करतलगतं दर्शयित्वाऽद्य तुष्टः ॥ १२९ ॥

नष्टो मोहः पुनरपि तमः स्तोमघातो न तुद्या
दुद्यज्ज्ञानप्रचितमहसा बोभवीम्यात्मनिष्ठः ।
यावत्पातं हृदयकमले भावयन्नात्मतत्त्वं
जोहृष्येऽहं च परमशिवे तत्कृपालालितात्मा ॥ १३० ॥

गाढध्यानस्फुटतरफलस्वच्छचित्ताब्जकोश-
नृत्यत्क्रीडाकलनमचिराद् ऐश्वरं वीक्ष्य भक्तः ।
मोमुद्यान्तनुतिशततीरीश्वरायार्पयित्वा
कञ्चित् कालं त्वनुभवसुधाप्लावितो नूनमासीत् ॥ १३१ ॥

इत्थं भक्त्या मुकुलितकरो देवदेवं प्रणम्य
शास्त्रौघार्थं विमलहृदये स्पष्टरूपं ददर्श ।
मोहान्ध्यार्कस्फुटतरमहः पूर्णमात्मानमग्रे
ध्यात्वा भक्त्या तदनु विमलं जीवनं स्वं निनाय ॥ १३२ ॥

॥ इति श्रीमधुसूदनपेन्नारचिता तत्त्वसुषमा समाप्ता ॥

***

In Public domain. Digitization Muthulakshmi Research Academy

नरमेधः

(दिल्लीतः अर्वाचीनसंस्कृतपत्रिकायां प्रकाशितम्)

क्रीस्तोः परं वर्षसहस्रयुग्मे गते कलेः पूर्णनवावतारे ।
सेप्तेंबराख्ये मलिने हि मासे हन्ता स्वजातेर्मनुजो बभूव ॥१॥

अमेरिकादेश-शिखायमानं न्यूयार्कनामास्ति पुरं प्रसिद्धम् ।
तत्रास्ति विश्वे प्रथितं महोच्चं वाणिज्यकेन्द्रं प्रविभासमानम् ॥२॥

ततो जगत्या विविधप्रदेशे वाणिज्यकार्यं तनुतेऽतिशीघ्रम् ।
अमेरिका-फान्स-जपान चीना ब्रिटन्-प्रधाने धरणीप्रदेशे ॥३॥

वाणिज्यकेन्द्रस्य विषाणयुग्मं हर्म्यद्वयं लोकमनोहरं तत् ।
अमेरिका देश-विलोचनं सद् – विश्वे प्रसिद्धं पुरतल्लजगत् ॥४॥

शताधिकाट्टाधिक शोभितं तद् वाणिज्यकेन्द्रं जनचित्तहारि ।
तत्पार्श्वहर्म्यान्तर-मध्यवर्ती विवृत्ततुण्डेन निरीक्षते ना ॥ ५ ॥

हर्म्यं तदारुह्य यदीक्षतेऽधो बृहन्ति यानानि कणायितानि ।
नराः समस्ताः परमाणुकल्पाः दृष्ट्वा भवेयुर्न हि तत्र शङ्का ॥६॥

विहङ्गमानां खलु मानहारि हर्म्यं तदाकाशतलान्तचुम्बि
देहेन ये नाकमभीप्सवस्ते नूनं तदारुह्य मुदा यतेरन् ॥७॥

सहस्रशस्तत्र जनाः स्वकार्ये निरन्तरं युक्तधियो रमन्ते ।
प्रान्तीय-भेदादि-विवक्षया ते नैवान्यकार्याणि विनाशयन्ति ॥८॥

ऐदंयुगीनं विविधं च तन्त्रं विकासमाप्तं भुवि तत्र सर्वम् ।
तान्त्रं विकासं समवेक्ष्य विश्वे स्थानं प्रधानं समदायि तस्मै ॥९॥

न्यूयार्कदेशस्य मणिर्महार्घस्तत्रस्थहर्म्येषु विराजमाप्य ।
हर्म्यं नराणां कुशलत्वसूचि तद्देश - संमान - विशेष - हेतुः ॥१०॥

सेप्तेंबर्मास-पूर्वार्धे दिने चैकादशे तथा ।
मानव्य - नव्य-विध्वंसे नरमेधोऽभवन्नवः ॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिन् दिनेऽप्यन्यदिनानुरूपं सूर्योदयोऽभूत् सकलार्तिहारी।
निद्रात उत्थाय विधाय वैधं जनः स्वकर्मस्वभियुक्त आसीत् ॥ १२॥

वाणिज्यकेन्द्रे विहितं स्वकर्म विधातुमेके गतवन्त आसन्।
तथाऽऽपरे भाग्यसुरक्षितास्तु गृहे स्वकीये स्थितवन्त आसन् ॥ १३॥

यानं तदा यात्रिकवृन्दयुक्तं वाणिज्यकेन्द्रस्य विषाणमेकम् ।
वेगेन गत्वा महता तदानीं महाग्निगोलं समघट्टयत् तत् ॥ १४॥

युगान्त-कालोत्थ- महाग्नितापस्फुटार्चिषा यानगताः प्रभीताः ।
उच्चै रूदद्भिः शलभायितं तैः क्षणेन मृत्युप्रविभीषणाग्नौ ॥ १५॥

कुतोऽयमग्निर्भयदार्चिषाऽऽवृत्तः पुरः क्षणादाविरभूद् युगान्तकः ।
विस्फोटनं किंनु किमन्यदत्र वै जातं भवेदेवमितीरितं जनैः ॥ १६॥

ततः पलायन्त जवेन केचिद् भयाद् युवानो महतोऽग्निकुण्डात्।
तथा न शक्ताः प्रपलायितुं ये भस्माभवंस्ते निमिषेण तत्र ॥ १७॥

केचित्तदा वह्निमहोग्रतापं सोढुं न शक्ताः शलभायमानाः ।
वातायनेभ्यः प्लवनेन भूमिं प्राप्यैव तूर्णं गगनं समीयुः ॥ १८॥

प्रत्यक्षमेवंविधमृत्युबाधां विलोक्य केचिद् भयमाप्य तीव्रम् ।
निरुद्धहृत्पीडन-कारणेन सद्यो विमुक्तिं मरणेन चापुः ॥ १९॥

तथा समक्षं मरणं विलोक्य घोरं भयात् केचन दिग्विमूढाः ।
हर्म्यान्तरादेव गवाक्षमार्गात् कूर्देन सद्यस्त्वलभन्त मुक्तिम् ॥ २०॥

जनं विलोक्य प्लवमानमेवं सर्वे प्रभीता रुरुदुर्महोग्रम् ।
सद्यो ज्वलन्वह्निमहोग्रकुण्डे प्रविश्य चकुर्मरणान्तकर्म ॥ २१॥

हाहाकाराः पादास्खलने सोपानाग्राद् भूमौ पतनम्।
जीवन्मरणं मृत्युस्फुरणं नश्यज्जीवन-रज्जुग्रहणम् ॥ २२॥

ज्वलत्सु देहेषु तदाऽतितापात् भ्रष्टं तदाऽसीद् भवनं समस्तम् ।
तदैव यानं त्वपरं तरस्वि द्वितीयहर्म्यं समघट्टयत् तत् ॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयमेतन्ननु मृत्युचक्षुर्युगान्त-कालानल-भीकरं सत् ।
तद्भीकरज्वालगुहान्तरान्तर्गताः क्षणे भस्म बभूवुरेके ॥२४॥

परे च जीवन्मरणोभयार्ताः स्वबुद्धिदृष्टां दिशमभ्यपप्तन् ।
तथाऽतिदुःखेन रुदद्भिरेवं हर्म्यं तु कोलाहलपूर्णमासीत् ॥२५॥

महोग्रतापेन यदा हि तस्य हर्म्यस्य लोहस्तरसा प्रदग्धः ।
भारं तदा तस्य विषोढुमुग्रं हर्म्यं त्वशक्तं भुवमाप वेगात् ॥२६॥

सहस्रशः प्राणपरीप्सया ये तदा समन्ताद् गतिमन्त आसन् ।
तेषां महद्दुःखवशेन भिन्नं हर्म्यं तदा भूमिगतं बभूव ॥२७॥

दुःखातिरेकेन जनान् विधाय स्वाङ्के यदा हर्म्ययुगं पपात।
तदैव भग्नानि भुवो मनश्च तद्देशमानश्च सतां मनश्च ॥२८॥

क्षणेन तत् स्थानमभूत् श्मशानं नाट्याङ्गणं मृत्युमहेश्वरस्य ।
स्वजाति-हत्याहित-दुष्टबुद्धिः कुर्यान्न किं मानवनाशनार्थम् ॥२९॥

तदोत्थितं घोररजस्तु तूर्णं तमः प्रकाण्डेन दिशः प्रलिम्पत् ।
सत्त्वं तु तत्पार्श्वगतस्य मुष्णत् न्यूयार्क-वाषिंग्टनमाप्तवत् तत् ॥३०॥

ग्रहान्तरेभ्यो भुवमेत्य कश्चिद् विनाशनं नैव करोति भूमेः ।
यद्वा ग्रहस्यैव विशीर्णखण्डः पृथ्वीं न घोरः प्रविघट्टयेत् नः ॥३१॥

परस्पर-द्वेष-मलीमसेन क्षीणप्रभा दर्शनशक्तिहीनाः ।
यावन्मतान्धाः नरमेधमेवं कुर्वन्ति तावन्न भवेत् प्रशान्तिः ॥३२॥

॥ इति श्रीमधुसूदनपेन्नारचितः नरमेधः समाप्तः ॥

***

In Public domain. Digitization Muthulakshmi Research Academy

काकदूतम्

(दिल्लीतः संस्कृतसंवादपत्रिकायां प्रकाशितम्)

कश्चिल्लोके विविधतनुभिः प्राणिभिर्धर्महीनैः
क्लिष्टं कर्म प्रणिहतधिया लक्ष्यशून्यैः सदैव।
कामाद् दुष्टैः क्रियत इति तत् वीक्ष्य सोद्विग्नचित्तः
तानुद्धर्तुं नियतकरणो ध्यानमग्नो बभूव ॥१॥

कस्माल्लोके भवति मनुजो धर्मदूरोऽतिदुष्टः
कस्माद् धर्मे पुनरपि मतिस्तस्य निष्ठां व्रजेच्च।
एकान्ते स्वां जनुषममलां कर्तुमीहेत कस्मात्
धर्मोच्छित्तौ कमिह शरणं याम धर्मस्य हेतोः ॥२॥

योऽयं देशो मुनिभिरमलैः शब्दरत्नैः प्रदीप्तो
ज्ञानादित्यप्रचितकिरणोद्धस्तमायाप्रभावः।
ज्ञाने नन्दन् सततमिनवत् काशमानो विरेजे
विज्ञानाभा-रत इति सदा भारताख्यां विधत्ते ॥३॥

सोऽयं संप्रत्यनुचलति धीप्राभवोन्मज्जनेन
पाश्चात्त्यानां सरणिमहहो दुःखहेतुं जनानाम्।
विस्मृत्यासौ व्रजति विपदामङ्कमालिङ्गनार्थं
मालां मत्वा प्रविततफणं सर्पमालिङ्गतीव ।।४।।

पूर्वैः सम्यङ् नियतमतिभिर्धीधनैर्मोनिवर्यै-
र्ध्याने साक्षात्कृतमिह महज्जन्मलक्ष्यं नराणाम्।
किं तत् प्राप्यं भवति मनुजैर्जीवने बुद्बुदाभे
स्वल्पे श्रेष्ठं कथमिह पुनः प्राप्यतां साधनेन ॥५॥

इत्थं चिन्ताव्यथितमनसा धार्मिके ध्यानमग्ने
तस्मिन् प्रेष्ठं फलमिव पुरस्तेजसां पुञ्ज आसीत् ।
वत्सात्यन्तं मम तु हृदयं जातमेतत्त्वदीयं
तस्मात् प्रेमाकुलितमनसा वच्मि तत् त्वं शृणुष्व॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

ध्याने वाक्यं हृदयतमसां नाशकं प्रीतिपूर्णं
श्रुत्वाऽत्यन्तं विवशकरणो गद्गदार्तस्वरः सन्।
धर्मी तूर्णं निजकरयुगं सम्पुटीकृत्य भक्त्या
श्रद्धापूर्णः क्षणमपि युगं मन्यमानोऽवतस्थे ॥७॥

श्रीमन् कस्त्वं कथमिह मयि प्रीतिमान् निर्गुणेऽपि
प्रज्ञातेजः किरणपटलैर्दीप्यमानोऽसि शुभ्रैः ।
आनन्दाब्धौ मम च हृदयं प्लावयित्वाऽद्य भूयो
निष्काण्डं त्वं वहसि सुदृढां प्रीतिमेवंविधेऽस्मिन्॥८॥

यस्माच्छङ्का तुदति न मनो मामकीनं त्विदानीं
तस्मान्मन्ये सकलभुवनप्रेरितारं भवन्तम् ।
त्वद्वाक्यं मे हृदयपटले देव पीयूषमेव
क्षेमं याचे जननमरणोद्वर्तिचक्रादमुष्मात्॥९॥

श्रुत्वाऽत्यन्तं प्रणयविवशो भक्तिलभ्यो हि देवः
कारुण्याब्धिर्नतजनमनःस्नेहसिंहासनस्थः।
नेत्राभ्यां स्वं हृदयममलं वर्षतीवामृतं स
प्रेष्ठं भक्तं मधुरवचनं प्रोचिवान् प्रेमपूर्णः॥१०॥

लोके वत्स क्षपितमलिना योगिवर्याः समाधौ
ज्ञातुं शक्ता यदपि भवते वच्मि तत् तत्त्वमारात्।
साध्यं सर्वं तपसि महिते साधिते पूर्वपुण्यै
स्तस्मात् सर्वे तप इति महच्छत्रमाराधयन्तु ॥११॥

वाक्यं कर्णामृतमिदमसौ तत्क्षणे सादरेण
स्तुत्वा देवं हृदयकमले स्थापयित्वा पुनश्च।
साक्षात् दण्डप्रणतिममलो हार्दिकीं भक्तिनम्रो
दैवायास्मै व्यतरदतुलां जन्मभाग्ये हि नन्दन्॥१२॥

जाग्रद्बुद्धिर्नयनयुगले स्फारिते वीतचिन्त
श्चक्रे यत्नं तपसि मलिनं चित्तजन्यं विहन्तुम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिन् मग्ने तपसि महिते स्वाश्रमे धार्मिके हि
क्षेमं कर्तुं त्रिभुवनपतिर्दूतमेकं ससर्ज॥ १३॥

का कः किं वा भवतिमिभयात् त्रातुमीष्टेऽत्र लोके
साध्यं हस्तामलकमिति को दर्शयेत्तत्त्वबोधे ।
इत्थं चिन्ताऽकुलितहृदये धार्मिके तस्य चिन्तां
दूरीकर्तुं मुनिवरपुरः काक एकोऽवतीर्णः ॥ १४॥

का का शब्दं श्रवणपरुषं तस्य रूक्षं निशम्य
ध्याने भग्ने हृदयमथवान्मौनिवर्योऽपि तूर्णम्।
उन्मील्याक्षिद्वयमपि मनाक् क्रोधयुक्तः पुरस्तात्
काकं दृष्ट्वा कथमयमिह प्राप्त इत्यास शान्तः ।। १५।।

नूनं दैवप्रहित इह मे दुःखहानाय काको
नाकं नेतुं मम हि वचनं सक्षमः प्रार्थनाख्यम्।
नूनं नाकस्थिरवसतयो देवताः पितृरूपा
यासामाशीर्वचनममृतं मर्त्यलोके नराणाम्।।१६।।

इत्थं मत्वा करयुगमसौ भक्तिनम्रश्च बद्ध्वा
काकं दृष्ट्वा निजसदनगं प्रोचिवान् सिद्धरूपम्।
काक त्वं मे पितृसदनतः प्राप्तवान् मामिदानीं
जीवातुस्त्वं नय मम वचःसारमेतं पितृभ्यः ।।१७।।

सत्यं ब्रूते श्रुतिरिह महल् लोककल्याणहेतो
र्लोके त्रीणि प्रमुखपदवीं धारयन्ते ऋणानि।
पित्रोराद्यं भवति महितं देहनिर्माणहेतो
स्तस्माद् देहं श्रुतिरपि वदत्याद्यधर्मप्रसूतिम्।।१८।।

देहं धृत्वा तदनु विविधां प्राप्नुते योग्यविद्यां
यस्मात् सोऽपि क्षपितमलिनो विन्दते क्षेममन्त्यम्।
प्राचीनर्षिर्भवति भुवने देवतुल्यो नराणां
तस्माल्लोके ऋषिऋणमितिप्रेक्ष्यतां तद् द्वितीयम् ॥ १९॥

In Public domain. Digitization Muthulakshmi Research Academy

यस्माद् देहं धरति मनुजो देवताशक्तियोगात्
तस्माद् दैवं भवति हि ऋणं मानवानां विशिष्टम्।
ऐकैकं यो विधिवदचलः श्रद्धया चोपकुर्यात्
मोक्षार्थं सो ह्यमलधिषणो योग्यतां संविधत्ते ॥२०॥

एवं ज्ञात्वा स्मृतिशतगतां वाचमेतामृणार्थां
जाने पित्रोः स्मरणमहिमा भूतले वागतीतः ।
पित्रोः पित्रोस्तदनु पितरावेवमाद्यन्तहीना
नित्या लोके लसति सरणिर्लोकभूतिं दधाना॥२१॥

पूर्वे धार्या हृदयकमले मानवानां विशिष्टा
येषां हेतोस्तनुरिह भुवि प्राप्यत क्षेमहेतोः।
त्वं हे काक प्रभवसि वचो मामकीनं पितृणां
साक्षान्नेतुं तदिह सदयं प्रार्थयेयं त्वदग्रे॥२२॥

रूपं दृष्ट्वा तव हि मनुजो मोहयुक्तः प्रकामं
कामं दूरे भवतु तव रे तेन ते कुत्र हानिः।
लोके भोज्यं यदपि मनुजोऽश्रद्धया संक्षिपेत् तत्
सम्यङ् नीत्वा क्षिपसि विपिने प्राणिनां भोजनार्थम् ॥२३॥

नो चेद् भुङ्क्षे मलिनमपि तत् न त्यजन् तस्य भागं
प्रक्षाल्यैव सकलपृथिवीं निर्मलां त्वं विधत्से।
कृष्णं रूपं परुषवचनं तावकं घोरनेत्रं
दृष्ट्वा श्रुत्वा भवति मनुजो नैव ते प्रेमिकोऽत्र॥२४॥

कीदृक् श्रेयस्तव हि करणात् जायते मानवानां
जानीते को हृदयमलिनान्मानवानां समाजे।
शुद्धिं कृत्वा विविधमलिनं क्षालयित्वा प्रकामं
काक त्वं मे लससि पुरतो धर्मदेवस्य दूतः ॥२५॥

धर्मोऽत्यन्तं मनुजभुवने कीर्त्यते श्रेयसे यो
बुद्धेः शुद्धेः प्रथमकरणं सो हि निःश्रेयसस्य ।

In Public domain. Digitization Muthulakshmi Research Academy

तादृक्कार्यं मनुज भुवने वायस त्वं करोषि
तस्मात् त्वं मे हृदयनिलयो धर्मदूतोऽसि मित्र॥ २६॥

शुद्धाशुद्धिप्रचितिरहितो मानवानां समाजे
त्यक्तं सर्वं वहसि मलिनं खादसि त्वं तथैव
अश्रान्तः सन् चरसि बहुशः काक देशे विविक्ते
जीवन्मुक्तेरनुपमदशां दर्शयन् गुप्तरूपम् ॥ २७॥

एकाक्षं त्वामसमनयनं क्रूरनेत्रं विलोक्य
हासोल्लासं वदनसहजं बुद्धिहीनो न रुन्ध्यात्।
मित्र त्वं मा कुरु मनसि तन्मानवानां विमोहं
पूजार्हः किं न भवति शिवस्तादृशोऽपीश्वरोऽत्र॥ २८॥

काकारूक्षं श्रवणपरुषं शब्दमाकर्ण्य लोके
त्तद्वस्तूत्क्षिपति मनुजो हन्तुकामः प्रकामम्।
काकाशब्दं वदति निगमोऽप्यर्थतत्त्वं विजानन्
का ते भ्रान्तिर्मनुज, विविधा लौकिकीति स्फुटार्थम्॥ २९॥

तस्मात् त्वं मे भवसि बहुशो मित्रवर्योऽत्र लोके
न त्वां मन्ये विगुणमहहो धर्मदूतं पितृणाम्।
संदेशं मे नय करुणया पूर्वजानां पुरस्तात्
काचिच्छान्तिर्भवतु हृदये मामकीनेऽपि मित्र ॥ ३०॥

तेषामाशीःफलमिव महज्जीवनं प्राप्तमेतद्
धर्म्यं मत्वा निगमवचनेष्वात्तबुद्धिः प्रकामम्।
यावद् देहं स्थिरकरणगं तावदेतान् स्मरन् वै
धर्मादित्यप्रखरकिरणान् ज्ञानरूपान् वसेयम्।।३१।।

नोचेन्मृत्युः कमिह मनुजं त्यक्तुकामोऽस्ति मित्र
क्षीणोत्साहं ग्रसति विदयो मृत्युरत्रैव सर्वम्।
मृत्योः पाशादवितुममलं ज्ञानमेकं हि शस्त्रं
प्राप्तुं तन्मे भवतु सततं श्रद्धया सर्वयत्नः॥ ३२॥

In Public domain. Digitization Muthulakshmi Research Academy

श्राद्धे काले दधति पितरो मानसं तत्स्वधार्थं
वर्षे दत्तं लवमपि महन्मन्यमानाः प्रतृप्ताः ।
तस्माद् याचे मुहुरपि मनःशुद्धिमस्मत्पितृभ्यः
श्रद्धा भूयो मम भवतु या सर्वसौभाग्यहेतुः ॥३३॥

श्रद्धामूलां वदति निगमःसर्वसम्पत्प्रसूतिं
श्रद्धायोगेऽप्यतुलमहिमा कीर्तिता योगिवर्यैः।
योगे सिद्धिर्भवति सुलभा श्रद्धया सेविते हि
तस्माच्छ्रद्धां दधतु पितरो मय्यनन्तां सुधाभाम्॥३४॥

यो यच्छ्रद्धो भवति मनुजस्तन्मयः प्रोच्यते स
क्षेत्रे श्रद्धा कलुषितमनः कारणं शास्त्रसिद्धम्।
क्षेत्रज्ञे चेदपनयति तन्मानसं कल्मषं सा
मोक्षार्थं सा परमपुरुषे श्लाघ्यते देवदेवे॥३५॥

श्रद्धायोगप्रदलिततमः स्तोमतो मानवानां
प्रज्ञावृद्धिर्भवति भवजं दुःखपूगं विदीर्य ।
यस्यात्यन्तं निशितधिषणा तस्य तत्त्वप्रबोधो
मूढप्रज्ञो न भवति महत्तत्त्वबोधे प्रयुक्तः ॥३६॥

स्वर्गे सौख्यं खलु बहुविधं प्राप्य पुण्ये प्रणष्टे
लोके मर्त्ये पुनरपि नरो जायते कर्म भोक्तुम्।
एवं कर्म प्रभवति नरं मर्त्यलोके प्रबन्धुं
किं वा मोक्षे प्रभवति मनः शुद्धिमाधाय नेतुम् ।।३७।।

तस्मात् कर्म प्रथमकरणं प्रोच्यते चित्तशुद्धौ
शुद्धीकृत्य स्वयमपि पुनर्नष्टशक्ति स्फुरेन्न।
जातप्रज्ञः परिणतमतिर्ज्ञातुमीष्टे हि तत्त्वं
तस्माद् भक्तिर्हृदयकमले जायते देवदेवे ॥ ३८॥

ज्ञानाद् भक्तिः क्वचिदिह भवेद् भक्तितो ज्ञानमेवं
कस्मात् किं स्यादिति हृदयगा पीडयेद् भूरि शङ्का ।

In Public domain. Digitization Muthulakshmi Research Academy

सेयं मोघं तुदति विफला दूरतो मित्र हेया
ज्ञानं भक्तिर्मिथ इह युते मोक्षहेतुर्न शङ्का॥ ३९॥

मित्र प्रीतिस्त्वयि मम परां कोटिमेत्यद्य नूनं
यस्मात् त्वं मे हृदयकुहरे वर्तमानं हि वेत्सि।
नीत्वा प्रेम्णा कथय च पितॄन् तर्पयेथा नितान्तं
दृष्ट्वा त्वां ते नयनसुभगं हर्षसीमां न विद्युः ॥४०॥

त्वामाश्रित्य प्रियतमतनुं भुञ्जते श्राद्धकाले
दत्तं पिण्डं सजलनयनास्ते हि पूर्वे प्रहृष्टाः ।
पूर्वं जातं स्मरति मनुजो यः सदा श्रद्धयैव
प्रेम्णा तस्मात् विकिरति तिलान् बद्धनिष्ठः पितृभ्यः ॥४१॥

धर्मोऽयं नः स्थिर इति पुरा शास्त्ररत्नेषु चोक्तं
स्मृत्वा सर्वे विदधतु शुभं यत्नमस्मिन् मनुष्याः ।
धर्मायत्तं सुखमिति महत् तत्त्वमाख्याति वर्यो
व्यासः पूज्यो विदितहृदयो धर्ममातुर्वयस्य ॥४२॥

देशस्येदं भविकमिति मे भाति मित्रात्र नूनं
जातं देशे यदिह परमं शास्त्रजातं वरिष्ठम्।
वेदाः साङ्गा मनुजनिलये जीवनं सार्थयित्वा
शान्तिं सौख्यं प्रददति ततो मोक्षमेवंविधास्ते ॥४३॥

वेदान्तेषु क्षपितमलिनो जीवने ह्यात्मतत्त्वं
ज्ञातुं शक्तो भवति परमं प्राप्तुमित्युक्तमेव ।
गीता माताऽप्यमितदयया जीवनस्यान्तरार्थं
स्पष्टं ब्रूते प्रणिहितधियां वाक्यपुष्पैर्विशिष्टैः॥४४॥

अस्माँस्त्रातुं भवति बहुधा निर्मितं शास्त्रजातं
देशेऽस्मिंस्तत् क्षपयति तमो बोधदीपेन मित्र।
अत्रोत्पन्नाः निशितमतयो ज्ञानमात्रेन तृप्ता
ज्ञानं दातुं विमलहृदयेषूत्सहन्ते सदैव॥४५॥

In Public domain. Digitization Muthulakshmi Research Academy

यावच्छास्त्रं लसति भुवने तावदेवास्ति सौख्यं
तन्नास्माकं हितमिह परं शास्त्रशून्ये हि लोके ।
वारं वारं वदितुममलं वाक्यमेतत् पितृभ्यो
जिह्वोत्साहं भजति मम हे मित्र सत्यं ब्रवीमि ॥४६॥

प्राचीं श्रित्वा दिशमिह रवौ दीप्यमानेऽपि देवे
यस्योद्वद्धं नयनयुगलं तस्य न स्यात् प्रकाशः।
एवं शास्त्रे विलसति परं बोधदीपे प्रजानां
श्रद्धालोपस्तिरयतितमां चक्षुराहत्य शर्म॥४७॥

तस्माद् याचे तव हि मुखतो मित्र पितृन् सदैव
श्रद्धामिद्धां हृदयकुहरे दीपकल्पां जनानाम्।
श्रेयः सर्वं विनिहितमिहक्षेमहेतौ सदर्थं
श्रद्धायां तद् भवतु हृदये बद्धमूला सदैव ॥४८॥

श्रुत्वा काको वलितनयनो वाक्यमेतत् प्रियार्थं
काकेत्युच्चैः श्रवणमधुरं तस्य कर्णे रुराव ।
ओमित्येतद् हृदयपटले धारयन् संप्रहृष्टो
लक्ष्यं सिद्धं ह्यमनुत महत् साधको भक्तियुक्तः।।४९।।

दृष्ट्वा तं ते भवतु सफला कामना धर्मसिद्धौ
श्रद्धां तीव्रां ददतु पितरस्ते हि वर्या जनेभ्यः ।
यास्याम्यात्मोन्नतिगतिमितो धर्मदेवस्य लोकं
संदेशं ते प्रतिपदसुधं श्रावयिष्ये पितृभ्यः ॥ ५० ॥

एवं दृष्टिं सहजकुटिलां सारयित्वा स काकः
शान्तस्तस्मिन् मुकुलितकरे साधके धर्मलक्ष्ये।
पक्षाभ्यां स्वां तनुमिह धरन् धर्महेतोः क्षणेन
प्रीतःस्फीतार्चिषमनु दिशं दक्षिणां सोऽजगाम॥५१॥

॥ इति मधुसूदनपेन्नारचितं काकदूतम् समाप्तम्॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसूत्रसारः

(हैदराबादतः संस्कृतपरिषदा प्रकाशितः)

श्रीगायत्रीप्रसादेन यत्किञ्चित् प्रोच्यते मया ।
गुणस्संगृह्यतां तस्माद् गुणदोषविवेकिभिः ॥१॥

दृश्यमानस्य लोकस्य प्रधानं कारणं मतम् ।
क्षेत्रक्षेत्रज्ञसंयोगः प्रोक्तोऽयं सांख्यदर्शने ॥२॥

सांख्यदर्शने प्रोक्त अयं क्षेत्रक्षेत्रज्ञसंयोगः दृश्यमानस्य लोकस्य प्रधानं कारणं मतम् । 'पङ्गन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः' इतीदं साख्यकारिकावाक्यमत्र प्रमाणम्।

प्रकृतेः क्षेत्रसंज्ञा सयात् पुमान् क्षेत्रज्ञ उच्यते ।
प्रकृत्या तस्य संयोगाल्लोकोऽयं सृज्यते सदा ॥३॥

साम्यावस्था गुणानां या प्रकृतिस्सा खलूच्यते ।
सत्त्वंरजस्तमांस्येते कार्यतो हि गुणास्त्रयः ॥४॥

सत्त्वं, रजः, तम इति त्रयो गुणाः । तेषां साम्यावस्थैव प्रकृतिरित्युच्यते । सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरिति वाचस्पतिमिश्राः ।

बुद्धिस्तत्प्रथमा सृष्टिर्द्वितीया स्यादहङ्कृतिः ।
अहङ्कारसमुत्पन्नं तन्मात्रं भूतकारणम् ॥५॥

प्रकृतेः प्रथमा सृष्टिर्महदिति कथिता बुद्धिः । द्वितीया सृष्टिरहङ्कारः । अस्मादेवाहङ्कारात् भूतानां कारणानि तन्मात्राणि समुत्पन्नानि ।

इन्द्रियाणि दशैकञ्च विकारोऽहङ्कृतस्तथा ।
प्रधानो यो गुणस्तस्मिन्नहङ्कारे स तत्परः ॥६॥

प्रधानं वैकृते सत्त्वं तैजसे रज उच्चते ।
तमस्तु तामसे मुख्यं संज्ञा ज्ञेया हि कार्यतः ॥७॥

In Public domain. Digitization Muthulakshmi Research Academy

एकादशेन्द्रियाणि चाहङ्कारस्यैव विकारः । तथाहि यो गुणः अहङ्कारे प्रधानः स अहङ्कारः तत्पर एव भवति । वैकऽताहङ्कार सत्त्वगुणः, तैजसाहङ्कारे रजोगणुः, तामसाहङ्कार च तमोगुणश्च प्रधानाः । एवं कार्यत एव संज्ञा ज्ञातव्या ।

ज्ञानेन्द्रियाणि पञ्चैव कर्मेन्द्रियाणि पञ्च च ।
अहङ्कारस्य कार्यं तन्मनासं चान्तरिन्द्रियम् ॥८॥

चक्षुः, श्रोत्रं, जिह्वा, घ्राणं, त्वक् इत्येतानि ज्ञानेन्द्रियाणि पञ्च । एवं वाक्, पाणिः, पादः, पायुः, उपस्थः इत्येतानि पञ्च कर्मेन्द्रियाणि । मनश्चान्तरिन्द्रियम्।

इत्थमेकादशेन्द्रियाणि तैजसाहङ्कारसहकृतसात्त्विकाहरात् समुत्पाद्यन्ते। पञ्चविंशतितमा सांख्यकारिका गौडपादभाष्यसहिता द्रष्टव्या ।

अहङ्कारो महत् चित्तं मनश्चत्वारि दर्शने ।
अन्तःकरणमित्येकं लभन्ते नाम कार्यतः ॥ ९ ॥

एकमेवान्तःकरणं वृत्तिभेदात् - अहङ्कारो, महत्, चित्तं, मन-इति दर्शने कथ्यते । योगदर्शने तु वृत्तिभेदात् त्रैविध्यं महदहङ्कारमनः स्वरुपमेव प्रसिद्धम् । न तु चातुर्विध्यम्। चित्तस्य चात्र मते महति बुद्ध्यपरपर्याये प्रवेश इति विज्ञानभिक्षुवाक्यमत्र द्रष्टव्यम् । (सांख्यप्रवचनभाष्यम्)

वैविध्यं दृश्यते कार्ये चैकत्वं करणे तथा ।
कार्यं सर्वं विनिष्पन्नं कारणादेव तत्त्वतः ॥१०॥

प्रधानस्य हि कार्यत्वात् मनस्त्रैगुण्यमीर्यते ।
गुणानाम्मानसे तस्मात् वृत्त्याख्यं कर्म दृश्यते ॥११॥

त्रिगुणात्मकात् प्रधानान्निष्पन्नं मनोऽपि त्रिगुणात्मकं भवति । कारणगुणाः कार्यगुणानारभन्त इति न्यायः । अत एव मनसि गुणानां वृत्त्याख्यं कर्म दृश्यते ।

ययेदं धार्यते चित्तं तत्सत्त्वं ज्ञायते यया ।
ज्ञेया सा चित्तवृत्तिस्तु सर्वा ब्राह्मणवृत्तिवत् ॥१२॥

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

यैः प्रमाणादिलक्षणव्यापारैः चित्तं जीवति त तद्वृत्तय उच्चन्ते द्विजानां याजनादिवत्।' इति विज्ञानभिक्षुणोक्तं वाक्यमत्र प्रमाणम् (१-५) वृत्त्यैव चित्त्वसत्त्वं इत्यत्र ज्ञेयम् । अत एव वृत्तिषु गृहीतासु चित्तमपि निगृह्यते।

असंख्येया हि चित्तस्य वृत्तयः परिकीर्तिताः ।
एकत्र गणने पञ्च वृत्तयः शक्तिसंज्ञकाः ॥ १३॥

प्रमाणं प्रथमा वृत्तिर्द्वितीया तु विपर्ययः ।
विकल्पाख्या तृतीया स्यान्निद्राऽन्या स्मृतिपञ्चमी ॥ १४॥

यथार्थानुभवः शास्त्रे प्रमेति कथ्यते बुधैः ।
प्रमायाश्च प्रमाणं तत्करणं शास्त्रकीर्तितम् ॥ १५॥

प्रत्यक्षमनुमानञ्च शब्दस्तत्त्वविनिर्णये ।
त्रयमेतत्प्रमाणं स्यात् सर्वं तेनैव साध्यते ॥ १६॥

युक्ताभ्यामिन्द्रियार्थाभ्यां जायमाना प्रमा ग्रहः ।
प्रत्यक्षं तत्प्रमाणं स्यादनुमानस्य कारणम् ॥ १७॥

'प्रमेयसिद्धिः प्रमाणाद्धि' इति न्यायमनुसृत्य योगदर्शने प्रमाणत्रयमङ्गीक्रियते। प्रत्यक्षं, अनुमानं, शब्दः इति प्रमाणत्रयेण योगदर्शने तत्त्वनिर्णये सर्वं साध्यते। इन्द्रियं यदा विषयेण सह सम्बद्धं भवति तदा जायमानं ज्ञानं तत्करणमपि प्रत्यक्षम्। अनुमानमपि प्रत्यक्षमेवाधारीकृत्य प्रवर्तते ।

वर्तमानेन सम्बन्धाद् वृत्तवर्तिष्यमाणयोः ।
ज्ञानं यज्जायते तत्र ह्यनुमानं प्रमाणकम् ॥ १८॥
लिङ्गाद्व्याप्तिमतो ज्ञानं लिङ्गिनो जायते यदा ।
प्रमा साऽनुमितिस्तत्र ह्यनुमानं च कारणम् ॥ १९॥

नियतसाहचर्यकात् लिङ्गात् यदा लिङ्गिनो ज्ञानं जायते तत्र 'अनुमितिः' प्रमा। अनुमानं प्रमाणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

यथार्थदर्शिनो वाक्यं प्रमाणं निश्चयात्मकम् ।
वेदाः वृद्धाश्च विज्ञेयाः प्रमाणं तत्त्वनिर्णये ॥२०॥

अतद्रूपप्रतिष्ठं यज्ज्ञानं सत्यत्ववर्जितम् ।
अविद्याख्यं भवेद्योगे संज्ञा तस्य विपर्ययः ॥२१॥

ज्ञानस्वरूपे अप्रतिष्ठं मिथ्यात्वगर्भितं ज्ञानं योगे विपर्यय इति कथ्यते। अविद्यापरपर्यायः ।

वृत्तिर्या वस्तुशून्यत्त्वे शब्दज्ञानानुपातिनी।
विकल्प इति विख्याता ज्ञेया सा योगदर्शने ॥२२॥

जाग्रद् वृत्तिस्तथा वृत्तिः स्वप्निकी तमसा यादा।
अभिभूते भवेतां सा वृत्तिर्निद्रेति कथ्यते ॥२३॥

अभावश्चान्यवृत्तीनां तामसो जायते तदा ।
मलिना चित्तसत्त्वस्य वृत्तिर्निद्रेति कीर्तिता ॥२४॥

निद्राया वृत्तिरूपत्त्वं स्मरणादेव बुध्यते ।
जागर्यां यादृशी दृष्टा स्मृतिर्निद्रा च तादृशी ॥२५॥

विना वृत्तिं कथं ज्ञानं ज्ञानाभावे कथं स्मृतिः।
तस्मान्निद्रा भवद् वृत्तिः जागर्यां स्मृतिसत्त्वतः ॥२६॥

जाग्रत्स्वप्नवृत्ती यदा तमसा मोहकारिणाऽभिभूयेते, वृत्त्यन्तराणां तामसेऽभावेजाते तदा चित्तस्य सद्वृत्तिरुपिणी मलिना वृत्तिः 'निद्रा इति कथ्यते । जाग्रदवस्थायां निद्राया अनन्तरं यादृशी स्मृतिः जायते ज्ञातव्या। स्मृतिरनुभवाधीना, अनुभवश्च वृत्यधीनः। अतः निद्रा चित्तवृत्तिः ।

गृहीतग्राहिणी वृत्तिश्चित्तस्य स्मृतिरुच्यते ।
ऊना स्यादनुभूतेस्सा नाधिका तु कदाचन ॥२७॥

 Public domain. Digitization Muthulakshmi Research Academy

या चित्तवृत्तिः गृहीतमेव विषयं गृह्णाति सा 'स्मृति' रिति कथ्यते। अनुभवे यावान् विषयः तस्मादनधिक विषया वृत्तिरित्यर्थः । यावन्तं विषयमनुभवामः, तावन्तं, न्यूनं वा स्मरामः न तु तदधिकम् ।

गृहीतग्रहिणीत्युक्ते दोषस्स्याल्लक्षणे तथा ।
ज्ञाने चानुगताकारे ह्यतिव्याप्तिः प्रसज्यते ॥२८॥

अतिव्याप्तिर्न वा तस्मिन् लक्षणे भिन्नरूपतः ।
ज्ञाने चानुगताकारे तदूनो विषयो न हि ॥२९॥

"घटः, घटः, घटः' इत्येकवस्तुविषयकज्ञानेऽपि गृहीतग्राहित्वमस्तीति 'अतिव्याप्तिप्रसङ्गः' । परन्तु ज्ञाने चास्मिन् पूर्वगृहीतविषयादूनो विषयो न भवति । स्मृतौ तु विषयः 'अनुभवविषयादनधिकविषय' अतो न तत्राव्यिप्तिरिति योगसिद्धान्त-चन्द्रिकाऽत्रानुसन्धेया।

वृत्तिभिस्सह चित्तस्य निरोधो योग उच्यते ।
योगस्समाधिनामाऽसौ 'राजयोग' इतीर्यते ॥३०॥

द्विविधोऽयं समाधिश्च ध्येयमालम्ब्य भिद्यते ।
सम्प्रज्ञातस्तु पूर्वस्स्यादसम्प्रज्ञस्तथाऽपरः ॥३१॥

योगस्समाधिस्समापत्तिरित्यनर्थान्तरम्। ध्येयमालम्ब्यायं समाधि-र्द्विधा भवति। सम्प्रज्ञातसमाधिः प्रथमः, असम्प्रज्ञातश्च द्वितीयः ।

यदा ध्येयं प्रविज्ञातं समाधौ चित्तरोधतः ।
सम्प्रज्ञातस्तदा ज्ञेयस्समाधिस्स चतुर्विधः ॥३२॥

सवितर्कविचारौ द्वौ सानन्दसास्मितौ तथा ।
सम्प्रज्ञातस्य चत्वारो भेदा योगे प्रकीतिताः ॥३३॥

यस्मिन् समाधौ ध्येयं वस्तु सम्यक् विज्ञायते स समाधिः 'सम्प्रज्ञात' इति कथ्यते । सवितर्कसमाधिः, सविचारसमाधिः, सानन्दसमाधिः,

सास्मितासमाधिरिति चत्वारोऽस्य भेदाः ।

In Public domain. Digitization Muthulakshmi Research Academy

चित्स्यालम्बनं स्थूलं वितर्के पाञ्चभौतिकम् ।
सविचारे तथा सूक्ष्मं तन्मात्रं भूतकारणम् ॥३४॥

यदा चित्तं पाञ्चभौतिकं स्थूलमालम्ब समाहितं भवति तदा स समाधिः 'सवितर्क' नामकः । यदा च सूक्ष्मं तन्मात्रादिकमालम्बते तदा 'सविचार' नामकः ।

ग्राह्योऽयं विषयो योगे प्रथमश्चित्तनिग्रहे ।
सानन्दसास्मितौ पश्चात् भैदौ ग्रहणपूर्वकौ ॥३५॥

एकीभावो यदा बुद्धेर्ग्रहीत्रा पुरुषेण च ।
अस्मिता स समाधिस्स्यात् पुरुषो विषयस्तदा ॥३६॥

सत्तवप्रकर्षहेतोस्तु साक्षात्कारः प्रजायते ।
आह्लादस्य यदा ज्ञेयस्सानन्दो हि तदा स्फटः ॥३७।।

यदा बुद्धिः ग्रहीत्रा पुरुषेण सहैकीभावमाप्नोतिः स समाधिस्मामिता नामकः । एकात्मिका संविदस्मितेति भाष्यम् । अस्मि इत्येतावन्मात्राकारात्वादस्मिता इत्यर्थः । सत्तवप्रकर्षेण जायमानस्य आह्लादस्य साक्षात्कारः 'सानन्दः'। अयमानन्दश्चित्तधर्म एवेति व्याख्यातारः ।

यदा ताः वृत्तस्सर्वाविरामं यान्ति सर्वशः।
संस्कारश्शिष्यते योगे चित्तस्यानन्यगामिनः ॥३८॥

वैराग्यं हि परं हेतुसमाधेर्यस्य विद्यते।
असम्पप्रज्ञातनामाऽसौ समाधिः काशते तदा ॥३९ ॥

यतो ध्येयार्थशून्योऽयं वस्तुशून्यत्तवमाश्रितः ।
अतोऽस्मिन् ध्येयवैराग्यं समाधी कारणं मतम् ॥४०॥

सर्ववृत्तिनिरोधे यदा केवलसंस्कारश्शिष्यते तदा 'अस्मप्रज्ञात' समाधिः अपरवैराग्यं, परवैराम्यमिति वैराग्यं द्विविधम् तत्र स्त्रयन्नपानादिषु दृष्टेषु स्वर्गादिषु च वैतृष्णूयम् प्रथमम्। गुणस्याशेषव्यवहारेषु तृष्णाविरोधिनी वृत्तिः परं श्रेष्ठं वैराण्या परवैराग्येन चित्तनिरोधस्ततस्त्रायत्तवपुरुषयोः शुद्धिसाम्ये कैवल्यम् (३-५५)

In Public domain. Digitization Muthulakshmi Research Academy

योगेन योगो ज्ञातव्य इत्युक्तं योगितल्लेजैः ।
प्रथमेन तथा चान्यो ज्ञेयो योगस्तथा शनैः ॥४१॥

सम्प्रज्ञातयोगेन शनैरसम्प्रज्ञातयोगो ज्ञातव्य इत्यर्थः ।

उपायप्रत्ययस्यसाध्यो योगश्श्रद्धादिकारणैः ।
मुमुक्षूणामयं ग्राह्यो विशेषाद्राजयोगिनाम् ॥४२॥

श्रद्धा, वीर्य, स्मृतिः, समाधिः, प्रज्ञा-इति श्रद्धादिकारणमाह । पूर्वपूर्वस्य तदनन्तरजनकतथा कैवल्यकारणत्वम् ।

जन्ममात्रादसम्प्रस्समाधिस्सुलभो न हि ।
तस्माद्देवमनुष्याणां नूनं श्रद्धादिराहितः ॥ ४३ ॥

भवहेतुर्विदेहानामषाङ्कौशिकदेहिनाम्।
प्रकृत्यां लीयमानानां समाधिस्सैव कथ्यते ॥४४॥

अविद्यैव भवस्यार्थो ज्ञेया मिथ्यात्मिका हि सा।
अस्य मूलं यतोऽविद्या योगस्यातो हि हेयता ॥४५॥

असंप्रज्ञातो द्विविध :- उपायप्रत्ययो भवप्रत्ययश्च । मुमुक्षूणा-मुपायप्रत्ययः पूर्वोक्तः, द्वितीयो भवप्रत्ययः अविद्याहेतुकः विदेहानां प्रकृतिलयानाञ्च । मांसशोणित-लोममेदोऽस्थिमज्जारूपषाङ्कौशिकदेहरहिता विदेहाः पिण्डपातानन्तरं भूतेन्द्रियेषु लीनाः। अव्यक्त-महदहङ्कार-पञ्चतन्मात्राणाम् अन्यतमम् आत्मत्वेन प्रतिपन्नाः तदुपासनया पिण्डपातानन्तरं प्रकृत्यादिकारणेषु लीनाः प्रकृतिलयाः। भवप्रत्ययासम्प्रज्ञातसमाधेरविद्या मूलामिति स त्याज्यः ।

समाधिस्सुखसाध्योऽयं तीव्रसंवेगहेतुना ।
उपाया विविधास्सन्ति समाधेस्सिद्धिदायकाः ॥४६॥

तीव्रवैराग्येण समाधिस्सुखसाध्यः। येषामुपायानुष्ठानशैघ्र्यं तेषामासन्नस्स-समाधिलाभः । 'श्रद्धामूलो योग' इति वाचस्पतिमिश्रैरुक्तं, 'यो यच्छ्रद्धस्स एव सः भ.गीता. १७.५) इति भगवदुक्तं च श्रद्धाप्राधान्यं प्रतिपादयतः।

In Public domain. Digitization Muthulakshmi Research Academy

भक्तियोगः क्रियायोगः चर्यायोगस्तथैव च ।
कर्मयोगो हठो मन्त्रो ज्ञानयोगो लयस्तथा ॥४७॥

अद्वैतो लक्ष्ययोगश्च सिद्धिब्रह्मास्तथा शिवः ।
वासनाध्यानयोगौ च सर्वे सूत्रेषु दर्शिताः ॥४८॥

पञ्चदशयोगप्रकाराः पातञ्जलयोगसूत्रेभ्य एव ज्ञातुं शक्या इति योगसिद्धान्त चन्द्रिकाकृतः नारायणतीर्थस्वामिनः प्रत्यपीपदन् । विशेषस्तत्र द्रष्टव्यः ।

भक्त्या हीशः प्रसन्नस्सन् मोक्षं शीघ्रं प्रयच्छति ।
तस्मादीशप्रणिध्यानादन्तराया भवन्ति न ॥४९॥

क्लेशकर्मविपाकैश्च संस्कारैश्च तथाशयैः ।
न कदाऽपि परामृष्टः पुरुषस्त्वीश्वरो मतः ॥५०॥

सर्वज्ञस्सर्वगस्सर्वं कालञ्चाप्यतिवर्तते ।
कालस्यापि च हेतुत्त्वादीश्वरो नित्य उच्चते ॥५१॥

प्रणवस्य जपान्नित्यं तथा तस्यार्थभावनात् ।
एकाग्रं चित्तमत्यन्तं परात्मानं प्रकाशयेत् ॥५२॥

तस्मादीशप्रणिध्यानादन्तराया भवन्ति न ।
स्वरूपज्ञानमप्यस्य योगिनस्संप्रजायते ॥५३॥

अन्तरायास्तु विक्षेपाः ज्ञातव्या विघ्नकारकाः ।
विक्षेपोपहतं चित्तं जायते त्यक्तभावनम् ॥५४॥

'व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनाऽलब्धभूमिकत्वानव स्थितत्वानि चित्तविक्षेपाः तेऽन्तरायाः इति (१-३०) 'दुःख-दौर्मनस्याङ्गमेजयत्वश्वास-प्रश्वासा विक्षेपसहभुवः' इति च (१ - ३१) योगसूत्रे द्रष्टव्ये।

यथैवेश्वरश्शुद्धः प्रसन्नः केवलः पुमान् ।
तथा बुद्धिविसंवेदी जीवो जात्यादिवर्जितः ॥५५॥

Public domain. Digitization Muthulakshmi Research Academy

इत्येवं जायते बुद्धिर्जीवात्मपरमात्मनोः।
स्वरूपज्ञानपूर्णा हि समाधिस्थस्य योगिनः ॥५६॥

विक्षेपैस्तैर्यदा चित्तं बाधते योगिनं तदा ।
अभ्यासेन च संस्कर्तुं मित्रत्त्वं भावयेत् सुधीः।
करुणां च तथा दुःखे पुण्ये हर्षञ्च भावयेत् ॥५७॥

अपुण्ये च तथोपेक्षां सततं भावयन् बुधः।
प्रसन्नं लभते चित्तं चर्यायोगोऽयमुच्यते ॥५८॥

प्रधानो मारुतः प्राणः प्राणाधारो हि मानवः ।
प्राणायामेन चित्तस्य निग्रहस्सुलभस्सदा ॥५९॥

प्रयत्नात् कुक्षितो वायुं नासिकापुटमार्गतः ।
शनैर्निस्सारयेत् सम्यक् प्रश्वासोऽयं निगद्यते ॥६०॥

रेचितस्य बहिर्वायोः स्थापनं कुम्भकं मतम् ।
श्वासप्रश्वासकुम्भाश्च हठयोगो निगद्यते ॥६१ ॥

हठयोगो योगबीजं प्राणायामः प्रकीर्तितः 'सूर्याचन्द्रमसौरैक्यं हठ इत्यभिधीयते' इत्यादिस्मृतिवाक्यानि प्राणायामस्य हठयोगत्वं प्रतिपादयन्तीति प्रमाणम्।

गन्धादिर्विषयो यस्यां प्रवृत्तिं तां समाश्रितः
योगी चेत् तस्य चित्तं हि भवत्येव विसंशयम् ॥६२॥

शब्दाद्यास्संविदश्चित्तं प्रकुर्वन्ति विसंशयम् ।
श्रद्धा संवर्धते तेन लक्ष्ययोगेन सत्त्विकी ॥६३ ॥

नासाग्रादौ चित्तस्य संयमरूपाल्लक्ष्ययोगात्तत्तद्विषयसाक्षात्कारः, तेन श्रद्धा, तया च ध्यानादौ स्थिरं चित्तं भवति । एवं पूर्वोक्तसाक्षात्कारेण मनसि संशया दूरीभवन्ति ।

मानसस्य स्थितिं रोद्धुं चास्मितामात्रनामिका।
प्रवृत्तिस्सा समर्था स्यात् बुद्धिसंवेदरूपिणी ॥६४॥

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मयोगो विशोकेति सूत्रेऽस्मिन् कथितः पदे।
ज्योतिष्मत्याः प्रसङ्गाच्च शिवयोगोऽपि सूचितः ॥६५॥

'विशोका वा ज्योतिष्यमती' (१-३६) इत्यस्मिन् योगसूत्रे मनसः स्थितिनिबन्धिनी काचित् प्रवृत्तिरुक्ता । आयासकृतक्लेशरहिता ज्योतिर्विषया चेयं प्रवृत्तिर्ब्रह्मशिवयोगौ सूचयतीति योगसिद्धान्तचन्द्रिका ।

अथवा चित्तसंरोधे मानसं तद्विरागिणः ।
आलम्ब्यते यदा चित्तं तदा तेनापि रुध्यते॥ ६६॥

वैराग्यवतो मानसमपि भावयन् योगी चित्तस्थैर्यमाप्नोति । निर्वासनं मनस्समाश्रीयत इति योगोऽयं वासनायोग इति कथ्यते ।

स्वप्ने प्रबुद्धरूपं वा निद्राज्ञानं तथापि वा ।
आलम्बते यदा चित्तं तदा स्थैर्य समश्नुते ॥६७।।

स्वप्ने पूर्ववासनाप्राप्तसत्तवप्रधानं मनः भगवतो यद्रूपं प्रबुद्धं, एवं निद्रादौ यत्सुखमनुभूयते तदालम्बनं चित्तं कृत्वा स्थैर्यं प्राप्नुयात् । अयमपि वासनासयोगस्यावान्तरभेद इति चन्द्रिका ।

यदेवालम्बते चित्तं गुणवैषम्यदूषितम् ।
ध्यायेदेतदनन्यरसन् चित्तं तेनापि रुध्यते ॥६८॥

ध्यानयोग 'इति योगप्रकारोऽयं कथ्यते । यथाभिमतेषु ध्यानमिति योगसिद्धान्तचन्द्रिका ।

वशीकारं समाप्नोति योगवित् स्थूलसूक्ष्मयोः ।
परमं तन्महत् स्थूले सूक्ष्मे चापरमाणु तत् ॥६९॥
महत्त्वान्तो वशः स्थूले सूक्ष्मे चापरमाणु सः ॥

योगिनो हि चित्तं सूक्ष्मे निविशमानं परमाण्वन्तं स्थितिपदं लभते स्थूले च महापरिमाणे । अयं सिद्धियोगः ।

स्फटिकस्य यथोपाधेस्सान्निध्याद्रूपधारणम् ।
तथा ग्राह्योपरक्तस्य मनसो रूपधारणम् ॥७०॥

In Public domain. Digitization Muthulakshmi Research Academy

निर्मलस्य स्फटिकस्य यथा जपाकुसुमाद्युपाधिसान्निध्यात् रक्ताद्याकरता तथैव मनसः ग्राह्याद्याकरता ।

पुरुषेन्द्रियभूतेषु क्रमशो मनसः स्थितिः ।
तत्तदाकारसम्प्राप्तिस्समापत्तिरितीर्यते ॥७१॥

शब्दार्थधीविकल्पैश्च सुतरां भिन्नरूपिभिः ।
संकीर्णा सा समापत्तिस्सवितर्केति कथ्यते ॥७२॥

शब्दधर्मा उदात्ताद्याः जाड्यादयोऽर्थवर्तिनः ।
प्रकाशो मूर्तिराहित्यञ्चेत्यन्ये ज्ञानवर्तिनः ॥७३॥

वैविध्ये वर्तमानेऽप्येकत्वमेव समाश्रिताः ।
भजन्ते च तथा सर्वे शब्दार्थज्ञानरूपिणः ॥७४॥

गौरित्युक्ते शब्दार्थज्ञानानि परस्परमभिन्नानि लोक भासन्ते ।गौरिति शब्दः, गौरित्यर्थः, गौरितिज्ञानं इति तेषां भिन्नता धर्मेषु भिन्नत्त्वात्। अविद्यालेशसंबन्धादिदमपरं प्रत्यक्षम् ।

स्मृतेर्विपरिशुद्धौ या वस्तुमात्रैव भासते ।
निर्वितर्केति नाम्ना सा समपात्तिर्निगद्यते ॥७५॥

शून्यत्वं भासते तस्यां स्वरूपस्य न शून्यता।
निर्विकल्पस्तथा चार्थस्तस्यां निर्भासते भृशम् ॥७६॥

तथैव भूतसूक्ष्मेषु समापत्तिश्च तादृशी ।
सविचारेति विख्याता विषयस्सूक्ष्म एव सः ॥७७॥

शान्तादिधर्मशून्या या या सूक्ष्मविषया तथा ।
निर्विचारा समापत्तिस्तुरीया चोत्तमा मता ॥७८॥

सङ्केत्तस्मृतित्यागे सति यत्र विकल्पितार्थनिर्भासस्सा निर्वितर्कसमापत्तिः। सम्प्रज्ञातस्य लययोगतन्मात्राहङ्कारादिषु सुक्ष्मेषु विकल्पितेषु समापत्तिस्सविचारा । इति नामान्तरं सिद्धान्तचन्द्रिकायां दृश्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

तत् सूक्ष्मविषयत्त्वञ्च प्रधानान्तं प्रकथ्यते।
न त्वलिङ्गात् परं किञ्चित् सर्वतत्त्वेषु विद्यते ॥७९॥

सबीजोऽयं समाधिस्स्यात् सवितर्कादिभूमिभिः ।
बीजस्थार्यो ह्यविद्या स्यात् सम्प्रज्ञातश्च तद्युतः ॥८०॥

अशुद्ध्यादिमलापेतं बुद्धिसत्त्वं प्रकाशते ।
यदा, तदा समाधिस्स्यान्निर्विचार इतीरितः ॥८१॥

आध्यात्मिकः प्रसादस्स्यात्प्रज्ञालोकस्तदा स्फटः ।
ऋतम्भरा तदा प्रज्ञा सत्यं नित्यं बिभर्ति या ॥८२ ॥

यतः प्रज्ञा विशेषार्था यतस्सूक्ष्मं बिभर्ति सा ।
श्रुतानमानबोधाभ्यां ततो वैविध्यमश्नुते ॥८३॥

निरुध्यन्तेऽन्यसंस्काराः प्रज्ञासंस्कारवारिणा ।
तत्संकारनिरोधे स्यान्निर्बीजो योग इष्टदः ॥८४॥

दुःखबीजैर्यतश्शून्यस्ततो निर्बीजनामकः ।
समाधिर्मोक्षहेतुस्स्याद् यस्मिन्वै केवलः पुमान् ॥८५ ॥

सवितर्कादिभेदवानसम्प्रज्ञातसमाधिरविद्यारूपबीजसत्त्वात् 'सबीजसमाधिः तच्छून्यस्त्वसम्प्रज्ञातसमाधि र्निबीर्जज समाधिः' । सबीजसमाधौ विशारदीभवति तदा सत्त्वोद्रेको भवति तस्मिन् सति जायते । समाधिप्रज्ञाजन्यसंस्कारेण व्युत्थानसंस्कारा बाध्यन्ते । निरोधे निर्बीजस्समाधिस्ततो मोक्ष इति क्रमो ज्ञेयः ।

***

CC-Public domain. Digitization Muthulakshmi Research Academy

II

प्रणवादिपवित्राणां मन्त्राणां जपपूर्वकम् ।
यस्य वै यावती शक्तिस्तावत्या तप आचरेत् ।।८६॥

क्रियाणां फलयुक्तानां सर्वासामपि चार्पणम् ।
सर्वोत्तमे परे पुंसि क्रियायोग इतीर्यते ॥८७॥

समाधिर्भावनारूपः क्लेशानां शक्तिनाशनम् ।
क्रियायोगेन सिद्ध्येते प्रसंख्यानाग्निदायके ॥८८॥

अविद्या चास्मिता रागः द्वेषश्चाभिनिवेशनम् ।
पञ्चैते कथिता योगे क्लेशाः प्रत्यूहकारकाः ॥८९।।

अविद्यामाश्रितास्सर्वे क्लेशा बीजमिवाङ्कुराः ।
अविद्ययैव वर्धन्ते क्षीयन्ते चाप्यविद्यया ॥९०॥

सद्रूपा न त्वभावोऽसौ मिथ्याबुद्धिस्वरूपिणी ।
नितरामप्यसद् द्रव्ये सद्बुद्धिर्जायते तया ॥९१॥

तपस्स्वाध्यायेश्वरप्रणिधानरूपक्रियायोगेन समाधिप्राप्तिः क्लेशानाम् अविद्यादीनां नाशश्च सम्भवतः । यथाङ्कुरो बीजाश्रितो वर्धते तथैव चत्वारः क्लेशा अविद्याश्रिता वर्धन्ते तयैव च क्षीयन्ते। अविद्या चन ज्ञानाभावः विभिन्नकार्यजनन-सामर्थ्यवत्त्वाज्ज्ञानमेव ।

पुरुषस्य तथा बुद्धेरत्यन्तं सुविभक्तयोः ।
मध्ये चैकात्मिका बुद्धिरस्मितेत्यभिधीयते ॥९२ ॥

अत्यन्तं भिन्नयोः बुद्धिपुरुषयोर्मध्ये ह्यभिन्नत्त्वधीरस्मितेति कथ्यते।

सुखे तत्साधने गर्धो राग इत्याभिधीयते ।
दुःखे तत्साधने मन्युर्द्वेष इत्यभिधीयते ॥९३॥

In Public domain. Digitization Muthulakshmi Research Academy

'सुखे तत्साधने वा गर्धस्तृष्णा लोभः स राग' इति भाष्यवचनं, 'दृश्यमानमपि हि सुखसाधनं तज्जातीयस्य सुखहेतुतां स्मृत्वा तज्जातीयतया सुखहेतुत्वमनुपायम् इच्छति'। वास्य इति मिश्रवचनमपि विषयेऽस्मिन्ननुसन्धातव्यम् ।

विदुषोऽपि सदाऽसक्तिर्जीवने वर्तते खलु ।
अभिनिवेश इत्येषः क्लेशस्तत्रास्ति कारणम् ॥९४॥

क्लेशोऽयं स्वरसवाही स्वभावेन वासनारूपेण वहनशीलो न त्वागन्तुकः। माऽहमभावी भूवं सदा जीव्यासमिति पूर्वजन्मीयमरणदुःखानुभवहेतुकः मरणभयरुपः क्लेशः 'अभिनिवेशः पण्डितस्याप्यस्ति ।

चित्तस्य विलयेनैते हेयाः क्लेशाश्च चित्तजाः ।
क्लेशानां वृत्तयः स्थूलाः हेया ध्यानेन योगिना ॥९५॥

क्लेशे सत्येव वर्तेते धर्माधर्मौ हि जीवने ।
वेदनीयौ यथा दृष्टे तथाऽदृष्टे च जन्मनि ॥९६॥

सुखदुःखे तयोर्जाते विपाकस्त्रिविधस्तयोः।
क्लेशमूलो विपाकोऽयं जात्यादिर्जीवने सदा ॥९७॥

जातिरायुश्च भोगश्च विपाकस्त्रिविधो मतः ।
एकदेहभवादेषो नन्वेकभविको मतः ॥९८।।

अविद्यादिपञ्चक्लेशेभ्यः धर्माधर्मरूपसंस्कारो वर्तमानभ-विष्यत्कालयोर्भोग्यो भवति । धर्माधर्मयोरेव सुखदुःखफलं जात्यादिविपाकश्च । जन्म, जीवनकालो, भोग इति त्रयं विपाक इति कथ्यते । एकस्मिन्नेव देहे फलस्य भावोऽस्तीति स एकभविकः चन्द्रिकायां विवृतः ।

विषयभोगगर्धस्य वृद्धिर्या दृश्यते नृषु ।
परिणामो हि सा प्रोक्ता ज्ञेयाऽसौ दुःखदायिनी ॥९९॥

तापस्तु द्वेष एवासौ भोगस्य परिपन्थिनि ।
भोगस्य स्मृतिहेतुस्स्यात् संस्कारो दुःखदायकः ॥१००॥

In Public domain. Digitization Muthulakshmi Research Academy

त्रिभिर्वा कारणैरेभिर्गुणवैषम्यकारणात् ।
भुञ्जतो विषयान् सर्वान् सर्वं दुःखं विवेकिनः ॥ १०१ ॥

उपभोगेने चातींत दुःखं साध्वतिवाहितम् ।
वर्तमानं तु भोग्यं तद् दुःखं हेयत्ववर्जितम् ॥ १०२ ॥

अनागतं यतो दुःखं बाधते योगिनं भृशम्।
अतस्तद्धेयतामेति योगिनस्तत्त्वमिच्छतः ।। १०३ ॥

पुरुषस्य तथा बुद्धेस्संयोगो हेयकारणम् ।
निष्क्रियस्सन् क्रियायुक्तः पुमाँस्तेनैव भासते ॥ १०४ ॥

सत्त्वं रजस्तमश्चैव ज्ञानव्यापारमोहदाः ।
भूतेन्द्रियात्मकं दृश्यं कारणं भोगमोक्षयोः ॥ १०५ ॥

शब्दादिविषयाकारा तद्रूपनिश्चयात्मिका ।
बुद्धिवृत्तिर्भवेद् भोगो बद्धवत्तेन पूरुषः ॥ १०६ ॥

भोक्तुस्स्वरूपविज्ञानं मोक्ष इत्येव दर्शनम् ।
भोगमोक्षौ न पुंसस्तौ गुणानामेव केवलम् ॥ १०७ ॥

द्रष्टाऽसौ दृशिमात्रोऽपि शुद्धं प्रत्ययमीक्षमते ।
बद्धिवृत्तिविसंवेदात् परिणामीव भासते ॥ १०८ ॥

कार्यकारणरूपं तद् दृश्यं स्वार्थं कदाऽपि न ।
समूहस्तु यथाऽन्येभ्यः परस्मै दृश्यवर्तनम् ॥ १०९ ॥

कृतार्थं प्रति नष्टं तन्नष्टं मूढचक्षुषे ।
नशेर्धातोर्न लोपोऽर्थो नाशो भूयाददर्शनम् ॥ ११० ॥

दृश्यस्यास्योपलब्धिर्या सा भोगनामिका मता।
द्रष्टुस्स्वरूपलब्धिश्च मोक्षस्स्याद्योगदर्शने ॥ १११ ॥

चितेश्चित्तस्य संयोगे त्वविद्या कारणं मतम् ।
अविद्या सा यदा नष्टा संयोगोऽपि तथा गतः ॥ ११२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

संयोगस्य ह्याभावोऽसौ हानमित्युच्यते बुधैः ।
कैवल्ये केवलो जीवो गुणा वा केवलास्तथा ॥ ११३॥

हानप्राप्तेरुपायो हि विवेकख्यातिनामकः।
मिथ्याज्ञानविनिर्मुक्ता ख्यातिस्सा मोक्षकारणम् ॥ ११४॥

दृश्यं नाम भूतेन्द्रियात्मकं, द्रष्टा नाम चैतन्यम् । दृश्यसान्निध्यवशात् पुरुषः परिणामीव पुरुषासान्निध्यवशात् दृश्यं चैतन्यमिव च भासेते। सान्निध्यमथवा संयोग एव हेयकारणम् । यथा सम्यगलङ्कृतानि वस्तूनि तदित्तरभोगाय तथा च दृश्यं पुरुषदर्शनार्थं प्रवर्तते । मुक्तस्य अविद्या अदृष्टा भवति न तु सर्वेषाम्। दृश्यस्य सवरूपोपलब्धिर्भोगः, द्रष्टुस्स्वरूपोपलब्धिर्मोक्ष इति तात्पर्यम् । अविद्याहेतुक-संयोगस्यास्याभावो हानम्। तत्प्राप्तिमार्गस्तु विवेकज्ञानम् ।

तद्वतो योगिनः प्रज्ञा सप्तधा जायतेऽमला।
प्रज्ञां सप्तविधां प्राप्य योगी कैवल्यमश्नुते ॥ ११५ ॥

१. ज्ञातव्यमखिलं ज्ञातं, न किञ्चिदपि ज्ञातव्यमस्ति- इत्येका ।
२. हातव्यास्सर्वे हीनाः न किञ्चिदपि हातव्यमस्ति - इति द्वितीया ।
३. प्राप्तव्यमखिलं प्राप्तं न किञ्चिन्मे प्राप्तव्यमस्ति - इति तृतीया ।
४. कर्तव्यमखिलं कृतं न किञ्चिन्मे कर्तव्यमस्ति - इति चतुर्थी ।
५. कृतार्थं बुद्धितत्वम् इति पञ्चमी ।
६. गुणाः कृताधिकारा - इति षष्ठी ।
७. गुणातीतोऽहं स्वरूपमात्रावस्थितः सच्चिदेकरसः - इति सप्तमी।

योगिना लक्ष्यसंसिद्धिस्साधनं हि समाश्रिता ।
योगाङ्गानामनुष्ठानं साधनं चित्तनिग्रहे ॥ ११६॥

योगाङ्गानामनुष्ठानादशुद्धिर्नाश्यते ध्रुवम् ।
अशुद्धेश्च क्षये नूनं विवेको राजते महान् ॥ ११७॥

यमाश्च नियमाश्चैव ह्यासनं श्रद्धया कृतम्।
प्राणायामश्च तत्त्वेन प्रत्याहारस्तथैव च ॥ ११८॥

In Public domain. Digitization Muthulakshmi Research Academy

धारणाध्यानयोगाश्च योगाङ्गानि पृथग्विधाः ।
सर्वत्र सर्वदा चैव त्वनुष्ठेया मुमुक्षुभिः ॥ ११९॥

अहिंसा सर्वभूतेषु मनोवाक्यकायकर्मभिः ।
सा न केनाऽप्यवच्छिन्ना सार्वभौमा महाव्रतम् ॥ १२०॥

तत्सापेक्षं तथा ज्ञेयं सप्तकञ्चोत्तरोत्तरम् ।
योगाङ्गानामनुष्ठानं सदाधेयं मुमुक्षुभिः ॥ १२१॥

निस्सरन्ती बहिश्शक्तिर्योगङ्गैर्गृह्यते यदा।
तदा संवर्धते सत्यं दैहिकं मानसं बलम् ॥ १२२ ॥

१. अहिंसा, सत्यं, अस्तेयं, ब्रह्मचर्यं, अपरिग्रहः - यमाः
२. शौच, संतोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम् - नियमाः
३. पद्मस्वस्तिकादीनि आसनानि -
४. श्वासप्रश्वासयोः गतिविच्छेदः - प्राणायामः
५. इन्द्रियाणां चित्तस्वरूपानुकारः - प्रत्याहारः
६. चित्तस्य विविधप्रदेशेषु स्थापनं - धारणा
७. एकरूपवृत्तिप्रवाहः - ध्यानं
८. ध्येयस्यासन्दिग्धसर्वात्मना भानं –

समाधिः यमास्तु जातिदेशकालसमयैरनवच्छिन्ना महव्रतमित्युच्यते।

तेषां सम्यगनुष्ठानात् सिद्ध्यन्ते भिन्नशक्तयः ।
अहिंसायाः प्रतिष्ठायां निर्वैरेण ह्यवस्थितिः ॥ १२३।।

सत्यस्यैव प्रतिष्ठायां ह्यमोघा जायते स्ववाक् ।
उपस्थानं च रत्नानामस्तेयादेव सिद्ध्यति ॥ १२४॥

ब्रह्मचर्यप्रतिष्ठायां योगी सामर्थ्यमश्नुते ।
परिग्रहे परित्यक्ते जानाति जन्मनः स्थितिम् ॥ १२५।।

शौचात् स्वाङ्गे जुगुप्सा स्यादसंसर्गस्तथा परैः।
संतोषात् सुखसंप्राप्तिर्यस्या नास्त्येव तोलनम् ॥ १२६॥

In Public domain. Digitization Muthulakshmi Research Academy

तपो नाशयतेऽशुद्धिं श्रद्धया सम्यगाहितम् ।
कायेन्द्रिमजयं योगी तस्मादाप्नोति हेलया ॥ १२७।।

स्वाध्यायादिष्टदवानां साक्षात्कारश्च सिध्यति ।
देवता ऋषयो दिव्या वर्तन्ते योगिकर्मणि ॥ १२८ ॥

स्थिरं सुखकरं यत्तत् गृह्यतां सम्यगासनम् ।
प्रयत्नोपरमाच्चित्ते, स्थिरे चित्तस्य धारणात् ॥ १२९॥

न शीतोष्णादिभिर्द्वन्द्वैरासनज्ञोऽभिभूयते ।
जित्वा तत्प्रथमं वायोर्निग्रहे यत्नवान् भवेत् ।।१३०॥

बाह्यस्य ग्रहणं वायोर्नासा पूरकमुच्यते ।
विरेचनं ततस्तस्य विधिवद्रेचकाभिधम् ।।१३१ ॥

तयोस्तु गतिविच्छेदः प्राणायामः प्रकीर्तितः ।
पूरकः रेचकः कुम्भ इत्येषः कथितस्त्रिधा ॥ १३२।।

दीर्घसूक्ष्मस्सुविख्यातश्चतुर्थः केवलो मतः ।
श्वासप्रश्वासशून्यो हि प्राणो भवति केवले ॥ १३३॥

प्राणायामात्प्रकाशस्य प्रावारः क्षीयते ध्रुवम् ।
धारणार्थं तदा योग्यं शुद्धं संजायते मनः ॥ १३४ ॥

***

In Public domain. Digitization Muthulakshmi Research Academy

III

नाभिचक्रादिदेशेषु बन्धश्चित्तस्य धारणा।
ध्यानं वृत्तिप्रवाहः स्यात् समानश्च निरन्तरः ॥ १३५॥

ध्येयाकारविनिर्भासं ध्यानं समाधिसंज्ञकम् ।
न रूपं वस्तुशून्यं समाधौ प्रत्यायात्मके ॥ १३६॥

बन्धध्यानसमाधीनां संज्ञा योगे तु संयमः ।
संयमस्यैव संसिद्ध्या प्रज्ञादीपः प्रकाशते ॥ १३७॥

एकैकस्यास्तथा भूमेर्जयेनानन्यगामिता ।
मनसः सिध्यते नूनं तेन प्रज्ञा प्रदीप्यते ॥ १३८॥

अन्तरङ्गं तथा चेदं समाधेः साधनात् परम्।
निर्बीजस्यापि योगस्य बहिरङ्गं त्रयं स्मृतम् ॥ १३९॥

योगसंदर्भे संयमो नाम धारणा, ध्यानं, समाधिश्च त्रयम्। एकस्मिन् वस्तुनि प्रत्ययान्तररहितं चित्तं समानप्रत्ययप्रवाहवत् सदर्थमात्रनिर्भासं यदा भवति तदा संयमः ज्ञेयः । एतादृशी मनसश्शक्तिरेकाग्रतारूपा सम्पादनीया । यमादिपञ्चभ्यः धारणाध्यानसमाधयोऽन्तरङ्गम् । साक्षात् स्वरूपोपकारकं त्रयम्। निर्बीजस्य समाधेस्तु साक्षादहेतुत्त्वात् बहिरङ्गम् ।

परिणामस्त्रिधा प्रोक्तश्चित्तस्यास्थिरवर्तिनः ।
निरोधश्च समाधिश्च तथाचैकाग्रताभिधः ।।१४०॥

व्युत्थानाभिभवस्सम्यक् निरोधस्य समुद्भवः ।
संस्कारस्य गतिश्चित्रा निरोध इति कथ्यते ॥ १४१॥

समाधिपरिणामस्स्यात् द्वयोर्मानसधर्मयोः।
सर्वार्थताक्षयः सम्यगकाग्रतोदयस्तथा ॥ १४२।।

शान्तोदितौ पुनर्धर्मौ समानप्रत्ययौ यदा।
ज्ञेय एकाग्रतारूपः परिणामश्चित्तधर्मिणः ॥ १४३॥

In Public domain. Digitization Muthulakshmi Research Academy

क्षिप्तमूढविक्षिप्ताख्यं भूमित्रयं व्युत्थानम् । तत्र क्षिप्तं रजोगुणोद्रेकादस्थिरं, मूढं तमोगुणोद्रेकवत्, विक्षिप्तं सत्त्वोद्रेकाद्रजोविशिष्टं दुःखसाधनं परिहृत्य सुखसाधनेष्वेव शब्दादिषु प्रवृत्तं चित्तम् । व्युत्थानसंस्काराभिभवो नाम क्षिप्तादित्रयस्य दाहः। निरोधसंस्कारसमुद्भवा नाम प्रकटतया वर्तमानाध्वनि समवस्थितिः। निरोधकालीनः परिणामश्चितं स्थिरं करोतीति सम्पादनीयो भवति। अयं निरोध-परिणामः। चित्तस्य सर्वार्थताया क्षयः, एकातायाः समाधिपरिणामः। तत्र द्वावती-तोत्पद्यमानौ सदृशप्रत्ययौ 'एकाग्रतापरिणामो' भवति । सजातीयप्रत्ययस्यैकैकस्य नाशे सति प्रत्ययान्तरं सजातीयं चोत्पद्यते ।

व्याख्याता एवमेतेन धर्मा भूतेन्द्रियेषु च ।
एकधर्मपरित्यागे प्राप्तिर्धर्मान्तरस्य च ।
प्रथमः परिणामस्स्यात् धर्मिणो स्थूलरूपिणः ॥ १४४॥

धर्माणाञ्चाप्यतीतादिकालभेदेन भिन्नता ।
लक्षणाख्यो द्वितीयस्स्यात् परिणामो हि तत्त्वतः।।१४५॥

गवादेर्बाल्यकौमारं यौवनं वार्धकं तथा ।
अवस्थाख्यः तृतीयः स्यात् परिणामः स चान्तिमः॥ १४६ ॥

एकस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरप्राप्तिर्धर्मपरिणामः । यथा मृदः पिण्डभावत्यागेन घटभावः । वर्तमानावस्थाया अतीतावस्थाप्राप्तिरूपः कालभेदेन भेदसम्पादको लक्षणापरिणामः। प्राचीनत्वार्वाचीनत्वादिभेदरुपः अवस्थापरिणामः ।

त्रयो वै धर्मिणो धर्माः धर्मो धर्मिषु योग्यता ।
व्यापाराश्रितधर्मस्य त्रैविध्यं सूत्रकृन्मतम् ॥ १४७।।

अतीता वर्तमानाश्च धर्माश्चानागतास्तथा ।
वर्तते तेषु सर्वेषु तद्भिन्नो धर्मवान् सदा ॥ १४८॥

क्रमो या यस्य धर्मस्य समनन्तरतावहः ।
परिणामे क्रमो नित्यं नानात्वस्यास्ति कारणम् ॥ १४९॥

परिणामत्रये योगी संयमाज्ज्ञानवान् भवेत्।
अतीतानागतस्यापि सर्वस्यैव हि वस्तुतः ॥ १५०॥

 Digitized by Arya Samaj Foundation Chennai and eGangotri. Digitization Muthulakshmi Research Academy

शब्दार्थप्रत्ययानां हि संकरोऽध्यासमूलकः
सर्वभूतरुतं ज्ञानं तद्विभागस्य संयमात् ॥ १५१ ॥

संस्कारा द्विविधाः प्रोक्ता वासना आशयास्तथा ।
वासना स्यात् स्मृतेर्हेतुर्विपाकस्यैव चाशयः ॥ १५२ ॥

साक्षात्कारात्तथैतेषां संस्काराणां हि तत्त्वतः ।
ज्ञानं स्वस्य परस्यापि जायते पूर्वजन्मनः ॥ १५३ ॥

प्रत्यये संयमात् ज्ञानं परचित्तस्य जायते ।
न तत्सालम्बनं प्रोक्तं स्वचित्ताविषयीकृतेः ॥ १५४ ॥

योगी तां ग्राह्यताशक्तिं प्रतिष्टभ्नाति संयमात् ।
तन्मात्राणामतस्तस्यां ह्यन्तर्धानं प्रजायते ॥ १५५ ॥

विपाकोऽप्यायुषः कर्म द्विविधं कथ्यते बुधैः ।
सोपक्रमं तदाद्यं स्याद् द्वितीयं निरुपक्रमम् ॥ १५६ ॥

फलदं तीव्रवेगेन सोपक्रममितीर्यते ।
कर्म तन्मन्दवेगेन निरुपक्रममुच्यते ॥ १५७ ॥

द्वयोस्तु संयमाद्योगी ज्ञानमापद्यते महत्।
अरिष्टेभ्यस्तथा वेत्ति मृत्योरागमनं तथा ॥ १५८ ॥

भावनासंयमाद्योगी हस्त्यादिष्वपि संयमात् ।
अनुत्तमं तथा शीघ्रं तत्तदापद्यते बलम् ॥ १५९ ॥

ज्योतिष्मत्या प्रवृत्त्या च प्रकाशन्यासतश्च धीः।
सूक्ष्मस्य विप्रकष्टस्य व्यवहितस्य जायते ॥ १६० ॥

सूर्ये च संयमाज्ज्ञानं भुवनस्यापि जायते ।
ताराव्यूहगतिज्ञाने शशाङ्कध्रुवसंयमात् ।। १६१ ॥

कायव्यूहस्य संबोधो नाभिचक्रे च संयमात् ।
क्षुत्पिपासाविनाशश्च काण्ठकूपे च संयमात् ॥ १६२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

संयमात् कूर्मनाड्यां च संयमी वर्तते स्थिरः ।
सुषुम्नायां तथा कृत्वा सिद्धानन्वीक्षते हि सः ॥ १६३॥

प्रातिभे संयमं कृत्वा सर्वं जानाति हेलया ।
हृदये च तथा कृत्वा चित्तं जानाति संयमी ॥ १६४॥

अत्यन्तं तावसंकीर्णौ प्रकतिः पुरुषः सदा ।
भोगस्तद्भेदशून्यत्त्वं परार्थत्त्वाच्च तत्त्वतः ॥ १६५॥

परार्थं तं सुविज्ञाय स्वार्थे कृत्वा च संयमम्
पुरुष वेत्ति सं योगी विज्ञातारञ्च हेलया ।।१६६॥

पुरुषे संयमाद्योगी बह्वीः सिद्धीः समश्नुते।
प्रातिभं श्रावणं ज्ञानं वेदनाख्यं तथैव च ॥ १६७॥

आदर्शास्वादवार्ताश्च सिद्धयस्ताः पृथग्विधाः ।
इन्द्रियं विषयं दिव्यं गृह्णातीत्येव सिद्धयः ॥ १६८।।

अन्तरायाश्च योगे ते प्रातिभाद्यास्तु सिद्धयः ।
व्युत्थाने सिद्धयस्तास्तु तस्मात्त्याज्या मुमुक्षुभिः ॥ १६९॥

कर्मबन्धक्षयाद्योगी चित्तसंचारवेदनात् ।
अन्यदेहेषु चित्तं तद्धेलया स्वं क्षिपत्यथ ॥ १७०॥

उदानस्य जयात्पंके जले वा कण्टकादिषु ।
उत्क्रान्तिं लभते योगी तद्वायोश्चैव शक्तितः ॥ १७१।।

समानस्य जयाद्योगी ज्वलत्याग्निवदेव वा ।
आकाशस्सर्वशब्दानां प्रतिष्ठा शब्दवारिधेः ॥ १७२॥

संबन्धे संयमं कृत्वा त्वाकाशकर्णयोस्तथा ।
दिव्यं श्रोत्रं समादत्ते योगी शब्दस्य कारणम् ॥ १७३॥

लघुतूलसमापत्तेराकाशे डयते तथा।
शरीरकाशसंबन्धे योगी कृत्वा च संयमम् ॥ १७४॥

Public domain. Digitization Muthulakshmi Research Academy

स्थूलस्वरूपसूक्ष्मेषु तथान्वयार्थवत्त्वयोः ।
संयमात् पञ्चभूतानां संयमी जयमश्नुते ॥ १७५।।

सिद्धीनामणिमाद्यानां प्राप्तिस्तेनैव सिध्यते ।
कायसम्पत्समाप्तिश्च धर्मैश्चानभिभूतता ॥ १७६।।

ग्रहणञ्च स्वरुपञ्च तथैव चास्मितान्वयः ।
एतेषु संयमं कृत्वा संयमी जयतीन्द्रियम् ॥ १७७।।

ततो मनोजवित्त्वं स्यादिन्द्रियाणाञ्च निग्रहः ।
प्रधानस्य जयः सिध्येत् प्रत्येकं सिद्धयः स्मृताः ॥ १७८॥

बुद्धिपुरुषयोर्भेदं सम्यग्विज्ञाय संयमी ।
सर्वज्ञः सर्वभावानामधिष्ठातापि जायते ॥ १७९॥

तद्वैराग्यादशेषाणां दोषाणां बीजनाशतः ।
कैवल्यं लभते द्रष्टा स्वरूपावस्थितिं ध्रुवाम् ॥ १८०॥

तत्तद्भोगरसास्वादे देवैश्चोपनिमन्त्रितः ।
सङ्गस्मयौ न वै कुर्याद्योगी पुनरनिष्टतः ॥ १८१ ॥

क्षणतत्क्रमयोर्योगी संयमाल्लभतेऽचिरात् ।
ज्ञानं विवेकसम्पन्नं तारकं सर्वसंक्षयात् ॥ १८२॥

शुद्धिसाम्ये हि कैवल्यं प्रकृतेः पुरुषस्य च ।
सत्त्वाधिकारसम्पूर्तिर्द्रष्टुस्स्वरूपदर्शनात् ॥ १८३॥

***

In Public domain. Digitization Muthulakshmi Research Academy

IV

जन्मौषधितपोमन्त्रसमाधीनां च सेवनात् ।
सिद्धयो जातु जायन्ते मानवानां विशेषतः ॥ १८४॥

मानवादिशरीरेभ्यस्तद्भिन्नदेहरूपता ।
प्रकृत्यापूरतो ज्ञेया धर्माधर्मनिमित्तिका ॥ १८५॥

धर्माद्या निमित्तं ते न कदापि प्रयोजकाः ।
कार्यं प्रावारभेदेन क्षेत्रिकोऽत्र निदर्शनम् ॥ १८६॥

कायान्तरं यदा योगी निर्मिमीते स्वशक्तितः।
तत्र निर्माणचित्तानि केवलाहंकृतेस्तदा ॥ १८७॥

व्यापारस्य हि नानात्वे चित्तमेकं प्रयोजकम् ।
तत्रापि ध्यानजं चित्तं कर्माशयविवर्जितम् ॥ १८८॥

सामान्यतस्तु सम्पूर्णा कर्मजातिश्चतुष्पदी।
शुक्ला पुण्यात्मनामेव कृष्णा तावद्दुरात्मनाम् ॥ १८९॥

शुक्लकृष्णा परेषां सा योगिनां तु कदापि न ।
तद्रूपश्च विपाकस्स्यात्तत्तज्जातीयकर्मणः ॥ १९०॥

अभिव्यक्ता विपाकेन तद्रूपाश्चैव वासनाः ।
देवतिर्यङ्मनुष्येषु समानश्चर्च एव सः ॥ १९१॥

स्मृतिसंस्कारयोरैक्यं रूपे तावद् यतः स्थितम् ।
अतो जात्यादिभिर्लिङ्गैर्व्यवहितोऽप्यनन्तरः ॥ १९२॥

कृषीवलो यथा केदारात् केदारान्तरं जलं निनीषुः प्रतिवन्धावरणभेदमात्रं करोति तथैव धर्मादि निमित्तं प्रकृतीनां परिणामेन प्रयोजकम् । योगिनोऽहङ्कारादुत्पन्नेषु चित्तेषु व्यापारनानात्वे योगिनः चित्तमेकमेव प्रयोजकम्। जन्मादिपञ्च-विधचित्ते ध्यानजं चित्तमेव वासनारहितम् । चतुर्विधायां कर्मजात्यां शुक्ल, कृष्ण, शुक्लकृष्ण, अशुक्लकृष्णारूपायांचतुर्थी योगिनां, यस्य यादृशं कर्म तद्गुणमेव पुनस्तत्फलानुगुण-

Public domain. Digitization Muthulakshmi Research Academy

वासनानामभिव्यक्तिः सर्वेषु । संस्कारात् स्मृतिः, स्मृतेश्च भोगः, योगानुभवाच्य पुनः संस्कारस्मृत्यादयः अतः जन्मशतेन, दूरदेशतया, कल्पशतेन वा व्यवहितानामपि वासनानां अव्यवहितवत् कार्यकारित्वं भवति - इति भावः ।

वासनानामनादित्वं नित्यत्वादाशिषस्तथा ।
चित्तं तद्वासनाविद्धं चितेर्भोगाय कल्पते ॥ १९३ ।।

हेतुफलाश्रयालाम्बैस्सङ्गृहीतास्तु वासनाः।
हेत्वादीनामभावे ता विनाशं यान्ति सर्वथा ॥ १९४॥

वासना न केवलं व्यवधानरहिता अपि चादिशून्याः। वासनास्ताः हेत्वादीनालम्ब्य प्रवर्तन्ते । तत्र हेतुः साक्षात्परम्पया वा अविद्या, फलं शरीरादि स्मृत्यादि च, आश्रयश्चित्तं, आलम्बनं यदेवालम्बनमनुभवस्य तदेव वासनानामपीति ज्ञेयम् । एषामभावे वासनानामप्यभावः ।

वासनाश्च निवर्तेरन् कथं द्रव्यत्वसम्भवे ।
इत्येवं वासनानाशे संदिह्यात्पुरुषः क्वचित् ॥ १९५॥

अतीतानगताः धर्माश्चित्तं धर्मि स्वरूपतः।
धर्माणामेव भेदोऽयं धर्मि भेदविवर्जितम् ॥ १९६ ॥

त्र्यध्वानो खल्वमी धर्मा व्यक्तसूक्ष्माश्च तत्त्वतः ।
गुणानां सन्निवेशात्ते गुणात्मानो भवन्ति च ॥ १९७॥

व्यक्तास्तु वर्तमानास्ते धर्मा, भूतेन्द्रियेषु च ।
अतीतानागतास्सूक्ष्माः धर्मा भूतादिगोचराः ॥ १९८।।

अङ्गाङ्गिभावतस्तत्त्वं गुणानामेकमिष्यते ।
परिणामो बहूनां हि तैलादीनां प्रदीपवत् ॥ १९९ ॥

त्रिष्वपि गुणेषु क्वचित् सत्त्वमङ्गि क्वचिद्रजः क्वचिच्च तम इति गुणानामङ्गाङ्गिभावोऽस्ति। यद्यपि त्रयो गुणाः तथाऽपि तेषामङ्गाङ्गित्वात् वस्तुतस्तत्वमेकमेव । यथा तैलवर्तिवह्नीनामेकः प्रदीपपरिणामस्तथाऽयम् ।

In Public domain. Digitization Muthulakshmi Research Academy

दृष्टं बहुविधं ज्ञानं वस्तुन्येकविधे तथा ।
अतो ज्ञानार्थयोर्भिन्नः पन्था इत्येव निश्चयः ।।२००।।

एकस्यां रूपलावण्यवत्यां योषिति रागिणस्सुखं, सपत्न्यास्तु द्वेषः, वेदान्तिनस्तूदासीनता, परिव्राजकस्य घृणा-इत्येकवस्तुनि भिन्नप्रत्ययः दृश्यते अतः ज्ञानं विषयाद् भिन्नम्।

चित्तनाशे प्रमाणं न चित्तस्यातः स्वतन्त्रता ।
ज्ञानसहभुवं चेत्थमर्थं सूत्रे निरस्यति ॥२०१॥

ज्ञानादतिरिक्तोऽर्थ इति भवतु, तथापि ज्ञानेनैव भास्यत्वात् सुखादिवद् भोग्यत्वात् ज्ञानसहभूरेवार्थ इति मतमसमीचीनमिति वदति। सर्वजनसमानः स्वतन्त्रोऽर्थः, प्रतिपुरुषं प्रवर्तमानानि चित्तानि स्वतन्त्राणि ।

अयोवद् विषयेणैतदुपरक्तं च मानसम्।
तमादत्ते जहात्यन्यं ज्ञाताज्ञातस्तथा हि सः ॥२०२॥

चित्तवृत्तिस्सदा ज्ञाता पुंसस्सा कूटवर्तिनः ।
परिणामि यतश्चित्तं पुमाँस्तत्संविवर्जितः ॥२०३॥

स्वाभासं न कदाप्येतत् दृश्यत्वाच्चित्तमग्निवत्।
न ह्यग्निस्तमसा गूढः पूर्वं पश्चात् प्रकाशते ॥२०४॥

अग्निवत् वृत्तयं एव स्वप्रकाशा भवेयुः किं वृत्तिसंवेदिना पुरुषेणेति चेत् - न; यतश्चित्तं परिणामि नीलादिवदतस्तत् स्वाभासं न भवति किन्तु स्वव्यतिरिक्तद्रष्ट्रपेक्षम्। चित्तस्य तु प्रकाशाप्रकाशादि-धर्मवत्त्वात् गुणवैषम्यकारणेन वह्न्यादिदृष्टान्तमप्यत्र न सङ्गच्छत इति भावः ॥

स्वरूपार्थौ यतश्चित्तं नादत्ते द्वयमेकदा ।
स्वाभासं ततस्तन्न केवलं दृश्यमिष्यते ॥२०५॥

वृत्त्यन्तरेण ग्राह्यत्वे वृत्तेरतिप्रसङ्गता ।
अनन्तवृत्तिबोधे स्यादनन्तस्मृतिसंकरः ॥२०६॥

In Public domain. Digitization Muthulakshmi Research Academy

चैतन्यं तदसंकीर्णं स्वबुद्धिवृत्तिवदनम् ।
बुद्धिवृत्तिस्वरूपे तु तद्रूपं जायते पुनः ॥२०७॥

मन्तव्यार्थोपरक्तं तत् सद्विषयञ्च मानसम् ।
द्रष्टृदृश्योपरक्तं हि चित्तं सर्वार्थमुच्यते ॥२०८॥

चित्तं संहत्यकारित्वात् परार्थमिति कथ्यते ।
तदसंख्येयस्कारौश्चित्रितमपि गेहवत् ॥२०९॥

सत्त्वपुरुषयोर्भेदं जानाति संयमी च यः ।
विनिवृत्ता भवत्यस्य तदात्मभावभावना ॥२१०॥

विषयैः पूर्णमज्ञानाच्चित्तं ज्ञानोदये पुनः ।
कैवल्याभिमुखं याति विवेकख्यातिभारतः ॥२११॥

ये समाध्यन्तरालेषु जाताश्चेतरप्रत्ययाः ॥
ज्ञेया व्युत्थानसंस्कारैर्नाश्याश्चित्तविनाशनात् ॥२१२॥

यथा क्लेशा न रोहन्ति वह्नौ प्रदग्धबीजवत् ।
संस्काराश्च तथा पूर्वे ज्ञानदग्धा विनाशिताः ॥२१३॥

धर्ममेघस्समाधिस्स्यात् प्रसंख्यानेऽप्यरागिणः ।
विवेकख्यातितो ज्ञेयस्समाधिः क्लेशनाशकः ॥२१४॥

सम्प्रज्ञातपराकाष्ठा नूनं धर्मस्य वर्षुकः ।
धर्ममेघो महान् योगे मार्गः कैवल्यदायकः ॥२१५॥

तस्य लाभादविद्यायाः क्लेशास्सर्वेऽपि नाशिताः।
कर्माशयाश्च सम्पूर्णं ते भवन्ति विनाशिताः ॥२१६॥

सर्वक्लेशविनिर्मुक्तं सर्वदोषविवर्जितम् ।
अनन्तं जायते ज्ञानं ज्ञेयमल्पं हि भासते ॥२१७॥

गुणानां तु कृतार्थानां समाधेरुदयात्तथा ।
समाप्तः परिणामस्य क्रमो भोगोपयोगिनः ॥२१८॥

In Public domain. Digitization Muthulakshmi Research Academy

वर्तमाना गुणानाञ्च सा परिणामिनित्यता।
कूटस्थनित्यता पुंसो ज्ञेया सा नित्यता द्वयोः ॥२१९॥

क्षणद्वन्द्वी क्रमो ज्ञेयस्स क्षणप्रचयाश्रयः ।
क्रमोऽपरान्तनिर्ग्राह्यः परिणामस्य तत्त्वतः ॥२२०॥

समाधेरुदयात् कृतार्थानां गुणानां भोगोपयोगिनः परिणामस्य क्रमस्समाप्तो भवति । क्रमस्य निरूपकः क्षणः तादृशक्षणप्रचयाश्र एव क्रमः निष्कृष्यापरान्तेन ग्राह्यः । मृदि पिण्ड, अपरान्तः कण: इतीति योगसुधाकरः।

पुरुषार्थे विनिष्पन्ने तच्छून्यो मोहको गुणः।
प्रतिप्रसवमापन्नः केवलो विद्यते सदा ॥२२१ ॥

तदा बन्धविनिर्मुक्तः पुरुषो निर्गुणस्सदा ।
स्वरूपावस्थितो योगे चैतन्याख्यस्तदा भवेत् ॥२२२॥

बन्धमोक्षौ न देहस्य न वा पुंसः कदाचन ।
बन्धोऽयं चित्तरागस्स्यान्मोक्षस्स्यादविरागिता ।।२२३।।

पातञ्जलं महात्सूत्रं व्यासभाष्यकरं तथा ।
वाचस्पतेस्तथान्येषां वाक्यञ्चालम्ब्य तत्त्वतः ॥२२४॥

श्लोकेषु योगसूत्राणां निबन्धोऽयं कृतो मया ।
अहं तु करणं चास्मिन् कारणं गुर्वनुग्रहः ॥२२५॥

॥इति श्रीमधुसूदनपेन्नारचितः योगसूत्रसारः समाप्तः॥

***

In Public domain. Digitization Muthulakshmi Research Academy

सिद्धयः

(योगसूत्रेषु विभूतिपादे काश्चन सिद्धयः विभूतयश्च विवृताः। तासां स्पष्टावगमनार्थं ताः पट्टिकारूपेणात्र दीयन्ते)

ज्ञानरूपाः सिद्धयः		
सिद्धिः	सिद्धुपायः	योगसूत्रसंख्या
अतीतानागतज्ञानम्	परिणामत्रये संयमः	३-१६
सर्वभूतरुतज्ञानम्	शब्दार्थप्रत्ययविभागे संयमः	३-१७
पूर्वजातिज्ञानम्	संस्कारे संयमः	३-१८
परचित्तज्ञानम्	स्वचित्तवृत्तौ संयमः	३-१९
मरणज्ञानम्	सेपक्रमनिरुपक्रमकर्मणि संयमः	३-२२
अरिष्टानि		
सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्	ज्योतिष्मत्यालोके संयमः	३-२५
भुवनज्ञानं	सूर्ये संयमः	३-२६
नक्षत्रव्यूहज्ञानम्	चन्द्रे संयमः	३-२७
तारागतिज्ञानम्	नाभिचक्रे संयमः	३-२८
काव्यूहज्ञानम्	नाभिचक्रे संयमः	३-२९
चित्तज्ञानम्	हृदये संयमः	३-३४
पुरुषज्ञानम्	स्वार्थे संयमः	३-३५
स्थैर्यम्	कूर्मनाड्यां संयमः	३-३१
बलानि	मैत्रीकरुणमुदितासु संयमः	३-२३
हस्त्यादिबलानि	हस्त्यादिबलेषु संयमः	३-२४
क्षुत्पिपासानिवृत्तिः	कण्ठकूपे संयमः	३-३०
सिद्धदर्शनम्	मूर्धज्योतिषि संयमः	३-३२

In Public domain. Digitization Muthulakshmi Research Academy

क्रियारूपाः सिद्धयः

सिद्धिः	सिद्ध्युपायः	योगसूत्रसंख्या
अन्तर्धानम्	कायरूपादिषु संयमः	३-२१
(यस्य तन्मात्रस्य ग्राह्यताशाक्तौ संयमः तस्यान्तर्धानम्)		
परदेहप्रवेशः	बन्धकारणशैथिल्यम्	३-३८
प्रचारसंवेदनम्		
जलपङ्ककण्टकादिषु	उदानवायोर्जयः	३-३९
असङ्गः, उत्क्रान्तिश्च		
अग्निवद्	ज्वलनम् समानवायोर्जयः	३-४०
दिव्यश्रोत्रप्राप्तिः	श्रोत्राकाशसंबन्धे संयमः	३-४१
आकाशगमनम्	कायाकाशसंबन्धे संयमः	३-४२
अणिमादिप्राप्तिः	भूतजयः (भूतानां स्थूलस्वरूप-सूक्ष्मान्वयार्थवत्त्वेषु संयमः)	३-४, ४५
जयः		
भूतजयः	भूतानां स्थूलस्वरुपान्वयार्थवत्त्वेषु संयमः	३-४४
इन्द्रियजयः	इन्द्रियाणां स्थूलादिषु संयमः	३-४७
प्रधानजयः	इन्द्रियजयः	३-४७
सर्वभावाधिष्ठातृत्वम्	सत्त्वपुरुषविवेकज्ञानम्	३-४९
सर्वज्ञातृत्वम्	सत्त्वपुरुषविवेकज्ञानम्	३-४९
कैवल्यम्	दोषबीजक्षयः विवेकज्ञानम्	३-५५

***

In Public domain. Digitization Muthulakshmi Research Academy

गुलाबगीता

(प्रज्ञाचाक्षुष-नामक-महाकाव्यान्तर्गता)

अथ प्रथमोऽध्यायः

अथ गीतां प्रवक्ष्यामि गुलाबस्य महात्मनः ।
षड्दर्शनपयः सिन्धोरुद्धूतां दिव्यवाक्सुधाम् ॥ १ ॥

उमा माता पिता शंभुर्गुरुर्ज्ञानेश्वरो महान् ।
पतिः साक्षात् जगत् त्राता श्रीकृष्णो मे जगद्गुरुः ॥ २ ॥

राधाद्याः भगिन्यो मे भक्तिमार्गानुसारिणः ।
पञ्चायतनमेतन्मे नित्यैश्वर्यविभूषितम् ॥ ३ ॥

संधामेतां विधायादौ नानाग्रन्थसुमानि यः ।
व्यचीकसन् महार्थानि श्रीगुलाबं प्रणौमि तम् ॥ ४ ॥

भक्तिर्ज्ञानं तथा योगो विज्ञानं पारलौकिकम् ।
आयुर्वेदादिसच्छास्त्रं बभौ तस्मिन् विना श्रमम् ॥ ५ ॥

नानाशास्त्रोक्तिसौवर्णं स्वबुद्धिनिकषे शितम् ।
आत्मानुभूतिदिव्याग्नौ गुलाबः समलक्षयत् ॥ ६ ॥

ज्ञानप्रकाशभास्वन्तं भक्त्यामोदविलासिनम् ।
सद्वर्णयोगसंकीर्त्यं गुलाबं तं नुमः सदा ॥ ७ ॥

अज्ञानतापतप्तानां सद्वाक्यं हिमशीतलम् ।
महामहिमसम्पन्नं तं नुमो योगिपुङ्गवम् ॥ ८ ॥

कामादिसर्पदंशाद् ये भीतास्ते साधुवर्तनाः ।
गरुडायितमिमं श्रित्वा तत्पतिं संव्रजन्तु तम् ॥ ९ ॥

नानाग्रन्थेषु तेनोक्तं संचित्य वच्मि साम्प्रतम् ।
कार्येऽस्मिन् श्रद्धयोद्युक्तो भ्रामरं व्रतमास्थितः ॥ १० ॥

शाङ्करज्ञानसंयुक्तं भगवद्भक्त्यलङ्कृतम् ।
यद् वाक्यं तत् प्रमाणं स्यादिति तन्मतनिर्णयः ॥ ११ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शुद्धं शङ्करमद्वैतं निबोधायैक्यमात्मनोः ।
भक्तिस्तत्रापि न त्याज्येत्याहुः सतां महाराजाः ॥ १२॥

प्रतिबिम्बो हि जीवोऽयं बिम्बभूतः परेश्वरः ।
प्रतिबिम्बापेक्षयैव बिम्बत्वारोप इष्यते ॥ १३॥

आत्ममायां प्रचोद्याऽसौ परेशो मूर्तिमान् भवेत् ।
तया तस्य पृथग्भावो न भेदः परमार्थतः ॥ १४ ॥

आत्मतत्त्वं सदा लोके प्रख्यापयितुमीश्वरः ।
आविर्भवति भूतानां हितायैकान्ततोऽव्ययः ॥ १५॥

स्वसंकल्पाश्रितं देहं लोकोद्दिधीर्षया वहन् ।
रसाभिधं परानन्दं दत्ते भक्तेभ्य ईश्वरः ॥ १६॥

ब्रह्मज्ञानोत्तरं सर्वं तद्भिन्नं विनिवर्तयेत् ।
ईशस्येयं परं मूर्तिर्न निवर्त्या सनातनी ॥ १७॥

तेन मूर्तिविशेषेण लोकधर्माविरोधि यत् ।
आचरेदीश्वरो लोके तद् ग्राह्यं नान्यकर्म तु॥ १८॥

श्रीहरेस्तस्य नामात्र लोके तु कर्म वैदिकम् ।
यावद् यज्ञादिकर्मोत्थं फलं तुल्यं न नामतः ॥ १९॥

तदाज्ञावशवर्तित्वं तस्मिन् कर्मसमर्पणम् ।
तन्नामस्मरणं नित्यं जीवदुःखविनाशकम् ॥ २०॥

निर्गुणः परमात्मा तु न भवेद् बुद्धिगोचरः ।
तस्माद् गुणी परेशो नो भक्तिलक्ष्यैकविग्रहः ॥ २१॥

प्रवृत्तिलक्षणो धर्मो धर्मो निवृत्तिलक्षणः ।
योग्याधिकारिणं प्राप्य तन्वाते लोकसंग्रहम् ॥ २२॥

सोऽयं सनातनो धर्मो धारयन् भारते प्रजाः ।
आर्यावर्तस्य माहात्म्यं प्राचीकटत् सदातनम् ॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

सतां भूमेर्हि माहात्म्यं वक्तुं शक्यं न मानवैः ।
सुराचार्यः स्वयं स्तोत्रं कर्तुं शक्नोति शाश्वतम् ॥२४॥

यदिहास्ति तदन्यत्र यन्नोहास्ति न तत् क्वचित् ।
आर्यधर्मे मनुष्याणां हितं निक्षिप्तमन्तिमम् ॥२५॥

धर्मान्तराश्रयेणान्ये निरुत्साहा भवन्ति चेत् ।
आर्यधर्मं समाश्रित्य परां शन्तिं समाप्नुयुः ॥२६॥

सहधर्माः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
धर्मोऽयं भवतां क्षेमं तनोतु परमन्तिमम् ॥२७॥

पृथिव्यां स्वस्वनीडानि निर्मान्ति प्राणिनो यथा ।
तथा धर्मं समाश्रित्य स्वमतं ख्यापयन्ति हि ॥२८॥

सर्वं विश्वं महाशक्तेर्विस्तारो नान्यथा ध्रुवम् ।
तस्माद् भेदं परित्यज्य शान्त्या जीवन्तु मानवाः ॥२९॥

कृण्वन्तो विश्वमार्यं यद् वाक्यं वेदविनिश्चितम् ।
आर्यधर्मं सदा ब्रूते श्रेष्ठं तद् भेदवर्जितम् ।।३०।।

धर्मान्तरेण न द्वेषो धर्मस्यास्य विलक्षणम् ।
तेन त्यागेन भोगस्तु धार्यते शिरसा सदा ॥३१॥

धर्मान्तरस्य वैशिष्ट्यं ज्ञात्वा स्वीकृत्य तच्चिरम् ।
तेनापि लक्ष्यसिद्धिस्तु दर्श्यते ह्यार्यदर्शनैः ॥३२॥

समन्वयस्य माधुर्यं दर्शयित्वाऽत्र सज्जनैः ।
जीवनस्यास्य माहात्म्यं जेगीतं ग्रन्थराशिभिः ॥३३॥

सच्चिदानन्दरूपोऽयं भासते परमेश्वरः ।
तस्मिन् समन्वयो यत्नात् साध्यः सच्चिन्तनेन हि ॥३४॥

अन्यधर्मसहिष्णुत्वं दौर्बल्यं मन्यतेऽधमैः।
ईशावास्यमिदं सर्वं विस्मृतं हीनबुद्धिभिः ॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

अल्पं लाभं तिरस्कृत्य महान्तं लाभमीप्सताम् ।
आर्यधर्मं परित्यज्य नान्यो मार्गोऽस्ति भूतले ॥३६॥

परस्परं विवादोऽत्रस्वस्वमार्गानुसारिणाम्।
लक्ष्यं किलैकमाश्रित्य शब्दमायान्यचक्षुषाम् ।।३७।।

अहम्मर्यादया मुक्ताः युक्ताः सत्त्वगुणेन ये
निर्मत्सरेण वर्तन्ते तेषां शक्यः समन्वयः ॥३८॥

सांख्यं योगस्तथा न्यायो वैशेषिकञ्च दर्शनम्।
पूर्वोत्तरे च मीमांसे दर्शनानि मनीषिणाम् ॥३९॥

मनुष्याणामेव कल्याणं सर्वेषां लक्ष्यमस्ति हि ।
तस्मात् समन्वयेऽस्मिन् मे श्रमो नास्ति महान् बुधाः ।।४०।।

॥ इति श्रीगुलाबगीतायां प्रथमोऽध्यायः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ द्वितीयोऽध्यायः

मनसो राज्यमेवेदं सर्वं विश्वविजृम्भणम् ।
तन्मनो विषयासक्तं बन्धहेतुर्भवेद् दृढम् ॥ १ ॥

ईश्वरानुग्रहादेषा हीना विषयवासना ।
शुद्धं मनस्तदा तत्त्वं गाहते परमं शनैः ॥ २ ॥

आत्मज्ञानप्रभाशून्ये हृदये तमसाऽवृते ।
इच्छाराज्यं प्रकुर्वन्ति कामक्रोधादयो वृकाः ॥ ३ ॥

आत्मज्ञानाय शास्त्राणि प्रादुर्भूतानि भूतले ।
लक्ष्यमेकं समाश्रित्य भिन्नमार्गाश्रयाणि च ॥ ४ ॥

उच्चावचाः यदा धर्मा एकं सद्धर्मिणं श्रिताः ।
धर्मेषु भेद इत्येवं ज्ञायतां मोक्षमीप्सता ॥ ५ ॥

धर्मी नारायणः साक्षात् सर्वधर्मपरायणः ।
धर्मेषु वर्तमानेषु कूटस्थः पश्यतीह तान् ॥ ६ ॥

दृक् दृश्यञ्चेति सत्तत्त्वं द्वैविध्यं भजते सदा ।
दृगर्थः शुद्धचैतन्यं दृश्यस्यार्थो जडं जगत् ॥ ७ ॥

दृश्यं यस्माज्जडं तस्मान्निःसारं कथ्यते बुधैः ।
दृशस्तत्त्वविवेकार्थं बोध्यते दृश्यमेव तत् ॥ ८ ॥

दृक्तत्त्वं जीवमप्याहुः प्रमातारञ्च पण्डिताः ।
अन्तःकरणयुक्तोऽयं भुङ्क्ते प्रकृतिजान् गुणान् ॥ ९ ॥

प्रमातृसत्तया यस्माद् दृश्यसत्ताऽस्ति रञ्जिता ।
तस्मान्मिथ्येति वेदान्ते शाङ्करैः स्वीकृतं मतम् ॥ १० ॥

मिथ्याज्ञानं निराकृत्य तत्त्वज्ञानेन पण्डितः ।
केवलः केवले नित्यं रमते ब्रह्मणि स्थिरम् ॥ ११ ॥

In Public domain. Digitization Muthulakshmi Research Academy

दृगर्थश्चापि चैतन्यं जीवेश्वरभिदा द्वयम् ।
सोपाधिकं तु जीवः स्यात् ब्रह्मैव निरुपाधिकम् ॥१२॥

अविद्याऽत्र मनः श्रित्वा भेदजातं प्रकल्प्य च ।
स्वप्नसत्यं जगत् सूते जीवबन्धनकारिका ।।१३।।

सैव चित्तं समाश्रित्य रज्जौ सर्पं प्रदर्शयेत् ।
तस्मादाविद्यकं विश्वं रज्जुसर्पोपमं स्मृतम् ।।१४।।

अविद्योपाधिनाशे तु तत्त्वं भाति विनिर्मलम् ।
तत्त्वे भेदग्रहो नास्ति भेदस्तत्त्वं कदापि न ।।१५।।

रज्जुज्ञानेन लोकस्य सर्पज्ञानं प्रहीयते ।
तस्मात्तत्त्वविबोधार्थं दर्शनानि मनीषिणाम् ।।१६।।

स्वरूपज्ञानाशून्याय त्वम्पदार्थस्वरूपिणे ।
स्वरूपज्ञानहेतूनां दर्शनानां महत् फलम् ।।१७।।

अहमित्यनुभूतेर्यो विषयो जीवसंज्ञकः ।
तदित्यर्थश्च यः शास्त्रे दर्शितः केवलं पदैः ।।१८।।

द्वयोस्तत्त्वे विनिर्ज्ञाने भेदो हीयेत तत्त्वतः।
स्वानुभूतिः प्रमाणं स्याद् योगिनामत्र केवलम् ।।१९।।

एवं दृग्दृश्ययोस्तत्त्वं प्रख्यापयितुमन्तिमम् ।
दर्शनानि प्रवृत्तानि भिन्नमानानि भूतले ।।२०।।

दृश्यं बोधयितुं तन्वं कानिचिद् दर्शनानि हि ।
दृगर्थानुभवायैवं कानिचित् सन्ति भूतले ॥२१॥

विज्ञाननामकं सर्वं दृश्यस्यास्यविवेचनम्।
आध्यात्मिकञ्च सच्छास्त्रं दृगर्थस्य विवेचनम् ॥२२॥

अन्तिमं लक्ष्यमेतेषां जीवस्यानन्द एवं हि ।
तद्रूपप्रविवेकेऽस्मिन् भिद्यन्ते तानि भूरिशः ॥२३॥

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

चार्वाकः सुखमेवेच्छन् यावन्जीवं सुखं भवेत्।
मरणं मोक्षमित्येतद् वदन् भोगी मृतो भवेत् ॥२४॥

दृश्यात् द्रष्टुः पृथक्त्वं तु नाङ्गीकरोति नास्तिकः।
न शास्त्रं नास्तिकं दुःखात् त्रातुं शक्नोति भूतले ॥२५॥

जगत् सुखमयं केचिन्नास्तिका ब्रुवते सदा ।
यावद् दुःखं न ते विद्युः शास्त्रं तेषां निरर्थकम् ॥२६॥

ये किञ्चिद् दुःखसंश्लेषं प्राप्य निर्विण्णचेतसा ।
दुःखहानिमभीप्सन्ति शास्त्रं तेषां महद्धनम् ॥ २७ ॥

भगवांस्तु गौतमो बुद्धो दुःखमन्वीक्ष्य जीवने ।
दुःखहानेरुपायं स्वं धर्मं प्रावर्तयद् भुवि ॥ २८ ॥

वर्धमानो महावीरोऽप्यकं नाशयितुं पुरा ।
जैनधर्मं महाचार्यैः स्वीकृतं विततान तम् ॥२९॥

दुःखत्रयाभिघातार्तान् तन्नाशोपायवीक्षिणः।
त्रातुं शास्त्रं महल्लोके जातं सांख्याभिधं सतः॥३०॥

सर्वं चित्तभवं दुःखं वीक्ष्य चित्तनिरोधतः ।
दुःखहानिं परां ब्रूते योगशास्त्रं च योगिनाम् ॥३१॥

दुःखात्यन्तविमोक्षार्थं तत्त्वज्ञानाय देहिनाम् ।
पदार्थानाह सच्छास्त्रे न्याये षोडश गौतमः ॥ ३२ ॥

सप्तानान्तु पदार्थानां तत्त्वज्ञानेन देहिनाम् ।
दुःखप्रहाणमत्यन्तं प्रोक्तं वैशेषिके नये ॥३३॥

दुःखस्पर्शोऽपि नैव स्याद् यत्र तं स्वर्गमीप्सितुम् ।
सत्कर्मचोदनां ब्रूते मीमांसाशास्त्रमुत्तमम्॥३४॥

सर्वोपाधिविनिर्मोके यदाऽनन्दात्मता तदा ।
ब्रह्मभावश्च मोक्षः स्यादित्याहुः शाङ्कराः प्रियाः॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

निर्गुणे ब्रह्मणि प्रेम कथं शक्यमिति ब्रुवन्।
प्रेमास्पदं वदत्यन्यः सगुणं ब्रह्म धीगतम् ॥३६॥

श्रीकृष्णाख्यं परं ब्रह्म समाश्रित्य विशेषतः ।
तल्लीलामाधुरीरक्ता रमन्ते केचिदुत्तमाः ॥३७॥

यथैका महिला गेहे सती माता सुता स्वसा ।
श्वश्रूश्चापि भवेदेवं भिन्नोपाधिविशेषतः ॥३८॥

तथैवायं महेशोऽपि ब्रह्मा विष्णुर्महेश्वरः ।
इन्द्रोऽपि वरुणोऽप्यग्निः कथ्यते भिन्नकार्यतः ॥३९॥

यथा भिन्नस्वरूपेण मृदेका भाति कार्यतः ।
तथोपाधिविशेषेषु भात्येकोऽपि महेश्वरः ॥४०॥

तदीयां रचनां लोके ज्ञात्वाऽनन्दाब्धिवीचिषु ।
निमग्नाः केचिदत्यन्तमीश्वरे प्रेम कुर्वते ॥४१॥

ईश्वरस्य महाप्रज्ञां महाशक्तिं च शाश्वतीम् ।
महत् प्रेमास्पदत्वञ्च वीक्ष्य तं स्तुवतेऽपरे ॥४२॥

एकान्ते नाम संगृह्य संकीर्त्य च समूहके।
तन्नाम केवलं धृत्वा जगच्चक्रं तरन्ति ते ॥४३॥

न दुःखं वस्तुनिष्ठं स्याद् दुःखं चित्तविजृम्भणम् ।
तस्माद् भक्त्यैव दुःखं ते निस्तरन्ति मनीषिणः ॥४४॥

एवं दुःखप्रहाणाय सर्वशास्त्रौघवर्तना।
तद् दुःखं तत्त्वबोधेन दूरीभवति नान्यथा ॥४५॥

तस्मात् तत्त्वविबोधार्थं यतन्तामल्पजीवने ।
नेक्षते कस्यचिन्मृत्युर्यावज्जीवं न नाशयेत् ॥४६॥

॥ इति श्री गुलाबगीतायां द्वितीयोऽध्यायः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ तृतीयोऽध्यायः

भक्तानां योगिनाञ्चापि ज्ञानिनां तत्त्वबोधतः ।
समाधौ श्रूयते शब्दः कश्चिदनाहताभिधः ॥१॥

तत्रैकाग्रं मनः कृत्वा तदेकतानतां वहन् ।
तादात्म्यं प्राप्नुते योगी प्रत्ययान्तरहानतः ॥२॥

संयमं तत्र कुर्वाणो योगी तन्नादमद्भुतम् ।
दशप्रकारमप्यत्र श्रोतुं शक्नोति संततम् ॥३॥

सगुणोपासको योगी भगवद्भक्तिसंयुतः ।
प्रणवानन्तरं तत्र वेदमन्त्रान् शृणोति हि ॥४॥

सर्वलोकहितार्थं ते वेदमन्त्राः मुनीश्वरैः ।
समाधौ संश्रुता नित्याः आविर्भवन्ति कालतः ॥५॥

समाधौ सर्ववृत्तीनां निरोधे श्रूयते परः ।
स शब्दो वेद इत्यस्मादपौरुषेयता स्फुटा ॥६॥

ध्यानयोगप्रभावेन सर्वस्तं श्रोतुमर्हति ।
द्रष्टुं शक्नोति तं बुद्ध्या तस्मिन्नित्या भवन्ति ते ॥७॥

स्वाधिष्ठानाधिरूढे तु योगिनि ध्यानसम्पदा ।
वेदं चतुर्मुखो ब्रह्मा तं स्वयं बोधयत्यहो ॥८॥

आत्मसाक्षात्कृतेर्वेदः श्रवणादि-दिव्यसाधनम् ।
प्रदायाभ्युन्नतिं साक्षाद् विधत्ते पारमार्थिकीम् ॥९॥

तस्माद् वेदार्थविज्ञाने ध्यानं महद्धि साधनम् ।
अनुभूतिः सतां तत्र प्रमाणं ध्यानयोगिनाम् ॥१०॥

आत्मोन्नतिमहामार्गे वेदपादानुसारिणः ।
पुराणानि सहायार्थम् शास्त्राणि प्रभवन्ति हि ॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

अतः शास्त्रं प्रमाणं नः कार्याकार्यव्यवस्थितौ ।
इत्याह भगवान् कृष्णो गीतायां सारमद्भुतम् ॥ १२ ॥

अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो नरः ।
ज्ञातुं शक्नोति यत्नेन प्राहेदं तैत्तिरी श्रुतिः ॥ १३॥

श्रवणं वेदवाक्यानामात्मरूपप्रबोधिनाम् ।
तदविरोधिशास्त्राणां साधनं प्रोच्यते बुधैः ॥१४॥

आत्मनोऽस्तित्वबोधेऽपि तत्स्वरूपविमोहिनाम् ।
जायते कल्पना भिन्ना या निष्ठाप्रतिरोधिनी ॥१५॥

तस्मात्तां हि निराकर्तुं मननं कुर्वीत नित्यशः ।
वेदाविरोधितर्केण येन स्यादात्मनिश्चयः ॥१६॥

संप्राप्तनिश्चयस्तस्मात् साक्षात्काराय तस्य हि ।
आत्मतत्त्वस्य योगाख्यं निदिध्यासनमाश्रयेत् ॥१७॥

एवं त्रितयमेतद् यः साधनस्य समभ्यसेत् ।
तस्य प्रज्ञा शिता भूत्वा साक्षात्कुर्यात् परं पदम् ॥१८॥

ध्यानयोगाग्निसम्भूतोपनिषज्ज्वालया चितम् ।
तत्त्वप्रकाशमासाद्य न लोके तमसो भयम् ॥१९॥

उपनिषत्सु महत् तत्त्वं प्रसङ्गैर्विविधैः परम् ।
समाख्यातमपीहाल्प-बुद्धिभिर्ज्ञायते न तत् ॥२०॥

तदेव तत्त्वमादाय भगवान् बादरायणः ।
ब्रह्मसूत्राणि लोकेऽस्मिन् प्रथयामास वाङ्निधिः ॥२१॥

उपनिषद्बोधितं तत्त्वं सूत्रबद्धं विधाय सः ।
क्रमशस्तत्र सम्मोहं दूरीचकार यत्नतः ॥२२॥

परं सूत्राणि विज्ञाय नानुष्ठातुं क्षमो नरः ।
इत्यालोक्य पुनः श्रीमान् भगवद्गीतामदीदिशत् ॥२३॥

In Public domain. Digitization Muthulakshmi Research Academy

भगवद्गीतेति भूलोके साक्षात् कल्पतरुः स्थितः ।
कोटिशोऽज्ञानिनां मोहं नाशयन् भास्करोपमः ॥२४॥

पिता सर्वस्य लोकस्य गोपिकापतिरीश्वरः ।
गीतायाममृतं लोके व्यतरीन्मधुसूदनः ॥२५॥

एका गीता महाशक्तिर्महाभूतिर्महद् धनम् ।
यच्चान्यद् वाङ्मयं सर्वं तत्तस्या ह्यनुवादकम् ॥२६॥

नाधीयतेऽन्यदत्युच्चैर्वाक्यं यदि जीवने ।
न हानिर्भवतां किन्तु गीताशास्त्रं ह्यधीयताम् ॥२७॥

जीवने भिन्नसन्दर्भे कार्याकार्यविनिर्णये ।
यदि मोहो भवेत्तस्य नाशो गीताख्यभानुना ॥२८॥

उपनिषद् ब्रह्मसूत्राणि भगवद्गीतेति भक्तितः ।
प्रस्थानत्रयमित्याहुः सम्प्रदाये मनीषिणः ॥२९॥

प्रस्थानत्रयमारूढो ध्यानयोगप्रकाशतः ।
आत्मज्ञानसमापन्नो ब्रह्मभूयाय कल्पते ॥३०॥

पूर्वजन्मार्जितैः पुण्यैः केचिदत्र विना श्रमम् ।
अलं तत्त्वावबोधाय प्रस्थानत्रयतो लघु ॥३१॥

उत्तमाः कथिता एते प्रौढबुद्धिसमञ्चिताः ।
मध्यमा अधमाश्चापि कथं तल्लाभमाप्नुयुः ॥३२॥

इत्यालोच्य दयासिन्धुर्भगवान् व्यासनामतः ।
आर्षकाव्ये पुराणानि प्रथयामास भूतले ॥३३॥

भारतं धार्मिकं रूपं विविधार्थैः कथानकैः ।
लोके स ग्राहयामास व्यासर्षिर्यमिनां वरः ॥३४॥

इतिहासपुराणानि वेदार्थस्य प्रकाशने।
सम्पुष्टौ च सदा सद्भिरादेयानि विवेकिभिः ॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

आत्मनिष्ठां परां भक्तिमीश्वरे तनुते च यः ।
स सर्वः शास्त्रनामार्हो ग्राह्य एवात्र मानवैः ॥ ३६ ॥

वाङ्मयं यत्तु लोकेऽस्मिन् भक्ति-ज्ञान-विवर्जितम् ।
तदुन्मत्तप्रलापः स्यात् त्याज्यं श्रेयोऽर्थिभिः सदा ॥ ३७ ॥

ऋषयः सात्त्विकीं प्रज्ञां प्राप्यैव भुवि वाङ्मयम् ।
विविधं तेनिरे तस्मात् श्रद्धया तद्धि सेव्यताम् ॥ ३८ ॥

एकं लक्ष्यं समाश्रित्य सर्वेषामुद्यमः सताम् ।
तथापि लक्ष्यसंसिद्धौ तारतम्यं भवेद् ध्रुवम् ॥ ३९ ॥

कश्चित् पन्थाः सुदीर्घः स्यात् कश्चिच्च कुटिलस्तथा ।
कश्चिच्च वर्तुलाकारः पन्था ज्ञेयास्तु तत्त्वतः ॥ ४० ॥

अतः पन्थानमात्मीयं सुविज्ञायैव मानवः ।
आध्यात्मिके प्रवृत्तः स्याज्जीवने हितकाम्यया ॥ ४१ ॥

भक्तेर्ज्ञानस्य योगस्य कर्मणश्चापि लक्षणम् ।
सामर्थ्यं यच्च तत् सर्वं ज्ञेयमत्र मनीषिभिः ॥ ४२ ॥

॥ इति श्रीगुलाबगीतायां तृतीयोऽध्यायः ॥

***

In Public domain. Digitization Muthulakshmi Research Academy

अथ चतुर्थोऽध्यायः

कर्मणां विषये यद्यज्ज्ञातव्यं तत्त्वतोऽखिलम् ।
बच्मि तत् साम्प्रतं शास्त्रात् सङ्गृह्यात्र परार्थदम् ।।१।।

कर्माणि चित्तशुद्धयर्थं क्रियमाणानि सूरिभिः ।
फलेच्छायाः परित्यागे न बन्धहेतवः क्वचित् ॥२॥

जनकर्षैः पुरा कर्म तादृशं मुनिभिः स्तुतम् ।
न कर्म बन्धहेतुः स्याद् यत् कृतं ज्ञानिना भुवि ॥३।।

कर्माकर्म विकर्मेति त्रिविधं कर्म वर्तते ।
तज्ज्ञात्वा कर्मबन्धात्तु मुच्यते बुद्धिमान् नरः ॥४॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
तानि स्वयं प्रवर्तन्ते कर्मेत्येषां तु लक्षणम् ॥५॥

यदेव दोषजं कर्म कामक्रोधादिसम्भवम् ।
वेदशास्त्रनिषिद्धं तद् विकर्मेति विबुध्यताम् ॥६॥

कर्मसु क्रियमाणेषु प्रकृतेर्गुणतस्तथा ।
यदा द्वेषाभिमानाभ्यां मानवो नाऽभिभूयते ॥७॥

साक्षी भूत्वैव कर्माणि मनोवाग्देहजानि हि ।
निर्लिप्त एव वीक्षेत कर्माप्यकर्मतां व्रजेत् ॥८॥

पूर्वजन्मकृतं कर्म वर्तमानस्य जन्मनः ।
हेतुर्भूत्वाऽभवन्नष्टं भोगार्हं फलरूपतः ॥९॥

आगामि कर्म नात्यन्तं समर्थं फलदं भवेत् ।
अनेन जन्मनाऽरब्धं कर्मैव फलदायि तत् ॥१०॥

ज्ञानिनां भक्तिशून्यानामलब्धं कर्म चान्तिमम् ।
ज्ञानोत्तरञ्च प्रारब्धभोगाय भवतीह तत् ॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

दैवं फलोन्मुखं कर्म यद् योगेन विजीयते ।
तज्जयः पुरुषयत्नेन भवतीति सतां वचः ॥१२॥

तावत् पुरुषयत्नेन भाव्यं ध्यानसमाधिना ।
प्राक्तनं पौरुषं यावदशुभं शाम्यतां स्वयम् ॥१३॥

जन्मान्तरमपेक्ष्यैव प्रारब्धं कर्म कथ्यते ।
कल्पान्तरमपेक्ष्यैव नियतिश्च तदीरिता ॥१४॥

तदीश्वरप्रसादेन जेतुं शक्यं न चान्यथा ।
प्रसादो भक्तियोगेन संसाध्योऽस्ति मनीषिभिः ॥१५॥

यावज्जीवनमेतद् वः कर्म तु नान्तरीयकम् ।
जीवः कर्म प्रकुर्वाणो जीवत्यान्तक्षणं तथा ॥१६॥

तस्मादकर्मणोऽत्यन्तं भक्तितः शरणं व्रजेत् ।
तेनालिप्तता प्राप्ता मोचयत्यञ्जसा नरम् ॥१७॥

शुभं वाऽप्यशुभं कर्म यत्किञ्चित् क्रियते भुवि ।
आत्मन्यारोप्य तान् धर्मान् क्रियते नास्ति संशयः ॥१८॥

अहमित्यस्य मर्यादा यावन्न क्रियते तदा ।
न शक्यं कर्म कर्तुं हि कर्म स्वाध्याससम्भवम्॥१९॥

शुभं चेत् कर्म तज्जन्यं फलं को वा समाप्नुयात् ।
एतत् पुण्यं ममैव स्यादित्येषा तु यदीयधीः ॥२०॥

तथा यो ह्यात्मनो रूपमज्ञात्वा भूरि कर्मसु ।
प्रवृत्तः पापकर्माणि लिम्पन्तीति विमोहितः ॥२१॥

शुद्धमपापविद्धं तदज्ञात्वा रूपमात्मनः ।
पापापहानये कर्म प्रकुर्वीत विमूढधीः ॥२२॥

तस्मात् कर्म स्वाविद्यावशतः क्रियते सदा ।
तत्स्वरूपप्रविज्ञाने भवेन्मोहप्रणाशनम् ॥२३॥

In Public domain. Digitization Muthulakshmi Research Academy

फलाप्तिकामनानुन्नं कर्म बन्धस्य कारणम् ।
आत्मज्ञानाय यत् कर्म क्रियते तन्न बन्धनम् ॥२४॥

भगवान् शङ्करः साक्षात् कर्मलक्षणमूचिवान् ।
आत्मानुभूतिपाकान्तं कर्म कार्यं मनीषिभिः ॥२५॥

आत्मानुभूतिपाके तु कर्म प्रशाम्यति स्वयम् ।
तदभावे नरो मोहात् कर्मपूगे प्रसज्जते ॥२६॥

अहमेव कर्म कुर्वाणः फलं प्राप्नोमि कर्मणः ।
इत्येवं मन्यमानस्तु कर्मबन्धमवाप्नुते ॥२७॥

गुणैः कर्माणि कार्यन्ते नाहन्तु गुणविक्रिया ।
तस्मात् कर्म फलं नापि बध्नाति मामविक्रियम् ॥२८॥

इति ज्ञानप्रकाशे तु न कर्म बन्धनं भवेत् ।
ज्ञप्तिरेषा भवेद्येषां ते नूनं धन्यजीविनः ॥२९॥

कर्माणि कुर्वतस्तेषां स्वरूपस्याबुबोधिषा ।
यदा भवेत् तदा तेषां बन्धनात्मकता न हि ॥३०॥

कर्माणि चित्तशुद्ध्यर्थं क्रियमाणानि सर्वशः।
आत्मज्ञानाधिकारं नो जनयन्ति प्रियवाक्यतः ॥३१॥

चित्तशुद्ध्यात्मबोधार्थमधिकारमवाप्य च ।
क्रमेणात्मविबोधञ्च प्राप्नुवन्तीह मानवाः॥३२॥

आत्मज्ञानेन मोक्षः स्यात् कर्म तस्यास्ति साधनम्।
ज्ञाने तु कर्म नाग्रे स्यात् ज्ञानं कर्म विनाशयेत् ॥३३॥

यदि ज्ञानेऽपि कर्माग्रे दृश्यते सत्सु चेत् तदा ।
लोकसङ्ग्रह एवास्य हेतुर्नान्यः कदाचन ॥३४॥

अहङ्कारोत्थितं कर्म ज्ञानं तस्य विलापनम् ।
अहम्मार्दवता भक्तौ ज्ञेयमेतन्मनीषिभिः ॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

केचित् कर्म न कुर्वन्ति ज्ञाने यत्नं न कुर्वते ।
ध्यानन्तु दूरतस्तेषां ते नूनं मन्दभागिनः ॥ ३६ ॥

अतो लोके सदा कार्यं ज्ञानावाप्त्यै हि कर्म सत् ।
लोककल्याणहेतोस्तत् क्रियमाणं तु शाश्वतम् ॥ ३७ ॥

विद्यादानमपां दानमन्नदानञ्च कुर्वताम् ।
कर्मैव मोक्षहेतुः स्यात् सेवाभावेन सञ्चितम् ॥ ३८ ॥

भगवान् श्रीवासुदेवः सर्वेषां हृदये स्थितः ।
तस्मै मदीयकर्माणि समर्प्यन्ते हि भक्तितः ॥ ३९ ॥

इत्थं लोके नरः कर्म क्षणे क्षणेऽपि कारितम् ।
समर्पयन् महत् श्रेयः प्राप्नोति नात्र संशयः ॥ ४० ॥

॥ इति श्रीगुलाबगीतायां चतुर्थोध्यायः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ पञ्चमोध्यायः

अथ योगविजिज्ञासोर्योगतत्त्वं ब्रवीमि वः ।
योगस्वरूप-भेदांश्च फलञ्चापि समासतः ॥१॥

ध्यानेन ब्रह्मसारूप्यं चित्तस्य योग उच्यते ।
ज्ञानेन ब्रह्मतादात्म्यं तस्य वेदान्त उच्यते ॥२॥

अहं ममेति तत्त्वेन त्यक्त्वा चैकाग्रमानसः ।
ध्यायीत देवदेवं तद् योगरहस्यमुच्यते ॥३॥

मोक्षार्थं चित्तवृत्तीनां निरोधो योगसंज्ञकः ।
कर्तृसम्पाद्यरूपश्च वस्तुसम्पाद्यरूपकः ॥४॥

भावनाविशदस्त्वाद्यो भावनाजन्मवान् परः ।
एवं द्वैविध्यमापन्नो योगश्चित्तमलापहा ॥५॥

सांख्येन त्वंपदार्थस्य तत्पदार्थस्य च योगतः ।
वेदान्तेन तयोः पूर्णमैक्यस्य शोधनं भवेत् ।।६।।

हठो ध्यानं तथा मन्त्रो लयो नादश्च पञ्चमः ।
योगस्यैते प्रकारास्तु राजयोगस्य सिद्धये ॥७॥

पातञ्जलो राजयोगो निदिध्यासननामकः ।
योगिनश्चितिरूपेण केवला सा ह्यवस्थितिः ॥८॥

चित्तवृत्तिनिरोधेन चैतन्यमवशिष्यते ।
तस्याः स्थितेरुपायास्तु योगशब्देन कीर्तिताः ॥९॥

श्रद्धामूलो हि योगः स्यात् श्रद्धेयं जननी स्मृता ।
योगाभ्यासप्रवृत्तं या कल्याणी पाति सर्वदा ॥१०॥

श्रद्धातो वर्धते शक्तिस्तस्याश्च वर्धते स्मृतिः।
स्मृतेर्दार्ढ्येन सम्पन्नो योगी समाधिमाप्नुते ॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

समाधौ परिपक्के हि प्रज्ञा सञ्जायते परा।
ऋतम्भरेति शास्त्रेऽस्मिन् गीयते सा सदोदिता ॥१२॥

श्रद्धा रुद्राक्षमालेव स्वेच्छातः स्वीकृता पुनः ।
गले स्थापयितुं नैव शक्येति ज्ञायतां परम् ॥१३॥

श्रद्धामयो भवेज्जीवस्तस्माच्छ्रद्धा भवेत् स्वयम् ।
सा सात्त्विकी योगमार्गेऽस्मिन् योगिनं पाति सर्वदा ॥१४॥

श्रद्धासत्त्वेऽपि यो योगे शङ्कावान् वर्तते सदा ।
शङ्का श्रद्धां विनिघ्नन्ती प्रज्ञाञ्च तानयेत् सताम् ॥१५॥

सशङ्कपण्डितान्नूनं निष्ठावान् पामरो वरः ।
यतो निष्ठा फलं सुते शङ्का नाशयते नरम् ॥१६॥

योगाभ्यासे विरक्तेस्तु महत्त्वं शास्त्रसम्मतम् ।
अविरक्तः सदा योगं कुर्वाणोऽपि न सिद्धिभाक् ॥१७॥

अविरक्तः पुनर्योगे प्रवृत्तोऽपि क्षणे क्षणे ।
विषयासक्तितः श्रान्तो योगमेव त्यजेत् खलः ॥१८॥

विषयेषु मानसं यस्य न सक्तं निर्मलं पुनः ।
अधिकारी स एवात्र शमादिषट्कसंयुतः ॥१९॥

अष्टाङ्गयोगनिष्ठस्य क्रमः शास्त्रेषु कथ्यते ।
तत्क्रमानुगते तस्मिन् तत्फलं हस्तगं भवेत् ॥२०॥

नियमेषु प्रधानं स्याच्छ्रवणं गुरुवाक्यतः ।
तेनैव तामसी शक्तिर्निरुद्धा योगिनश्चिरात् ॥२१॥

आसनानां जये देहे स्थैर्यमुत्पद्यते परम् ।
ततो द्वन्द्वप्रहारात् स योगी दुःखं न विन्दति ॥२२॥

प्राणायामेन चित्तस्य चाञ्चल्यं नाशितं भवेत् ।
तस्मादेकाग्रता नूनं जायते मनसोऽचिरात् ॥२३॥

In Public domain. Digitization Muthulakshmi Research Academy

एतैर्नियतमभ्यस्तैर्मूढावस्था नाश्यते ननु ।
क्षिप्तावस्था तथा नष्टा प्रत्याहारेण मानसी ॥२४॥

यमाभ्यासेन निष्ठात इन्द्रियाणां क्रमेण हि ।
निरोधो जायते तस्मादात्मशक्तिर्विवर्धते ॥२५॥

धारणाध्यानसामर्थ्यादन्या विक्षिप्तनामिका ।
नाशं याति सदा चित्ते योगाभ्यासविरोधिनी ॥ २६ ॥

सम्प्रज्ञातसमाधेस्तु चित्तैकाग्र्यं भवेन्नृणाम् ।
निर्विकल्पसमाधेश्च निरोधो मनसो भवेत् ॥२७॥

प्राणायामेन चित्तस्य चाञ्चल्यं नाश्यते ध्रुवम् ।
तथापि विषयासक्तिर्मनसो नैव नश्यति ॥२८॥

परात्परतरे दृष्टे चित्तस्य विषयस्पृहा ।
नष्टा भूत्वाऽथ कैवल्यं योगिनो भवति ध्रुवम् ॥२९॥

तदर्थं प्राणरोधेन सहान्यद्दोषदर्शनम् ।
नियतं क्रियते चेत् तत् मनसो हन्ति कल्मषम् ॥३०॥

चित्तस्य मृदुसंवेगो वासना परिकीर्तिता।
स्वप्नश्च मध्यसंवेगस्तीव्रसंवेगकारणम् ॥३१॥

मनसस्तीव्रसंवेगाज्जगत् सत्यमिव स्फुरेत् ।
ईश्वरे तीव्रसंयोगात् समाधिसिद्धिरीश्वरात् ॥३२॥

ईश्वरप्रणिधानेन साधकश्च समाधिभाक् ।
व्युत्थानेऽपि जगद् ब्रह्म द्रष्टुं शक्नोति केवलम् ॥३३॥

वैराग्यादपराख्याच्चेदिन्द्रियाणां विनिग्रहः ।
अभ्यासाच्च समाधिः स्यात् सम्प्रज्ञातः सदा नृणाम् ॥३४॥

परवैराग्यदार्ढ्येनासम्प्रज्ञातो भवेद् ध्रुवम् ।
प्रारब्धनाशको यश्च त्रिविधः कथ्यतेऽधुना ॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

अक्षीणवासनं चित्तं दृश्यते पुनरुत्थितम् ।
असंप्रज्ञातभेदोऽयं स्वयंव्युत्थाननामकः ॥३६॥

विष्णुश्च शंखनादेन प्रह्लादं शान्तमानसम् ।
अबोधयद् गाढसुप्तन्तु पुरा लोकशिवाय हि ॥३७॥

एवं व्युत्थानमापन्नं बाह्यतो दृश्यते परम् ।
असंप्रज्ञातप्रभेदोऽयमन्यव्युत्थाननामकः ॥३८॥

पुरा शिखिध्वजस्यायमसंप्रज्ञातनामकः ।
समाधिर्नाप्नुवद् भङ्गं व्युत्थानेऽप्यञ्चितोऽभवत्॥३९॥

एवं व्युत्थानकालेऽपि समाधिस्थितिरञ्चिता ।
असंप्रज्ञातभेदोऽयं व्युत्थानरहिताभिधः ॥४०॥

व्यतिरेकेन या निष्ठा त्वम्पदार्थगामिनी ।
सा व्युत्थानं भजेन्मध्ये नामरूपविवर्जिता ॥४१॥

अन्वयेन तु या निष्ठा सा तत्पदार्थगामिनी ।
सा न व्युत्थानमाप्नोति नामरूपाञ्चिता तथा ॥४२॥

यदन्तःस्फूर्तिजं ज्ञानं तदेवाऽत्र विशिष्यते ।
अन्येभ्यो ज्ञानरूपेभ्यो ऋतम्भरेति कीर्तितम् ॥४३॥

ज्ञानानन्तरमप्येषोऽसंप्रज्ञातनामकः ।
समाधिश्च समभ्यस्तः साप्नोति परमं पदम् ॥ ४४ ॥

क्वचित् स्वप्नोपि योगत्वं याति हिरण्यनामकः ।
यथार्थापार्थभेदेन स्वप्नो हि द्विविधः स्मृतः ॥४५॥

अन्यार्थश्च भवेत् स्वप्नः क्वचिदन्यार्थसूचकः ।
स्वप्ने च देवदेवस्य गुरूणामपि दर्शनम् ॥४६॥

यथार्थः कथ्यते भाग्याद् भाग्योदर्कश्च कथ्यते ।
स्वप्नादिष्टैश्च विद्वद्भिर्निर्मितं वाङ्मयं महत् ॥४७॥

In Public domain. Digitization Muthulakshmi Research Academy

देहेस्मिन् कुण्डलाकारा कुण्डलिनी प्रकाशिनी ।
मूलाधारमधिव्याप्य भासते शक्तिरीश्वरी ॥४८॥

या शक्तिः पृथिवीं धत्ते कुण्डलाकारिणी परा।
सैवादिशेषनामानं भजते तन्त्रवाङ्मये ॥४९॥

एवं योगरहस्यं यो ज्ञात्वा योगं समभ्यसेत् ।
कैवल्यं प्राप्य जन्मादिचक्रस्यान्तं समाप्नुयात् ॥५०॥

॥ इति श्रीगुलाबगीतायां पञ्चमोध्यायः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ षष्ठोऽध्यायः

अथ ज्ञानस्वरूपं वः प्रवक्ष्यामि समासतः ।
यदाप्य मोक्षसाम्राज्ये सुखिनः सन्ति साधवः ॥१॥

स्वात्मानुभूतिहेतुर्यः क्रमेण मोक्षसाधनम् ।
तज्ज्ञानमन्यदत्यन्तं लोकानां भ्रान्तिकारणम् ॥२॥

येन स्वरूपजिज्ञासा पश्चाच्च ज्ञानसाधनम् ।
स्वरूपं ज्ञायते पूर्णं तज्ज्ञानं लोकतारकम् ॥३॥

दृश्यस्वरूपविस्तारो ज्ञानमित्युच्यतेऽबुधैः ।
दृशः स्वरूपनिष्ठैव ज्ञानमित्युच्यते बुधैः ॥४॥

येन स्वरूपबोधेन कामादिमलशोधनम् ।
पूर्णत्वञ्च भवेज्जीवे तज्ज्ञानं लोकतारकम् ॥५॥

श्रीकृष्णपदरेणूनां रेणूनां येन रेणवः ।
धार्यन्ते हृदये येन तज्ज्ञानं जन्मतारकम् ॥६॥

गीतार्थसारसौगन्ध्यावासितं येन जीवितम् ।
तज्ज्ञानं सर्वलोकस्य सौगन्ध्यस्य च कारणम् ॥७॥

अहिंसा करुणा प्रेम त्रितयं येन वर्ध्यते ।
तज्ज्ञानमन्यदान्ध्यं स्याच्चित्तस्यैव मलात्मकम् ॥८॥

नाहं न मे गुणोद्भूतं जगत् सर्वविकारजम् ।
निष्ठेयं जायते येन तज्ज्ञानं जन्मतारकम् ॥९॥

चैतन्याम्बुधिवीचीनां लीलेयं सृष्टिरद्भुता ।
तत्राहं वीचिरात्मीया ज्ञानमित्येतदुच्यते ॥१०॥

कृष्णभिन्नं जगत् सर्वं मिथ्येति वा पुनः पुनः ।
कृष्णात्मकमदः सर्वमिति वा भाव्यतां सदा ॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

येनावृतिविनाशः स्यात् मनसि स्थिरता तथा ।
ईश्वराराधनार्हत्वं तज्ज्ञानं प्रोच्यते बुधैः ॥ १२॥

ईश्वरस्यापरोक्षत्वभानं येन समुल्लसेत् ।
हृदये ज्ञानमन्त्यं तज्ज्ञानं सत् प्रोच्यते बुधैः ॥ १३॥

जीवः कर्ता च भोक्ता च कारयिता महेश्वरः ।
इत्येतद् भानमेवोक्तं ज्ञानं तद्विदां वरैः ॥ १४॥

येन जीवः क्रमेणोर्ध्वं गत्वा लब्ध्वा मनोन्मनीम् ।
तज्ज्ञानं जीवमोक्षस्य साक्षाद्धेतुः प्रकीर्तितम् ॥ १५॥

सर्वस्मात् सारमादाय शास्त्राल्लोकहिताय हि ।
यत् पुरस्कुरुते नित्यं तज्ज्ञानं लोकतारकम् ॥ १६॥

ब्रह्म सत्यमिति स्थैर्यं तदाकारमनो यदा ।
जायते तस्य हेतुः स्यात् ज्ञानं लोकोपकारकम् ॥ १७॥

आनन्दाब्धितरङ्गेषु हंसो हंसायते क्षणात् ।
तज्ज्ञानं नित्यसौन्दर्यसमुल्लासः पदे पदे ॥ १८॥

कृष्णानन्दमहोल्लासे जीवपुत्तलिकालयः ।
येनैव जायते तत् स्यात् ज्ञानं ज्ञेयविजृम्भणम् ॥ १९॥

अनध्यस्तविवर्तो हि शिवकृष्णमयं वपुः ।
अनन्यभक्तिसंसेव्यमितिज्ञानं परं मतम् ॥ २०॥

ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चेतसा ।
प्राप्यते यद्धि मोक्षाय ज्ञानं तत् प्रोच्यते बुधैः ॥ २१॥

आर्यधर्मो महान् धर्मः शाश्वतः कलिनाशकः ।
इत्येतज्ज्ञानमित्युक्तं भारतस्य महद् यशः ॥ २२॥

वेदो वेदान्तरूपेण स्थायुकं भजते यशः ।
द्वयोर्लक्ष्यं भवेद् येन ज्ञानं तज्जीवतारकम् ॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

विभ्रान्तिरहितं चित्तं स्थिरां शान्तिं प्रपद्यते ।
येन तज्ज्ञानमित्युक्तं ज्ञानं न भ्रान्तिकारणम् ॥२४॥

अभ्रान्ता मुनयः सर्वे लोककल्याणहेतवे।
प्रवृत्तास्तेषु नाज्ञानं ज्ञानमेतन्मनीषिणाम् ॥२५॥

शब्देषु भ्रान्तिमासाद्य तत्त्वज्ञानेन वञ्चिताः ।
जीवनं मोहितं केचित् कुर्वतेऽज्ञानकारणात् ॥२६॥

शब्देष्वेव महत् तत्त्वं निक्षिप्तं मोक्षसाधनम्।
इत्थं येन सदा शब्दाः प्रयुज्यन्ते स बुद्धिमान् ॥२७॥

यज्ज्ञानं भक्तिमाधुर्यं तनुते तज्ज्ञानमन्तिमम् ।
तद्भिन्नं केवलाज्ञानं जनानां मोहकारकम् ॥२८॥

ज्ञानं विना कथं प्रीतिरीश्वरेऽपि भवेन्नृणाम् ।
तस्मादीशगुणग्रामं जानीत विगतज्वराः ॥२९॥

अद्यश्वीनं सदा भाव्यं जीवनं जीवधारकैः ।
तस्माद् धर्मं समाश्रित्य नेयं जीवनमुत्तमम् ॥३०॥

येनाऽहंभावना गाढं वर्धिता गर्विताऽमिता ।
ज्ञानं तन्नैव संग्राह्यं त्याज्यं स्वक्षेममिच्छता ॥३१॥

येनान्तः शान्तिरुध्वस्ता विक्षिप्तं चित्तमन्ततः ।
ज्ञानं तन्नैव संग्राह्यं सतां वचःसु भक्तितः ॥ ३२॥

चक्षुर्द्वारा जगत्पीत्वा वासनाभिर्निबध्य च ।
स्वमनःफलके नित्यं स्वदन्ते केचिदर्भकाः ॥ ३३ ॥

चक्षुर्निमीलने प्राप्तां शान्तिमन्तर्गतां सदा ।
उन्मीलनेऽपि सर्वत्र यः प्राप्नोति स योगिराट् ॥३४॥

आवृत्तचक्षुरत्यन्तां शन्तिं यां प्राप्य नन्दति ।
बहिश्च तां सदा प्राप्य नन्दतादीश्वरेच्छया ॥ ३५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अहं ममेति जीवस्य चिह्ने दुःखविवर्धके ।
तयोर्विवेचने सत्यं नाशो भवति नान्यथा ॥ ३६ ॥

ईश्वरस्याहमित्येका ममायमिति चापरा ।
दृढबुद्ध्या कृते चेत्ते निःश्रेयसप्रदे मते ॥ ३७ ॥

ईश्वरो मूर्तिमानेव गुरुरूपेण भासते।
इत्थं यस्य गुरौ भक्तिः स मुक्तो नात्र संशयः ॥ ३८ ॥

आद्यन्तवन्ति भूतानि तेषां द्रष्टा महान् विभुः ।
स एवान्तः प्रविश्यैतान्यूर्जयत्यात्मतेजसा ॥ ३९ ॥

अज्ञात्वा तस्य तेजस्तज्ज्ञात्वा चापि विमोहिताः ।
बाह्येष्वेव हि रूपेषु विकारान् कुर्वते जनाः ।।४०।।

क्षणेनात्मानमालोच्य विकारेभ्यः पृथक् स्थितम् ।
योऽन्तः शान्तिं क्षणाद् विन्ते स धन्यो योगिराट् स्वयम् ॥ ४१ ॥

ज्ञानं ज्ञेयस्य तादात्म्यं ज्ञातुर्भेदविवर्जितम् ।
तदैक्यं ब्रह्म निर्द्वन्द्वं सर्वकल्याणकारकम् ॥ ४२ ॥

आदावन्ते च यन्नास्ति मध्ये भवति दर्शितम्।
तन्मिथ्या तस्य विज्ञानादात्मनो न फलं क्वचित् ॥ ४३ ॥

रज्जौ सर्पभ्रमः शास्त्रे दृष्टान्तत्वेन दर्श्यते ।
सर्पस्वरूपविज्ञानात् कस्य किं फलमुच्यते ॥ ४४ ॥

रज्जुस्वरूपविज्ञाने भयं कम्पादिकं स्वतः ।
सर्पस्वरूपविज्ञानात् कस्य किं फलमन्तिमम् ॥ ४५ ॥

नष्टं स्यात् सत्यविज्ञानं प्रदत्ते फलमुच्यते ।
ज्ञानं स्मृतिश्च विज्ञानमूहापोहौ नृणां सदा ।
सर्वेश्वराद् भवन्त्येते विशिष्टं कालमाश्रिताः ॥ ४६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्माज्ज्ञाने नरो गर्वमज्ञाने दुःखपीडनम् ।
नाप्नुयादीश्वरे भारं न्यस्य सन्तुष्टमानसः ॥४७॥

नाऽज्ञानं लौकिकं, दुःखं जनयेत् पारलौकिकम् ।
पारलौकिकमज्ञानं महन्नाशयते फलम् ॥४८॥

तस्माद् ज्ञानी तथा योगी भक्तिमेवाश्रितौ सदा ।
स्वजन्म सफलं कर्तुं समर्थौ भवतां भुवि ॥४९॥

॥ इति श्रीगुलाबगीतायां षष्ठोऽध्यायः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ सप्तमोऽध्यायः

अथ भक्तिं प्रवक्ष्यामि जीवानां हितकाम्यया ।
या सूते मोक्षसाम्राज्यं योग्यानां सम्यगाश्रिता ॥ १ ॥

भक्तिज्ञानयुतः साक्षात् सम्प्रदायस्तपस्विनाम् ।
भागवतोऽयमत्युच्चैः सर्वशास्त्रार्थसारदः ॥ २ ॥

धारावाही रसो भक्तिरीशे तत्पदगोचरे।
त्वम्पदज्ञो परो भक्तस्तयोरैक्यं रसात्मकम् ॥ ३ ॥

भक्तिश्च पुरुषार्थः स्यात् पञ्चमः सर्वधर्मिणाम् ।
तत्प्राप्त्या मोक्षसाम्राज्यं करामलकतां भजेत् ॥ ४ ॥

बिम्बं महेश्वरः साक्षाज्जीवस्तत्प्रतिबिम्बकः ।
दृष्टिसृष्टिप्रवादेऽपि भक्तिर्न हीयते परा ॥ ५ ॥

तस्मादेव तु मुक्तानामपि सर्वविलापने।
पञ्चमः परुषार्थोऽयं भक्तिरूपः प्रकथ्यते ॥ ६ ॥

ईश्वरेण प्रदत्ताया वाचः सार्थक्यमीप्सितुम् ।
भक्तिमेव प्रकुर्वीत वागृणं हीयते ततः ॥ ७ ॥

पुण्याच्छुद्धिरुपास्तेस्तु स्थैर्य ज्ञानाद्विमुक्तता ।
प्रारब्धाभिभवो भक्तेरित्येतत् सत्यमन्तिमम् ॥ ८ ॥

समाधौ व्यतिरेकेण ब्रह्म भवति गोचरम् ।
भक्तावन्वयरूपेण तदेवानन्दकारकम् ॥ ९ ॥

वैराग्यं दृढयितुं भक्तिर्महेशस्य गरीयसी ।
रसास्वादविनाशाय श्रीकृष्णस्य तादृशी ॥ १० ॥

ईश्वरास्तित्वधीर्यस्य तस्य भक्त्यधिकारिता ।
स ब्राह्मणो नृपो वैश्यः शूद्रो वाऽप्यन्त्यजोऽपि वा ॥ ११ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वेषामपि वर्णानां परमात्मैकसंश्रयात् ।
तद्भक्तेरधिकारश्च स्वयं प्राह जनार्दनः ॥१२॥

शब्दोत्था चेतसो वृत्तिः साक्ष्युन्मुखतया स्थिता ।
गृह्णाति परमानन्दं तद्भक्तौ मानमुच्यते ।।१३।।

पराऽपरेति सा भक्तिर्द्विविधा शास्त्रनिश्चिता ।
मुख्या गौणीति तस्याश्च भेदद्वयं प्रकथ्यते ॥१४॥

आत्मसाक्षात्कृतेः प्रेम्णो लयः क्वापि न सम्भवेत् ।
इदमेव परं प्रेम मुख्या भक्तिरिति स्मृता ॥१५॥

अहं भिन्नात्मसंस्कारो द्रुते चेतसि यो भवेत् ।
फलभिन्नतयोद्भूतः स रसो भक्तिलक्षणः ॥१६॥

परा भक्तिरियं शुद्धा प्रेमसागरलक्षणा।
उपाधिसहिता या स्याद् गौणीति प्रोच्यते बुधैः ॥१७॥

सत्त्वोद्रेके द्रुते चित्ते प्रह्लादो जायते स्वयम्।
स एव रसतामेत्य भक्तिनाम्नाऽभिधीयते ॥१८॥

अदृष्टे दर्शनोत्कण्ठा दृष्टे विश्लेषभीरुता।
दृष्टेऽदृष्टे महद् दुःखं तदप्यस्ति महत् सुखम् ॥१९॥

सदा कृष्णपदप्रेम्णा मानसं द्रवतां नयेत्।
तदा तदाऽकृतिर्दिव्या मानसे स्थिरतां व्रजेत् ॥२०॥

श्रीरिति प्रोच्यते राधा श्रीकृष्णो राधया युतः।
श्रीकृष्णनामसंकीर्तिस्तयोः साक्षात् स्मृतिः परा ॥२१॥

शैवो भूत्वा नमेद् विष्णुं तेन शम्भुः प्रसीदति ।
वैष्णवश्चापि नमेच्छम्भुं तेन विष्णुः प्रसीदति ॥२२॥

पिता शम्भुः पतिः कृष्णः पिता कृष्णः पतिः शिवः ।
उभयोर्न भवेद् भेद इति प्राचां मतं हितम् ॥२३॥

Institute for Advanced Study in Yoga Tradition. Digitization Muthulakshmi Research Academy

ज्ञानं शाङ्करमद्वैतं मधुरं भक्तिसंज्ञितम् ।
भक्तिः प्रीतिरविच्छिन्ना गुरौ वा शिवकृष्णयोः ॥२४॥

समाधौ स्यादहं ब्रह्म व्युत्थाने दासभावना ।
तादृशी भावना श्रेष्ठा प्रोच्यते ब्रह्मविद्वरैः ॥२५॥

त्वंपदाश्रयिणी प्रीतिः ज्ञानाभिमानवर्जिता ।
तत्पदार्थे समापन्ना भक्तिरित्यभिधीयते ॥२६॥

व्युत्थाने ज्ञानिनः शक्यो देहाहङ्कार ईरितः ।
तस्माज्ज्ञानोत्तरा भक्तिर्गर्वापहारिणी मता ॥२७॥

ईश्वरेणैव मायां स्वामाश्रित्य शरीरिता ।
शरीरं तच्च देवस्य नित्यमेवोच्यते बुधैः ॥२८॥

भगवतः शरीरस्य सत्ता स्यात् पारमार्थिकी।
प्रतिभासावच्छिन्ना सा नित्यैव गदिता बुधैः ॥२९॥

घटादेर्मृत्तिकादृष्ट्या ह्यनध्यस्तविवर्तता।
तस्यैव ब्रह्मदृष्ट्या तु स्यादध्यस्तविवर्तता ॥३०॥

अधिष्ठानस्य बोधेऽपि विवर्तो योऽनुवर्तते ।
अनध्यस्तविवर्तोऽयं भगवत्प्रीतिवर्धकः ॥३१॥

अभ्यासे सिद्धगस्य योगशास्त्रोक्तरीतितः ।
अनध्यस्तविवर्तस्य साक्षात्कारः स्वयं भवेत् ॥३२॥

निर्गुणन्तु परब्रह्म स्वभक्तानुजिघृक्षया ।
सगुणं भाति भूतानामानन्दं वर्धयत् सदा॥३३॥

ज्ञानेश्वरो महाराजः एकनाथस्तथा सधीः ।
तुकारामश्च सद्वर्यश्चान्ये सद्योगिपुङ्गवाः॥३४॥

ईश्वरस्य शरीरं ते स्वानुभूत्या न्यदर्शयन् ।
अनध्यस्तविवर्तस्य प्रामाण्यं तत एव हि ॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मज्ञानेऽपि कृष्णादि शरीरं न निवर्तते ।
अनध्यस्तविवर्तत्वं तस्मादित्येव बोध्यताम् ॥३६॥

अधिष्ठानस्य बोधेन निवर्त्यं यच्च दृश्यते ।
तदध्यस्तविवर्तस्य दृष्टान्तत्वेन गीयते॥३७॥

रज्जुज्ञानेन सर्पस्य यो बोधो विनिवर्तते ।
स एवात्र हि दृष्टान्तः शुक्तौ रजतधीर्बुधैः ॥३८॥

ब्रह्मण्यध्यस्तमेवेदं विश्वं मोहपरायणम् ।
ब्रह्मज्ञानेन सम्पूर्णं विश्वमेव निवर्तते ॥३९॥

किन्तु ब्रह्मप्रबोधेऽपि श्रीकृष्णादिशरीरकम् ।
निवर्तते यतस्तस्मादनध्यस्तविवर्तता ॥४०॥

यत्र यत्रावृतिर्जाता ज्ञानमावृतिनाशकम् ।
यत्रावृतिर्भवेन्नैव तत्र तन्नाश एव न ॥४१॥

ईश्वरस्य शरीरस्य नावृतिस्तु भवेत् क्वचित् ।
तस्माज्ज्ञाननिवर्त्यं तत् नैव स्यात् शास्त्रवाक्यतः ॥४२॥

तस्माद् विदेहमुक्तौ च भक्तिः स्यात् स्वीकृता परा।
नोचेदानन्द एवात्र कथं व्यज्येत तत्त्वतः॥४३॥

जीवेशयोः परानन्दरूपेणात्र व्यवस्थितिः।
भक्तौ हि प्रोच्यते सद्भिस्तस्मात् सा सेव्यतां बुधैः ॥४४॥

यां प्रीतिं गोपिका कृष्णे रासक्रीडासु वल्लभे ।
दर्शयित्वा परानन्दं प्राप्नोत् सा भक्तिरुत्तमा ॥४५॥

दृष्टिसृष्टिविवादेऽपि भक्तिर्भवति गोपतौ ।
वृत्तिरूपा परा भक्तिः सन्धिरूपः प्रबोधकः॥४६॥

व्युत्थाने च समाधौ च या भवेत् कृष्णरूपता ।
सा भक्तिः परमोत्कृष्टा या स्वयं मोक्षरूपिणी ॥४७॥

CC-0. In Public Domain. Digitization Muthulakshmi Research Academy

सागरेण किमस्माकं बिन्दुनैव महत् सुखम् ।
निराकारेण किं नः स्यात् सगुणं भवति सुन्दरम् ॥४८॥

श्रीकृष्ण कृष्ण जगदात्मक कृष्ण कृष्ण
कृष्ण प्रभो दलय दुःखमशेषमस्य ।
इत्थं प्रभोश्चरणमूलगतस्य जन्म
धन्यं तथाऽन्यजनदुःखविनाशकञ्च ॥४९॥

गुलाबरावसाहित्यपाथोनिधिविलोडनात् ।
यच्चिन्तनामृतं प्राप्तं तदत्र निहितं मया ॥५०॥

अनेन ज्ञानयज्ञेन तुष्यतात् परमेश्वरः ।
सतां विचारसौगन्ध्यं व्याप्नुतां भुवि सर्वदा ॥

॥ इति सप्तमोऽध्यायः ॥

॥ इति श्रीमधुसूदनपेन्नारचिता श्रीगुलाबगीता समाप्ता ॥

***

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

(रामटेकतः कालिदाससंस्कृतविश्वविद्यालयेन प्रकाशितः)

अथ समाधिपादः

योगसूत्रम्

अथ योगानुशासनम् ॥ १ ॥

योगसारः

श्रीगायत्रीप्रसादेन यत् किञ्चित् प्रोच्यते मया ।
गुणः संगृह्यतां तस्माद् गुणदोष-विवेकिभिः ॥ १ ॥

हिरण्यगर्भतः श्रीमान् योगोऽयं सम्प्रवर्तितः ।
पूर्वान् श्रेष्ठानृषीन् प्राप्य लोकेस्मिन् राजते भृशम् ॥२ ॥

योगं पतञ्जलिर्देवः नानारूपविलासिनम् ।
जग्रन्थ सूत्ररूपेण सर्वेषां हितकाम्यया ॥३ ॥

अनुशासन-शब्देन सेयं ज्ञेया परम्परा ।
अथ-शब्दश्च सूत्रेस्मिन्नारम्भार्थः प्रकीर्तितः ॥ ४ ॥

अतः प्रथम-सूत्रस्य भावोऽयं ज्ञायतां स्फुटः ।
योगः परम्पराप्राप्तः प्रारभ्यते मयाऽधुना ॥ ५ ॥

शासनं शास्त्रमेव स्यात् सर्वत्र नियमार्थकम् ।
अनुशासनमित्युक्ते यत्प्राप्तं सम्प्रदायतः ॥६ ॥

योगः साङ्ख्यस्य सिद्धान्तान् स्वीकृत्यैव प्रवर्तते ।
तस्मात् सांख्यस्य सिद्धान्ताः प्रोच्यन्ते सारतोऽधुना ।।७ ॥

दृश्यमानस्य लोकस्य प्रधानं कारणं मतम् ।
क्षेत्र-क्षेत्रज्ञ-संयोगः प्रोक्तोऽयं साङ्ख्यदर्शने ॥८ ॥

प्रकृतेः क्षेत्रसंज्ञा स्यात् पुमान् क्षेत्रज्ञ उच्यते ।
प्रकृत्या तस्य संयोगाल्लोकोऽयं सृज्यते सदा ॥९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

साम्यावस्था गुणानां हि प्रकृतिः प्रोच्यते नये ।
सत्त्व-राजस्तमान्स्येते कार्यतो हि गुणास्त्रयः ॥ १० ॥

बुद्धिः स्यात् प्रथमा सृष्टिर्द्वितीया स्यादहंकृतिः ।
अहंकारसमुत्पन्नं तन्मात्रं भूतकारणम् ॥ ११ ॥

इन्द्रियाणि दशैकं च विकारोहंकृतेस्तथा ।
प्रधानो यो गुणस्तस्मिन् अहंकारे स तत्परः ।।१२ ॥

प्रधानं वैकृते सत्त्वं तैजसे रज उच्यते ।
तमस्तु तामसे मुख्यं संज्ञा ज्ञेया हि कार्यतः ॥ १३ ॥

ज्ञानेन्द्रियाणि पञ्चैवं कर्मेन्द्रियाणि पञ्च च ।
अहङ्कारस्य कार्यं तन्मानसं चान्तरिन्द्रियम् ॥ १४ ॥

अहङ्कारो महाच्चित्तं मनश्चत्वारि दर्शने ।
अन्तःकरणमित्येकसंज्ञाभाञ्जि भवन्ति हि ॥ १५ ॥

वैविध्यं दृश्यते कार्ये करणे चैकता तथा ।
कार्यं सर्वं विनिष्पन्नं कारणादेव तत्त्वतः ॥ १६ ॥

सूत्रम्

योगश्चित्तवृत्तिनिरोधः ॥२॥

योगसारः

चित्तं हि मन एवात्र न कार्यो भेदसंशयः ।
चित्तवृत्ति-निरोधोऽतस्त्वन्तःकरणरोधनम्॥ १७ ॥

प्रधानस्य च कार्यत्वान्मनस्त्रैगुण्यमिष्यते ।
गुणानां मानसे तस्मात् वृत्त्याख्यं कर्म दृश्यते ॥ १८ ॥

ययेदं धार्यते चितं यया विज्ञायते तथा ।
चित्तवृत्तिरिति ज्ञेया साऽखिला ब्रह्मवृत्तिवत् ॥ १९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

क्षिप्तं विक्षिप्तमत्यन्तं मूढमेकाग्रमेव वा ।
निरुद्धं चेति चित्तस्य गुणानां कार्यमुच्यते ॥२० ॥

रजसः क्षिप्त-विक्षिप्ते तमसो मूढमुच्यते ।
एकाग्रं सत्त्वतः प्रोक्तमित्थं हि भूमयो मताः ॥ २१ ॥

योगाय क्षिप्त-विक्षिप्ते नोपयुक्ते कदाचन ।
न वा मूढा ततो ह्यन्ते द्वे योग्ये भूमिके मते ॥२२ ॥

वासनाभ्यो हि वृत्तीनामुद्भवः परिकीर्तितः ।
वासनानां मनोमूलं योगो निर्वासनं मनः ॥२३ ॥

चित्तवृत्ति-निरोधोऽत्र वृत्तीनां कारणे लयः ।
सैष समाधिरित्युक्तो योगो भाष्यादिकारिभिः ॥२४ ॥

सर्ववृत्ति-निरोधोऽत्र नोक्तः सूत्रेण साशयात् ।
तत्रेदं कारणं वेद्यं भाष्यकारस्य शब्दतः ।।२५ ॥

समाधेर्भवतो भेदौ सम्प्रज्ञासम्प्रज्ञनामतः ।
सर्वशब्दे गृहीते हि द्वयोर्न संग्रहो भवेत् ॥२६ ॥

सर्ववृत्ति-निरोधस्तु स्यादसम्प्रज्ञ-नामके।
सम्प्रज्ञाते तु चित्तस्य वृत्तिर्भवति सात्त्विकी ॥२७ ॥

इत्यतः सर्वशब्दोऽत्र सूत्रे नोपात्त इत्ययम् ।
आशयः कथितो भाष्ये व्यासवर्येण धीमता ॥२८ ॥

चित्तस्य तस्य वृत्तीनां संबन्धः ईदृशः स्फुटः ।
दीपस्य हि यथा ज्वाला तथा चित्तस्य वृत्तयः ॥२९ ॥

वृत्तिर्द्रव्यं मनो द्रव्यमुभयं द्रव्यमेव हि ।
यद्यस्माज्जायते द्रव्यं तत्तु तत्रैव लीयते ॥३० ॥

वृत्तीनां चित्तजन्यानां चित्ते यो जायते लयः ।
स एव योग इत्युक्तः समाधिनामकः शुभः ॥३१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

संयोगार्थेऽपि शब्दोऽयं लोके विज्ञैः प्रयुज्यते ।
परमत्र न संयोगो योगशास्त्रे विवक्षितः ।।३२ ॥

दुःख-संयोग-वियोगो योगशब्देन दर्श्यते ।
द्रष्टुर्दृश्यवियोगो वै योगः स्याद् योगदर्शने ॥३३ ॥

चैतन्यं पुरुषः साक्षी चितिश्चिदिति नामतः ।
एकमेवोच्यते तत्त्वं चैतन्यमेवान्तिमम् ॥३४ ॥

अपरिणामिनी शुद्धा चितिरप्रतिसङ्क्रमा ।
अनन्ताऽविषया किन्तु दर्शित-विषया मता ॥ ३५ ॥

सूत्रम्

तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥३॥

योगसारः

तदा वृत्ति-निरोधे या द्रष्टुः स्यात् स्थितिरुत्तमा ।
सैवात्र कथिता सूत्रे स्वरूपस्थिति-रूपिणी ॥३६ ॥

द्रष्टात्र शुद्ध-चैतन्यं वृत्तिमात्रेण बिम्बितम् ।
तस्माद वृत्ति-निरोधे तत् स्वरूपेणैव विद्यते ॥३७ ॥

तस्माद् वृत्ति-निरोधेऽपि नात्मनो नाश-संभवः ।
आत्मा चैतन्यमेवेति चैतन्यं शिष्यतेऽन्ततः ॥३८ ॥

ये केचिच्चित्तमात्रस्य सत्तां स्वीकुर्वतेऽबुधाः ।
ते तत्तच्चित्तनाशेन स्वात्मनाशं प्रचक्षते ॥ ३९ ॥

तेषामत्र मतं सूत्रे खण्डितं बुध्यतां बुधैः ।
वृत्तिनाशेऽपि द्रष्टुस्तु चितिरूपेण संस्थितेः ।।४० ॥

चैतन्येन मनो नूनं संबद्धं वर्तते सदा ।
द्वयोः स्व-स्वामि-संबन्धस्ततोऽयसो मणेरिव ॥४१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

एवं वृत्ति - निरोधस्य फलमत्र निगद्यते ।
वृत्ति-हानौ न चैतन्य-हानिरित्यन्तिमं मतम् ॥ ४२ ॥

चित्तमेव चितिः स्यात् चेत् न किञ्चिदवशिष्यते ।
इत्यतः सूत्रकारेण स्वरूप- स्थितिरीरिता ॥४३ ॥

एवं समाहितस्यान्तः स्वरूपमुक्तमादरात् ।
जाग्रत्स्वप्न-स्थिती तावदितो भिन्ने समुत्थिते ॥४४ ॥

कैवल्य-सदृशी काचिद् स्वरूप-स्थितिरुच्यते ।
व्युत्थानं नास्ति कैवल्यात् समाधेरस्ति तत्पुनः ॥४५ ॥

सूत्रम्

वृत्तिसारूप्यमितरत्र ॥४॥

योगसारः

समाधि-स्थिति-भिन्नासु द्रष्टुः किं रूपमुच्यते ।
इतीदं दर्शितं सूत्रे वृत्ति-सारूप्य-रूपतः ॥४६ ॥

यादृशी यादृशी वृत्तिस्तादृशी तादृशी चितिः ।
इत्येवं भासतेऽन्यत्र स्वरूपस्थितितोऽन्यदा ॥४७ ॥

अध्यासः स्पष्टमेवात्र सारूप्यकारणं भवेत् ।
अन्यथा कुत्र सारूप्यं चित्तस्य पुरुषस्य च ।।४८ ॥

स्वरूप-प्रच्युतिर्नूनं वृत्ति-सारूप्य-वञ्चितः।
तेनास्य काम-लोभादि-दोषाणामुपरागिता ॥४९ ॥

द्रष्टृत्वमस्य साङ्केत्यं तस्मात् चित्तोपरागिता ।
वासना वृत्तिसारूप्ये प्रधानं कारणं मतम् ॥ ५० ॥

वासनानां विनाशेन न चितो वृत्ति-रूपता ।
वासनानामधिष्ठानं चित्तं न पुरुषोऽमलः ॥५१ ॥

Public domain. Digitization Muthulakshmi Research Academy

अहं कर्ता ह्यहं भोक्ता द्रष्टाहमिति भावनाः ।
वृत्तिसारूप्य-सञ्जाताः केवलाध्यासमूलकाः ॥५२ ॥

सूत्रम्

वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥५॥

योगसारः

असङ्ख्येया हि चित्तस्य वृत्तयः परिकीर्तिताः ।
एकत्र गणने तास्तु पञ्चैव शक्तिसंज्ञकाः ॥ ५३ ॥

चित्तस्य वृत्तयः पञ्च प्रमाणादि-विभेदतः ।
पञ्चावयविनी वृत्तिस्तस्मात् प्रत्यय-योजना । ५४ ॥

क्लिष्टाऽक्लिष्टेति प्रत्येकं वृत्तिरस्ति पुनर्द्विधा ।
अक्लिष्टाः ख्याति-मूलाः स्युः क्लिष्टाश्च क्लेश-मूलकाः ॥ ५५ ॥

आदौ क्लिष्ट-निरोधः स्यात् पश्चादक्लिष्ट-निग्रहः ।
स्थूलस्य क्षालणम् पूर्वं सूक्ष्मस्य तदनन्तरम् ॥ ५६ ॥

संस्कारेभ्यो भवेद् वृत्तिः संस्कारो वृत्तितः पुनः ।
वृत्ति-संस्कार-चक्रस्य प्रवृत्तिर्भवतीदृशी ॥ ५७ ॥

सूत्रम्

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥६॥

योगसारः

प्रमाणादि-विभेदेन वृत्तयः संभवन्ति हि ।
एतेषां वृत्ति-रूपाणां निरोधो योग उच्यते ॥५८ ॥

पृथक् पृथग्-विनिर्देशे प्रमाणानि विपर्ययः ।
विकल्पश्च तथा निद्रा स्मृतिश्चेत्यवधार्यताम् ॥५९ ॥

क्लिष्टाऽकिल्ष्टविभेदेन प्रत्येकं च द्विधा पुनः ।
जाग्रत्-स्वप्न-प्रपञ्चोऽयं वृत्तिरूपोऽस्ति तत्त्वतः ।। ६० ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥

योगसारः

यथार्थानुभवः शास्त्रे प्रमेति कथ्यते बुधैः ।
प्रमायाः करणं प्रोक्तं प्रमाणमिति तद्विदैः ॥ ६१ ॥

यथार्थानुभवः पश्चाद्बाधितो नैव विद्यते ।
अतो ह्यबाधिता बुद्धिः प्रमेति शास्त्रनिर्णयः ॥६२ ॥

इन्द्रियार्थोपसम्बन्धात् चित्ते वृत्तिः प्रजायते ।
या सा प्रत्यक्षनाम्नेह शास्त्रेषु परिकीर्तिता ।।६३ ॥

अनुमानं भवेद् वृत्तिः जायमानोपपत्तितः ।
साहचर्यात् तथा हेतोः साध्येन सह जायते ॥६४ ॥

वर्तमानेन संबन्धाद् वृत्त-वर्तिष्यमाणयोः ।
जायमाना भवेद्वृत्तिरनुमानं पुनस्त्रिधा ।। ६५ ॥

आप्तेन स्वप्रमा शब्दात् साक्षात् संबोध्यते तदा ।
आगमः स प्रमाणं स्यात् क्वचिदन्यमुखादपि ।।६६ ॥

यथार्थदर्शिनो वाक्यं प्रमाणं निश्चयात्मकम् ।
वेदा वृद्धाश्च विज्ञेयाः प्रमाणं तत्त्वनिर्णये ॥ ६७ ॥

एवं त्रीणि प्रमाणानि योगशास्त्रे भवन्ति वै ।
प्रमाणानां फलं बोधः पौरुषेयोऽवभासितः ॥ ६८ ॥

प्रमाणं क्लेशमूलं चेद्वासनाकारणम्मतम् ।
तदेव शास्त्रशुद्धं चेदक्लिष्टं क्लेशनाशनम् ।। ६९ ॥

सूत्रम्

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ ८॥

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

तद्रूपं तच्च रूपं च तस्मिन् यत् स्यात् प्रतिष्ठितम् ।
तद्भिन्नं ज्ञानमत्यन्तं बाधितं स्याद विपर्ययः ।। ७०॥

अतद्रूप-प्रतिष्ठं यज्ज्ञानं सत्यत्व-वर्जितम् ।
अविद्याख्यं भवेद्योगे संज्ञा तस्य विपर्ययः ॥ ७१॥

द्विचन्द्र-दर्शनं रज्जौ सर्पज्ञानं विपर्ययः ।
एतद्धि सर्वथाज्ञानं प्रमाणेनैव बाध्यते ॥७२ ॥

विपर्ययोपि क्लिष्टः स्यादक्लिष्टश्च यथाफलम् ।
सर्वदायं निरोद्धव्यो योगाभ्यासे जिगीषुणा ।।७३ ॥

सूत्रम्

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥९॥

योगसारः

वृत्तिर्या वस्तुशून्येपि शब्द-ज्ञानानुपातिनी ।
विकल्प इति विख्याता व्यवहारस्य कारणम् ।। ७४ ॥

विपर्यये विकल्पे च साम्यमस्ति हि कुत्रचित् ।
अतद्रूप-प्रतिष्ठे द्वे वृत्ती स्यातां विचारतः ॥ ७५ ॥

विकल्पे वस्तुशून्यत्वं वस्त्वाधारोविपर्यये।
तस्माद् भिन्ने उभे वृत्ती पृथगेवहिसूत्रिते ॥ ७६ ॥

चिते रूपं हि चैतन्यमित्यत्र सा वृत्तिः स्फुटम् ।
चिदेव यत्र चैतन्यं केन किं व्यपदिश्यते ॥ ७७ ॥

सूत्रम्

अभावप्रत्ययालम्बनावृत्तिर्निद्रा ॥ १० ॥

योगसारः

In Public domain. Digitization Muthulakshmi Research Academy

जाग्रद्वृत्तिस्तथा वृत्तिः स्वाप्निकी तमसा यदा ।
अभिभूते भवेतां सा वृत्तिर्निद्रेति कथ्यते ॥७८ ॥

अभावश्चान्य वृत्तीनां तामसो जायते यदा ।
मलिना चित्तसत्त्वस्य वृत्तिर्निद्रेति कथ्यते ॥ ७९ ॥

सा प्रत्यय-विशेषो हि जागरा-स्मृतियोगतः ।
निद्रापि वृत्तिरूपेति वृत्तिशब्दाद्विबुध्यते ।। ८० ॥

निद्राया वृत्तिरूपत्वं स्मरणादेव बुध्यते ।
जागर्यां यादृशी दृष्टा स्मृतिर्निद्रा च तादृशी ॥ ८१ ॥

विना वृत्तिं कथं ज्ञानं ज्ञानाभावे कथं स्मृतिः ।
तस्मान्निद्रा भवेद् वृत्तिः जागर्यां स्मृतिसम्भवात् ॥ ८२ ॥

सूत्रम्

अनुभूतविषयासम्प्रमोषः स्मृतिः ॥११॥

योगसारः

अनुभूतस्य सम्मोषः विषयस्य यदा भवेत् ।
चित्ते तदा भवेद् वृत्तिः स्मृतिरूपा च पञ्चमी ॥ ८३ ॥

गृहीत-ग्राहिणी वृत्तिर्मनसः स्मृतिरुच्यते ।
अनपहरणं प्रोक्तं ह्यसम्प्रमोषशब्दतः ॥ ८४ ॥

गृहीत-ग्राहिणीत्युक्ते दोषः स्याल्लक्षणे तथा ।
ज्ञाने चानुगताकारे ह्यतिव्याप्तिः प्रसज्यते ।।८५ ॥

अतिव्याप्तिर्न वा तस्मिन् लक्षणे भिन्नरूपतः ।
ज्ञाने चानुगताकारे तदूनो विषयो न हि ॥ ८६ ॥

वृत्तिभिः सः चित्तस्य निरोधो योग उच्यते ।
योगः समाधिनामाऽसौ राजयोगाख्यतां गतः ॥ ८७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

अभ्यासवैराग्याभ्यां तन्निरोधः ॥ १२॥

योगसारः

अभ्यासाद् दीर्घकालेन नैरन्तर्येण सेवितात् ।
वैराग्यादपि चित्तस्य निरोधः शक्यते नृणाम् ।। ८८ ॥

कल्याणाय च पापाय नदीव कल्पते मनः ।
पुराण्याप्लावयेत् किंवा सस्यार्थं वा वहेन्नदी ।। ८९ ॥

तथा चित्तनदी पापे कल्याणे वाऽप्लावयेन्नरम् ।
बन्धाय विषयासक्तं विरक्तमिह मुक्तये ॥ ९० ॥

सूत्रम्

तत्र स्थितौ यत्नोऽभ्यासः ॥ १३॥

योगसारः

धैर्यं वा साहसं योगे नित्याभ्यासस्तथा परः ।
एकाग्रता - प्रसिद्ध्यर्थमुत्साहो यत्न उच्यते ॥ ९१ ॥

अभ्यासेनोत्तरं भूमिं परामाप्नोति साधकः ।
अभ्यासे वा प्रमत्तस्य निश्चिता ह्यनवस्थितिः ॥ ९२ ॥

नित्याभ्यासरतो योगी वैराग्यसम्पदा युतः ।
योगविघ्नानतिक्रम्य स्वाराज्यं प्राप्नुते परम् ॥ ९३ ॥

सूत्रम्

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ॥ १४॥

योगसारः

साधको नित्यमभ्यस्येत् दीर्घकालं निरन्तरम् ।
अप्रमत्तस्तथा योगं सत्कर्मभिः समादरात् ॥ ९४॥

In Public domain. Digitization Muthulakshmi Research Academy

अभ्यासो द्रुढतां याति कृतो नित्यं जिगीषया ।
योगार्थं जीवनं नेयं मोक्षार्थं प्रयतिष्णुना ॥ ९५ ॥

सूत्रम्

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥ १५॥

योगसारः

लौकिके वैदिके चापि विरक्तं विषये मनः ।
वशीकार-समाख्यां हि वैराग्य-स्थितिमाप्नुते ॥९६ ॥

अस्यां नैव मनोभ्रंषो यस्माद्वशीकृतं मनः ।
विषये दोषदृष्ट्यैव वैराग्यं जायतेऽपरम् ॥ ९७ ॥

सूत्रम्

तत्परं पुरुषख्यातेः गुणवैतृष्ण्यम् ॥ १६ ॥

योगसारः

परंतु पुरुष-ख्याते: गुणे वितृष्णतां गतम् ।
मनो वैराग्यमापद्य परं शान्तिमवाप्नुते ॥९८ ॥

पुरुषो निर्मलः पूर्णो ह्यसङ्गः केवलः सदा ।
न तस्य किञ्चिदाप्तव्यं न हेयं वास्ति भूतले ॥९९ ॥

अतो हि वासनाश्चैत्ताः भासयन्ति जगत् पुरः ।
गुणपरिणतिर्दृश्यं सदैव निर्गुणः पुमान् ॥ १०० ॥

इत्येषा विमला प्रज्ञा सञ्जाता योगिपुङ्गवे ।
परं वैराग्यसाम्राज्यं हस्तसात् कुरुतेऽचिरात् ॥ १०१ ॥

नातिदूरेऽस्य कैवल्यं परवैराग्यशालिनः ।
चिज्ज्ञानाद् गुणवैतृष्ण्याद् पुरुषः केवली भवेत् ॥ १०२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

वितर्कविचारानन्दास्मितारुपानुगमात्सम्प्रज्ञातः ॥१७॥

योगसारः

समाधिर्ध्येयभेदेन द्विविधः कथितो बुधैः ।
सम्प्रज्ञातस्तयोराद्यो ह्यसम्प्रज्ञस्तथोत्तरः ॥ १०३ ॥

यदा ध्येयस्य बोधः स्यात् समाधावपि योगिनः ।
सम्प्रज्ञातः समाधिः स्यात् चतुर्धाऽवस्थितस्तदा ॥ १०४ ॥

सवितर्का - विचारौ च सानन्द-सास्मितौ पुनः ।
एवं चतुर्विधो योगे सम्प्रज्ञातः प्रकीर्तितः ॥१०५॥

चित्तास्यालम्बनं स्थूलं वितर्के पाञ्चभौतिकम् ।
विचारे च तथा सूक्ष्मं तन्मात्रं भूतकारणम् ॥१०६ ॥

ग्राह्योऽयं विषयो योगे ह्यादौ चित्तविनिग्रहे ।
सानन्द-सास्मितौ पश्चाद् भेदौ ग्रहणपूर्वकौ ॥१०७ ॥

एकीभावो यदा बुद्धेर्ग्रहीत्रा पुरुषेण हि ।
अस्मिता स समाधिः स्यात् पुरुषो विषयस्तदा ॥ १०८ ॥

सत्त्वप्रकर्षतो चित्ते ह्याह्लादोयः प्रजायते ।
साक्षात्कारः स विज्ञेयः सानन्दश्चरमस्तदा ॥१०९ ॥

सूत्रम्

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥१८॥

योगसारः

विरामप्रत्ययाभ्यासाद् परवैराग्यनामकात् ।
असम्प्रज्ञ-समाधिः स्यात् संस्कारो यत्र शिष्यते ॥११० ॥

वृत्तीनां हि विरामस्य हेतुः प्रत्यय उच्यते ।
तत्पूर्वो हि समाधिः स्याद् द्वितीयः क्लेशनाशनः ॥१११ ॥

In Public domain. Digitization Muthulakshmi Research Academy

यतो ध्येयार्थ-शून्योऽयं वस्तुशून्यत्वामाश्रितः ।
अतोऽस्मिन् ध्येयवैराग्यं समाधौ कारणं मतं ।।११२ ॥

योगेन योगो ज्ञातव्य इत्यादिष्टं सतां वरैः ।
प्रथमेन तथा चान्त्यो ज्ञेयो योगस्तथा क्रमात् ।। ११३ ॥

सूत्रम्

भवप्रत्ययो विदेहप्रकृतिलयानम् ॥ १५ ॥

योगसारः

अविद्या भव इत्युक्ता सा यस्य कारणं भवेत्।
असम्प्रज्ञः समाधिः स ध्येयार्थरहितः शुभः ॥११४ ॥

भवहेतुर्विदेहानाम् अषाङ्कौशिक देहिनाम् ।
प्रकृतौ लीयमानानामसंप्रज्ञः स भाव्यते ॥११५ ॥

अविद्यास्य यतो मूलम् अतोस्य हेयता मता ।
सहजोऽयं समाधिः स्यात् उपायादि-विवर्जितः ॥११६ ॥

सूत्रम्

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥२०

योगसारः

श्रद्धामूलो यतो योगस्तस्मात् श्रद्धा परा मता ।
उपायप्रत्ययो योगो वश्यः श्रद्धादिकारणैः ।
मुमुक्षूणामयं ग्राह्यो विशेषाद् राजयोगिनाम् ॥ ११७ ॥

विदेहादि-विभिन्नानां श्रद्रादिरभिधीयते ।
जन्मतः सुख-साध्योऽयं सर्वेषां नास्ति वै यतः ॥ ११८ ॥

चेतसः सम्प्रसादः स्यात् श्रद्धा कल्याण-कारिणी ।
श्रद्धातो जायते वीर्यं तत्स्मृतिरुपतिष्ठते ॥ ११९ ॥

अनाकुलं ततश्चित्तं समर्थं स्यात् समाहितम् ।
समाहिते ततश्चित्ते प्रज्ञा संजायते परा ॥ १२० ॥

In Public domain. Digitization Muthulakshmi Research Academy

उपाय-प्रत्ययो योगः कैवल्य-हेतु-रुच्यते ।
अप्रमत्तेन योक्तव्यः आत्मनः शुभमिच्छता ॥ १२१ ॥

सूत्रम्

तीव्रसंवेगानामासन्नः ॥ २१ ॥

योगसारः

समाधिः सुखसाध्योऽयं तीव्र-संवेगिनां पुनः ।
संवेगो नाम वैराग्यमुत्साहो धीरताऽथवा ॥ १२२ ॥

सूत्रम्

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥ २२ ॥

योगसारः

उपाय-तीव्रता हेतुः समाधेरिति तत्क्रमः ।
मृदु-मध्याधि-मात्रत्वात् ततोऽपि शीघ्रता भवेत् ॥ १२३ ॥

शीघ्रः स्यान्मृदु-संवेगे मध्ये शीघ्रतरस्तथा ।
अधिमात्रविरक्तस्य समाधिः क्षणमात्रतः ॥ १२४ ॥

सूत्रम्

ईश्वरप्रणिधानाद्वा ॥ २३ ॥

योगसारः

उपाय-प्रत्ययो योगो योगिनां फलदायकः ।
उपायाः विविधाः सन्ति क्रियायोगादि-नामकाः ॥ १२५ ॥

ईश्वर-प्रणिधानाद् वापि समाधिरिह लभ्यते ।
वा-शब्दो निश्चयार्थेऽत्र विकल्पार्थे न सर्वथा ॥ १२६ ॥

प्रणिधानं भवेद् भक्तिरीश्वरस्य दयाकरम् ।
ईश्वरे निहिता बुद्धिः समाधिसुखमश्नुते ।। १२७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

भक्त्या ह्यावर्जितो देवो मोक्षं शीघ्रं प्रयच्छति ।
तस्मादीश-प्रणिध्यानादन्तराया भवन्ति न ॥ १२८ ॥

सूत्रम्

क्लेशकर्मविपाकाशयैः अपरामृष्टः पुरुषविशेष ईश्वरः ॥ २४॥

योगसारः

क्लेश-कर्म-विपाकैश्च संस्कारैराशयाभिधैः।
न कदापि परामृष्टः पुरुषः परमेश्वरः ॥ १२९ ॥

अविद्यादिर्भवेत् क्लेशः धर्मादिः कर्म कथ्यते ।
कर्मफलं विपाकः स्यादाशयाः कर्म-वासनाः ॥ १३० ॥

क्लेशादि-सहितो जीवः पुरुषश्चितिरुच्यते ।
क्लेशादि-शून्य-चैतन्यम् ईश्वरः साङ्ख्के नये ॥ १३१ ॥

साम्यातिशय-निर्मुक्तमैश्वर्यम् तस्य सर्वदा ।
स पुरुष-विशेषोऽत्र भवेदीश्वरशब्दभाक् ।। १३२ ॥

सूत्रम्

तत्र निरतिशयं सर्वज्ञबीजम् ॥ २५॥

योगसारः

सत्त्वोत्कर्षोऽत्र सर्वज्ञबीजं प्रोक्तमथेश्वरे ।
सर्वातिशय-निर्मुक्तमीश्वरे बीजमिष्यते ॥ १३३ ॥

सर्वेषां सर्वदा सर्वं ज्ञानं सर्वत्र सर्वथा ।
यस्यैव वर्तते ज्ञेयः स हि सर्वज्ञ ईश्वरः ॥ १३४॥

सूत्रम्

स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥ २६॥

योगसारः

सर्वज्ञ ईश्वरः सर्व-विद्याधीशो महान् विभुः ।
पूर्वेषामपि सर्वज्ञ आचार्याणां गुरुर्मतः ॥ १३५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

कालेन सर्व आचार्याः अवच्छिन्नाः प्रभाविना ।
ईश्वरस्त्वनवच्छिन्नः कालस्य कारणं यतः ।।१३६ ॥

आचार्याणां हि सर्वेषां ज्ञानं यस्मात् प्रजायते ।
ईश्वरः स हि सर्वज्ञः काले ज्ञानं प्रयच्छति ।। १३७ ॥

सूत्रम्

तस्य वाचकः प्रणवः ॥ २७ ॥

योगसारः

ईश्वरः प्रणवार्थः स्यात् प्रणवस्तस्य वाचकः ।
अनयोर्नित्यसंबन्धः जन्य-जनकयोरिव ॥१३८ ॥

मण्डप-शब्दवच्छब्दः प्रणवो रूढ-यौगिकः ।
सगुणं निर्गुणम् ब्रह्म प्रणवेनैव बोध्यते ॥१३९ ॥

सूत्रम्

तज्जपः तदर्थभावनम् ॥ २८ ॥

योगसारः

प्रणवस्य जपान्नित्यं तथा तस्यार्थभावनात् ।
एकाग्रं जायते चित्तं परमात्म-प्रकाशकम् ।।१४० ॥

स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमामनेत् ।
स्वाध्याय-योग-सम्पत्त्या परमात्मा प्रकाशते ॥१४१ ॥

सूत्रम्

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभवश्च ॥ २९॥

योगसारः

तस्मादीश-प्रणिध्यानाद् अन्तराया भवन्ति न ।
स्वरूप-ज्ञानमप्यस्य योगिनः सम्प्रजायते ॥१४२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यगत्र भवेज्जीवः चेतनश्च परात्परः ।
अतश्चाप्युभयोरस्मात् सम्प्राप्तिः कथिताऽमला ॥ १४३ ॥

यथैव केवलः शुद्धः परमात्मा शुभङ्करः ।
तथा बुद्धि-विसंवेदी जीवो जात्यादि-वर्जितः ।।१४४ ॥

इत्येवं जायते ज्ञानं जीवात्म-परमात्मनोः ।
स्वरूप-ज्ञान-पूर्णा सा समाधिस्थस्य संस्थितिः ।।१४५ ॥

सूत्रम्

व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितत्वानि चित्तविक्षेपाः ते अन्तरायाः ॥३०॥

योगसारः

अन्तरायास्तु विक्षेपाः ज्ञातव्याः विघ्न-कारकाः ।
विक्षेपोपहतं चित्तं कल्पते न समाधये ॥ १४६ ॥

व्याधिस्तु धातु-वैषम्यं स्त्यानं कर्म-निरीहता।
संशयश्च भवेच्छङ्का प्रमादोऽभावनं तथा ।।१४७ ॥

आलस्यमप्रवृत्तिः स्याद् अविरती राग उच्यते ।
भ्रमो विपर्यय-ज्ञानम् अलब्ध-भूमिकाऽपरः ॥ १४८ ॥

प्राप्तायां भूमिकायां याऽप्रतिष्ठा तथाऽपरः ।
इत्येवं चित्त-विक्षेपाः नव योगमला मताः ॥ १४९ ॥

सूत्रम्

दुःखदौर्मनस्यागमेजयत्वश्वासप्रश्वासाः विक्षेपसहभुवः ॥ ३१ ॥

योगसारः

विक्षेपैः सह दुःखादि-पञ्चकं जायते सदा ।
तद् दुःखं यन्न हीच्छन्ति सर्वेऽपि प्राणिनः सदा ।१५० ॥

In Public domain. Digitization Muthulakshmi Research Academy

इच्छा-विघात-संक्षोभात् दौर्मनस्यं प्रजायते ।
तथा ह्यङ्गमेजयत्वं स्यात् शरीरे कंपनात्मकम् ॥ १५१ ॥

वायोस्तु ग्रहणं श्वासः प्रश्वासो रेचनं तथा ।
एते विक्षिप्त-चित्तस्य भवन्ति योग-घातिनः ॥ १५२॥

सूत्रम्

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥३२॥

योगसारः

अतो विक्षेप-नाशाय सदेक-तत्त्व-मभ्यसेत् ।
एकतत्त्वं हि विश्वत्मा भगवान् श्रीहरिः स्मृतः ॥ १५३ ॥

स एव शङ्करः साक्षाद् ब्रह्मा वा गणपः प्रभुः ।
अनेकार्थं हि विक्षिप्तमेकार्थं क्रियतां मनः ॥ १५४ ॥

सूत्रम्

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातः चित्तप्रसादनम् ॥३३॥

योगसारः

विक्षेपैस्तैर्यदा मूढं बाधते योगिनं मनः ।
मैत्र्यादि-भावना-शक्त्या योगी तत् सम्प्रसादयेत् ॥ १५५ ॥

अन्येषां सुखकाले स्यान्मैत्री तैः सह सर्वदा ।
दुःखे च करुणा दर्श्या पुण्ये मुदितभावना ॥ १५६ ॥

उपेक्षाभावना पापे दर्शनीया हि योगिना ।
प्रसीदति ततश्चित्तं योगसिद्धौ प्रकल्पते ॥ १५७ ॥

एवं हि भावनाः कुर्वन् प्रसन्न-मानसः पुमान् ।
चर्याभी राजते नित्यं चर्यायोगोऽयमुच्यते ॥ १५८ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ ३४॥

योगसारः

प्रधानो मारुतः प्राणः प्राणाधारो हि मानवः ।
प्राणायामेन चित्तस्य निग्रहः सुलभः स्मृतः ।।१५९ ॥

प्रयत्नात् कुक्षितो वायुं नासिकापुटमार्गतः ।
शनैर्निःसारयेत् सम्यक् प्रच्छर्दनं भवेत् तदा ॥१६० ॥

रेचितस्य बहिर्वायोरधारणं कुम्भकं मतम् ।
श्वास-प्रश्वास-कुम्भाश्च हठयोगो निगद्यते ॥१६१ ॥

सूत्रम्

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थिति निबन्धिनी ॥३५॥

योगसारः

गन्धादिर्विषयो यस्यां प्रवृत्तिं तां समाश्रितः ।
योगी भवति सिद्धात्मा स्थितप्रज्ञो विसंशयः ॥१६२ ॥

योगोऽयं लक्ष्ययोगाख्यः शास्त्रेषु कथितो बुधैः ।
श्रद्धा संवर्धते पुण्या लक्ष्ययोगेन योगिनः ॥१६३ ॥

सूत्रम्

विशोका वा ज्योतिष्मती ॥३६॥

योगसारः

विशोका ह्यस्मिता नाम्नी बुद्धिसंवेदरूपिणी ।
ज्योतिष्मती च सा ज्ञेया द्विविधा योगिना सदा ॥ १६४ ॥

अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः ।
ध्वनेरन्तर्गतं ज्योतिः ज्योतिरन्तर्गतं मनः ॥१६५॥

Public domain. Digitization Muthulakshmi Research Academy

तन्मनो विमलं याति तद्विष्णोः परमं पदम् ।
ब्रह्मयोगो विशोकेति सूत्रेस्मिन् कथितः परः ।।
ज्योतिष्मत्त्याः प्रसंगाच्च शिवयोगोपि सूचितः ॥ १६६ ॥

सूत्रम्

वीतरागविषयम् वा चित्तम् ॥ ३७॥

योगसारः

वीतरागो विरक्तः स्यात् सर्वत्र ज्ञानसम्पदा ।
मनस्तद्विषयं स्थैर्यं लभते निश्चयेन हि ॥ १६७ ॥

अयं च वासनायोगः पुराणेषु प्रदृश्यते ।
रक्ताश्रितं मनो रक्तं विरक्तमतदाश्रितम् ॥ १६८ ॥

सूत्रम्

स्वप्ननिद्रा ज्ञानालम्बनम् वा ॥ ३८॥

योगसारः

स्वप्ने प्रबुद्धरूपं वा निद्राज्ञानमथापि वा ।
आलम्बते यदा चित्तं तदा स्थैर्यं समश्नुते ॥ १६९ ॥

सूत्रम्

यथाभिमतध्यानाद्वा ॥ ३९॥

योगसारः

यदेवालम्बते चित्तं शास्त्रसिद्धं समाश्रयम् ।
स्थैर्यं तस्य भवेत् तत्र ध्यानयोगोऽयमुत्तमः ॥ १७० ॥

सूत्रम्

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ ४०॥

योगसारः

सिद्धस्य योगिनश्चित्तम् अनर्घशक्ति-संयुतम् ।
परमाणु-महात्त्वान्तं सर्वं तद्वशगं भवेत् ॥ १७१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

महत्त्वान्तो वशः स्थूले सूक्ष्मे चापरमाणु तत् ।
सिद्धियोगः समाख्यातो योगोयं योगिपुङ्गवैः । १७२ ॥

सूत्रम्

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतग्रहणग्राह्येषु तत्स्थतदञ्जनतासमापत्तिः ॥४१॥

योगसारः

स्फटिकस्य यथोपाधेः सान्निध्याद् रूपधारणम् ।
तथा ग्राह्योपरक्तस्य मनसो रूपधारणम् ॥ १७३ ॥

योगाभ्यासवशाच्चित्तं प्रक्षीण-वृत्तिकं भवेत् ।
तदा तद्ग्राह्यसंरक्तं विमलं स्फटिकोपमम् ॥ १७४ ॥

पुरुषेन्द्रियभूतेषु क्रमशो मनसः स्थितिः ।
तत्तदाकारसंप्राप्तिः समापत्तिरितीर्यते ॥१७५॥

ग्राह्यस्तु विषयो बाह्यो ग्रहणमिन्द्रियं मतम् ।
ग्रहीता पुरुषः साक्षी समापत्तिस्तदाकृतिः ॥१७६ ॥

सूत्रम्

तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः ॥४२॥

योगसारः

शब्दार्थधी-विकल्पैश्च सुतरां भिन्नरूपिभिः ।
सङ्कीर्णा या समापत्तिः सवितर्केति कथ्यते ॥१७७ ॥

शब्दधर्मा उदात्ताद्याः जाडयादयोऽर्थवर्तिनः ।
प्रकाशं मूर्तिराहित्यमित्यन्ये ज्ञानवर्तिनः ॥१७८ ॥

वैविध्ये वर्तमानेपि सदैकत्वमिहाश्रिताः ।
एकत्वमेव भिन्नानां सङ्कीर्णत्वमिहोच्यते ॥१७९ ॥

सूत्रम्

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥४३॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

सङ्केतस्मृतिशुद्धौ या वस्तुमात्रावभासिनी ।
भाति स्वरूपशून्येव निर्वितर्का निगद्यते ॥ १८० ॥

अर्थमात्रावभासत्वात् न वस्तुशून्यता पुनः ।
वितर्कस्यैव भेदौ हि द्वाप्येतौ प्रकीर्तितौ ॥ १८१ ॥

सूत्रम्

एतयैव सविचारा निर्विचारा च सूक्ष्मविषय व्याख्याता ॥४४॥

योगसारः

तथैव भूतसूक्ष्मेषु समापत्तिश्च तादृशी ।
सविचारेति विज्ञेया विषयस्य सूक्ष्मता तदा ॥ १८२ ॥

शान्तादि-धर्म-शून्यत्वे सूक्ष्मविषयवर्तनात् ।
निर्विचारा समापत्तिस्तुरीया भाति सर्वदा ॥ १८३ ॥

सूत्रम्

सूक्ष्मविषयत्वं च लिङ्गपर्यवसानम् ॥४५॥

योगसारः

अलिङ्गं हि प्रधानं स्यात् तस्मादपि परम् न हि ।
तदेव परमं सूक्ष्मं सर्वस्य कारणं मतम् ॥ १८४ ॥

प्रज्ञा सुसूक्ष्मपर्यन्तग्रहणे कुशला तदा ।
तत्सूक्ष्मविषयत्वं च प्रधानान्तं प्रकीर्त्यते ।। १८५ ॥

सूत्रम्

ता एव सबीजस्समाधिः ॥ ४६॥

योगसारः

सबीजोऽयं समाधिः स्यात् सवितर्कादिभेदवान् ।
अविद्या बीजमित्युक्तं सर्वेषां कारणं यतः ॥ १८६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ताः समापत्तयः सर्वाः सबीजत्वेन योगिभिः ।
ज्ञायन्ते तास्ततो योगी निर्बीजं प्राप्तुमिच्छति ॥ १८७ ॥

सूत्रम्

निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥४७॥

योगसारः

अशुद्ध्यादि-मलापेतं बुद्धिसत्त्वं प्रकाशते ।
यदा तदा समाधिः स्यान्निर्विचारोऽथ योगिनाम् ॥ १८८ ॥

आध्यात्मिकः प्रसादः स्यात् प्रज्ञालोकस्तदा स्फुटः ।
यया योगी भवेत् प्रज्ञा-प्रवाह-पाटवान्वितः ॥ १८९ ॥

सूत्रम्

ऋतम्भरा तत्र प्रज्ञा ॥४८॥

योगसारः

ऋतम्भरा तदा प्रज्ञा सत्यं नित्यं बिभर्ति या ।
अन्वर्थनामतः ख्याता योगशास्त्रेऽतिनिर्मला ॥१९०॥

सूत्रम्

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥४९॥

योगसारः

साहि प्रज्ञा विषेशार्था यतः सूक्ष्मं बिभर्ति सा ।
श्रुतानुमानबोधाभ्यां ततो वैविध्यमश्नुते ॥१९१ ॥

श्रुतमागमात् संप्राप्तमनुमानं च हेतुतः ।
ऋतम्भरा तु सा प्रज्ञा साक्षात्कारस्वरूपिणी ॥१९२ ॥

सूत्रम्

तज्जस्संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥५०॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

निरुध्यन्तेऽन्यसंस्काराः प्रज्ञा-संस्कार-पाटवात् ।
तदेक-मात्र-संस्कारः राजते योगिनो भृशम् ॥ १९३ ॥

सूत्रम्

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥ ५१ ॥

योगसारः

अन्य-संस्कार-नाशेऽपि प्रज्ञा-संस्कार इष्यते ।
संस्कारः सोऽपि रुद्धश्चेत् निर्बीजो योग इष्टदः ॥ १९४ ॥

अविद्या-लेशमात्रं च समाधौ नैव विद्यते ।
तस्मादयं समाधिः स्यात् निर्बीजः केवलः परः ॥ १९५ ॥

इति समाधिपादः

श्रीपेन्नामधुसूदनविरचिते

योगसारे प्रथमपादः

***

In Public domain. Digitization Muthulakshmi Research Academy

अथ साधनपादः

सूत्रम्

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ १ ॥

योगसारः

आद्ये समाधियुक्तस्य वर्णितो योग उत्तमः ।
योगोऽथ व्युत्थचित्तस्य वर्ण्यते साधनाश्रितः ॥ १९६ ॥

अशुद्धिरिह चित्तस्य तपसैव विनाश्यते ।
इत्यतस्तपसो नूनं क्रियायोगः प्रवर्तते ॥ १९७ ॥

प्रणवादि-पवित्राणां मन्त्राणां जपपूर्वकम् ।
यथाशक्ति तपः प्राज्ञो युञ्जानः सततं चरेत् ॥ १९८ ॥

क्रियाणां फलयुक्तानां सर्वासामपि चार्पणम् ।
सर्वोत्तमे परे पुंसि प्रणिधानमितीर्यते ॥ १९९ ॥

सूत्रम्

समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ २ ॥

योगसारः

समाधिर्भाव्यते तेन क्रियायोगेन योगिनः ।
क्लेशाश्च तनुतां यान्ति प्रसङ्ख्यानाग्निदाहतः ।।२०० ॥

सूत्रम्

अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥ ३ ॥

योगसारः

अविद्या चास्मिता रागद्वेषौ चाभिनिवेशनम् ।
एते हि पञ्च योगेस्मिन् क्लेशाः प्रत्यूहकारकाः ॥ २०१ ॥

गुणानामधिकारं हि द्रढयन्तीह सर्वदा ।

In Public domain. Digitization Muthulakshmi Research Academy

विपाकं कर्मणोऽत्यन्तं सर्वदा निर्हरन्ति च ॥२०२ ॥

इमे क्लेशाः सदा हेयाः योगिना भूतिमिच्छता ।
तदर्थं धैर्ययुक्तः स्यात् क्रियायोगे प्रवर्तितः ॥२०३ ॥

अन्यथाग्राहिणी बुद्धिरविद्येति निगद्यते ।
सर्वानर्थस्य मूलम् या योगशक्त्या प्रहन्यते ।। २०४ ॥

सूत्रम्

अविद्या क्षेत्रमुत्तरेषाम् प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥४॥

योगसारः

अविद्ययैव वर्धन्ते क्षीयन्ते चात्मविद्यया ।
अविद्यामाश्रिताः सर्वे क्लेशाः बीजमिवाङ्कुराः ॥२०५॥

अविद्या भावरूपात्र नाभाव-रूपिणी मता ।
अत्यन्तमप्यसद्द्रव्ये सद्बुद्धिर्जायते यतः ॥२०६ ॥

प्रसुप्ताः केचन क्लेशाः केचिच्च तनवस्तथा ।
विच्छिन्नाः केचन क्लेशाः उदाराश्च भवन्ति हि ॥२०७ ॥

उत्पत्तेरिह सर्वेषाम् अविद्या कारणं मता ।
अविद्या विद्यया नाश्या विद्या च योगसम्भवा ।।२०८ ॥

सूत्रम्

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥५॥

योगसारः

अनित्ये नित्यता- बुद्धिरशुचौ शुचिभावना ।
दुःखे च सुखबुद्धिर्या ह्यनात्मन्यात्मभावना ॥ २०९ ॥

इत्येवं या विपर्यस्तरूपेणाऽवर्तते पुनः ।
अविद्येति सुविख्याता सर्वशास्त्रेषु घातिनी ॥२१० ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

दृग्दर्शनशक्त्योरेकात्मतैवास्मिता ॥६॥

योगसारः

पुरुषस्य तथा बुद्धेरत्यन्तं प्रविभक्तयोः ।
संविदेकात्मिका शास्त्रे ह्यस्मिताक्लेशनामिका ॥२११ ॥

सूत्रम्

सुखानुशयी रागः ॥७॥

योगसारः

सुखे तत्साधने गर्धो राग इत्यभिधीयते ।
रागेनोपहतं चित्तं विषयानुपधावति ॥२१२ ॥

सूत्रम्

दुःखानुशयी द्वेषः ॥८॥

योगसारः

दुःखे तत्साधने मन्युर-द्वेष इत्यभिधीयते ।
द्वेषेणोपहतं चित्तं विषयेषु समन्युकम् ॥२१३ ॥

सूत्रम्

स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥९॥

योगसारः

स्वरसेन स्वभावेन विज्ञेऽपि रूढतां गतः ।
क्लेशो ह्यभिनिवेशः स्यात् रूपमस्य जिजीविषा ॥ २१४ ॥

तत्त्वे ज्ञातेऽपि विज्ञस्य स्वास्तित्वाभिनिवेशतः।
मा भूवमिति या वाञ्छा वासनारूपतः सदा ॥ २१५ ॥

सैवात्राऽभिनिवेशाख्यः क्लेशो भवति दुःखदः ।
तत्त्व-विज्ञान-सामर्थ्यात् क्लेशोयं नाशमाप्नुयात् ॥ २१६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥१०॥

योगसारः

प्रतिप्रसवमार्गेण सूक्ष्माणाम् हानिरुच्यते ।
कार्यस्य कारणे लयः प्रतिप्रसव उच्यते ॥२१७ ॥

क्लेशानामस्मिता मूलम् अतस्तस्यां लयो भवेत् ।
दग्ध-बीजसमाः क्लेशाः न रोहन्ति कदाचन ।।२१८ ॥

सूत्रम्

ध्यानहेयाः तद्वृत्तयः ॥११॥

योगसारः

परन्तु क्लेशवृत्तीनां हानं ध्यानफलं मतम् ।
ध्यानेन स्थूलवृत्तीनां क्षालनं सुकरं भवेत् ॥२१९ ॥

सूत्रम्

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥१२॥

योगसारः

कर्माशयोऽत्र धर्मादिः क्लेशमूलः प्रदृश्यते ।
वेदनीयो यथा दृष्टे तथाऽदृष्टे च जन्मनि ।।२२० ॥

क्लेशे सत्येव वर्तेते धर्माधर्मौ हि जीवने ।
अतः कर्म धर्मादि क्लेशमूलं निगद्यते ॥२२१ ॥

सूत्रम्

सति मूले तद्विपाको जात्यायुर्भोगाः ॥१३॥

योगसारः

क्लेशेषु सत्सु जन्मादि-विपाकस्त्रिविधो मतः ।
जातिरायुश्च भोगश्च क्लेशानां फलमुच्यते ।२२२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

एकस्य जन्मनः कर्म चानेकमपि कारणम् ।
तदेकभविकः कर्माशयस्तु शास्त्रसंमतः ॥ २२३ ॥

सूत्रम्

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥१४॥

योगसारः

जात्यादयस्त्रयः पुण्याद् भवन्ति सुखकारणम् ।
पापाच्च परितापं ते जनयन्ति जन्मजन्मसु ॥ २२४ ॥

सूत्रम्

परिणामतापसंस्कारदुःखैः गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥१५॥

योगसारः

विषयासक्तचित्तस्य गर्धा या दृश्यते बहु ।
परिणामो हि सा प्रोक्ता ज्ञेया च दुःखदायिनी ॥२२५ ॥

तापश्च द्वेष एवासौ भोगस्य परिपन्थिनि ।
भोगस्य स्मृतिहेतुः स्यात् संस्कारो दुःखदायकः ॥२२६ ॥

त्रिभिर्वा कारणैरेभिर्गुणवैषम्य-कारणात् ।
विषयान् सेवमानस्य सर्वं दुःखं विवेकिनः ॥२२७ ॥

अथ शास्त्रं चतुर्व्यूहं हेयं हेयस्य कारणम् ।
हानं तृतीय इत्युक्तो हानोपायस्तथान्तिमः ।।२२८ ॥

संसार एव हेयोऽत्र योगिना क्षेममिच्छता ।
प्रधानस्य तथा पुंसः संयोगो हेयकारणम् ॥२२९ ॥

संयोगनाशनम् शास्त्रे हानशब्देन कथ्यते ।
विवेकख्यातिरेवेह हानोपाय इतीड्यते ॥२३० ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

हेयं दुःखमनागतम् ॥ १६ ॥

योगसारः

उपभोगेन चातीतं दुःखं साध्वतिवाहितम् ।
वर्तमानं तु भोग्यं स्यात् कुतस्तद्धेयता भवेत् ॥ २३१ ॥

तस्माद्धि केवलं दुःखं हातुं शक्यमनागतम् ।
तदर्थं योगमाश्रित्य योगी भवति यत्नवान् ॥ २३२ ॥

सूत्रम्

द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥

योगसारः

द्रष्टा हि पुरुषः साक्षी प्रधानं दृश्यमुच्यते ।
द्रष्टुः दृश्यस्य संयोगो हेयस्य कारणं मतम् ॥ २३३ ॥

सूत्रम्

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥ १८ ॥

योगसारः

अथ दृश्यस्वरूपं तत् त्रिगुणात्मकमीरितम् ।
भूतेन्द्रियात्मकं दृश्यं कारणं भोगमोक्षयोः ॥ २३४ ॥

प्रकाशः सात्त्विको धर्मः क्रिया च राजसी तथा ।
स्थितिश्च तामसी तस्माद दृश्यं स्यात् त्रिगुणात्मकम् ॥ २३५ ॥

शब्दादि-विषयाकारा तद्रूप-निश्चयात्मिका ।
बुद्धिवृत्तिर्भवेद् भोगो बद्धवत् तेन पूरुषः ॥ २३६ ॥

भोक्तुः स्वरूप-विज्ञानम् मोक्ष इत्येव दर्शनम् ।
भोगमोक्षौ नपुंसस्तौ गुणानामेव केवलम् ॥ २३७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥१९॥

योगसारः

चतुर्धा गुणपर्वाणि दृश्यन्ते सांख्यदर्शने ।
विशेषाश्चाविशेषाश्च लिङ्गमात्रमलिङ्गकम् ॥२३८ ॥

विशेषाः स्थूलभूतानि तत्तद्-धर्म-पराणि वै ।
अविशेषाश्च सूक्ष्माणि तन्मात्रलक्षणानि च ॥२३९ ॥

लिङ्गमात्रं महत् तत्त्वमलिङ्गं प्रकृतिर्मता ।
गुणानामेव विस्तारो जगद्रूपेण भासते ॥२४० ॥

सूत्रम्

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥२०॥

योगसारः

द्रष्टा हि पुरुषः शुद्धः केवलो निष्क्रियः सदा ।
तथापि बुद्धि-संवेदी तद्वृत्तिमनुवीक्षते ॥२४१ ॥

अतदात्मा तदात्मेव पुरुषो भासते ततः ।
बुद्धि-वृत्त्यनु-कारेण पश्यतीत्यनुपश्यता ।।२४२ ॥

सूत्रम्

तदर्थ एव दृश्यस्यात्मा ॥२१॥

योगसारः

दृश्यं पुरुषभोगार्थं मोक्षार्थं च यतस्ततः ।
तदर्थ एव दृश्यस्य स्वरूपं पारमार्थिकम् ॥२४३ ॥

सूत्रम्

कृतार्थं प्रतिनष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥२२॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

कृतार्थम् ज्ञानसम्पन्नं प्रति दृश्यं न भासते ।
तथा नष्टाप्यनष्टाऽसौ प्राकृतं प्रति दर्शनात् ॥ २४४ ॥

सूत्रम्

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥२३॥

योगसारः

स्वशक्तिः स्वामिशक्तिश्च संयुक्ते भवतो यदा ।
तदा स्वरूप-लब्धिस्तु तयोः संयोग-कारणम् ॥२४५ ॥

दृश्योपलब्धिर्भोगाख्या द्रष्टुःसा मोक्षनामिका ।
स्वस्वरूप-परिज्ञाने संयोगो न भवेत् तयोः ॥२४६ ॥

सूत्रम्

तस्य हेतुरविद्या ॥२४॥

योगसारः

अविद्या कारणं तस्य संयोगस्य विभासने ।
चैतन्यस्य जडस्यापि संयोगो वा कथं भवेत् ॥२४७ ॥

अतोऽयं कालिको नैव संयोगो दैशिको न वा ।
भोक्तृ-भोग्याख्य-संयोगो भवति द्रष्टृ-दृश्ययोः ॥२४८ ॥

अविद्याजन्य-संयोगो न भवेत् पारमार्थिकः ।
विद्योदये स्वयं नष्टा सूर्योदये तमो यथा ।।२४९॥

दर्शनं नैव मोक्षस्य साक्षाद्धि कारणं मतम् ।
अविद्याभाव एवात्र बन्धनाशाय कल्पते ॥२५० ॥

तस्माच्च योगशास्त्रेऽस्मिन् चित्तं स्याद् बन्धकारणम् ।
मोक्षश्च चित्तनिवृत्तिरविद्याहानितः परः ॥२५१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥२५॥

योगसारः

अविद्याया अभावेनसंयोगाभावसंभवः ।
अविद्याभाव एवात्र हानशब्देन कथ्यते ॥२५२ ॥

प्रधानेन ह्यसंयोगे विद्यते केवलः पुमान् ।
तदेव तस्य कैवल्यं संयोगाभावतः परम् ॥२५३ ॥

सूत्रम्

विवेकख्यातिरविप्लवा हानोपायः ॥२६॥

योगसारः

प्रधानस्य तथा पुंसो विवेकख्यातिरुत्तमा ।
हानोपायो भवेद् योगे भ्रमशून्यैव सर्वदा ॥२५४ ॥

अविप्लवत्वमप्यत्र प्राधान्यं भजते परम् ।
तज्ज्ञानं भ्रमशून्यं स्यात् मिथ्याज्ञानं हि विप्लवः ॥२५५ ॥

सूत्रम्

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥२७॥

योगसारः

तादृश-ख्याति-युक्तस्य प्रज्ञा भवति सप्तधा ।
तत्प्रज्ञाभूमयः सप्तप्रान्ता इत्येव हेतुना ॥२५६ ॥

ज्ञातव्यमखिलं ज्ञातं न ज्ञेयमिह शिष्यति ।
इत्येषा प्रथमा भूमिः प्रज्ञायाः भाति योगिनः ॥२५७ ॥

हीनाः क्लेशाश्च हातव्याः न हेयमवशिष्यति ।
इत्येषा भूमिरुद्दिष्टा द्वितीया शास्त्रवेदिभिः ॥२५८ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्राप्तव्यमखिलं प्राप्तं न किञ्चित् प्राप्यमस्ति मे ।
प्रज्ञाभूमिरियं श्रेष्ठा तृतीया स्याद् योगवर्त्मनि ॥२५९ ॥

कृतं मयाखिलं कार्यं न कार्यमवशिष्यति ।
प्रज्ञाभूमिरियं योगे तुरीया योगिदर्शिता ।।२६० ॥

कृतार्थं बुद्धितत्त्वमित्येषा पञ्चमी मता।
नष्टो गुणाधिकारश्चेत्येषा षष्ठी पुनर्मता ॥२६१॥

अतीतो गुणसंबन्धं स्वयंज्योतिरहं शुभः ।
केवलोऽहमितिप्रज्ञा सप्तमी कुशला मता ॥२६२ ॥

अन्तः प्रकृष्ट इत्यासां भूमीनां प्रान्तता मता ।
सर्वथा भ्रमशून्यत्वात् प्रज्ञेयं मोक्षकारिणी ।। २६३ ॥

सूत्रम्

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ॥२८॥

योगसारः

योगाङ्गानामनुष्ठानाद् अशुद्धिः क्षीयते यदा ।
विवेक-ख्याति-पर्यन्तं ज्ञानदीप्तिस्तदा भवेत् ॥ २६४ ॥
योगाङ्गानामनुष्ठानाद् भ्रमो नश्यति साधके ।
भ्रमे नष्टे स्वयं ज्ञानं सम्यग्दर्शन-नामकम् ।
समुदेति साधके तस्माद् अशुद्धिः क्षय-माप्नुते ॥२६५ ॥
यथा यथेयमत्यन्तम् अशुद्धिः क्षीणतां गता ।
तथा तथास्य दीप्ता स्यात् धीराऽविवेकसंभवात् ॥२६६ ॥
अनुष्ठानम् अशुद्धेस्तु वियोगकारणं मतम् ।
अनुष्ठानं तदेवेह ज्ञानस्य प्राप्तिकारणम् ॥२६७ ॥

सूत्रम्

यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-समाधयोऽष्टावगानि ॥२९॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

यमाश्च नियमाश्चैव ह्यासनानि तथैव च ।
प्राणायामस्तथा तुर्यं प्रत्याहारश्च पञ्चमम् ॥ २६८ ॥

षष्ठं च धारणारूपं ध्यानं भवति सप्तमम्।
समाधिरष्टमं प्रोक्तं योगाङ्ग-गणने तथा ॥२६९ ॥

अष्टावङ्गानि योगस्य नयें पातञ्जले शुभे ।
एतेषां समनुष्ठानात् योगो भवति दुःखहा ॥२७० ॥

सूत्रम्

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः ॥३०॥

योगसारः

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं तथोत्तमम् ।
अपरिग्रह इत्येवं यमः पञ्चविधाः मताः ॥२७१ ॥

कायेन मनसा वाचा हिंसायाः परिवर्जनम् ।
अहिंसेति च संप्रोक्तं सर्वकालेषु सर्वथा ॥२७२ ॥

सत्यं यथार्थ-वाणी स्यात् यथार्थं मानसं तथा ।
अस्पृहारूपमस्तेयं शास्त्रीयं ग्रहणं मतम् ॥२७३ ॥

ब्रह्मचर्यं मतं श्रेष्ठं गुप्तेन्द्रियविनिग्रहः।
उपस्थानिग्रहश्चापि तेनैव हि निगद्यते ॥ २७४ ॥

अनिच्छा परदत्तेषु द्रव्येषु चापरिग्रहः ।
उपहृतेषु दत्तेषु किंवा त्यक्तेषु सर्वथा ॥ २७५ ॥

सूत्रम्

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥३१॥

योगसारः

जात्या देशेन कालेन समयेनापि सर्वथा ।

In Public domain. Digitization Muthulakshmi Research Academy

यमा ये ह्यपरिच्छिन्नाः सार्वभौमं महाव्रतम् ॥ २७६ ॥

सर्वथा परिपाल्यास्ते यमा ह्यव्यभिचारतः ।
तदैव सार्वभौमत्वं व्रजन्तीह महाव्रतम् ॥ २७७ ॥

सूत्रम्

शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ ३२ ॥

योगसारः

नियमाः शौच-संतोष तपःस्वाध्यायरूपिणः ।
ईश्वर- प्रणिधानेन पूर्णतां यान्ति सर्वशः ।। २७८ ॥
बाह्यमाभ्यन्तरं शौचं सन्तोषः तप उत्तमम् ।
स्वाध्यायो मोक्ष-शास्त्राणां प्रणवस्य जपोऽथवा ॥ २७९ ॥
ईश्वर-प्रणिधानं तदीशे सर्वसमर्पणम् ।
एवं हि नियमाः योगे पञ्चैव कथिताः पुरा ॥ २८० ॥

सूत्रम्

वितर्कबाधने प्रतिप्रक्षभावनम् ॥ ३३ ॥

योगसारः

वितर्कैः बाधितो योगी प्रतिपक्षान् विभाययेत् ।
वितर्का योगसंसिद्धौ विघ्नानुत्पादयन्ति हि ॥ २८१ ॥

सूत्रम्

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिप्रक्षभावनम् ॥ ३४ ॥

योगसारः

हिंसादयो वितर्काश्च बाधन्ते त्रिविधा बहु ।
यथा स्वयं कृता हिंसा परेण कारिता तथा ॥ २८२ ॥
हिंसायां जायमानायामथवाऽप्यनुमोदिता ।
एवं हि त्रिविधा हिंसा दृश्यतेऽसत्यमेव च ॥ २८३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

हिंसादि-वियमाः लोके बाधन्ते ये वितर्कतः ।
लोभात् मोहादथ क्रोधात् मृदु-मध्याधिमात्रतः ॥२८४ ॥

दुःखं तेषां फलं नूनम् अज्ञानं चापि दुःखदम् ।
अनन्तं तत्फलं चेति योगी विभाययेत् सदा ॥२८५ ॥

सूत्रम्

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥३५॥

योगसारः

योगाङ्गानां फलं सूत्रे क्रमशः प्रोच्यतेऽधुना ।
अहिंसायाः प्रतिष्ठाने योगिनो योगशक्तितः ॥२८६ ॥

सर्वेऽपि प्राणिनस्तस्य संनिधौ स्नेहपूर्वकम् ।
जातिवैरं च विस्मृत्य जीवन्ति मित्रभावनाः ॥२८७ ॥

सूत्रम्

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥३६॥

योगसारः

सत्यस्य च प्रतिष्ठायां सर्वथा योगिनः परा ।
अमोघा जायते वाणी सर्व-कर्म-फलाश्रयः ॥ २८८ ॥

सूत्रम्

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥३७॥

योगसारः

अस्तेय-प्रतिष्ठायां सर्वरत्नोपसंस्थितिः ।
जातौ जातौ भवेत् श्रेष्ठं योगी तद्रत्नमश्नुते ॥ २८९ ॥

सूत्रम्

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥३८॥

योगसारः

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मचर्यप्रतिष्ठायां योगिनो वीर्यसंचयः ।
वीर्यलाभे स्वयं सिद्धो योगी शिष्यान् प्रभावयेत् ॥ २९० ॥

सूत्रम्

अपरिग्रहस्थैर्ये जन्मकथंता सम्बोधः ॥३९॥

योगसारः

अपरिग्रहसंस्थैर्ये योगिनो ज्ञानमुद्भवेत् ।
स्वकीय-जन्म-संबद्धं पूर्वापरविनिश्चयम् ॥२९१ ॥

सूत्रम्

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः ॥४०॥

योगसारः

शौचात् स्वाङ्ग-जुगुप्सा स्यात् कायाभिष्वङ्गवर्जिता ।
परकायेषु दोषाच्चाप्यसंसर्गः शुचेः फलम् ॥ २९२ ॥

सूत्रम्

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥४१॥

योगसारः

सत्त्वशुद्धि-सौमनस्ये चित्तस्यैकाग्रातापि च ।
इन्द्रियाणां जयः स्वात्म-दर्शन-योग्यता तथा ॥२९३ ॥

अन्तःशौचस्य योगेऽस्मिन् प्रोक्तं पञ्चविधं फलम् ।
सत्त्वशुद्धिक्रमात् सर्वं विज्ञेयं प्राप्यमन्ततः ॥२९४ ॥

सूत्रम्

संतोषादनुत्तमः सुखलाभः ॥४२॥

योगसारः

सन्तोषान्नित्यतृप्तेश्च फलं सौख्यमनुत्तमम् ।
असंतोषेण रोगाः स्युः योगलोपोऽपि निश्चयात् ।। १९५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

कायेन्द्रियसिद्धिरशुद्धिक्षयात् तपसः ॥४३॥

योगसारः

अथ तपःफलं सिद्धिः कायेन्द्रियगता शुभा ।
अशुद्धिः क्षयमायाति तपसा श्रद्धाकृतेन हि ॥२९६ ॥

सूत्रम्

स्वाध्यायादिष्टदेवतासम्प्रयोगः ॥४४॥

योगसारः

स्वाध्यायात् स्वेष्ट-देवानां सिद्धर्षीणां च योगिनः ।
सम्प्रयोगो भवेन्नूनं सम्प्रयोगोऽत्र दर्शनम् ॥२९७ ॥

सूत्रम्

समाधिसिद्धिः ईश्वरप्रणिधानात् ॥ ४५ ॥

योगसारः

ईश्वर-प्रणिधानाच्च भक्तिरूपाद् भवेद् ध्रुवम् ।
समाधिर्योगिनोत्यर्थो विनायासेन निश्चयात् ॥२९८ ॥

सूत्रम्

स्थिरसुखमासनम् ॥४६॥

योगसारः

अथासनेन येनास्य योगिनः स्थिरता सुखम् ।
अनायासेन लभ्येत तदेवासनमुत्तमम् ॥२९९ ॥

सूत्रम्

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥४७॥

योगसारः

प्रयत्नस्य च शैथिल्याद् अनन्तधारणात् पुनः ।
आसनं स्थैर्यमापन्नं योगिनः सिद्धि-दायकम् ॥३०० ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

ततो द्वन्द्वानभिघातः ॥४८॥

योगसारः

आसने स्थैर्यमापन्ने न द्वन्द्वपीडनं भवेत् ।
शीतोष्णादि सदा द्वन्द्वमस्थैर्यं योगिनं तुदेत् ॥३०१ ॥

सूत्रम्

तस्मिन् सति श्वासप्रश्वास्योगतिविच्छेदः प्राणायामः ॥४९॥

योगसारः

सञ्जाते चासन-स्थैर्ये प्राणायामं समाचरेत् ।
श्वास-निःश्वासयोः मन्दं गतोरोधो भवेदिह ॥३०२ ॥

षड्विंशदङ्गुलं हंसः प्रयाणं कुरुते बहिः ।
सव्यापसव्यमार्गेण तेन प्राणोऽभिधीयते ॥३०३ ॥

प्राणो देहगतो वायुरायामस्तन्निबन्धनम् ।
प्राणायामपरो योगी कालं जयति तत्त्ववित् ॥३०४ ॥

सूत्रम्

बाह्याभ्यन्तरस्थम्भवृत्तिः सूत्रम् देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥५०॥

योगसारः

वर्तमाना बहिर्वायोर्बाह्यवृत्तिस्तु रेचकः ।
आभ्यन्तरे तथा वायौ द्वितीयः पूरको मतः ॥३०५ ॥

प्रयत्नादुभयाभावस्तृतीयः स्तंभवृत्तितः ।
इयान् हि विषयो देश इयान् वा काल आश्रितः ॥३०६ ॥

इयतीभिश्च सङ्ख्याभिः प्राणायामोऽथ गण्यते ।
एवं हि परिदृष्टोऽयं दीर्घसुसूक्ष्मतां भजेत् ॥३०७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

दीर्घोयं देशकालादि-प्रचयव्यापनात् पुनः ।
सूक्ष्मः परमनैपुण्यासाद्यतावशात् ॥ ३०८ ॥

सूत्रम्

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥५१॥

योगसारः

बाह्यान्तरवृत्ती हि योगे रेचक-पूरकौ ।
रेचक-पूरकौ त्यक्त्वा चतुर्थः स्वयमुद्भवेत् ॥३०९ ॥
दीर्घ-सूक्ष्मस्तृतीये स्याच्चतुर्थे नैव संभवेत् ।
अयमेव द्वयोर्भेदः शास्त्रेषु गदितः स्फुटः ॥३१० ॥

सूत्रम्

ततः क्षीयते प्रकाशावरणम् ॥५२॥

योगसारः

प्राणायामात् ततः पापं ज्ञानस्यावरकं तमः ।
विवेकावरकं कर्म क्षीयते योगिनोऽखिलम् ॥३११ ॥
प्राणायामात् परं किञ्चित् तपो नास्तीह योगिनाम् ।
तस्माद्धि मलशुद्धिः स्यात् ज्ञानदीप्तिश्च निश्चयात्।।३१२ ॥

सूत्रम्

धारणासु च योग्यता मनसः ॥५३॥

योगसारः

प्राणायामान्मनःशुद्धौ योग्यता जायते परा।
धारणासु च भिन्नासु विक्षेपरहिता स्थिरा ॥३१३ ॥
योग्यता चित्तनैर्मल्यं विभिन्नधारणास्वपि ।
यत्र यत्र मनो यायात् तत्र तत्र हि धारणाः ॥३१४ ॥

सूत्रम्

स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥५४॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

रागः क्रोधोऽथ मोहश्च चित्तस्य विषया मताः ।
तैस्तु सम्बन्धराहित्यमसम्प्रयोग उच्यते ॥३१५ ॥

तदा विषयसम्बन्धे नष्टे चित्तस्य या स्थितिः ।
इन्द्रियेष्विन्द्रियार्थेभ्यो निवृत्तेषु च सा भवेत् ॥३१६ ॥

प्रत्याहारः फलीभूतो निवृत्तिः सर्वथापि सा ।
चित्तस्येवेन्द्रियाणाम् तु तत्त्वाभिमुखता न हि ।
इत्येवं ज्ञाप्यते सूत्रे त्विवशब्देन नर्म तत् ॥३१७ ॥

सूत्रम्

ततः परमावश्यता इन्द्रियाणाम् ॥५५॥

योगसारः

प्रत्याहारात् ततस्तेषामिन्द्रियाणां हि वश्यता ।
परमा जयरूपेण जायते वशिता तदा ॥३१८ ॥

इति साधनपादः

श्रीपेन्नामधुसूदनविरचिते योगसारे द्वितीयपादः

*****

In Public domain. Digitization Muthulakshmi Research Academy

अथ विभूतिपादः

सूत्रम्

देशबन्धः चित्तस्य धारणा ॥ १ ॥

योगसारः

योगस्य बहिरङ्गानां कृतं पूर्वं निरूपणम् ।
धारणाद्यन्तरङ्गानि रूप्यन्ते त्रीणि सांप्रतम् ॥ ३१९ ॥

बाह्ये वाभ्यन्तरे वापि प्रदेशे चित्तबन्धनम् ।
धारणा स्थापनं ध्येये विषयेभ्यः परावृतम् ॥ ३२० ॥

सिद्धिसम्पादिका एताः सप्तधा कथिताः पुरा ।
मुमुक्षु-धारणा श्रेष्ठा परमात्मनि या स्थिरा ॥ ३२१ ॥

सूत्रम्

तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

योगसारः

तत्रेति धारणादेशे प्रत्ययस्यैकतानता ।
ध्यानं भवति चित्तस्य समानप्रत्ययात्मकम् ॥ ३२२ ॥

चित्तस्यैकाग्रता शास्त्रे प्रत्ययस्यैकतानता ।
वृत्त्यन्तरेण शून्या या कल्पतेऽथ समाधये ॥ ३२३ ॥

सूत्रम्

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

योगसारः

तदेव ध्यानमर्थात्मा स्वरूपशून्यवर्त्मनि ।
समाधिरिति विख्यातं योगाङ्गं योगकारणम् ॥ ३२४ ॥

ध्याने स्वरूपशून्यत्वं विषयाभावमात्रतः ।
अनुमानेन वेद्यत्वात् वस्तुतो न हि शून्यता ॥ ३२५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

वृत्तिप्रवाहरूपेण ध्यानं भवति संततम् ।
अर्थमात्र-विनिर्भासात् समाधिरभिधीयते ॥३२६ ॥

सूत्रम्

त्रयमेकत्र संयमः ॥४॥

योगसारः

एवं च धारणा-ध्यान-समाधि-त्रितयं यदा ।
एकत्र विषये युक्तं संयमाख्यां लभेत तत् ॥३२७ ॥

सूत्रम्

तज्जयात् प्रज्ञालोकः ॥५॥

योगसारः

तज्जयात् भवति प्रज्ञा विशदा तत्त्वदर्शिनी ।
संयमस्य जये प्रज्ञालोकः फलं भवेत् ॥३२८ ॥

प्रज्ञालोकेन सिद्धीनामुदयो योगिनस्तदा ।
शारीर्योऽथ च मानस्यो बौद्धाश्च सिद्धयः स्मृताः ॥३२९ ॥

सूत्रम्

तस्य भूमिषु विनियोगः ॥६॥

योगसारः

तादृश-संयमस्याथ तत्तद्भूमिषु योजनम् ।
अधरामधरां जित्वा तदूर्ध्व-भूमि-योजनम् ॥३३० ॥

स्थूलदि-भूमिका जित्वा सूक्ष्मासु तन्नियोजनम् ।
क्रमशः सिद्धिहेतुः स्यात् संयमः सिद्धिकारणम् ॥३३१ ॥

योगेन योगो ज्ञातव्यो योगात् योगः प्रवर्तते ।
योऽप्रमत्तस्तु योगेन स योगे रमते चिरम् ॥३३२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

त्रयमन्तरङ्गं पूर्वेभ्यः ॥७॥

योगसारः

योगाङ्ग-पञ्चकात् तस्मादन्तरङ्गं त्रयं परम् ।
संयमोक्तं त्रयं शास्त्रे ह्यन्तरङ्गमुदीर्यते ॥३३३ ॥

अन्तरङ्गत्वमस्यापि यत् साक्षात्कारहेतुना ।
स्वरूपोपकरं साक्षादन्तरङ्गं त्रयं मतम् ॥ ३३४ ॥

सूत्रम्

तदपि बहिरङ्गं निर्बीजस्य ॥८॥

योगसारः

पञ्चकादन्तरङ्गत्वेऽप्यस्य न ह्यन्तरङ्गता ।
त्रयं पञ्चकसाध्यं स्यात् त्रयं चाप्यन्यसाधनम् ॥३३५ ॥

सबीज-साधनं पञ्च यमादीनि भवन्ति हि ।
सबीजमपि निर्बीजं साधयेदिति साधनम् ॥३३६ ॥

निर्बीजापेक्षया तस्मादन्तरङ्गं त्रयं मतम् ।
सबीजमगंतां याति निर्बीजमङ्गि संमतम् ॥३३७ ॥

सूत्रम्

व्युत्थाननिरोधसंस्कारयोः अभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥९॥

योगसारः

व्युथानस्य तु संस्कारो यदान्येनाभिभूयते ।
निरोधस्य च यत्काले प्रादुर्भवति मानसे ॥३३८ ॥

निरोध-परिणामाख्या चित्तपरिणतिर्भवेत् ।
निरोध-क्षणमन्वेति चित्तं परिणतौ तदा ॥३३९॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥

योगसारः

संस्कारबलतश्चित्तं निरुद्धं विद्यते यदा ।
परिणामः स निर्विघ्नः प्रशान्तवाहितां गतः ।।३४० ॥

सजातीयेऽथे संस्कारे प्रशान्तवाहिता भवेत् ।
विजातीयो हि संस्कारो यावन्नोदेति ध्यानहा ।।३४१ ॥

सूत्रम्

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥

योगसारः

चित्तस्य सहजो धर्मस्तस्य सर्वार्थता यतः ।
अतस्तद् सर्वदाऽरुद्धं विषयानुपधावति ॥ ३४२ ॥

एकाग्रतापि चित्तस्य सहजो धर्म एव हि ।
अन्यथा चित्तवृत्तीनां निरोधो नैव शक्यते ॥ ३४३ ॥

सर्वार्थताक्षयश्चित्तस्यैकाग्रतोदयस्तथा ।
समाधि-परिणामाख्यां लभते चित्तधर्मिणः ॥ ३४४ ॥

सूत्रम्

ततः पुनः शातोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥

योगसारः

सर्वार्थताविनाशे यः पुनश्चित्तस्य धर्मिणः ।
एकप्रत्ययशान्तौ च समान प्रत्ययोदयः ।।३४५ ॥

एकाग्र-परिणामः स्यात् समाधिसुखदः शुभः ।
इति परिणतिः प्रोक्ता त्रिधा चित्तस्य धर्मिणः ॥ ३४६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

एकाग्रं चेन्निरुद्धं स्यात् ततः समाहितं भवेत् ।
इत्येवं चित्तरोधार्थं यतमानस्य योजना ॥ ३४७ ॥

सूत्रम्

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्था परिणामा व्याख्याताः ॥ १३ ॥

योगसारः

चित्तपरिणतेरुक्त्या प्रसङ्गादन्यधर्मिणाम् ।
व्याख्यातास्त्रिविधा ज्ञेयाः परिणामा यथायथम् ।। ३४८ ॥

धर्मेषु परिणामस्तु प्रथमः परिकीर्तितः ।
लक्षणरूपकाले च द्वितीयः कीर्तितस्तथा ॥ ३४९ ॥

अवस्थापरिणामश्च तृतीयः परिगण्यते ।
भूतेन्द्रियेषु सर्वत्र त्रितयं परिदृश्यते ।। ३५० ॥

परिणामश्च विज्ञेयो धर्मे धर्मान्तरोदयः ।
धर्मिणो या भवेच्छक्तिः सा ज्ञेया धर्मनामतः ॥ ३५१ ॥

सूत्रम्

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥ १४ ॥

योगसारः

अथ धर्मी क इत्येषा जिज्ञासा सहजा यतः ।
धर्मि-स्वरूप-निर्देशः सूत्रेण क्रियतेऽधुना ॥ ३५२ ॥

धर्माणाम् आश्रयो धर्मी धर्मनाशेऽपि सुस्थिरः ।
शक्तिस्तु योग्यतारूपा तद्वान् धर्मितया मतः ॥ ३५३ ॥

प्रत्यभिज्ञाबलाद् धर्मी स्थिर एवानुमीयते ।
धर्माश्च त्रिविधाः शास्त्रे धर्मिणः सम्भवन्ति हि ॥ ३५४ ॥

शान्ताः अतीत-धर्मास्तु वर्तमानास्तथोदिताः ।
अव्यपदेश्यतां यान्ति धर्मा अनागतास्तथा ॥ ३५५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥१५॥

योगसारः

धर्माणां परिणामेऽपि क्रमो ज्ञेयोस्ति तत्त्वतः ।
परिणामक्रमज्ञाने तत्त्वज्ञानोदयो भवेत् ॥३५६ ॥

यो धर्मो यस्य धर्मस्य समनन्तर एव हि ।
स एव क्रमतां याति परिणामविधौ स्फुटम् ॥३५७ ॥

क्रमान्यत्वेन विज्ञेया परिणामान्यता सदा ।
क्रमभेदेन द्रव्यानां परिणामो भिद्यते यतः ।।३५८ ॥

निरोधधर्म-संस्काराः परिणामोऽथ जीवनम् ।
चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिताः ।।३५९ ॥

सूत्रम्

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥१६॥

योगसारः

परिणामत्रये नूनं संयमात् सिद्धिरूपतः ।
अतीतानागतज्ञानं योगिनः सम्प्रजायते ॥३६० ॥

सूत्रम्

शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरः तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ॥१७॥

योगसारः

शब्दार्थ-प्रत्ययानां हि सम्भेदो भवति स्फुटः ।
तथापि धर्म-संस्कारादध्यासोऽस्ति परस्परम् ॥३६१ ॥

एवं विभिन्नधर्माणाम् अध्यासाज्जातसङ्करे ।
तद्भेदसंयमाद् योगी सकल-रुत-विद् भवेद् ॥३६२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वेषां प्राणिनां भाषा यथावत् तेन बुध्यते ।
जानश्रुतेश्च च्छान्दोग्ये तादृशी प्रतिभा श्रुता ॥ ३६३ ॥

सूत्रम्

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् ॥ १८॥

योगसारः

द्वये चित्तस्य संस्काराः विपाकक्लेशहेतवः ।
केचिद्धि वासनारूपाः स्मृतेः क्लेशस्य हेतवः ॥ ३६४ ॥

अपरे सन्ति संस्काराः विपाक-हेतवोऽहिताः ।
धर्माधर्माख्यमत्यर्थं विपाकं जनयन्ति ये ॥ ३६५ ॥

साक्षात्कृत्य हि संस्कारान् द्विधान् योगिनस्तदा ।
पूर्वस्य वाऽथ पूर्वेषाम् जन्मनां ज्ञानमुद्भवेत् ॥ ३६६ ॥

सूत्रम्

प्रत्ययस्य परचित्तज्ञानम् ॥ १९॥

योगसारः

अन्यस्य प्रत्यये योगी संयमात् चित्तविद् भवेत् ।
परचित्तमथ ज्ञातुं समर्थो भवति क्षणे ॥ ३६७॥

सूत्रम्

न च तत् सालम्बनं तस्याविषयी भूतत्वात् ॥ २० ॥

योगसारः

न च सालम्बनं तत् स्यात् प्रत्ययस्यैव संयमात् ।
आलम्बनस्य ज्ञानार्थं तदेव विषयी भवेत् ॥ ३६८ ॥

तस्य त्वविषयीभावात् न तज्ज्ञानस्य संभवः ।
इत्यतः प्रत्ययस्यैव महर्षिर्ज्ञानमूचिवान् ॥ ३६९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुः प्रकाशासम्प्रयोगेऽन्तर्धानम् ॥२१॥

योगसारः

साक्षात्कारे पदार्थानां सम्बन्धो कश्चिदस्ति नु ।
चक्षुः प्रकाशसम्बन्धः सम्प्रयोग इतीरितः ॥३७० ॥

पदार्थे ग्राह्यताशक्तिस्तद्रूपमपि विद्यते ।
पदार्थे विद्यमानं तत् साक्षात्कारस्य कारणम् ।।३७१ ॥

रूपे च संयमं कृत्वा तद्ग्राह्यशक्तिरोधतः ।
अन्तर्धानमवाप्नोति योगी सिद्धिमिहोत्तमाम् ॥३७२ ॥

सूत्रम्

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानम् अरिष्टेभ्यो वा ॥२२॥

योगसारः

आरब्धं चाप्यनारब्धमित्येवं कर्म दृश्यते ।
तत्सोपक्रममारब्धं निरुपक्रममन्यथा ॥३७३ ॥

तादृशे द्विविधे योगी संयमात् खलु कर्मणि ।
मृत्योश्च कालमासन्नं जानीयात् शकुनादपि ॥३७४ ॥

शकुनानि च शास्त्रेषु पुराणेष्वपि सर्वशः ।
बहुधा वर्णितानीति ज्ञेयानि तत एव हि ॥३७५ ॥

सूत्रम्

मैत्र्यादिषु बलानि ॥२३॥

योगसारः

मैत्र्यादि-भावनाः प्रोक्ताः आद्ये पादेऽथ याः शुभाः ।
तास्वेव संयमं कृत्वा बलानि प्राप्नुते मुनिः ॥३७६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

बलेषु हस्तिबलादीनि ॥२४॥

योगसारः

बलेष्वपि ततो योगी हस्त्यादिबलसंयमात् ।
तादृशं बलमाप्नोति यत्रापि संयमः कृतः ॥ ३७७ ॥

सूत्रम्

प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥२५॥

योगसारः

ज्योतिष्मतीति प्रवृत्तिः पूर्वमुक्ता महर्षिणा ।
तस्याः प्रकाशविन्यसे संयमात् योगिपुङ्गवः ॥३७८ ॥

सूक्ष्मं व्यवहितं वापि विप्रकृष्टमथापि वा ॥
पदार्थं ज्ञातुमत्यन्तं शक्तो भवति संयमात् ॥३७९ ॥

सूत्रम्

भुवनज्ञानं सूर्ये संयमात् ॥२६॥

योगसारः

अथ ग्रहाधिपे सूर्ये संयमात् शास्त्रसंमतात् ।
योगी भुवनविन्न्यासं जानीयात् करपुष्पवत् ॥३८० ॥

सूत्रम्

चन्द्रे तारव्यूहज्ञानम् ॥२७॥

योगसारः

तथा ताराधिपे चन्द्रे संयमात् योगिपुङ्गवः ।
ताराव्यूहं विजानीयात् कालादिगणनां तथा ॥३८१ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

ध्रुवे तद्गतिज्ञानम् ॥ २८॥

योगसारः

ध्रुवनामक-तारायां स्थिरायां संयमान्मुनिः ।
तारागतिं विजानीयात् सिद्धिशक्त्यैव धीयुतः ॥३८२ ॥

सूत्रम्

नाभिचक्रे कायव्यूहज्ञानम् ॥ २९॥

योगसारः

शरीरकेन्द्ररूपेऽत्र नाभिचक्रेऽथ संयमात् ।
शरीर-व्यूह-विज्ञानं योगिनो भवति ध्रुवम् ॥३८३ ॥

सूत्रम्

कण्ठकूपे क्षुत्पिपासा निवृत्तिः ॥३०॥

योगसारः

अधस्तादस्ति जिह्वायाः तन्तुरेको बिसोपमः ।
अधस्तात् तस्य कण्ठः स्यात् तस्याधः कूप उच्यते ।।३८४ ॥

तत्कूपे संयमं कृत्वा योगी न बाधितो भवेत् ।
क्षुधापिपासया वापि ततो जयति तद् ध्रुवम् ॥३८५ ॥

सूत्रम्

कूर्मनाड्यां स्थैर्यम् ॥३१॥

योगसारः

कूपादधः उरःस्थाने कूर्मनाडीति विद्यते ।
तस्यां कूर्माकृतौ योगी संयमात् स्थैर्यमश्नुते ॥ ३८६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

मूर्धज्योतिषि सिद्धदर्शनम् ॥३२॥

योगसारः

शिरः कपाल-मध्यस्थं ज्योतिर्भवति भास्वरम् ।
तत्स्थाने संयमं कृत्वा लभ्यते सिद्धदर्शनम् ॥३८७ ॥

सूत्रम्

प्रातिभाद्वा सर्वम् ॥३३॥

योगसारः

प्रातिभं नाम यज्ज्ञानं प्रतिभाजन्यमुच्यते ।
तत्तस्य योगिनो जातु जायते संयम-प्रभम् ॥३८८॥

ततश्च तारकं ज्ञानं प्रातिभं प्राप्नुते मुनिः ।
तत्परं पुरुषख्यातिः प्रतिभाज्ञानतो भवेत् ॥३८९ ॥

इदं सर्वज्ञताहेतुरनौपदेशिकं मतम् ।
सर्वार्थविषयम् चापि प्रातिभं ज्ञानमुत्तमम् ॥३९० ॥

सूत्रम्

हृदये चित्तसंवित् ॥३४॥

योगसारः

हृदयम् पुण्डरीकं स्यात् तद्ब्रह्मस्थानमुच्यते ।
संयमात् तत्र चित्तस्य साक्षात्कारो भवेन्मुनेः ॥३९१ ॥

सूत्रम्

सत्त्वपुरुषायोः अत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्स्वार्थसंयमात् पुरुषज्ञानम् ॥ ३५॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

सत्त्वं हि बुद्धिसत्त्वं स्यात् चितिमात्रश्च पूरुषः ।
तयोर्न सङ्करः शक्यस्तमःप्रकाशयोर्यथा ॥ ३९२ ॥

तथापि प्रत्ययाभेदो द्वयोर्हि भोगनामकः ।
परार्थाद् भोग इत्येतद् विदित्वा स्वार्थसंयमात् ॥ ३९३ ॥

अहमेव सर्वतत्त्वानां भासकोस्मीति योगिनः ।
स्वरूप-ज्ञानमत्यन्तं विमलं सम्प्रजायते ॥ ३९४ ॥

सूत्रम्

ततः प्रातिभश्रावाणवेदनादर्शास्वादवार्ता जायन्ते ॥ ३६ ॥

योगसारः

पुरुषे संयमात् तस्य विशिष्टेन्द्रिय-सिद्धयः ।
भवन्ति प्रातिभाद्याश्च दिव्या इन्द्रियशक्तयः ॥ ३९५ ॥
अनौपदेशिकं ज्ञानं प्रातिभं जायते ततः ।
श्रावणम् दिव्य-शब्दानां श्रवणात्मक-पाटवम् ॥ ३९६ ॥
त्वगिन्द्रिय-वशात् ज्ञानं दिव्यं भवति वेदना ।
आदर्शो दिव्यरूपस्य दर्शनं जायते तदा ॥ ३९७ ॥
आस्वादो नाम दिव्यस्य रसस्य ज्ञानमुच्यते ।
वार्तेति दिव्य-गन्धस्य ज्ञानं भवति योगिनः ॥ ३९८ ॥
एवं हि सर्व-विज्ञाने प्रमाऽपरोक्षता मुनेः ।
शास्त्रोक्त-दिव्य-विज्ञान-सम्पन्नो योगिराड् भवेत् ।। ३९९ ॥

सूत्रम्

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥ ३७ ॥

योगसारः

परंतु वस्तुतः सर्वाः व्युत्थाने एव सिद्धयः ।
समाधौ विघ्नरूपेण बाधन्ते योगिनं भृशम् ॥ ४०० ॥

In Public domain. Digitization Muthulakshmi Research Academy

अतो व्युत्थानकालीन-सिद्धीनां प्राप्तये मुनिः ।
न यत्नवान् भवेत् मोघं प्राप्यापि धन्यतानहि ॥४०१ ॥

सूत्रम्

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥३८॥

योगसारः

कर्माशयवशात् चित्तं शरीरे बन्धमाप्नुते ।
सङ्कोचेन स्थितिर्बन्धः प्रचारप्रतिबन्धकः ॥४०२ ॥

प्रचार-संवेदनाद् योगी चित्तस्य योगशक्तितः ।
शैथिल्याद् बन्धनस्यापि संयमस्य प्रभावतः ।।४०३ ॥

स्वशरीराच्च निष्कृष्य चित्तं बन्धमोचितम् ।
प्रचार-संवेदनाच्चापि देहान्तरेषु निक्षिपेत् ॥४०४॥

एवं हीतरदेहेषु चित्तावेशवशादथ ।
इन्द्रियाण्यनुयास्यन्ति चित्तमेवाथ योगिनः ॥ ४०५ ॥

सूत्रम्

उदानजयात् जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ३९॥

योगसारः

आनासादा शिरोवृत्तिः प्राण उदान उच्यते ।
तज्जयाद् योगिनः सिद्धिर्जायते लाघवात्मिका ॥४०६ ॥

ततः स लाघवात् पङ्के जले वा कण्टकादिषु ।
न प्रतिहन्यते नापि सज्जत्युदानसंयमात् ॥ ४०७ ॥

तथा प्रायण-कालेऽपि स्वेच्छया मरणं भवेत् ।
स अर्चिरादि-मार्गेण ह्युत्क्रान्तिमवाप्नुते ॥ ४०८ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

समानजयाज्ज्वलनम् ॥ ४० ॥

योगसारः

समान नामको वायुरानाभिवृत्तिरुच्यते ।
तज्जयाज्ज्वलनम् नाम तेजसा दीप्तिमान् भवेत् ॥४०९ ॥

सूत्रम्

श्रोत्राकाशयोः सम्बन्धसंयमात् दिव्यं श्रोत्रम् ॥४१॥

योगसारः

आकाशः सर्वशब्दानां श्रोत्राणामपि चाश्रयः ।
श्रोत्राकाशयोः कश्चित् सम्बन्धो विद्यते सदा ।। ४१०॥

सम्बन्धे संयमं कृत्वा दिव्यं श्रोत्रं समश्नुते ।
येनास्य श्रवणं दिव्य-शब्दानामपि जायते ॥४११ ॥

सूत्रम्

कायाकाशयोः सम्बन्धसंयमात् लघुतूलसमापत्तेश्चाकाशगमनम् ॥४२॥

योगसारः

तादृग् भवति सम्बन्धः कायाकाशयोरापि ।
सम्बन्धे संयमं कृत्वा प्रथमं तज्जयी भवेत् ॥४१२ ॥

तज्जयात् लाघवं योगी शारीरं लभते परम् ।
ततश्च लाघवात् तस्य जलेपि गमनं भवेत् ।
ततस्तूलसमापत्त्या चाकाशगमनं भवेत् ॥४१३ ॥

सूत्रम्

बहिरकल्पिता वृत्तिः महाविदेहा ततः प्रकाशावरणक्षयः ॥४३॥

योगसारः

मनसो बाह्यवृत्तिः स्याद् विदेहा नाम धारणा ।
साऽप्यत्र द्विविधा प्रोक्ता कल्पिताऽकल्पितेति हि ॥४१४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शरीरस्थस्य सा वृत्तिः कल्पिता परिकीर्तिता ।
शरीरनैरापेक्ष्येण बाह्यवृत्तिरकल्पिता ।।४१५ ॥

अकल्पिता बाह्यवृत्तिस्तु सङ्कल्पादेव जायते ।
एषा महाविदेहाख्या सिद्धिरत्र निरूपिता ॥४१६ ॥

ज्ञानस्यावरणम् शास्त्रे रजस्तमोगुणोद्भवम् ।
महाविदेहताप्राप्तौ प्रकाशावरणक्षयः ॥ ४१७ ॥

सूत्रम्

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमात् भूतजयः ॥४४॥

योगसारः

भूतानां पञ्च रूपाणि स्थूलादीनि भवन्ति हि ।
स्थूल-स्वरूप-सूक्ष्मत्वान्वयरूपाणि वस्तुतः ॥ ४१८ ॥

अर्थवत्त्वं च रूपाणि ज्ञेयानि तत्त्वतः पुनः ।
तत्रापि संयमात्तस्य प्राप्तं भूतजयं फलम् ।। ४१९ ॥

सूत्रम्

ततोऽणिमादिप्रादुर्भावः कायसम्पत् तद्धर्मानभिघातश्च ॥४५॥

योगसारः

फलं भूतजयस्येदं विविधं सम्प्रकीर्तितम् ।
अणिमाद्यष्टसिद्धीनां प्रादुर्भावो भवेन्मुनौ ॥ ४२० ॥

कायसम्पद् भवेत् तस्य विविधा संयमोद्भवा ।
तद्धर्मानभिघातश्च सिद्धिरूपेण लभ्यते ॥ ४२१ ॥

तद्धर्म इत्ययं शब्दो भूतधर्माभिशंसकः ।
पृथिव्यादिभूतधर्माणां पीडा न योगिनो भवेत् ॥ ४२२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत् ॥४६॥

योगसारः

रूपं लावण्यमत्यन्तम् बलं तस्य भवेन्मुनेः ।
वज्रसंहननं तस्य देहस्य जायते तदा ॥४२३ ॥

चक्षुः प्रियो गुणो रूपं येनाकर्षणवर्धनम् ।
लावण्यमङ्गसौन्दर्यं बलं वीर्यमितीरितम् ॥४२४ ॥

वज्रस्येव दृढो देहे सङ्घातो जायते तदा ।
वज्रसंहननाख्या सा सम्पत्कायस्य कीर्त्यते ॥४२५ ॥

सूत्रम्

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥४७॥

योगसारः

इन्द्रियाणामपि रूपाणि पञ्च ज्ञेयानि तत्त्वतः ।
तत्रापि संयमं कृत्वा योगीन्द्रियजयी भवेत् ॥४२६ ॥

ग्रहणं प्रथमं रूपं स्वरूपं च द्वितीयकम् ।
अस्मिताख्यं तृतीयं स्यादन्वयाख्यं चतुर्थकम् ॥४२७ ॥

तथा स्यादर्थवत्त्वं हि पञ्चमं रूपमन्तिमम् ।
एतेषु संयमं कृत्वा योगिनः खजयो भवेत् ॥४२८ ॥

सूत्रम्

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥४८॥

योगसारः

इन्द्रियाणां जये देहो मनोवत् रयवान् भवेत् ।
इन्द्रियाणि विशिष्टानि भवन्ति योगिनस्तदा ॥४२९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रधानस्य जयश्चापि संयमस्य फलं मुनेः ।
इत्येवं कीर्तिता सिद्धिरिन्द्रियाणां हि संयमात् ।।४३० ॥

सूत्रम्

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥४९॥

योगसारः

सत्त्वस्य पुरुषस्यापि यान्यताख्यातिरुत्तमा ।
तत्प्रज्ञासम्प्रतिष्ठस्य सर्वशक्त्युदयो भवेत् ॥४३१ ॥

सर्वेषामपि भावानामधिष्ठातृत्वसम्भवः ।
सर्वात्मनां गुणानां च ज्ञानं विवेकसंभवम् ।
एतद् विवेकसंपन्न-योगिनः सिद्धिरुच्यते ॥ ४३२ ॥

सूत्रम्

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥५०॥

योगसारः

सत्त्वजन्ये विवेकेऽपि वैराग्याद् योगिनः परम् ।
दोषबीजक्षये नूनं कैवल्यं स्थितिरुच्यते ।।४३३ ॥

सूत्रम्

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥५१॥

योगसारः

स्थानिनां देवतादीनां निमन्त्रणमपि संभवेत् ।
योगिनो भोगसौख्यार्थं विविधस्थानदर्शनात् ॥४३४ ॥

न तत्र तस्य सङ्गः स्यात् विस्मयश्चापि सिद्धिषु ।
सङ्गं स्मयम् प्रकुर्वाणः पुनरनिष्टवान् भवेत् ॥४३५ ॥

सङ्गस्मयावकुर्वाणः भवितव्यं विभावयेत् ।
तेनास्य भावनीयस्याऽभिमुख्यं सम्प्रजायते ॥ ४३६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

क्षणतत्क्रमयोः संयमात् विवेकजं ज्ञानम् ॥५२॥

योगसारः

क्षणे च तत्क्रमे चापि संयमाद् योगिनोऽमलम् ।
ज्ञानं विवेकजं श्रेष्ठं जायते मोक्षकारणम् ॥ ४३७ ॥

प्रकृतेः पुरुषस्यापि पृथग्धर्मम् विजानतः ।
नेदीयः किल कैवल्यं जन्मसंसारनाशनम् ॥ ४३८ ॥

परमाणोर्गतेः कालः क्षण एकः प्रकीर्तितः ।
पूर्वं देशं परित्यज्य देशमन्यं लभेत सः ॥ ४३९ ॥

अविच्छेदः प्रवाहस्य क्रम इत्यभिधीयते ।
क्षणतत्क्रमयोर्योगी संयमात् ज्ञानवान् भवेत् ॥ ४४० ॥

सूत्रम्

जातिलक्षणदेशैः अन्यतानवच्छेदात् तुल्ययोः ततः प्रतिपत्तिः ॥५३॥

योगसारः

जातिश्च लक्षणं देशः वस्तूनां भेदहेतवः ।
त्रयमेतत् समाश्रित्य परस्परभेदसंग्रहः ।। ४४१ ॥

समानानां पदार्थानां जात्या भेदग्रहो भवेत् ।
विभिन्नलक्षणेभ्यो वा देशभेदेन वा परम् ॥४४२ ॥

जात्यादि-भेद-हेतूनामभावे योगिनस्तदा ।
विवेकज्ञानतस्तुल्यप्रतिपत्तिः समुद्भवेत् ॥ ४४३ ॥

सूत्रम्

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥५४॥

योगसारः

ज्ञानं स्वप्रतिभाजन्यमनौपदेशिकं तथा ।
संसार-तारणात् प्रोक्तं तारकं न ततः परम् ॥४४४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वं तद्गोचरीभूतमविषयो न कदाचन ।
सकल-विषयत्वेपि स्वस्याविषयता मता।। ४४५ ॥

एक-क्षणोपरूढं सत् सर्वं गृह्णाति सर्वथा ।
इत्यतः कथितं ज्ञानमक्रमं चेति योगिभिः ॥४४६ ॥

एतादृशं भवेत् ज्ञानं विवेकोद्भवमुत्तमम् ।
साक्षाद्धि मोक्षहेतुः स्यात् ज्ञानं विवेकसंभवम् ॥ ४४७ ॥

सूत्रम्

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ॥५५॥

योगसारः

सत्त्वस्य पुरुषस्यापि शुद्धिसाम्यात् तदा परम् ।
कैवल्यमुभयोश्चापि भवेत् या परा स्थितिः ॥ ४४८ ॥

तदोपचरितो भोगः पुरुषस्य निवर्तते ।
भोगाभावः परः पुंसः कैवल्यं परमा स्थितिः ॥ ४४९ ॥

इति विभूतिपादः

श्रीपेन्नामधुसूदनविरचिते योगसारे तृतीयपादः

*****

In Public domain. Digitization Muthulakshmi Research Academy

अथ कैवल्यपादः

सूत्रम्

जन्मौषधिमन्त्रतपस्समाधिजाः सिद्धयः ॥ १ ॥

योगसारः

पादत्रये च पूर्वस्मिन् प्रसङ्गादुक्तमन्ततः ।
विस्तार्य विशदीकर्तुं पाद आरभ्यतेऽधुना ।। ४५० ॥

चित्तं कैवल्यभागीयं सिद्धिमापद्य संस्थितम् ।
तस्येमाः सिद्धयः पञ्च सूत्रेणानेन दर्शिताः ।।४५१॥

जन्मना चौषधिभ्यश्च मन्त्रेभ्यस्तपसाऽथवा ।
समाधेश्चापि संपन्नाः सिद्धयो योगिनः पराः ॥४५२॥

सूत्रम्

जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥ २॥

योगसारः

जात्यन्तरेण सर्वेषां परिणामोऽथ दृश्यते ।
यदा कायेन्द्रियाणां हि जात्यन्तरेण संस्थितिः ॥ ४५३ ॥

मनुष्यो मानुषं देहं त्यक्त्वा दैवं समाप्नुयात् ।
दैवादिसर्वदेहेषु प्रकृत्यापूर एककः ॥ ४५४ ॥

आपूरोऽनुप्रवेशः स्यात् पूर्वापायेऽन्य-वस्तुनि ।
कायादि-प्रकृतेरेवमापूरः कारणं मतम् ॥ ४५५ ॥

सूत्रम्

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥३॥

योगसारः

आपूरः सहजः किवा स्याद् धर्मादि-निमित्तकः ।
इतीयं सर्वथा शक्या शङ्काऽपूरसंगतौ ॥ ४५६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अतोऽत्र योगसिद्धन्तः कथ्यते बोधहेतवे ।
धर्मादयो निमित्तं स्यान्न तु प्रयोजका इह ।।४५७ ॥

सहकार्यप्रयुक्ता हि स्वतन्त्रा प्रकृतिस्तदा ।
आपूरहेतुतां याति वरणभेदकृते परम् ॥४५८ ॥

यथा हि क्षेत्रिकः कश्चिद् केदारात् जलसंचरे ।
भिन्द्यादावरणं तस्माज्जलमन्यत्र संवहेत् ॥४५९ ॥

तथैव चात्र धर्मादेर्निमित्तहेतुता भवेत् ।
वरण-भङ्ग-मात्रेण प्रवृत्तिः प्रकृतेः स्वयम् ॥ ४६० ॥

सूत्रम्

निर्माणचित्तान्यस्मितामात्रात् ॥४॥

योगसारः

बहूनां कायनिर्माणे चित्तानां विषये पुनः ।
सन्देहो जायते काये तत्संख्याविषयाश्रितः ।।४६१ ॥

अस्मितामात्रमेवेह निर्माण- चित्त-कारणम् ।
अहङ्कारोऽस्मितामात्रं मनोवृत्तिनिवृत्तितः ।।४६२ ॥

अहङ्कारो हि चित्तानां निर्माणे कारणं मतम् ।
तानि निर्माणचित्तानि प्रवृत्तिहेतवस्तथा ॥ ४६३ ॥

सूत्रम्

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥५॥

योगसारः

जातानि बहुचित्तानि बहुप्रवृत्तिकानि चेत् ।
संदेहाद् योगिनः सिद्धिर्नैव शक्येति चेत् शृणु ॥ ४६४ ॥

निर्मातृचित्तमेकं हि व्यापारभेदकारणम् ।
चित्तेषु बहुषु स्थित्या प्रयोजयति तान्यदः ॥ ४६५ ॥

In Public domain. Digitization Muthulakshmi Research Academy

निर्मातृचित्तमाधृत्य निर्माणचित्तभावना ।
अतः सङ्ख्या-विभेदेऽपि क्रियाभेदो न कश्चन ।।४६६ ॥

सूत्रम्

तत्र ध्यानजमनाशयम् ॥ ६॥

योगसारः

जन्मौषधादिसिद्धानि सिद्धचित्तानि पञ्च हि ।
तत्रापवर्ग-भागीयं चित्तं निर्धार्यतेऽधुना ।। ४६७ ॥

तत्रैव पञ्चचित्तेषु मध्ये यद् ध्यानजं भवेत् ।
अनाशयं यतस्तस्मादपवर्गोन्मुखं भवेत् ॥४६८ ॥

अनाशयं हि तच्चित्तम् आशयाः कर्मवासनाः ।
रागादि-क्लेश-निवृत्तिश्चित्ते हि ध्यानजे तदा ।। ४६९ ॥

सूत्रम्

कर्माशुक्लाकृष्णं योगिनः त्रिविधमितरेषाम् ॥७॥

योगसारः

चतुर्विधं भवेत् कर्म शुक्ल-कृष्णादि-भेदतः ।
शुक्लं कृष्णं तथा कर्म शुक्लकृष्णं च संमतम् ॥ ४७० ॥

अशुकलाकृष्णमत्यन्तं केवलं कर्म योगिनः ।
अन्येषां त्रिविधं लोके कामलोभादिहेतुतः ॥ ४७१ ॥

शुक्लं कर्म सुसिद्धानां तपःस्वाध्याय-वर्तिनाम् ।
कामक्रोधादिजन्यं स्यात् कृष्णं कर्म दुरात्मनाम् ।। ४७२ ॥

बहिः साधनसाध्यं यत् शुक्लकृष्णं हि कर्म तत् ।
संन्यासिनां पुनः कर्माऽशुक्लकृष्णमुदीरितम् ॥ ४७३ ॥

अशुक्लं फलसन्न्यासात् कर्म संन्यासिनां शुभम् ।
अकृष्णं च तथा तेषां तत् पुनरनुपादानतः ॥ ४७४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

ततः तद्विपाकानुगुणानामेवाभिव्यक्तिः वासनानाम् ॥ ८॥

योगसारः

ततस्तत्कर्मसम्बन्धादन्येषां यत् फलं भवेत् ।
तदत्र कथ्यते सूत्रे वासनानां प्रसङ्गतः ।। ४७५ ॥

जात्यायुर्भोगरूपेण विपाकस्त्रिविधो मतः ।
वासनानामभिव्यक्तिर्विपाकानुगुणैव या ॥४७६ ॥

यादृशी वासना जाता विपाकस्तादृशो मतः ।
एवं कर्मविपाकस्य फलं ज्ञेयं मनीषिणा ॥ ४७७ ॥

सूत्रम्

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोः एकरूपत्वात् ॥९॥

योगसारः

जात्या देशेन कालेन व्यवहिताश्च वासनाः ।
अभिव्यक्ता भवन्त्येव सदृशकर्मचोदिताः ॥ ४७८ ॥

अनुभवानुगः सर्वः संस्कारो वासनात्मकः ।
संस्कारानुगुणा लोके स्मृतिर्भवति सर्वथा ॥४७९ ॥

स्मृति-संस्कारयोरेवमेकरूपत्वमास्थितम् ।
ततश्च जन्मसंसारचक्रमेवं प्रवर्तते ॥ ४८० ॥

सूत्रम्

तासामनादित्वं चाशिषो नित्यत्वात् ॥१०॥

योगसारः

तासामिति वासनानामनादित्वस्य संभवः ।
आत्माशिषां च नित्यत्वादनादयो हि वासनाः ॥ ४८१ ॥

मा न भूवं तु भूयासमिति या लोकविस्तृता ।
भावना सैव चात्माशीरनादिकालवर्तिनी ॥ ४८२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

हेतुफलाश्रयालम्बनैः संगृहीतत्वात् तेषामभावे तदभावः ॥ ११ ॥

योगसारः

वासनानां कथं नाशः शक्य इत्यर्थ्यते तदा ।
उपायं वासना-नाशे भगवान् वक्ति सांप्रतम् ॥ ४८३ ॥

हेतुनापि फलेनापि स्वाश्रयालंबतस्तथा ।
सङ्गृहीतास्ततस्तेषामभावे नैव वासनाः ॥ ४८४ ॥

अविद्या वासना-हेतुः शरीरादि फलन्तथा ।
साधिकारं मनस्तद्वद् भवति वासनाश्रयः ।। ४८५ ॥

आलम्बनं तथा तत्तद् यत्सत्त्वे वासनोदयः ।
हेत्वादीनामभावे हि वासना-नाश इष्यते ॥ ४८६ ॥

हेतुमात्रस्य नाशेन सर्वासां नाशसम्भवः ।
अविद्यानाशतो नाशो वासनानां स्वयं भवेत् ।। ४८७ ॥

सूत्रम्

अतीतानागतं स्वरूपतोऽस्ति अध्वभेदाद् धर्माणाम् ॥ १२ ॥

योगसारः

अतीतमिति भूतस्य शान्तधर्मस्य सङ्ग्रहः ।
भविष्यद्-धर्मकस्तद्वदनागतमितीर्यते ॥ ४८८ ॥

एवं हि धर्मभेदेन भूतादि-व्यपदेशना ।
स्वरूपतोस्ति भूतादि धर्मभेदतयाऽध्वनाम् ॥ ४८९ ॥

सूत्रम्

ते व्यक्तसूक्ष्माः गुणात्मानः ॥ १३ ॥

योगसारः

ते धर्मा व्यक्ततां यान्ति वर्तमानात्मना तथा ।
अतीतानागताश्चापि सूक्ष्मत्वं यान्ति ते सदा ॥ ४९० ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्यक्ताः सूक्ष्माः गुणात्मानो धर्मा हि विश्वकारणम् ।
इत्येवं दृश्यतां यातं गुणानामेव संनिधेः ॥ ४९१ ॥

संनिवेशो गुणानां यो धर्माख्यां लभते परम् ।
विज्ञायते स मायेति विनाशि तुच्छतां गतः ।। ४९२ ॥

सूत्रम्

परिणामैकत्वात् वस्तुतत्त्वम् ॥ १४॥

योगसारः

गुणानां परिणामस्तु समानात्मा न भेदवान् ।
एको यथेन्द्रियाणां स्यात् श्रोत्रादिरूपतः सदा ॥ ४९३ ॥

ग्राह्यस्वरूपिणामेवं शब्दादिरूपविक्रिया ।
पृथ्व्यादिपरमाणूनां वृक्षादिरूपविक्रिया ।। ४९४ ॥

वस्तुतत्त्वं गुणानां तु कार्येणैवानुमीम्यते ।
अनेकत्वे गुणानां तदेकत्वं वस्तुतत्त्वतः ॥ ४९५ ॥

सूत्रम्

वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ॥१५॥

योगसारः

वस्तुसाम्येपि चित्तस्य ज्ञानरूपस्य भेदतः ।
तयोर्भिन्नस्तु पन्थाः स्यात् विज्ञान-वस्तुनोः सदा ॥ ४९६ ॥

विज्ञानवादिनां पक्षे विज्ञानमात्रमेव सत् ।
सहोपलम्भनादर्थविज्ञानाव्यतिरेकिता ॥ ४९७ ॥

न साधीयानयं पक्षस्तयोर्विभिन्नरूपतः ।
पदार्थस्य यथा रूपं विज्ञानस्य तथा न हि ।। ४९८ ॥

इत्येवं भिन्नरूपत्वाद् भिन्ने विज्ञान-वस्तुनी ।
सर्वं विज्ञानमेवेति पक्षस्तस्मान्निराकृतः ।। ४९९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रम्

न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥ १६ ॥

योगसारः

ज्ञानवस्तु-सकालत्वं नैव भवितुमर्हति ।
विज्ञानविषयो वस्तु नैक-विज्ञान-निर्भरम् ॥५०० ॥

चित्तस्यान्यत्र सञ्चारे रूपं किं तस्य वस्तुनः ।
अगृहीतस्वभावं सत्-अलीकं तद्भवेत् तदा ।।५०१ ॥

इत्येवं दोषदुष्टं तत् न ग्राह्यं बौद्धसंमतम् ।
स्वतन्त्राणि च चित्तानि स्वतन्त्रं वस्तु नो मते ॥५०२ ॥

सूत्रम्

तदुपरागापेक्षित्वात् चित्तस्य वस्तु ज्ञाताऽज्ञातम् ॥ १७ ॥

योगसारः

साङ्ख्ययोगनये तावद् वस्तुनो ज्ञानसम्भवः ।
अर्थोपरागतश्चित्तं तत्तज्ज्ञानकरं भवेत् ॥ ५०३ ॥

ज्ञानाज्ञाने पुनश्चित्ते वस्तूपरागसम्भवे ।
येनोपरज्यते चित्तं वस्तु तज्ज्ञातमुच्यते ॥ ५०४ ॥

अज्ञातं वस्त्वसम्बद्धं चित्तेन सह सर्वथा ।
इत्येव ज्ञानतत्त्वस्य शास्त्रं साङ्ख्यानुमोदितम् ॥ ५०५ ॥

सूत्रम्

सदाज्ञाताः चित्तवृत्तयः तत्प्रभोः पुरुषस्यापरिणामित्वात् ॥ १८ ॥

योगसारः

चित्तवृत्तिः सदा ज्ञाता पुरुषापरिणामतः ।
पुरुषः स प्रभुस्तस्याः साक्षी तस्याः सदातनः ॥५०६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पुरुषापरिणामाद्धि वृत्तीनां ज्ञातता सदा ।
इत्येवं चित्तवृत्तीनां साक्षी स पुरुषः स्मृतः ।।५०७ ॥

सूत्रम्

न तत्स्वाभासं दृश्यत्वात् ॥१९॥

योगसारः

इन्द्रियाणि स्वप्रकाशाणि दृश्यत्वात् न भवन्ति हि ।
स्वाभासं न तथा चित्तं दृश्यत्वेनैव हेतुना ।। ५०८ ॥

स्वाभासो न हि दृश्यस्य लोकेऽस्मिन् दृश्यते क्वचित् ।
इत्यतः पुरुषो द्रष्टा स्वयम्प्रकाश एककः ॥५०९ ॥

सूत्रम्

एकसमये चोभयानवधारणम् ॥२०॥

योगसारः

स्वाभासं विषयाभासं कथं चित्तं भवेदिह ।
एकस्मिन् समये चित्तं द्वयं निश्चिनुयात् कथम् ॥ ५१० ॥

भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ।
इत्येष बौद्धवादस्य पक्षो न साधुसंमतः ॥ ५११ ॥

सूत्रम्

चित्तान्तरदृश्ये बुद्धिबुद्धेः अतिप्रसङ्गः स्मृतिसङ्करश्च ॥२१॥

योगसारः

अथवा खलु वेद्येत चित्तं चित्तान्तरेण चेत् ।
तच्चित्तमपि वेद्येत चित्तान्तरेण सर्वथा ॥५१२ ॥

इत्येवमनवस्था स्यात् चित्तस्वाभाससंमतौ ।
अपि च स्मृतिसांकर्यं प्रसज्येतात्र वर्त्मनि ॥५१३ ॥

CC-0. In Public Domain. Digitization Muthulakshmi Research Academy

अनुभूतिं समाश्रित्य स्मृतयः संभवन्ति हि ।
चित्त-चित्तान्तराभासे सङ्कीर्णाः स्मृतयस्तदा ॥५१४ ॥

सूत्रम्

चितेरप्रतिसङ्क्रमायाः तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥ २२॥

योगसारः

अप्रतिसङ्क्रमा शक्तिश्चिच्छक्तिरभिधीयते ।
संचारः सङ्क्रमः प्रोक्तस्तदभावश्चितौ मतः ॥ ५१५ ॥

बुद्धेराकारमाश्रित्य चितिशक्तेराकृतिर्मता ।
प्रतिबिम्बग्रहो यद्वत् सलिलस्य तथा चितेः ।
अतो नाकारतापत्तिः चिच्छाक्तेः परमार्थतः ॥५१६ ॥

ततः सा बुद्धिसंवेदे स्वाभासा सक्षमा सदा ।
सा वृत्तीर्विजानीते चिच्छक्तिः परिणामिनीः ॥५१७ ॥

सूत्रम्

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥ २३ ॥

योगसारः

सचेतनत्वमापन्नं चित्तमचेतनं स्वयम् ।
चित्तस्य चेतनत्वं तु चिच्छक्तेरुपरागतः ।५१८ ॥

अतश्चित्तं हि सर्वार्थं द्रष्टृ-दृश्योपरागतः ।
द्रष्टाऽपि दर्श्यते तेन दृश्यं चापि प्रदर्श्यते ।।५१९ ॥

आत्मानं तत् कथं चित्तं दर्शयेत् तेन भासितम् ।
इत्युक्ते सत्यमुक्तं तत् दर्शकं तस्य भासनात् ।। ५२० ॥

सूत्रम्

तदसङ्ख्येयवासनाभिः चित्रमपि परार्थं संहत्यकारित्वात् ॥ २४॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

अनादिकाल-प्रवृत्तं चित्तं हि वासनावृतम् ।
असङ्ख्येयाः मनोनिष्ठाः वासनाः सम्प्रकीर्तिताः ।।५२१ ॥

तदेवं वासना-चित्रं संहत्यकारि सर्वथा ।
परस्मै पुरुषायैव चित्तं हि सम्प्रवर्तते ।।५२२ ॥

ज्ञानस्यैव कृते ज्ञानं कथं स्यात् परमार्थतः ।
तथा चित्तं न हि स्वार्थं पुरुषार्थमभीप्सितम् ॥ ५२३ ॥

सूत्रम्

विशेषदर्शिनः आत्मभावभावनानिवृत्तिः ॥२५॥

योगसारः

जडस्य चेतनस्यापि विशेषज्ञानमुत्तमम् ।
अशुद्धं तु जडं शुद्धं चैतन्यमिति यद् भवेत् ॥५२४ ॥

तेनात्मभावसंबद्धाः निवृत्ताः सर्वभावनाः ।
कोऽहमासमितः पूर्वं कथं वा कुत्र वाऽभवम् ।।५२५ ॥

इतश्च को भविष्यामि कथं वेति हि भावनाः ।
आत्मास्तित्वेन सम्बद्धाः निवृत्ताः ह्यात्मदर्शनात् ॥५२६ ॥

सूत्रम्

तदा विवेकनिम्नम् कैवल्यप्राग्भारं चित्तम् ॥२६॥

योगसारः

विवेकदर्शने चित्तं विवेकनिम्नतां गतम् ।
कैवल्यप्रवणम् तस्माद् विवेकज्ञान-निम्नगम् ॥ ५२७॥

सूत्रम्

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥२७॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

विवेकख्यातिमात्रस्य चित्तस्य च्छिद्रसम्भवः ।
तदा व्युत्थान-संस्काराः प्रत्ययान्तरकारिणः ॥५२८ ॥

जीवन्मुक्तेरवस्थायां चित्तसत्त्वमुदीयते ।
संस्कारेभ्यो हि पूर्वेभ्यो संमधिर्भज्यते यतः ॥ ५२९ ॥

सूत्रम्

हानमेषां क्लेशवदुक्तम् ॥२८॥

योगसारः

एवमुदितसंस्काराः क्लेशवद्धेयतां गताः ।
एवं संस्कारहानं स्यात् तत्पूर्वमभ्यधीयत ॥५३० ॥

विनाशः क्लेशवृत्तीनां ध्यानेन शक्यसंभवः ।
प्रतिप्रसवहेयाश्च क्लेशाः सूक्ष्मस्वरूपिणः ॥५३१ ॥

एवं हि स्थूल-सूक्ष्माणां क्लेशानां हानमुच्यते ।
तथैवात्राऽपि संस्काराः परिहाप्याः प्रयत्नतः ॥ ५३२॥

सूत्रम्

प्रसङ्ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेः धर्ममेघस्समाधिः ॥२९॥

योगसारः

प्रसङ्ख्याने ऽप्यलुब्धस्य परवैराग्यशालिनः ।
सर्वथैव विवेकाख्य-ख्यतिमात्रस्य संनिधेः ॥५३३ ॥

धर्ममेघः समाधिः स्यात् धर्ममात्रैकवर्षणः ।
पुमर्थसाधकं धर्मं यो हि मेहति मेघवत् ॥ ५३४ ॥

सूत्रम्

ततः क्लेशकर्मनिवृत्तिः ॥३०॥

In Public domain. Digitization Muthulakshmi Research Academy

योगसारः

तस्य लाभादविद्याद्याः क्लेशा नश्यन्ति पूर्णतः ।
ततश्च कर्महानेन न पुनः कर्मसंभवः ॥५३५ ॥

जीवन्नेव विमुक्तोऽयं विद्वान् नष्टविपर्ययः ।
धर्ममेघसमाधेश्च फलमेतत् महार्थदम् ॥५३६ ॥

सूत्रम्

तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पम् ॥ ३१॥

योगसारः

जीवन्मुक्तेरवस्थायामनन्तं ज्ञानमीरितम् ।
सर्वावृति-मलापेतं तज्ज्ञानं मोक्षकारणम् ॥५३७ ॥

ज्ञानस्य तस्य चानन्त्यात् ज्ञेयं बह्वल्पमुच्यते ।
आकाशे द्युमणौ दीप्ते खद्योतस्येव दीधितिः ।। ५३८ ॥

सूत्रम्

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ॥३२॥

योगसारः

धर्ममेघोदयात् तस्मात् गुणानां हि कृतार्थता ।
परिणाम-क्रमस्तेषां समाप्तिं याति सर्वथा ॥५३९॥

धर्ममेघोदयात् पूर्वं परिणामक्रम-वर्तिनः ।
गुणाः कृतार्थतां प्राप्य क्रमहीनाः भवन्ति ते ॥५४० ॥

सूत्रम्

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥३३॥

योगसारः

क्षणानन्तर्यरूपेण क्रमः प्रतीयते सदा ।
क्षणस्य प्रतिसंबन्धी तत्प्रतियोगितां गतः ॥५४१ ॥

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

क्रमोऽयमनुमेयः स्यादपरान्तस्य दर्शनात् ।
अन्यान्तः परिणामस्य क्रमस्य चानुमापकः ।।५४२ ॥

बुद्ध्यादि-भिन्न-रूपेण परिणामो बभूव यः ।
सोऽयं नष्टक्रमः सर्वः ख्यातियुक्तस्य योगिनः ।। ५४३ ॥

सूत्रम्

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥३४॥

इति कैवल्यपादः

समाप्तं पातञ्जलं योगसूत्रम्

योगसारः

अधुना पुरुषार्थो हि गुणानां साधितः परः ।
इतोऽपि पुरुषार्थो न गुणपरिणतेः पुनः ॥५४४ ॥

प्रधान-दर्शनार्थं च कैवल्यार्थमथाऽपि च ।
यः क्रमो गुणचक्रस्य स समाप्तिमितो गतः ।।५४५ ॥

स प्रतिप्रसवः मूल लयात्मकोऽथ जायते ।
गुण-सम्पर्क-शून्यस्य पुरुषस्य कृतार्थता ॥५४६ ॥

चितिशक्तिस्तदा शुद्धा स्वरूपसंप्रतिष्ठिता ।
पुरुषस्याथ कैवल्यं गुणवियोगमात्रतः ।।५४७ ॥

प्रकृतेश्चापि कैवल्यं पुरुषस्य यथा तथा ।
तथाऽपि पुरुषे गौणं कैवल्यमुच्यते नये ॥ ५४८ ॥

प्रकृतेरेव सर्वाऽपि प्रवृत्तिरिति तत्त्वतः ।
अविक्रियस्य पुंसस्तु प्रवृत्तिर्न हि काचन ॥ ५४९ ॥

इत्यतः प्रकृतिः पुंसः पुरतो गुणविक्रियाम् ।
दर्शयित्वाऽथ निवृत्ता ततः सापि हि केवला ॥५५० ॥

In Public domain. Digitization Muthulakshmi Research Academy

कैवल्यं केवलावस्था पुरुषस्यैव संमता ।
अकृतार्थं प्रति स्फीता प्रक्रितिर्णास्ति केवला ।। ५५१ ॥

इदं शास्त्रं सदा बुद्धौ स्थापनीयं प्रयत्नतः ।
इदं सुधासमं लोके मुमुक्षूणां हि तारकम् ॥५५२ ॥

पातञ्जलं महत् सूत्रं व्यासभाष्यस्य चान्वयात् ।
विज्ञेयं जन्मसाफल्य-हेतवोऽत्र मुमुक्षुभिः ॥ ५५३ ॥

मिश्राणामन्यसिद्धानां योगिनां च तपस्विनाम् ।
व्याख्यानानि भवन्त्यत्र योगदृष्टिप्रदानि च ।।५५४ ॥

नूनं जीवनविद्येयं संसारतारिणी मता ।
सुधेव बिन्दुना विद्या पीतमात्रेण तारयेत् ॥५५५ ॥

मधुसूदननामाऽयं गौतमानां हि वंशजः ।
पेन्नाकुलसमुत्पन्नः शास्त्रतत्त्वार्थबुद्धये ।। ५५६ ॥

योगसारमिदं पुण्यं स्वान्तःशुद्धेरवाप्तये ।
कृतवान् तेन विश्वात्मा नारायण प्रसीदतु ।। ५५७ ॥

या देवी बोधरूपेण मद्बुद्धिमधितस्थुषी ।
सदा मां प्रेरयेद् वाचा तया तामेव संस्तुवे ।।५५८ ॥

न मामि मनसा यां तां नमामि वचसा हि ताम् ।
न मामितरसङ्गोष्ठी नयेदन्यत्र शङ्करात् ।। ५५९ ॥

मधुराद्वैतवेदान्तसम्प्रदायप्रतिष्ठितः ।
श्रीगुलाबो ममान्तः स्यात् तत्त्वज्ञानप्रदो गुरुः ।। ५६० ॥

गौतमगोत्रोत्पन्नेन श्रीपेन्नामधुसूदनेन विरचिते
योगसारे चतुर्थपादः पूर्णतां गतः॥

योगसारः समाप्तः

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रमौलीश्वरविजयम्

(काव्यम्)

या देवीबोधरूपेण मद्बुद्धिमधितस्थुषी।
सदा मां प्रेरयेद्वाचा तया तामेव संस्तुवे॥ १॥

स्मितेन यस्या जगदेतदञ्जसा वशीकृतंन्यक्कृतचन्द्ररोचिषा।
तदेव बाभातुहृदीडितप्रभं क्षपातमस्काण्डविनाशनक्षमम्॥ २॥

भक्तानां तु सुधायतेऽत्र वसुधाकायोऽपि नाकायते
धेनुः कामदुघाऽपि भक्तिरसतो गोष्ठीयवत्सायते।
दिव्यःकल्पतरुश्च सुतरां गेहस्थशष्पायते
मुक्तिर्भक्तिरसेन साधु तुलिता काषायशाकायते॥ ३॥

वीक्षायां शशिनं रविं घनरुचिं ज्ञाने प्रबोधात्मके
भावे क्षीरसमुद्रमेव चलने लास्याब्धिमत्यद्भुतम्।
धृत्वा भक्तहृदन्तरालविलसन्मन्दस्मितोद्भासुरं
वन्देऽहं परभक्तिमात्रविवशं कृष्णाख्यनारायणम्॥ ४॥

ज्ञानेनात्मविलोकनेन कतिचित्केचिच्च सत्कर्मणा
योगेनात्मनिमज्जनेन कतिचित्स्वात्मप्रभातेजसि।
केचिद्भक्तिसुधाब्धिदिव्यलहरीमाधुर्ययोगेन यं
देवेशं समुपासते स भगवान्नारायणः पातु नः॥ ५॥

अध्यात्मप्रियवासनोर्जितमहासत्त्वस्थसाधुप्रिये
देशे भारतनामकेऽत्र पवनोऽप्यध्यात्मगन्धोद्वहः।
धन्यानां यमिनां परार्थचरितैस्त्वाऽमोददोमोददः
सार्थक्यं प्रददातुदिव्यचरितैराधाप्रियाऽराधितः ॥ ६॥

जातो गौतमपूतवंशजलधौ सन्मौक्तिकाभः पुरा
प्राचां दिव्यतपोविपाकबलतः सम्प्राप्तशक्तिर्महान्।
सिद्धानां किल दर्शनेन तदनु प्रीतेष्टदैवेन यो
जीवन्नेव समाधिमाप भगवान्श्रीचन्द्रमौलीश्वरः॥ ७॥

In Public domain. Digitization Muthulakshmi Research Academy

दिव्यं तच्चरितामृतं दिविषदां प्रीतिप्रदं सोज्ज्वलं
भक्तिज्ञानसमन्वितं सुमनसां सत्कर्मसंप्रेरकम्।
लीनं तद्धृदयेषु भक्तिभरितं दोषापहं ज्ञानदं
तस्मात्तत्सहसैव गातुमिह भो प्रवृत्तमस्मन्मनः॥८॥

शृण्वन्तु प्रियभावुकाः रसवतीं चेतोहरीं सत्कथां
ध्यायन्तु प्रियदैवतं च मनसा श्रीचन्द्रमौलीश्वरम्।
तत्पादाब्जपरागरेणुकलितं चेतोगृहीत्वा पदं
स्वाराज्यादपि वर्यमत्र भुवने भक्त्यामृतं विन्दताम्॥९॥

धन्यः स वंशो यत आबभूव श्रीचन्द्रमौलीश्वरवेणुनादः।
संव्याप्य चेतः सुसदात्मकोऽयं सुधां प्रतिष्ठापयतीह रम्यः॥१०॥

अस्ति स्थिरायां स्थिरधर्मनिष्ठस्त्रिलिङ्गदेशो दिशि दक्षिणस्याम्।
यत्र श्रुतिप्रेरितकर्मदक्षा वसन्ति धर्मावनमात्रलक्ष्याः॥११॥

तत्राऽस्ति पूतः प्रथितप्रकाशः कोडंगलाख्यः पुरवर्य ईड्यः।
सत्कर्मनिष्ठाहितसंप्रतिष्ठा तत्कीर्तिकेतुर्जगतीड्यरोचिः॥१२॥

तत्रोषतुर्नित्यशिवार्चनायां पूतौ हि दाम्पत्यमभिप्रपन्नौ।
शेषाख्यविप्रोगिरिजाम्बिका च सुपुत्रवक्त्राम्बुजदर्शनोत्कौ॥१३॥

तौ चन्द्रमौलेः शुभनामहारौ हरं प्रपन्नौ विहितात्मभारौ।
तस्मात्तयोश्चन्द्रविशिष्टदीप्तिप्रभाऽशिषां सिद्धिरनुत्तमाऽसीत्॥१४॥

श्रीविश्वनाथस्य वरेण्यकाशीं कपर्दिपादोत्थरजोंशकाशीम्।
तौ जग्मतुर्भूतिविशेषभूतिं प्राप्तुं दयां वर्यसुतोदयाय॥१५॥

यत्राऽविरास्ते भुवि विश्वनाथो रूपादिशून्योऽपि च रूपधारी।
नैल्यं प्रमार्ष्टुं किल नीलकण्ठो गङ्गाधरः स्वीकृतगाङ्गवासः॥१६॥

यत्र क्षमायां सकलाक्षमायां भूतेश्वरो भूतगणार्चिताङ्घ्रिः।
गणैर्गुणाढ्यैर्निजभक्तिरिक्थैः सोमावतंसो रमते हि सोमः॥१७॥

In Public domain. Digitization Muthulakshmi Research Academy

शुद्धान्तरङ्गाविनतार्तिभङ्गा गङ्गा कपालिप्रथितप्रसंगा।
अर्धाङ्गदुर्गाप्रणयाभिषङ्गात् शिवेन नित्यं शिरसार्चिताऽस्ते॥ १८॥

विलाप्य सर्वं किल भस्मरूपात् सर्वाङ्गनिर्णेजनमाचरन्सः।
मद्भस्ममात्रग्रहणाख्यसिद्धिः सिद्धेश्वरीड्येति सदा व्यनक्ति॥ १९॥

प्रबोधनं सर्वधनप्रधानं विधाय धीशांजनिसार्थकत्वम्।
तनोति मोक्षस्य सुखप्रवासं तत्र स्वयं स्वीकृतमूलवासः॥ २०॥

मन्नाममात्रस्मरणेन भक्त्या मत्पादपद्माश्रयणेन पुंसाम्।
भवार्तिनाशो भवितेति शम्भुर्भक्तान्भवानीसहितोऽभिधत्ते॥ २१॥

वाचं सुधाभां वसुधावितानें विधाय शम्भुः पुरुधर्मकार्ये।
पुरोधसाधारितसर्वतत्त्वे यत्र स्वयं राजति राजराजः॥ २२॥

प्रसादयन्ती जनमानसानि गेहेषु वीथीषु च मन्दिरेषु।
पापाऽपनिघ्नाशिवपादनिघ्ना गङ्गेव संगुञ्जति मञ्जुवाणी ॥ २३॥

साक्षान्महेशस्य गणाधिपाश्च यत्रावतीर्णा वसुधा सुराभाः।
सदाऽर्चना-कीर्तन-सेवनाद्यैस्तमाशुतोषं परितोषयन्ति॥ २४॥

काशीपुरीसेयमनूनसत्त्वा तत्त्वप्रबोधाय मुनिप्रसेव्या।
योगीन्द्रजुष्टाऽतितपोवरिष्ठा प्रेष्ठा महेशस्य सतां विशिष्टा॥ २५॥

तौ दम्पती प्राप्य पुरीं हि काशीं मोमुद्यमानौ निजभागधेये।
देहेन वाचा मनसा च साम्बं संसेवमानौ वसतः स्म तत्र॥ २६॥

नमः शिवायेति पवित्रमन्त्रजपप्रभावोर्जितसर्वसत्त्वौ।
प्रत्येकरोमाञ्चितदिव्यतत्त्वौ तं देवदेवं गिरिशं प्रपन्नौ॥ २७॥

स आशुतोषः प्रणतार्तिहारी स्थाणुर्हृदिस्थं च तयोर्विवेद।
क्षेमोपसर्गं स तयोस्तदानीं जवेन दूरीकृतवान्कृपालुः॥ २८॥

विघ्नावसादो गिरिशप्रसादे तमोविनाशस्तरणिप्रकाशे।
अतस्तयोः पुत्रमुखेक्षणेच्छा क्षणेन शम्भोर्दयया ह्यपूरि॥ २९॥

In Public domain. Digitization Muthulakshmi Research Academy

तावाशुतोषात्समवाप्य सिद्धिं पुत्राप्तिरूपां मुदितान्तरङ्गौ।
गङ्गातटाज्जङ्गमदेवतीर्थात्प्रत्यागतौग्राममवाप्यलक्ष्यम्॥ ३०॥

तदा शुभोदर्कमिवास किञ्चित्सूर्योदयात्पूर्वमिवारुणाभा।
ततः परं भानुसुतोदयं तौ प्रतीक्षमाणौ सुखिताविवास्ताम्॥ ३१॥

कैलासयात्रामिव संप्रसाध्य प्रत्यागतौ शम्भुवराप्तकामौ।
इत्यादरात्केचन भक्तिनुन्नास्तद्दर्शनार्थं स्वजनाः समीयुः ॥ ३२॥

वाराणसीदिव्यकथाविचित्राः गङ्गानदीतोयघनप्रभावम्।
अघोरघोराचरणंपवित्रम्सत्पण्डितानां महनीयतत्त्वम्॥ ३३॥

तौ दम्पती सर्वमनोऽभिरामं सर्वं समाख्याय जनान्प्रहृष्टौ।
दूरे भवन्तोऽपि तदैव सन्तः काशीं गतास्तच्चरिताभिधानात्॥ ३४॥

ततः पवित्रे युवनामवर्षे मासे तथा कार्तिकनाम्निपुण्ये।
श्रीकार्तिकेयप्रथमप्रकाशः जातो दशम्यां हि कृपावकाशः॥ ३५॥

तं चन्द्रमौलीश्वरसत्प्रसादमासाद्य हृष्टौ पितरौ स्वभाग्ये।
श्रीचन्द्रमौलीश्वरनामतस्तावाजुह्वतुश्चन्द्रकलाविशेषम्॥ ३६॥

शैवः शिशुर्गौतमगोत्रजातो महर्षितेजः प्रसरोर्जितात्मा।
कालेन भेजे प्रसरञ्जितात्मा भानोर्यथाच्छांशुगणः प्रभाते॥ ३७॥

आबाल्यमाराद्धकपर्दिपादः प्रपेदिवान्सिद्धिपदं त्वरेण।
शान्त्या च वैराग्यबलेन सर्वान् जिगाय शीघ्रं शुकवत्प्रतेजाः॥ ३८॥

माता तदीयागिरिजाम्बिकाख्या सद्राजयोगीन्द्रकुलागताऽसीत्।
महेशपूजानिरतिप्रधानास्तत्पूर्वजाः कीर्तिधनाः धरायाम्॥ ३९॥

पुरा तदीये शिवरामनामा बभूव वंशे घनराजयोगी।
मुखोद्गतं भागवतं पुराणं तस्यासवाचो नवनीतकल्पम्॥ ४०॥

तद्भागिनेयोऽप्यथयोगिवर्यो नाम्ना चरित्रेण च राजयोगी ।
स्वमातुलेयाच्छिवरामवर्यादवाप भक्त्या सकलाश्च विद्याः॥ ४१॥

In Public domain. Digitization Muthulakshmi Research Academy

स चन्द्रमौलेः प्रथमो गुरुश्च बान्धव्यहेतोरथ मातुलश्च।
प्रीतार्द्रचित्तः स्वयमेव विद्याः तं बालकं शिक्षयितुं प्रवृत्तः॥४२॥

स बालके कोमलमानसेऽपि भक्तेः सुगन्धं व्यतरीन्महात्मा।
काले कृता युक्ततरक्रियैव फलप्रसूतेः करणत्वमेति॥४३॥

स भागिनेयप्रतिभाविशेषप्रसारहेतुं भगवत्प्रसादम्।
विज्ञाय विज्ञोऽतिमुदाऽत्र बाले पचेलिमं भाग्यमिति प्रवेद॥४४॥

क्रियाऽङ्कुरे योग्यगुणं प्रसूते न जीर्णवृक्षे गुणवत्यपीह।
इत्थं विदन्कालविशेषतत्त्वं संस्कर्तुमैच्छद्गुरुराट् स बालम्॥४५॥

तस्मात्सदा सत्त्वगुणाभिवृद्ध्यै कथाः पुराणीः कथयन्स बालम्।
विज्ञः क्वचिद्दिव्यकथाप्रसंगे स्वमातुलेयस्य कथामुवाच॥४६॥

आसीत्पुरा श्रीशिवरामवर्यो धर्मान्तरात्मा मम मातुलश्रीः।
तस्यैव चाशीर्बलतो ममेदं संप्राप्तमध्यात्मपवित्रजन्म॥४७॥

उक्त्वा तमित्थं प्रियभागिनेयं स राजयोगीचरितं महार्थम्।
संश्रावयामास सुधासमार्थं संस्कर्तुमिच्छन्कुसुमाभ बालम्॥४८॥

बाल्ये मातुलशिक्षितः सनियतं प्रोद्भूतसंस्कारतः
श्रद्धावान्गुरुभक्तिभावकलितस्तेजोविशेषावृतः।
तत्तद्योग्यगुणाढ्यबीजकलितो विद्याफलप्राप्तये
पित्रोः प्रेमरसाभिषिक्ततनुभृत्प्रेमाङ्कुरोऽवर्धत॥४९॥

इतिमधुभारतीमधुसूदनकृतचन्द्रमौलीश्वरविजयनामके काव्ये जन्मवृत्तान्तनामकः प्रथमः सर्गः

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयः सर्गः

सद्रूपगन्धादिगुणैर्विशिष्टं सुमं समेषां खलु चित्तहारि।
गुणैर्महार्घैः शिवरामवर्यो तथा समेषां मन आजहार॥ १॥

तदीयकीर्तिर्विमलाजवेन सुगन्धवद्विप्रसरा बभूव।
सुगन्धिनो वृक्षवरस्य कीर्तौ तद्गन्धमात्रं खलु दौत्यकारि॥ २॥

प्रसरिष्णुकीर्तेः स्वयमेव विज्ञाः सर्वत्र दौत्येऽनिलतां भजन्ति।
लोके सदा श्लाघ्यगुणे ममत्वं स्वभावसिद्धो गुण उत्तमानाम्॥ ३॥

आचारनिष्ठायतिनां वरिष्ठे श्रेष्ठावितेने शिवरामवर्ये।
भक्तिः स्थिरा तत्र कृतावसक्तिः व्यानक्सुवर्णस्य सुगन्धयोगम्॥ ४॥

प्रगे समुत्थाय विधाय वैधं सान्ध्यादिसत्कर्म च होमयुक्तम्।
श्रद्धायुतो भागवतादिदिव्यग्रन्थान्सभक्त्या पठति स्म नित्यम्॥ ५॥

सराजयोगेन हृदन्तरेव प्रमायमायाकुशलं महेशम्।
स्वाध्याययोगेन पुनश्च तस्य व्युत्थानकालेऽध्ययनं चकार॥ ६॥

समातुलास्याच्छ्रवणेन तत्त्वं ज्ञात्वा स्वबुद्ध्या मननं चकार।
ततः स्वबुद्धेर्निहितं गुहायां देवं निदध्यौ विमलान्तरात्मा॥ ७॥

व्युत्थानकाले च समाधिकाले तदीयनिष्ठापरमाबभूव।
तस्मान्महाभागवताऽनुरक्तिर्मुक्त्यै तदीये विरराज चित्ते॥ ८॥

श्रीनारदर्षिं शुकयोगिवर्यं स व्यासदेवस्य पदैर्विदित्वा।
तद्दर्शनोत्कण्ठितमानसः सन् निनाय कालं युगवत्समुत्कः॥ ९॥

परं सचिन्ताव्यथितान्तरात्मा लेभेन शान्तिं मुनिदर्शनोत्कः।
लक्ष्यं समासादयितुं प्रवृत्तं चित्तं सतां शान्तिपदं न विन्ते॥ १०॥

न लक्ष्यमेवास्त्यधमस्य किञ्चिल्लक्ष्येऽपि यत्नो न हि मध्यमानाम्।
लक्ष्यं विदित्वा सहसा धनेन प्राप्नोति लक्ष्यं तरसोत्तमौजाः॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

अतः सविज्ञः शिवरामवर्यो लक्ष्यस्य सिद्ध्यै कृतयत्न आसीत्।
ग्रन्थानधीत्याऽपि तदीयसारं जिघृक्षमाणो नियतं प्रयेते॥ १२॥

योग्यान्गुरून्प्राप्य कृतस्तु यत्नो विशेषतो याति फलप्रसूतिम्।
अदः सविज्ञाय परार्थतत्त्वं लघुप्रपन्नो गुरुपादमूलम्॥ १३॥

श्रीनारदर्षिं यदि भक्तवर्यं वीक्षेय भाषेय च तेन किञ्चित्।
मद्भागधेयातिशयप्रभावतुलां न कश्चिद्विदधीत लोके॥ १४॥

सुधां मुधा केचन संस्तुवन्ति द्राक्षां च रूक्षामपि मुक्तकण्ठम्।
किं जानते ते रसमुत्तमस्य पदाब्जभक्तेर्मधुसूदनस्य॥ १५॥

श्रीनारदो भक्तशिखामणिर्नो मनः सुभक्त्यङ्कुरमाततान।
सकीर्तनाम्भः प्रविसेचनेन भक्त्यङ्कुरः पुष्पति फुल्लतीह॥ १६॥

सनारदो भागवतौषधेन व्यासेन दत्तेन भिषग्वरेण।
अनादिजन्माञ्चितवासनौघं विनाश्य मोक्षं प्रददाति तूर्णम्॥ १७॥

महौषधं भागवतं नराणामाविद्यकं हन्ति तमःप्ररूढम्।
कामादिदोषोपहतस्वभावं प्रक्षाल्य बुद्धिं विशदीकरोति॥ १८॥

तदौषधं लोकसुखाय विज्ञः श्रीनारदो विष्णुकृपाप्रसादात्।
श्रीव्यासदेवाय ददौ महार्घं येनामृतं लोकहिते वितीर्णम्॥ १९॥

लोके तदेतन्महितौषधं हि जीवातुकल्पं यदि नाऽभविष्यत्।
अज्ञानरोगार्तिजकामदोषः स्वयं कथं वामनुजे व्यनंक्ष्यत्॥ २०॥

अतः कथं वाऽपि मनुष्यलोके लभेय मर्त्योऽपि सुधमहं ताम्।
मदन्तरालोर्जितमोहजालं विनाशयेद्यद्वितताममहन्ताम्॥ २१॥

अहं कथं नारददर्शनोत्थं रोमाञ्चसौख्यं च लभेयवर्यम्।
मद्भागधेयस्य फलं तदीयं सर्वार्थतो दर्शनमेकमेव॥ २२॥

विना महद्भाग्यमिहैव लोके न दर्शनं यच्छति मौनिराजः।
तद्भाग्यहेतुः क्वचिदान्तरः स्यात् क्वचिच्च संसाधितपुण्यकर्म॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

सनारदर्षिं परतत्त्वदर्शी दध्यौ हृदा दर्शनकांक्षयान्तः।
स्वामिन्भवांस्तत्त्वरहस्यवेत्ता मन्मानसं देवविदां करोतु॥ २४॥

इत्थं स तातेन महर्षिवर्यः संप्रार्थितो दर्शनमात्रहेतोः।
प्राप्ते तु काले फलदायिसर्वं संकल्पमात्रान्नहि कर्मसिद्धिः॥ २५॥

एवं विदित्वा शुभकालमार्यः प्रतीक्षमाणो दिवसान्निनाय।
क्वचित्समेयाय गृहं तदीयम् कश्चिन्महात्मा मुनिरूपधारी॥ २६॥

तमातिथेयादिसपर्ययैव प्रसाद्यभक्त्या चरणौ गृहीत्वा।
श्रीनारदर्षेर्वदनाब्जशोभामीक्षेय साधो कथमित्युवाच॥ २७॥

न मानसं मे रमतेऽत्र भोगे न लोकसौख्ये न च वा परत्र।
भक्तेरसाग्रशिखरप्रविष्टं तन्नारदं द्रष्टुमिहास्ति सोत्कम्॥ २८॥

इति प्रधीस्तस्य वचो निशम्य वाञ्छां तदीयामपि सम्प्रबुद्ध्य।
जगाद सौम्यात्र तपः श्रयस्व तपो हि सर्वार्थफलं प्रसूते॥ २९॥

मानुष्यकेऽस्मिन्मरुभूमिकल्पे सञ्जीवनं भागवतं किलैकम्।
सुधा स्वयं श्रीशुकनिर्गताऽत्र त्यक्त्वा सुरान्भूमिगतान्पुनाति॥ ३०॥

परात्मनो दिव्यकथा अमोघाः श्रोतुं स्वयं सर्वसुरेन्द्रसङ्घः।
धिक्कृत्य पीयूषमपि स्वकीयं पारं परं स्वीकुरुते महार्थम्॥ ३१॥

गीताशुकाचार्यमुखालयेयं लोकोत्तराभागवताभिधाना।
अनेककृत्वःपठिती तु भक्त्या रसाम्बुधौ मज्जनमातनोति॥ ३२॥

अतस्त्वमद्यैव गृहाणदीक्षां तीव्रा यदि श्रीमुनिदर्शनेच्छा।
धिक्कृत्य भक्ताः करगामि मोक्षं तं मौनिवर्यं सततं श्रयन्ति॥ ३३॥

मद्भक्तिभावाञ्चितयोगसिद्ध्या नामामृतं प्राप्य मदीयभक्ताः।
यत्र प्रगायन्ति वसामि तेषां चित्ते सदैवेति हरिर्ब्रवीति॥ ३४॥

श्रीमन्महाविष्णुरसप्रधाने तदीयलीलारससंनिधाने।
आसेविते भागवताभिधाने प्रीतो महर्षिर्भवति प्रधाने॥ ३५॥

In Public domain. Digitization Muthulakshmi Research Academy

आचारनिष्ठो व्रतसंप्रविष्टो धर्मप्रतिष्ठो यमिनां वरिष्ठः।
वाक्यं तदाशासनमेव मत्वा जग्राह दीक्षां शिवरामवर्यः॥ ३६॥

पवित्रचित्तोव्रतधर्मवित्तः रसप्रमत्तो गुरुभक्तिवित्तः।
शौचेन भक्त्या तपसाऽप्रमत्तः शक्त्या तमानर्च चिराय योगी॥ ३७

स आसनस्थैर्यमवाप्य भक्त्या वाग्वैभवं भागवतं सिषेवे।
अनन्यचित्तो नियताप्रमत्तः जलैकजीवोनियतं बभूव॥ ३८॥

यत्पर्वताग्रस्थिरवासदीक्षां जग्राह योगी शिवरामवर्यः।
सपर्वतो नारदशैलनाम्ना लेभे यशोभूरि धरातलेऽस्मिन्॥ ३९॥

तत्पर्वताग्रे खलु नारदर्षिः स्वयं पुरा तैजसमाप्यरूपम्।
दयानिधिस्तं शिवरामवर्यमाश्वासयामास तदेकनिष्ठम्॥ ४०॥

धर्मार्थं भुवि जन्मकर्मविमलं संतत्य केचिद्बुधाः
कीर्तिं भास्कररोचिषाऽत्र तुलितामातन्वते भूरिशः।
तत्कीर्तिर्मधुमासदिव्यसुषमाकल्पान्सदासज्जनान्
प्रीणानातिमिरापहा च हृदये लालस्यते शाश्वती॥ ४१॥

शिवरामवर्यो महनीयकीर्तिप्रथमानतेजोविसरेणदीप्तः।
मुनिवर्यरूपां भुवनैकरम्यां समवाप्यसिद्धिं प्रथितो बभूव॥ ४२॥

इति मधुभारती-मधुसूदनकृतचन्द्रमौलीश्वरविजयनामकेकाव्ये
पूर्वजानां तपश्चर्यानामको द्वितीयः सर्गः

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयः सर्गः

श्रीनारदर्षेर्भुवि दर्शनार्थं तदेकनिष्ठे शिवरामवर्ये।
ज्ञानञ्च वैराग्यमथाऽपि भक्तिः सहैव वासप्रियतामगच्छन्॥ १॥

वैराग्यशून्यं विषयानुधावि ज्ञानं भवेत्केवलदम्भहेतुः।
वैराग्यमप्यान्तरबोधशून्यं विना च भक्तिं फलदायिनैव॥ २॥

अतो द्वयोश्चाऽपि बलं हि भक्त्या न भक्तिहीनं निगमाः पुनन्ति।
भक्त्यैकनिष्ठावतिसच्चरित्रे ज्ञानं विरक्त्या सहितं विभाति॥ ३॥

अतो हि विज्ञे शिवरामवर्ये चिरप्रतिष्ठाविषये विरक्तिः।
भक्तिश्च सा बोधफलात्मनैव प्रदीर्घवासं कुरुतः स्म बाले॥ ४॥

क्वचिन्महाभागवतप्रबन्धे श्रीव्यासदेवस्य कथाप्रसंगे।
व्यासव्यथां नारदवाक्यतः स विवेदयोगीजनुषो हितार्थाम्॥ ५॥

श्रीमत्पुराणादिसमस्तवाणीविस्तारमाधाय च नाऽतितृप्तः।
श्रीव्यासदेवः प्रचिखेदमौनी स्वजन्मसार्थक्यमिह प्रपित्सुः॥ ६॥

वेदान्विभज्याथ पुराणराशिं निर्माय वेदान्तपदानि कृत्वा।
अलब्धशान्तेस्तु महात्मनोऽपि गूढाग्निकाष्ठायितमास चित्तम्॥ ७॥

सरस्वतीदिव्यतटाश्रितः सन् चिन्ताकुलान्तर्व्यथितान्तरात्मा।
मूलं तदाऽशान्तिपदस्य मृग्यन् असिद्धयोगीव चचार मौनी॥ ८॥

श्रीमन्महाभारतरूपतोऽहं प्राचीकटं वेदरहस्यमर्थम्।
का न्यूनता मे हृदयं दुनाति केनैव पूर्णत्वमिहाप्नवानि॥ ९॥

धर्मामया भागवता उदात्ता निरूपितामेनततोऽपि तृप्तिः।
अद्यापि शान्तिर्मम मानसेन प्रख्यातवेदान्तरहस्यवेत्तुः॥ १०॥

खिलोऽस्मि नैवाखिलतत्त्वबोधे चेखिद्यते मे हृदयं प्रभिन्नम्।
इत्यन्तरन्तः परिदूयमानं श्रीनारदर्षिर्मुनिमभ्यगच्छत्॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

तं पूजयित्वा मुनिराण्मुनीन्द्रं स्वदुःखहेतुं निजगाद पूर्णम्।
शुश्राव तत्सुन्दरमन्दहासप्रोद्भासिवक्त्राब्जधनीमुनीन्द्रः॥ १२॥

श्रीनारदर्षिः कृपया तदानीं विज्ञाततत्त्वोऽखिललोकसत्त्वः।
समादधे वाक्यरुचा प्रहिण्वन् चिन्तातमश्चित्तगतं तदीयम्॥ १३॥

नूनं भवान्धन्यतमोऽस्ति लोके यो वेदशास्त्रादिरहस्यवेत्ता।
भवत्तपस्या नभसि प्रदीप्तो धर्माख्यभानुः सततं विभाति॥ १४॥

परं परात्मा जगदाश्रयात्मा स्वरूपलीलाविभवादियुक्तः।
नारायणः कृष्णपदाभिधेयो वत्स त्वया मङ्क्षु समीडितो न। १५॥

ससंश्रयः साधुवराश्रयो नः सर्वार्थदः सर्वमुखः समेशः।
प्रधानमुख्यादिनिदानमेकः परावरो लोकहितप्रधानः ॥ १६॥

लोके प्रधाने खलु यत्नवन्तो द्रागेव भो सिद्धिपदं प्रयान्ति।
लब्धे हि रत्ने प्रविहाय रत्नं को वानरः शैवलमात्रमिच्छेत्॥ १७॥

अतो महात्मन्भुवनैकपालं गोपालमह्नायपरं श्रयस्व।
सर्वान्तरात्मानमुदग्रवीर्यं सर्वाश्रयं सर्वविदं भजस्व॥ १८॥

तदीयदिव्यार्थपवित्रलीला इक्षोरिवाग्रं मधुरा नितान्तम्।
ताश्चर्व्यमाणाः रसमेधयन्ते ततो रसो जन्मफलं प्रसूते॥ १९॥

तत्संस्तुतिर्नित्यरसाभिषिक्ता त्वज्जन्मसार्थक्यफलप्रदेह।
तमात्मबन्धुं धरमानसान्तर्गोविन्दलीलाः परिवर्णयेह॥ २०॥

इत्यूचिवांसं मुनिमात्मबन्धुं निरूढदुःखाग्निशमाम्बुदाभम्।
व्यासः प्रणम्यात्महितं विजानन् श्रीमन्महाभागवतं व्यधत्त॥ २१॥

यज्जाह्नवीवामृतवर्षधारमनादिकालाद्भुवनं पुनाति।
यत्राच्युताख्यः किल राजहंसः विवेकतश्चैत्तमलं धुनाति॥ २२॥

अदो विदित्वा शिवरामवरर्यः प्रीतिं परां प्राप तथैव शङ्काम्।
श्रीनारदोक्तेः परमा बभूव प्रीतिः स्वभाग्ये च परैव शङ्का॥ २३॥

कथं स साक्षान्मुनिराजहंसो मन्मानसान्तः कुरुताद्विगाहम्।

In Public domain. Digitization Muthulakshmi Research Academy

ममाऽपि चक्षुर्भवसार्थकत्वं कदा भवेद्दर्शनलालसस्य॥ २४॥

इत्थं प्रधीरार्तिहतो हिताय क्षणान्मुनीन्द्रस्य पदं विदध्यौ।
तदा प्रकाशात्मनभोऽन्तरालाद्वीचिर्दयाब्धेः सहसा ललास॥ २५॥

तदेन्द्रियव्यापृतिवेगनाशे बाह्यप्रपञ्चस्फुरणावसादे।
चित्तं मनोबुद्धिरहङ्कृतिश्च त्यक्तस्वरूपासमतां प्रजग्मुः॥ २६॥

तदा तदीयाकिलजीवरेखा सर्वात्मतामाप्यललास दीप्त्या।
अनेकजन्मार्जितपूर्वपुण्यप्रभाफलत्वेन जिगाय तस्मिन्॥ २७॥

तदा कुतश्चित्तुलसीसुगन्धः सर्वेन्द्रियाणां नवतर्पणात्मा।
तस्मिन्प्रदेशे सहसैव गाढो जीवं समुज्जीवयितुं वितेने॥ २८॥

ततो ह्यकस्मादिव देवलोकाद्भवार्तिनाशोत्थितदिव्यतेजः।
प्रसादयत्सर्वमनांसि तूर्णं नेत्रानुकूलं क्रमशोऽभ्यतानीत्॥ २९॥

तत्तेजसा साकमलौकिकात्मा शीतानिलोमन्दविसर्पकश्च।
सर्वाङ्गसंतर्पणमातनिष्णुः क्रमेण तत्राविरभूत्सुखाय॥ ३०॥

ओङ्कारनादानुविधानमाप्त आप्तः समेषां परतत्त्वधारी।
सर्वत्र माङ्गल्यरुचा विराजन् नादः पवित्रः शनकैरतानीत्॥ ३१॥

नारायणस्यैव पवित्रनाम भ्राजत्प्रभाभासुरदिव्यतेजः।
यदिन्द्रमुख्यैरनिशं हृदन्तः प्रणामपूर्वं सततं गृहीतम् ॥ ३२॥

यदिन्द्रसाम्राज्यसुखाच्च वर्यं भक्त्या गृहीतं भवदुःखहारि।
यन्मोक्षसाम्राज्यपदं प्रदत्ते तन्नाम तस्मिन्सहसा विरेजे॥ ३३॥

तदद्रिकूटं निकषा वनान्तर्ये कीचकानीरसतां गतास्ते।
कर्णौमनश्चाऽपि विलोलयन्तः तदा सुनादं स्वयमभ्यनञ्जुः॥ ३४॥

दिव्यानुभूतेश्चरमां प्रतिष्ठां समीरयन्प्रीतिवहः समीरः।
मन्दारगन्धैस्तुलसीविमिश्रैः समेधितः शान्ततमोऽन्वभावि॥ ३५॥

In Public domain. Digitization Muthulakshmi Research Academy

समाहितात्मा शिवरामवर्यस्तेजोविशेषं प्रथमं लुलोके।
बाह्यं किमेतद्रवितेज एव किं वाऽन्तरं तन्न बुबोध बोधी॥ ३६॥

विसारितेजः क्रमशोऽन्तरन्तर्घनीभवन्नेत्ररुचिं प्रहिण्वत्।
गोलाकृतिं प्राप्य पुरोव्यनञ्ज स्फीतप्रभं दीप्तरविप्रकाशम्॥ ३७॥

तथाऽपि तस्मान्न भयं न वाऽर्तिर्नवाऽन्यचिन्ताहृदये बभूव।
जीवश्च सर्वात्मशुभप्रसाराच्चक्षुष्ट्वमापद्य कृतार्थ आसीत्॥ ३८॥

पुञ्जीभवत्तेजसि नैल्यमग्रे शुभ्रं क्रमेणोत्तममाविरासीत्।
क्रमेण तत्साकृतिशोभमानं पुंभावमापद्य तदा व्यलोकि॥ ३९॥

अनेकजन्मार्जितपुण्यपूगं तथाहि साकारमभूत्क्षणेन।
आविर्बभूव प्रसरत्प्रकाशं व्यञ्जत्तदानीं शिवरामभाग्यम्॥ ४०॥

यत्प्रार्थितं जन्मसुकर्मसाध्यं तपःफलं वा सदुपासनार्थः।
तज्जीवभाग्याङ्कुरतां प्रपद्य प्रादुर्बभूव प्रथिमानमाप्य॥ ४१॥

आदौ प्रकाशस्तत उत्तमाभा तेजस्ततः सूर्यरुचिः क्रमेण।
क्रमेण चन्द्रार्चिरदभ्ररोचिर्व्यलोकि गोलाकृतिदीप्तिराशिः॥ ४२॥

तन्मण्डले दिव्यरुचा विभास्वान् मन्दस्मिताभासितसुन्दरास्यः।
पुमान्पुमांसं परमं श्रितो हि श्रितार्तिनाशो ददृशे क्रमेण॥ ४३॥

नीलालकोद्भासिशिरःप्रदेशस्त्रिपुण्ड्ररेखाङ्कितफालभागः।
सप्रेममाधुर्यविलासिहासप्रभासमुद्भासितरम्यवक्त्रः॥ ४४॥

उद्दाममन्दारसुगन्धिपुष्पप्रद्योतिमालातुलसीसमेतः।
दिव्याम्बरो दिव्यतनुः समन्तात्स श्रीहरेश्चन्दनचर्चिताङ्गः॥ ४५॥

नारायणस्यैव पवित्रनाम सदा जपाप्यायितसुन्दरौष्ठः।
निमीलिताक्षो महतीं स्ववीणामास्फालयन्केवलवीक्षणेन॥ ४६॥

तदोष्ठयोः सुन्दरयोर्हृदन्तस्तद्वल्लकीतन्त्रिनिनादभूम्नि।
नारायणः श्रीसहितो विभाति प्रदित्सुरार्ताय परं पदं स्वम्॥ ४७॥

In Public domain. Digitization Muthulakshmi Research Academy

तं नारदं देवमहर्षिमीड्यं विज्ञाय तुष्टः शिवरामवर्यः।
वाणीमतीतोह्यनुभूतिमात्रे तदा परेशे स्थिरधीर्बभूव॥४८॥

स्फीतामहेशस्य दयेति किं वा फुल्लं हिमे भाग्यमिति ब्रवाणि।
किं वा तपःपूर्वकृतं महोच्चं सिद्धिं गतं चेति मुधावदानि॥४९॥

ऋतौ वसन्ते यदि मञ्जुनादः पुंस्कोकिले तत्र स एव हेतुः।
तथा मदीयात्ममहः प्ररोहे श्रीनारदोऽयं मुनिराड्रमाणम्॥५०॥

ततः कदाचित्समवाप्तवाणीबलप्रणुन्नः शिवरामवर्यः।
तं तुष्टुवे केवलभाग्यलब्धं नारायणात्मानमनन्यचिन्तम्॥५१॥

नारायणध्यानपरोऽपि नित्यं समाधिमग्नोऽपि दयासमुद्रः।
व्युत्थानमाप्याऽथ ददर्श भक्तं बद्धाञ्जलिं स्वस्तवने प्रवृत्तम्॥५२॥

नारायणेति यदि नाम मनोऽन्तराला-
दोष्ठोद्गतं भवति तस्य सदाऽस्मि दासः।
माधुर्यमात्ररसपूर्णपरेशनाम्ना
क्रीतोऽहमस्मि दययेति तदोचिवांस्तम्॥५३॥

इति मधुभारतीमधुसूदनकृतचन्द्रमौलीश्वरविजयनामके काव्ये
नारदमहर्षिसाक्षात्कारनामको तृतीयः सर्गः

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थः सर्गः

प्रतिपदमधुधारास्त्राविवाक्यं निशम्य
पुलकिततनुवल्लीं धारयन्फुल्लभाग्यः।
नयनकमलनिर्यत्स्वच्छनेत्राम्बुधारो
भगवति शिवरामस्तस्थिवानात्ममार्गे॥ १॥

अहह फलति भाग्यं मे भवद्दर्शनेन
सुविततसुकृतानां शेवधिर्मे पुरस्तात्।
भगवति रसपाकं प्राप्य भक्तेश्चिराय
स्थित इह मम देव प्रेष्ठभक्तावनाय॥ २॥

भुवनभवनलीलासंनिधानादिदक्षो
हरिरपि भवदीयप्रीतिमात्रप्रसन्नः।
विलसति चिरभक्तेर्गूढपाशेन बद्धः
क्षणमपि च वियोगं नैव सोढुं स शक्तः॥ ३॥

तव खलु महनीये दर्शने सोऽपि साक्षा-
दिह भवति पुरस्तान्माधवो मे धवश्च।
दृतगतिरपि वाणीमोहिता ते स्वरूपे
कथमपि तव कीर्तिं गातुमुत्कण्ठिनीह॥ ४॥

अवनिमवितुमद्धाशुद्धविद्यास्वरूपो
विविधविषयबन्धत्रोटनायासिसिद्धः।
कलयसि महतीं ते हस्तभूषायमाणां
हरिमनसि निवेष्टुं कीर्तनद्वारकल्पाम्॥ ५॥

स्वरगतमधुरत्वं व्यञ्जयन्कञ्जनाभे –
रनुभवसुखसारं सारयन्सूरदीप्तिः।
त्रिभुवनलघुपल्लीभ्रामसल्लापकेलिर्
विचरसि मधुशत्रोर्नाममात्रान्तरात्मा॥ ६॥

In Public domain. Digitization Muthulakshmi Research Academy

यदि तव घनभक्तिर्नाऽभविष्यत्पृथिव्यां
कथमिह मनुजानां पापनाशोऽभविष्यत्।
हरिरपि कथमिष्टस्त्यक्तवैकुण्ठसौख्यो
मनसि च मनुजानां वस्तुमायास्यदत्र॥७॥

त्वमसि मनसि काये सर्वथा विष्णुरूपश्
चरसि भुवनसंघेऽभंगलीलाविनोदी।
तव चरणसरोजध्यानमेकान्ततो मे
सकलविधशुभानां हेतुरात्यन्तिको हि॥८॥

इति खलु शिवरामो भक्तिवैवश्यमाप्य
प्रविमलमनसा तं नारदं प्रार्थ्यतुष्टः।
हिमसितशकलाभं नारदर्षेस्तदानीं
दृतमभवदमोघं मानसं भक्तिवश्यम्॥९॥

अयि तव चिरवाञ्छा न केति जिज्ञासमानो
विमलिनहृदयं त्वां प्रष्टुमिच्छामि वत्स।
अहमिहघनभक्त्या प्रीतिमाप्तस्तवाऽप्तः
फलति हि गुरुभक्तिः प्राप्तकाले शुभार्थे॥१०॥

इति वचनममोघं कर्णमात्रप्रविष्टं
भगवति शिवरामः द्वारमामंस्ततुष्टः।
मुनिवरचरणाब्जं संश्रितायेह मह्यं
श्रुतिशिरसि विदीप्तं ब्रह्मतत्त्वं प्रदेहि॥११॥

इति स गहनवाचं नारदोऽप्यन्वमंस्त
प्रियतमहरितत्त्वं तत्त्वतः संजगाद।
तदनु स शिवरामो विश्वमूलं महेशं
हृदयकुहरमध्ये ह्यन्वभूत्सप्रसारम्॥१२॥

अभिमतमथ दत्त्वा नारदेऽन्तर्हिते स
क्षणमपि निजपुण्ये शंकितो मौनमास।

In Public domain. Digitization Muthulakshmi Research Academy

तदनु च निजगेहं प्राप्य नित्यं ननन्द
त्रिभुवनपतिविष्णौ किं न साध्यं प्रसन्ने॥ १३॥

जगति स गिरिवर्यः प्रेष्ठतां प्राप तस्मात्
तपसि हि शिवरामो नारदं यल्लुलोके।
जडमपि महितानां संनिधानाद्विशिष्टात्
कलयति यश उच्चैः सूत्रवत्पुष्पसंगात्॥ १४॥

इति घनतपसातं नारदर्षिं प्रसाद्य
स्वभिमतमपि लब्ध्वा ह्यागतं योगिवर्यम्।
सहमुदमभिगम्य प्रेमभावेन पौराः
कुसुमनिकरवर्षैः पूजयामासुरीड्यम्॥ १५॥

तत इनरुचिराभः साधयित्वा ह्यसाध्यं
मुनिवरशिवरामः सत्तपश्चेतुमैच्छत्।
प्रतिदिनमपि शुद्धो धर्मनिष्ठान्तरात्मा
भगवति हितचित्तः कालमर्थे निनाय॥ १६॥

इति घनचरितं तद्बोधयित्वा गुरुस्तं
नवजनिपरिपाके योग्यमाधाय तुष्टः।
इतरविषयचिन्तां मानसात्संव्युदस्य
स्थिरमतिमतिमन्तं राजयोगी चकार॥ १७॥

ललितमधुरगाथाः श्रावयन्राजयोगी
कुसुममनसि बाले सद्गुणामोदमाधात्।
वयसि हि कृतयत्नो नूनमर्थान्प्रसूते
गतपयसि तडागे सेतुबन्धो वृथैव॥ १८॥

फलति विहितयत्नो भाग्यतो नान्यहेतो-
रिति वदति हि कश्चिद्भाग्यमात्रे निषण्णः।
बलवदपि च भाग्यं निष्क्रियेनैव सिद्ध्ये -
दिति विदितरहस्यो यत्नवान्भाग्यशाली॥ १९॥

In Public domain. Digitization Muthulakshmi Research Academy

कुलगतगुणपूगं मातुलात्प्राप्य धन्यः
कृतमतिरधिकाभश्चन्द्रमौलीश्वरश्च।
अनवरतसदर्थप्रीतिमात्रैकयत्नः
पुरभिदि पुरुभक्त्या सद्व्रतः सञ्चचार॥२० ॥

ध्रुवगतघनदीक्षाप्रेरितश्चन्द्रमौलिर्
विविधमधुरगाथातत्त्वविज्ञानमत्तः।
त्रिगुणविषयपाशान्मोक्षमिच्छन्सदर्थे-
प्यगुणवति महेशेऽराजतानन्यचित्तः॥२१ ॥

उपनयनमथाऽस्य ब्रह्मविद्याप्रवेशे
त्वरितमिह विधातुं राजयोगी ववांछ।
अत उचितमवाप्य प्रीतियुक्तो मुहूर्तं
भवभिदिहितदीक्षं चन्द्रमौलिं व्यधत्त॥२२॥

अथ स च परविद्यानिष्ठया शुद्धचित्तो
नियतविहितविद्योपासनाऽवाप्तबोधः।
प्रतिहतसकलाघो दैवशक्त्या विशिष्टो
विषयविरतिभक्तिस्थेमशक्त्या ललास॥२३॥

तनुरपि पुरुगन्धश्चन्दनोघर्षितोऽत्र
कषितकनकखण्डो राजते शुद्धवर्णः।
लघुरपि पुरुकान्त्या भ्राजते ना तथैव
नियतकृततपस्याराजितात्मासदर्थे॥२४ ॥

विषयविरतिसिद्धाज्ञानशक्त्या समिद्धाः
अखिलसुगुणविद्धाः पुण्यकर्मप्रसिद्धाः।
श्रवणमननराद्ध-ध्यानमार्गप्रणद्धाः
परमपुरुषबद्धा मुक्तिभाजोऽत्र शुद्धाः॥२५ ॥

इति मधुभारती-मधुसूदनकृत-चन्द्रमौलीश्वरविजयनामके काव्ये
फलसिद्धिनामकः चतुर्थःसर्गः

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमः सर्गः

इत्थं मातुलशिक्षितः स विविधाविद्याः शुभाः हेलया
संप्राप्योर्जितशक्तिरत्र विमलं तेने यशोबालकः।
प्रह्लादस्य महोच्च भक्तिकलितां शुश्राव गाथां परां
लक्ष्यास्यै ध्रुवमानसञ्चकलयन्लक्ष्यैकचित्तोऽभवत्॥ १॥

तस्मिन्नात्मबलं परञ्च सहनं श्रद्धा गुरौ गोप्तरि
निष्ठा वेदविदां वचः सुपरमा धर्मे च निःश्रेयसे।
भक्तिः श्रीमधुसूदनेऽतिविमलाज्ञानप्रभाराजिता
निष्प्रत्यूहफलाप्तये करणतां प्रापुः समे संगताः॥ २॥

तं तं वैदिककर्ममार्गसुलभं संस्कारमाधित्सुना
पित्रा बालक उत्तमेन विधिना संस्कारितः कर्मणा।
काले प्राप्य स बालकोऽपि जनुषो वर्षाष्टमं धीधनः
सावित्रीमनुसंदधान उदितां कालं निनायोत्तमम्॥ ३॥

शङ्काः प्राप्य मनस्तुदाः स विविधाः तत्तत्प्रसङ्गे पुनः
योग्यं चोत्तरमाप्य मातुलमुखात्संशान्तधीकल्मषः।
शङ्का कल्मषहारि शुभ्रसलिलं ज्ञानाम्बरे संस्थितं
मेने मातुलमम्बुदाभमतुलप्रज्ञाप्रभुं प्रीतितः॥ ४॥

एवं वर्षचतुष्टयेऽथ गमिते बालेन वै लीलया
निष्ठाश्रीमधुसूदनस्य चरिते वृद्धिं गता निर्मले।
तत्तच्छास्त्ररहस्यमात्रकलने तीक्ष्णामतिर्वर्धिता
स्वान्तः सारविलोकने च नियतं चित्तं स्वयं संरतम्॥ ५॥

शास्त्रं रक्षति सर्वदैव विषये योग्यार्थमादर्शयत्
शास्त्रेणैव भवन्ति कीर्तितयशः पुञ्जाश्च योग्या नराः।
शास्त्रं धीमलिनं प्रमार्ष्टिविमलां सूते धियं राजितां
शास्त्रेणैव विनश्वरेऽपि मनुजाः काले यशस्तन्वते॥ ६॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्यालोच्य समग्रशास्त्रविषये तत्त्वे परे निष्ठितः
सार्थक्यं जनुषः परं निशितधीः प्राप्तुं सदातत्परः।
सर्वाधारमुमासहायमतुलप्रेमास्पदं शङ्करं
बालः सन्नपि नीलकण्ठममलं भक्त्या परं शिश्रिये॥७॥

तद्ग्रामं निकषा प्रशस्तमहिमा देवः स्वयं मन्दिरे
कस्मिंश्चिद्विललास देवविनुतश्चैकाम्बरेशः शिवः।
देवः सर्वगतोऽपि भक्तिविवशस्तत्राविरासीत्स्वयं
यं द्रष्टुं मुनयोऽपि शान्तरजसस्तत्रानिशं संययुः॥८॥

साक्षाच्छम्भुरिहास्ति शक्तिसहितः पापानि नः क्षालयन्
मोक्षं हस्तगतं करोति दयया भक्त्यैकवश्यः प्रभुः।
तस्माद्देवमुनीन्द्रराजनिचयः श्रद्धा समिद्धान्तरो
धृत्वा दिव्यवपुर्विशेषमहहो संयाति देवालयम्॥९॥

इत्याकर्ण्यवचः समातुलमुखाद्बालोऽपि लीलाप्रियस्
तद्द्रष्टुं प्रववाञ्छ किन्तु जननी नाज्ञां ददौ सत्वरम्।
दुःखार्तं ह्यवलोक्य तस्य जननी विज्ञाय हेतुं पुनर्
गन्तुं मन्दिरमन्वमंस्त तनयप्रेमार्द्रचित्तास्वयम्॥१०॥

बालं तापसकर्ममार्गहृदयं प्राप्तोदयं मातुलः
आहूयेत्थमुवाच वत्स तव धीः संनिष्ठिता हीश्वरे।
किन्त्वेकं खलु वच्मि साम्प्रतमिह प्रीत्यैव मे त्वं श्रुणु
नाऽस्माभिर्निशि मन्दिरे हितपरैर्भाव्यं क्वचिन्मानवैः॥११॥

इत्याबोध्य समातुलोऽपि दयया तं भागिनेयं पुनः
स्थाने तत्र निनाय कार्यवशतश्चान्यत्र तूर्णं ययौ।
बालोऽपि प्रियदैवतस्य निलयं प्राप्यान्तरानन्दितस्
तत्रोवास मुनीन्द्रदर्शनमना रात्रौ च भीतिं विना॥१२॥

सायंकालविधिं समाप्य विधिवत्सद्ब्राह्मणामन्दिरान्
निर्वृत्ताः क्रमशश्च तत्र परमाशान्तिस्ततानाद्भुता।

In Public domain. Digitization Muthulakshmi Research Academy

भक्ता दैवतदर्शनेन नितरामानन्ददोलायिताः
नेच्छन्तोऽपि गृहं तदा प्रतिययूरात्रिस्थितेर्भीरवः ॥ १३ ॥

प्राचीमन्दिरमाश्रितश्च शुशुभे शुभ्राम्बरश्चन्द्रमा
ज्योत्स्नादर्शितशुभ्रमार्गममलः संश्रित्य पूजाविधिम्।
मन्नाम्ना पशुपोऽपि भाति भुवने श्रीचन्द्रमौलीश्वरः
इत्थं पूजयति स्म तं परशिवं तारासुमैः राजितैः ॥ १४ ॥

दूरे तिष्ठतमन्दिरादिह मनाक्शास्त्रादिवान्तर्मलाः
आहूतायमदेवधर्मनिलयं तिष्ठास्यतां मन्दिरे।
इत्थं भीकररावणैर्हि जनतां निर्वर्तयन्तो मृगाः
शास्त्रार्थादिह कोमलेव धिषणादूरे ततो बभ्रमुः ॥ १५ ॥

योगे स्वात्मविलोकनेन नियतं येषां मनः पावितं
हित्वा तान्सुविशुद्धकर्मनिचयैर्दिव्यात्मनो योगिनः।
अन्ये पापविमिश्रकर्मनिकरे बंभ्रम्यमाणाः जनाः
पूते मन्दिरसन्निधौ हतबलाः स्थातुं कथं शक्नुयुः ॥ १६ ॥

प्रज्ञालोकविलासशक्तिलसिता यत्रासते योगिनः
आस्तां कोऽपि कथं नु पापमलिनस्तत्सन्निधौ निर्भयः।
यत्राऽक्षीणपराक्रमोऽस्ति मृगराट्संघोऽन्यतेजोहरो
जम्बूकोऽपि पराक्रमीव भवतात्तत्सन्निधौ वा कथम् ॥ १७ ॥

प्राप्तो द्वादशवर्षमात्रममलं चायुः शुभं शान्तधीर्
आज्ञप्तः स तु मातुलेन दयया प्राप्तस्तदा मन्दिरम्।
एकाकी निजभागधेयममलं संश्रित्य तन्मन्दिरे
कोणे तत्र निलीय शान्तमनसा प्रत्यैक्षताशीः फलम् ॥ १८ ॥

रात्रिर्ध्यानपरेव तत्र ददृशे स्वान्तस्थतारेक्षणा
योगे कुम्भकमाश्रितेव सहसा निर्वातवेगा बभौ।
प्रत्याहृत्य समस्तजीवकरणं साधारणातत्परा
सम्प्रज्ञातमतीत्य दिव्यशकुनैः शीघ्रं समाधिं गता ॥ १९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिन्ब्रह्मसमाधिदिव्यसमये सत्त्वातिरेकेशुभे
बालो दिव्यसुगन्धवायुममलं प्राबुध्यदन्तःस्थितः।
तद्देहः कुतुकान्मुनीन्द्रकलने चक्षुष्ट्वमापद्यत
प्राणाः पञ्चसहस्रपद्मनिलये नेत्रोत्सवार्थं स्थिताः॥२०॥

आदौ कापि तु दिव्यकान्तिरतुलातन्मन्दिरान्तर्बभौ
पश्चाद्दिव्यवपुर्विशेषकलिताः केचित्तदालक्षिताः।
आरात्तेषु समागतेषु बहुधा ते संयमीन्द्रा इति
स्फीतालोकवशात्क्रमेण हितधीर्बालोऽपि चाऽलोकत॥२१॥

सिद्धामौनिवराश्च तत्र विविधां पूजां विधायोत्तमां
साम्बं देवमुपाश्रितावनिरे तं दिव्यमन्त्रैः शिवम्।
पूजां शम्भुमनः प्रसादनकरीमालोक्य सिद्धैः कृतां
तांश्चालोक्य मुनीन्प्रसन्नवदनान्बालः परं हर्षितः॥२२॥

किं मे भाग्यफलं सुपक्कमधुना प्राग्जन्मजन्मार्जितं
किं किं वा मम पूर्वकर्मकलितं पुण्यं चिरायोर्जितम्।
साक्षात्सिद्धसमागमोऽत्र पुरतो देवार्चना तत्कृता
सर्वं दैवतसन्निधौ सुविहितं साक्षात्कृतं तन्मया॥२३॥

एतज्जन्मफलस्य सूचकमिह प्रोद्भासते भाग्यतः
सान्निध्यं निधिमेव जन्मसुसतां संचक्षते शास्त्रिणः।
अस्मादेव मदीप्सितं बहुफलं हस्तस्थरत्नायते
नूनं हीति विनम्रभावभरितः साधुः स मेने तदा॥२४॥

तावत्तेऽपि समाप्य दिव्यमुनयो देवस्य दिव्यार्चना –
मुद्युक्ताः प्रतिगन्तुमीप्सितस्फलप्राप्त्या समानन्दिताः।
कोणे तत्र निलीनमर्भकममुं संवीक्ष्य कश्चिन्मुनिर्
आश्चर्यात्तमुपेत्य दिव्यवचसा प्राहेदमत्यद्भुतम्॥२५॥

कस्त्वं वत्स किमर्थमत्र गहने निर्मानवे मन्दिरे
एकाकी वससीह कोऽपि तव नो संदृश्य ते त्वन्तिके।

In Public domain. Digitization Muthulakshmi Research Academy

मा भैषीस्तव कारणं तु तरसा मां ब्रूहि ते शं भवेत्
इत्याशीः करमुन्नमय्य दयया प्राहार्भकं सन्मुनिः ॥ २६ ॥

वाक्यं तन्मधुवर्षिबालकमनः कर्णामृतं सौख्यदं
श्रुत्वाऽप्यायितनैजसर्वकरणो धृत्वा हि धैर्यं तदा।
प्राहेदं मुनिराजमूर्जितकलः श्रीचन्द्रमौलीश्वरः
स्वामिन्भूरि नमोऽस्तु तत्र भवते भूयोऽपि कुर्वे नमः ॥ २७ ॥

माहात्म्यं खलु मन्दिरस्य भवतां हेतोः सदैवोर्जितं
श्रुत्वा मामकमातुलस्य वदनाद्दिदृक्षुरत्रागतः।
स्वामिन्किं करवाणि भाविजनुषो भाग्ये न नुन्नोऽस्म्यहम्
आशीर्वादममोघमाप्य भवतां गन्ताऽस्मि गेहं पुनः ॥ २८ ॥

इत्याकर्ण्य वचः स बालकमुखादाश्चर्यतो मौनिराट्
प्राहेदं ननु वत्सधैर्यमतुलं ते भाति नोदर्शने।
प्रायोऽन्ये तु भवन्ति मूकबधिरा नो दर्शनान्मानवास्
तत्राऽपीदृशसाहसेन सुतरामस्मन्मनो नन्दति ॥ २९ ॥

तस्माद्वत्सवरं वृणीष्व किमहं दद्यां हि ते ते हिते
प्रीताः किं न वितन्वतेऽत्र मुनयः सर्वत्र क्षेमंकराः।
इत्याकर्ण्य वचः स बालकमुनिः पीयूषकल्पं परं
सार्थक्यं जनुषस्तु ये न भवतात्तद्दीयतामीप्सितम् ॥ ३० ॥

नाऽस्थामेऽस्ति जघन्यवस्तुनिचये न स्वर्गसौख्येऽचिरे
योगाभ्यासफलेषु वाऽपि सुतरां वाञ्छा न मे मानसे।
प्रह्लादः खलु बालकोऽपि मतिमान्यत्प्राप्तुमिच्छां दधे
स्वामिन् तन्मम दातुमर्हति भवानित्याह बद्धाञ्जलिः ॥ ३१ ॥

तद्वाक्यं हृदयार्तिसूचकमिति प्रीत्या तु विज्ञाय स
प्रीत्युल्लासविहासदीप्तवदनस्तं प्राह बालं मुनिः।
बालस्त्वं तु कथं तपः प्रकुरुषे योग्यं विना सद्गुरुं
तस्मान्मातुलमाश्रयस्व गुरुवत्तेऽभीष्टसिद्धिर्भवेत् ॥ ३२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रुत्वा वाक्यं श्रवणसुभगं मौनिराट्-सुन्दरास्यात्
भूयोभूयः परवशमनाः प्राप्तरोमाञ्चवर्ष्म।
तत्पादाब्जे विनिहितकरो बालकश्चन्द्रमौलिर्
धृत्वा वाक्यं शिरसि निधिवत्प्रीतचित्तो बभूव॥ ३३॥

इति मधुभारती-मधुसूदनकृत-चन्द्रमौलीश्वरविजयनामके काव्ये
एकाम्बरेश्वरवृत्तन्तनामकः
पञ्चमः सर्गः

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठः सर्गः

प्रातःकाले विमलककुभं वीक्ष्य दिव्याम्बरं स
प्रीतो भाग्ये मुनिवरकृपाप्यायितात्मा नितान्तम्।
स्मारं स्मारं मुनिवरकृपां जन्मसार्थक्यहेतुं
प्रत्येयाय स्थिरतरमतिस्त्वन्तिकं मातुलस्य॥ १॥

स्वामिन् भाग्यं मम फलितमहो मन्दिरे चन्द्रमौले –
राशीर्वादो बहुगुणफलः स्वामिवर्याच्च लब्धः।
भावत्कन्तु प्रियमपि वचोऽपालयं नैव मोहा -
दस्मादस्मिन्मनसि महती वेदनादूयते मे॥ २॥

आज्ञोल्लङ्घो भवति भवतः पालिता सायतो न
रात्रौ वासं गिरिवरतले मन्दिरेऽकार्षमेकः।
भाग्योद्रेकान्मुनिवरमहं त्वन्तिकेऽद्राक्षमल्पः
आशीर्वादं बहुविधफलं प्राप्तवांश्चापि तस्मात्॥ ३॥

इत्थं द्वन्द्वप्रमथितमना डोलितात्माऽस्मि देव
हर्षामर्षौ मनसि मम भो भूरिदुःखस्य हेतू।
भोज्यप्रीत्याजलगतममुं तर्णकं विद्धिबाल-
मस्योद्धारे कलयतुभवान्कौशलं वै विशिष्टम्॥ ४॥

आकर्ण्येत्थं क्षपिततमसो भागिनेयस्य वाक्यं
भाग्ये तस्य प्रमुदितमनामातुलस्तं जगाद।
भाग्योदर्के परिणतफले साम्प्रतं नास्ति दुःखं
हित्वा दुःखं विधृतहृदयो लक्ष्यमात्रे यतस्व॥ ५॥

आज्ञावाक्यं शिरसि निधिवत्तूर्णमाधाय धीरो
योग्ये मार्गे चलितुमधिकं निश्चिकायात्मनीने।
आत्मज्ञानो चितपथजुषां नास्ति नाशः कदाचि-
दुन्मार्गं यो जुषति मनुजो निश्चितस्तस्य नाशः॥ ६॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वं साध्यं भवति विमलान्मन्त्रयोगान्नरस्य
प्राप्याभीष्टं लसति मनुजो मोक्षमाप्नोति चेति।
मन्त्रं पञ्चाक्षरगणयुतं भागिनेयाय दत्त्वा
तं प्राह त्वं जप सुनियतः पञ्चकृत्वोऽथ कोटिम्॥७॥

प्राप्तं मन्त्रं विधिवदमलं मानसे धारयित्वा
युक्तोयुक्तं प्रतिदिनजपं कर्तुमारब्धमौनी।
ब्राह्मे काले सुविहितविधिर्बद्धशुद्धासनस्थो
मन्त्रावेशाद्विमलमनसा मन्त्रयोगे विरेजे॥८॥

आदौ वृत्तीः क्षपितविसराधारणामात्रवृत्तिं
प्राप्ताः पश्चात्सदृशसदृशाध्यानदेशे विलुप्ताः।
तस्मादात्मा त्वधिकमहसा वृत्तिशून्यप्रदेशे
शुद्धो रेजेऽनुपहितविभः शुद्धचैतन्यरूपः॥९॥

ओमित्यादौ नम इति ततस्तं शिवायेति पश्चा –
न्मन्त्रं दीक्षाविहितमनसा सम्यगाधाय चित्ते।
मन्त्रैक्ये तं परमसुखदं देवदेवं महेशं
मन्त्रात्मानं नयनसुभगं बालकस्तं ददर्श॥१०॥

ओमित्येकाक्षरबलयुतो निर्गुणं तं समष्टौ
ब्रह्मा विष्णुः शिव इति गुणैर्मण्डितं व्यष्टिरूपे।
एकं नानाविधमपि परं नामरूपादिहीनं
साक्षात्कृत्य क्षपितमलिनस्तं शिवं सोऽभ्यनन्दत्॥११॥

मन्त्रात्मानं मनसि विमले सम्यगाधाय विज्ञः
साक्षात्काराहितबलयुतस्तूर्जितात्मा ललास।
योगाभ्यासप्रखरपदवी काचिदत्यन्तदीप्ता
प्रज्ञा तस्मिन्विमलहृदये ह्याविरासीत्तदानीम्॥१२॥

प्रज्ञादीप्त्या जगदिति बुधः सारहीनं स पश्यन्
जीवं चान्ते विगतमलिनं ज्ञातवान्शक्तिरूपम्।
अन्तःशुद्धिस्त्विह भवति परं योग आवश्यकीति
व्यज्ञासिष्ट प्रणिहितमनास्तत्त्वमन्तःसमेषाम्॥१३॥

In Public domain. Digitization Muthulakshmi Research Academy

सत्यं कश्चिद्वदति वरधीर्विश्वमन्तःस्थविष्णुम्
मिथ्यां चान्यः प्रवदति मनाग्ब्रह्ममात्रा हितात्मा।
इत्थं वादः प्रचलति मिथः पामरास्तत्र मूढा
धर्मे भेदो भवति विविधोऽद्वैतमेवात्र धर्मि॥ १४॥

विश्वं भोगोपचितमनसो भोग्यरूपेण सत्यं
योगप्रज्ञालसितमनसो ब्रह्मरूपेण सत्यम्।
मिथ्याऽज्ञानोपहतमनसां रज्जुसर्पायमानं
योगप्रज्ञोपहितमनसां विष्णुरूपं हि विश्वम्॥ १५॥

विश्वं विष्णुर्विसरविभवः शक्तिमात्रोद्भासिरूपो
दृष्टिर्भिन्ना भवति मनुजे बुद्धिभेदस्य हेतुः।
तस्माद्बन्धं स्वयमिह नरः प्राप्नुते वासनात्मा
बन्धाभावो भवति सुतरां वासनानां विनाशे॥ १६॥

एवं वर्षत्रयमपि मुनिर्निश्चलात्मा क्रमेण
सर्वं त्यक्त्वा जपहितमनाः पञ्चकोटिं जजाप।
धृत्वा योगी क्वचिदिह फलैर्जीवनं जीवनेन
स्थाणुं चाऽपि प्रणयविवशं चन्द्रमौलिं व्यधत्त॥ १७॥

स्फाराकारं परमशिवभालिङ्गमुच्चैः प्रदीप्तं
दीक्षाकाले परिणतमतिः स्वप्नलोके ददर्श।
तस्मात्तेजः प्रसरसुषमं सर्वतेजोऽतिशायि
स्फीतं मूर्ध्नि विततकिरणं चन्द्रमौलेर्बभासे॥ १८॥

अन्याभासे तदनु विरते केवले भाति तस्मिन्
प्रज्ञादीप्ताह्यभवदमलातत्त्वमेकं दधाना।
तेजःपुञ्जे प्रसरति तदा चन्द्रमौलीश्वरेण
शब्दाः केचित्परममहसः संश्रुताः स्पष्टमेव॥ १९॥

दीक्षापूर्णा भवति भवतो नाऽस्ति संशीतिलेशः
प्रीतः साक्षादिह पशुपतिर्दीक्षयाऽकृष्टचेताः।

In Public domain. Digitization Muthulakshmi Research Academy

तातः प्रीतस्तदनु जननी प्रीयतां चन्द्रमौले
इत्यादेशः कलिमलहरः शुश्रुवे स्पष्टशब्दः ॥ २० ॥

आदेशं तं शिरसि निधिवत्फुल्लभाग्यो गृहीत्वा
नेयं भ्रान्तिर्मम मनसिजा चेति निश्चित्य मौनी।
आशीःसेति त्रिभुवनगतेश्चन्द्रमौलेर्वचस्तत्
नत्वा तं स्वं गृहमभितदा चन्द्रमौलिः प्रतस्थे॥ २१ ॥

मार्गे दृष्टो विकसितमुखो मातुलो राजयोगी
जातं सर्वं विविदिषुरहो भागिनेयस्य वक्त्रात्।
तस्मै सर्वं मनुजपफलं प्रीतिमान्श्रावयित्वा
तेनाऽज्ञप्तो गृहमभिययौ चन्द्रमौलिस्तदानीम्॥ २२ ॥

नित्यं योगे नयति दिवसान्पर्यटन्सर्वदैव
स्थाने गुप्ते गिरिवरतले घोरवन्यप्रदेशे।
इत्यालोच्य परिणयमहो मातुलस्तस्य कर्तुं
कृष्णम्माख्यां सुमतनुरुचिं दर्शयामास कन्याम्॥ २३ ॥

भोगेऽरक्तं कथमपि मनो नैव सौख्येषु लग्नं
दाम्पत्येऽस्मिन्मम नरमते मानसं सर्वथैव।
आज्ञा धार्या परमिहपरा मातुलस्येतिकष्टा-
दङ्गीकारं कथमपि तदा दत्तवानात्तदीक्षः ॥ २४ ॥

स्वैरी योगे नित्यं तस्मात् कन्यापाशाद्बन्धः शक्यः।
इत्थं माता चिन्ताक्रान्ता योग्यं कार्यं कर्तुं चैच्छत्॥ २५

सा कन्यकाव्याधिविशेषपीडा सम्पीडिताहीति विवेद योगी।
तथाऽपि वैराग्यदृढत्वहेतोरङ्गीचकार स्थिरधीर्विवाहम्॥ २६

इतिमधुभारती-मधुसूदनकृत-चन्द्रमौलीश्वरविजयनामके काव्ये
पञ्चाक्षरीजपवृत्तन्तनामकः षष्ठःसर्गः

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमः सर्गः

इत्थं विवाहमनभीप्सितमाप्य खिन्नः
श्रीचन्द्रमौलिरधिकाधिकदैवसक्तः।
भोगेन तस्य हृदयं विकृतिं प्रपेदे
निष्ठा बभूव शिवदिव्यपदारविन्दे॥ १॥

कन्या तु रोगगलिता क्रमशः कृशासीत्
सोऽसाध्यरोग इति तद्भिषजोऽप्यवोचन्।
तस्माद्विवाहशुभकर्मणि संप्रपन्ने
कालेन साऽपि दिविषन्निलयं जगाम॥ २॥

दैवं कथं भवति कालविशेषहेतुर्
योगं वियोगमपि कर्तुमलं हि दैवम्।
क्वाहं क्व सापरिणयेन कथं च बद्धौ
कस्मादिदं भवति केन विचोदितं सत्॥ ३॥

इत्थं विचारवलये परिशून्यदृष्टिं
श्रीचन्द्रमौलिमपरे जगदुः समेत्य।
योग्यातवार्यमतिरत्र न दोषभात्त्वं
नूनं द्वयोः परिणये विधिरेवमानम्॥ ४॥

तं मातुलस्तु विषयेषु विरक्तबुद्धिं
लोकेप्सितार्थविषये विरतं विदित्वा।
एतत्तुते भविकमन्यफलाय नूनं
तस्माद्भजस्व विमलां पदवीं गुरूणाम्॥ ५॥

आदेश्य चेत्थमुभयार्थविदं स धीमान्
श्रीचन्द्रमौलिमनुनीय शुभं ववाञ्च्छ।
तद्वाक्यमात्महितकारि तथा निशम्य
क्षीणाशयो विदितलक्ष्यपरो जगाद॥ ६॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वामिन्न मे भवति कर्मफलेषु वाञ्छा
कालः करोति खलु सर्वशुभाशुभानि।
दुःखं न मे सुखकरे विगतेऽपि काले
प्रीतिस्तथा भवति नैव सुखप्रसंगे॥७॥

नदीप्रवाहपतितौ किलकाष्ठखण्डौ
संयोगमाप्य पुनरेव ततो वियुक्तौ।
कालप्रवाहपतितेषु शुभाशुभेषु
मन्मानसे भवति नैव विकारलेशः॥८॥

जातौ पृथग्जगति देवनरश्च नारी
कालेन किन्तु महता किल संगतौ तौ।
संगोद्भवा विविधसृष्टिरनन्तकालात्
काले मिथो भवति देववियोगदुःखम्॥९॥

इत्यूचिवांसमवलोक्य स भागिनेयं
विज्ञोऽपि मन्दमधुहासरुचा विदीप्यन्।
ज्ञात्वा तदीयगुणगौरवमात्मनीनं
जोषं परात्परमहो विदितोऽवतस्थे॥१०॥

प्रश्लाघनीयगुणवृन्दघनेऽपि बाले
श्लाघाकृता भवति वातहतेः समाना।
नूनं भवेत्सपदि तस्य मुदे तु साक्षात्
किन्त्वन्ततः सकलमस्य निहन्ति भाग्यम्॥११॥

तस्मात्परं स तरुणोऽपि विवाहवार्तां
केनाऽपि नैव कृतवान्परतत्त्वरक्तः।
तं चन्द्रमौलिमुमया सह नित्यदीप्तं
नित्यं समानसतले नियतं प्रपन्नः॥१२॥

पश्चादनन्तगिरिकूटमभिप्रपन्नः
स्थानोत्तमेव सतिमच्छतले प्रकल्प्य।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीपद्मनाभवरदैवतपादपद्मं
शिश्राय योगपदवीमधिरूढ एकः ॥ १३ ॥

अत्राऽस्ति धाम निकषा विमलस्तडागः
स्वच्छेन वारिनिचयेन जनानुकर्षी।
तस्मान्ममात्र भविता शुभदो हि वासः
इत्थं सतीर्थवरराजमभिप्रपन्नः ॥ १४ ॥

श्रीपद्मनाभमहितं सवरेण्यनाम
क्षिप्रं दधन्मनसि पूततरान्तरात्मा।
प्राणान्नियम्य नियमेन मनोऽनुकृष्य
ध्याने पदं सकललोकपदेन्यधात्सीत् ॥ १५ ॥

ध्याने तदन्यविषये विलयं प्रयाते
दिव्या जपे मनसि पञ्चदशाक्षरी तु।
देवीस्वरूपमिव नित्यविभा प्रसन्ना
यत्नं विना स्वयमहो स्थिरतां प्रपन्ना ॥ १६ ॥

श्रद्धामयोऽत्र मनुजो भुवने निकामं
श्रद्धाफलं च नियतं विहिता प्रसूते।
श्रद्धाप्रधान इह सर्वविधोऽपि योगः
प्रज्ञाऽपि तां श्रयति संचितयोगजन्या ॥ १७ ॥

मूले स्थितां कनकचारुविभासि गात्रां
वाचो हि मूलमधिकुण्डलिनीं सुवर्णाम्।
चक्रान्तरन्तरुदितां मुदितः सयोगी
चक्राधिराजपदवीं शनकैर्निनाय ॥ १८ ॥

आदौ तु मूलमभितत्यविसर्पिणी सा
सर्पात्मिका क्रमश ऊर्ध्वगतिं प्रपद्य।
चक्राणि पञ्च परितत्यरसान्विशोष्य
आज्ञाख्यचक्रवरमेति शुभस्वरूपा ॥ १९

In Public domain. Digitization Muthulakshmi Research Academy

योगी तदा विततपूर्णनवोर्जसैव
संराजते नवशिशोर्नवकान्तिभासा।
तद्देहयष्टिरपि पुष्टिकलां प्रपद्य
संदृश्यते नवनवीनविशिष्टकान्तिः॥२०॥

इत्थं चिरं महितयोगपदे स तिष्ठन्
सस्मारनैव गतमद्भुतकालचक्रम्।
वर्षे गते सुखदयोगसमाधिमग्नो
व्युत्थानमाप्य परितो सदयं लुलोके॥२१॥

तत्पार्श्वतस्तु सहसा ददृशे तदानीं
व्याघ्री प्रशान्तवदना गृहकुक्कुरीव।
वैरं विहाय निजजन्मगतञ्च शान्त्या
प्रीत्या तमेव गुरुरूपमवेक्षमाणा॥२२॥

तत्पार्श्वतश्च विपुलां स्वफणां वितत्य
पुच्छाग्रसंस्थिततनुर्भुजगोऽपि दृष्टः।
भोगी हतो हि विषयाख्यविषेण लोके
योगी तु योगसुधया परिरक्षितोऽत्र॥२३॥

ध्याने निलीनमनसस्तु न बाह्यचिन्ता
नाऽप्यन्यबोधजनितश्च मनोविकारः।
इत्थं समाहितमना स च योगसिद्धी –
रुच्चावचाः क्रमश आपनतासुरक्तः॥२४॥

काले स्वयोगजनितान्विविधान्विशेषान्
पौत्रीं जगाद कुतुकात्सतया हि पृष्टः।
तस्मिंश्च सा निजपितामहसोदरेऽपि
प्रीतिं पितामह इवात्र सदा दधार॥२५॥

इत्थं स योगमहिमानमचिन्त्यशक्तिं
स्वात्मानुभूतिनिकषोपललक्षितार्थम्।

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वा जनिं सकललोकसमर्चितार्थो
धन्यो रराज जनराजितपूतनामा ॥ २६ ॥

विद्यादेवी सर्वसौख्यप्रदात्री वेदव्यासाद्यर्चिता बासरस्था।
विद्यां दत्त्वा ज्ञानदीप्तिं वितत्य रक्षाकर्त्री लोकरक्षैकनिष्ठा ॥ २७ ॥

सारदा शारदा श्रद्धया चार्चिता व्यासदेवार्चिता विप्रदेवाञ्चिता।
यत्र योगीगतः प्रापदात्मप्रियं वासरा वासिनीरा तु सा मङ्गलम् ॥ २८ ॥

इति मधुभारती-मधुसूदनकृत-चन्द्रमौलीश्वरविजयनामके काव्ये
अनन्तगिरिवृत्तन्तनामकः सप्तमःसर्गः

In Public domain. Digitization Muthulakshmi Research Academy

अष्टमः सर्गः

या ते वर्षे ध्यानयोगे निषण्णं काचिद्देवी शाबरीवादरेण।
आरादेत्य क्षीणदेहं तपःस्थं दृष्ट्वा प्रेम्णा प्रोचुषीचन्द्रमौलिम्॥ १॥

वत्सात्यन्तं सीदसीवात्र योगे भुक्त्वा कालो भूरि यातः प्रभाति।
किं वा लक्ष्यं तेऽक्षिगम्यं वदेह सल्लक्ष्याणां निश्चिता कीर्तिरन्ते॥ २॥

आयाताऽहं दूरतस्त्वामवेक्ष्य क्षीणं तन्वाध्यानमात्रैकनिष्ठम्।
पूर्वं त्वां भो ध्यानयोगान्तरस्थं पृष्ट्वा चापि प्राप्नवं नोत्तरं ते॥ ३॥

तस्माद्ध्याने संस्थितं त्वां च बुद्ध्वा या तापश्चादागता ते सकाशम्।
मातेवाहं त्वं च वत्सोऽसि बालस्तस्माद्ब्रूहि प्रीयसे चेन्मयीह॥ ४॥

तस्या वाक्ये कर्णमात्रं प्रविष्टे देहे काचिद्यापपीयूषधारा।
द्रष्टुं सा तु शाबरीवास नूनं कान्त्या तावन्न्यक्कृतान्यप्रकाशा॥ ५॥

ध्यानं भग्नं चेति वक्तुं न शक्यं यस्मात्साक्षाद्ध्यानलक्ष्यं व्यलासीत्।
ध्यानाध्यानस्पष्टभासोऽपि तत्र क्षीणः काचित्केवलाशान्तिरासीत्॥ ६॥

वक्तुं किञ्चिद्यत्नमस्थाय बाल ओष्ठस्पन्दं केवलं कर्तुमैच्छत्।
माता बालं वारयन्तीस्वयं हि प्रोवाचेत्थं वत्स मा त्वं प्रयासीः॥ ७॥

आदौ भुंक्ष्व क्षीणशक्तिर्यतस्त्वं पश्चाद्भूरिश्रावयेत्यादरेण।
माता शीघ्रं सर्वतः संविलोक्य वन्यान्यादात्प्रीतियुक्ताफलानि॥ ८॥

तद्दत्तेषु प्रीतिसारः फलेषु पीयूषाख्यां प्राप्य भाति स्म नूनम्।
निःस्नेहानां जीवनं शुष्कमेव स्नेहेनैव मूल्यवत्सर्ववस्तु ॥ ९॥

तान्यादाय प्रीतचित्तः फलानि दर्शं दर्शं तानि मुग्धोऽवतस्थे।
तं चालोक्य प्राप्तसंकोचमेवं माता साऽपि प्रीतिपूर्णा बभाषे॥ १०॥

संकोचं त्वं वत्सरे माऽत्र कार्षीर्जानाम्यत्र ब्राह्मणं त्वां तपःस्थम्।
तस्मादन्नं भोज्यमस्माकमत्र नाऽनैषं ते दीक्षया लालितात्मा॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

वन्यान्येवं वृक्षशाखाचितानि दीक्षाभंगे कारणं नो फलानि।
जग्ध्वैतानि प्राप्तसत्त्वः प्रकामं विप्रावासे भोक्तुमर्होऽसि पश्चात्॥ १२॥

श्रुत्वा तस्याः प्रीतिपूर्णं सवाक्यं प्राप्तोद्वेगो नेत्रवारिप्रमुञ्चन्।
मातः का त्वं प्रीतिरेषा किमर्थं धन्योहं ते दर्शनेनेत्यवोचत्॥ १३॥

जाने न त्वां नैव जानामि देशं मादृग्दीने दीर्यते मानसं ते।
दीने नूनं दीर्यते यस्य चित्तं सोऽस्मिंल्लोके दैवतं लोकवन्द्यम्॥ १४॥

श्रुत्वा वाक्यं दीनदीनस्य तस्य प्रीतिं प्राप्ता भूयसीं सा तदानीम्।
प्राहेदं भो नामतस्त्वस्मि सीता भर्ताऽरामे काष्ठचेता ममात्र।
यातः काष्ठान्वेषणार्थं स दासः सोऽपि भ्रात्रा लक्ष्मयुक्तेन चाद्य॥ १५॥

शीतारामे मारुतप्रायदेशे वासोऽस्माकं मन्दिरप्रान्तमार्गे।
दृष्ट्वा प्रीतिर्लक्ष्मणैर्युक्तमेतं सर्वेषां संजायते युक्तचित्ते॥ १६॥

पश्यन्त्या संचाबहोः कालतस्त्वां भुक्तं नैव क्षीणशक्त्याऽपि किञ्चित्।
श्रेष्ठा निष्ठा कोमले चाऽपि चित्ते वर्याणां वै स्वान्तमाकर्षतीह॥ १७॥

आयुस्तावत्कोमलं तेऽत्र वत्स वल्लीकल्पातावकी देहयष्टिः।
अन्तर्वह्निं तं शमीरं पवित्रं बालो वन्यं स्मारयस्यात्मदीप्त्या॥ १८॥

त्वद्वर्षीया भुञ्जते सर्वदैव प्रीणानाः स्वं देहमात्रं कृतार्थाः।
एकस्त्वं रे दृश्यसे भिन्नलक्ष्यो नित्यध्याने ब्रह्मभूयाय मग्नः॥ १९॥

सर्वे देवा भुञ्जतां काममन्यद्विष्णुः सर्वं प्राप्नुते यज्ञरूपम्।
कामं वृक्षा भिन्नरूपा भवन्तु व्याधेर्नाशे पावनीकेवलैका॥ २०॥

पिण्डादिभ्यो वायसायन्तिमोदं ज्योत्स्नाभोजीतृप्त आस्ते चकोरः।
संस्कारोत्थं सर्वकर्माऽत्र लोके कर्माश्रित्य प्राणिनां जन्मभोगौ॥ २१॥

श्रुत्वा तस्या वाक्यमत्यन्तगूढं ज्ञात्वा तस्या हृद्गतं च प्रहृष्टः।
वक्तुं ये ते किन्तु वाणी तु शान्ता शान्ते तस्मिन्वैखरीनोद्बभूव॥ २२

In Public domain. Digitization Muthulakshmi Research Academy

वत्सो धेनुं चार्थपूगः सुवाचं यज्ञं वैधं दक्षिणासंप्रदत्ता।
साध्वी नाथं वायुमेवं च गन्धः नद्यश्चाब्धिं यान्ति नित्यं यथैव॥ २३॥

वेदान्तार्थं धीमतां याति बुद्धिर्विष्णुं सर्वं याति विश्वं निदानम्।
तद्वद्विद्वान्प्रीतिपूर्णः कृतार्थस्तामेवार्यां मातृवत्सोऽन्वगच्छत्॥ २४

प्रतिपदरञ्जितवाक्यशेवधिं बुधवरसन्नुतपादपङ्कजाम्।
कलिमलनिर्हरमात्मरूपिणीम् अनुगत आस सभक्तिसंयुतः॥ २५

इति मधुभारती-मधुसूदनकृत-चन्द्रमौलीश्वरविजयनामके काव्ये सीतप्रसादनामकः अष्टमःसर्गः

In Public domain. Digitization Muthulakshmi Research Academy

नवमः सर्गः

माता तमालोक्य च चन्द्रमौलिं प्राहेदमात्मीयवचः सुधाभम्।
यस्माद्वयं कर्मपरा सदैव प्रायो विरामेन मनोऽस्ति लग्नम्॥ १॥

आरामरक्ता खलु लक्ष्मणाभा अतः सदा मारुतपूर्णवासम्।
आश्रित्य नन्दामविनैव चिन्ताम् आनन्दमूलं खलु चित्तमात्रम्॥ २॥

इत्थं वदन्ती सह तेन तूर्णं कस्याऽपि विप्रस्य गृहं समाप्नोत्।
स्वामी च गेहस्य तस्याऽस कश्चिदनन्तनामाऽच्युतनैजधर्मः॥ ३॥

स्थित्वा बहिर्गेहमुखे सुशोभे सा चन्द्रमौलिं निजगाद वाक्यम्।
वत्साऽयमत्यन्तकुलीनजन्मा अनन्तनामा खलु विप्रवर्यः॥ ४॥

अत्राऽस्तु ते भोजनयोजनेति त्वाऽनैषमेतद्गृहमुत्तमं भो।
विश्रम्य तां यवदहं पुरेऽस्मिन् कार्याणि संसाध्य पुनर्मिलानि॥ ५॥

उक्त्वा तथा साऽपि जगाम दूरं श्रीचन्द्रमौलिश्च ददर्श विप्रम्।
प्रीत्या स विप्रो गृहमभ्युपेतं तं भोजयामास तदीप्सितार्थम्॥ ६॥

कस्त्वं कथं वत्सकुतोऽसि देशात् अत्र प्रदेशे कथमागतिस्ते।
अल्पं वयः किन्तुमहद्धि तेजो व्यनक्ति ते योगबलं विशिष्टम्॥ ७॥

प्राचीं श्रितस्य प्रथमानतेजो बालस्य भानोरपि लोकसिद्धम्।
बालोऽपि सिंहो न मृगायते भो तस्मान्न तेजो वयसि प्ररूढम्॥ ८॥

श्रीरामचन्द्रोऽपि पुरा वनान्ते जघान दैत्यान्किल बाल्य एव।
श्रीकृष्णचन्द्रोऽपि विशिष्टलीलाः बाल्ये व्यतानीत्किल देवदेवः॥ ९॥

तथाऽस्तु तावत्तवसर्ववार्ता कथं कुतो मे गृहमागतोऽसि।
किं दर्शितं मे गृहमुच्यतां भो केनाऽपि चात्र स्थवने चरेण॥ १०॥

श्रुत्वा वचस्तावदनुत्तमं स प्राप्तोर्ज आहेत्थमहीनवृत्तिः।
स्वामिन्महात्मा जननीव काचित् फलानि दत्त्वाऽत्र समानिनाय॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

लक्ष्मीर्मुखे तद्वचने च वाणी गौरी तनौ श्रीललिता च चित्ते।
ज्योत्स्ना च हासे नयने च तारा आसीत्तथा साऽखिलदेवतात्मा॥ १२॥

आकर्ण्य तद्वाक्यमनन्तवर्यो मुमोच नेत्राम्बुसरोमहर्षम्।
किं वक्तुमर्हामि तवात्र भाग्ये त्वं भागधेयस्य निधानमेव॥ १३॥

सा प्राकृता नास्ति वने चराणां योषित्तु काचित्किल लोकवृत्तिः।
सा पद्मनाभस्य कलत्रमेव प्रदेशमेतं ह्यधितिष्ठतीह॥ १४॥

पृथग्जनानां न तथा प्रदेशे प्रवेशमत्र त्वनुमन्यते सा।
तवोत्तमं वीक्ष्य मनःप्रसादं स्वयं त्वया साकमिहागताऽसीत्॥ १५॥

वयन्तु नित्यं प्रतिमासु किं वा शैलेषु वा मन्दिरकन्दरेषु।
गवेषयन्तः किल तां सदर्थां सर्वात्मिकां द्रष्टुमिहासमर्थाः॥ १६॥

नित्योदिता वै सुषमा तदीया स्वयं व्यनक्तिस्पृहणीयशोभा।
स्वच्छान्तरङ्गं स्वयमेतिपुण्या पापात्मनो दूरमपैति नूनम्॥ १७॥

त्वद्भागधेयादिह सा स्वतश्च व्यक्ताऽभवत्प्रीतिविशेषनुन्ना।
त्वां वीक्ष्य वत्साऽहमुदग्रतेजो विशेषदीप्तं किल धन्यधन्यः॥ १८॥

तया प्रदत्तेषु फलत्वबुद्धिं मा वत्स कार्षीः क्वचिदन्यचेताः।
शक्तिः परा सा फलरूपिणीति बुध्यस्व बुद्धेः परवर्तितत्त्वम्॥ १९॥

तवाऽतिथेयस्य परं हि भाग्यं मयाऽप्तमित्येव महान्प्रमोदः।
विनैव सङ्कोचमिहास्यतां भो गेहे मदीये कतिचिद्दिनानि॥ २०॥

ततः परं चेद्गमने तवेच्छा चेद्दर्शनेच्छा परदेवतायाः।
श्रीशारदा क्षेत्रमभिप्रयाहि देदीप्यमानं भुवि वासराख्यम्॥ २१॥

इत्यूचिवां सम्परमार्थविज्ञं तं विप्रवर्यं बहुशो ननाम।
श्रीचन्द्रमौलिश्च तदीयपादं दधार भक्त्या निजपूतमौलौ॥ २२॥

दाक्षिण्यपूर्णा दिशि दक्षिणस्यां श्रीवासराभूसुरलोकवन्द्या।
गोदावरी वारितटे विशिष्टे व्यक्ताऽस्ति चाऽव्यक्तनिजस्वरूपा॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

जन्मान्तरासञ्चितपुण्यशेषाः सम्प्राप्तवाणी दृढभक्तिभावाः।
आयान्ति तत्तीर्थमनन्यभक्त्या तद्देवतादर्शनमात्रहेतोः॥२४॥

तत्रागतानां वचसोऽवरोधं दुर्ज्ञेयहेतुं हृदयार्तिदञ्च।
सा देवता हन्ति कृपाप्रसादैर्भक्त्या प्रसन्ना विनतोपसन्ना॥२५॥

कृपाप्रसादाच्च महत्कवित्वं वक्तृत्वशक्तिं महनीयरूपम्।
व्याख्यानकौशल्यमथाऽप्नुवन्ति तद्भक्तिमात्रादिह भक्तवर्याः॥२६॥

साधारणो वाग्वृषभत्वमीयात्मूढोऽपि पाण्डित्यकलां समेयात्।
भक्त्या तपस्वी खलु वासराम्बां प्रसाद्य चेयात्जनुषोऽर्थवत्त्वम्॥२७॥

गोदावरी वारिसदाऽवगाहः श्रीशारदादर्शनदिव्यभाग्यम्।
इदं द्वयं देववरप्रमृग्यं त्रिलिङ्गराज्यस्य विशिष्टभाग्यम्॥२८॥

तीर्थं यियासो रथवासराख्यं श्रीचन्द्रमौलेर्हृदयं प्रहृष्टम्।
सा शारदा सारदरूपिणी मामव्यात्सुतं दिव्यवचः प्रभावैः॥२९॥

सारासारौ जनुषितरसा सारदावासरस्था
शिक्षित्वा मां ह्यवितुममला वत्समात्मप्रकाशम्।
इत्थं वाणीं विमलवचसाध्यानयोगेन भूरि
ध्यात्वा तस्याः निलयमपि तं चन्द्रमौलिर्जहर्ष॥३०॥

इतिमधुभारती-मधुसूदनकृत-
चन्द्रमौलीश्वरविजयनामकेकाव्ये
सीतप्रसादनामकः
नवमःसर्गः
९

In Public domain. Digitization Muthulakshmi Research Academy

दशमः सर्गः

अपदां पदरूपां तां वासरस्थां सरस्वतीम्।
उपस्थातुं पदैर्योगी पदाभ्यामुपचक्रमे।१॥

एकोनविंशवर्षीयः सोऽनूनशक्तिसंहितः।
पद्भ्यामेव जगन्मातुं जगन्मातुः पदं ययौ॥२॥

निरन्तरं चलन्योगी पथि न श्रान्ततां गतः।
अक्षीणशक्तिसञ्चारः सञ्चरन्मोदमाप्तवान्॥३॥

आशयो दृढसङ्कल्पः उत्साहो यत्न उत्तमः।
इत्येतत्सर्वकार्याणां फलप्राप्त्यैकसाधनम्॥४॥

महोन्नतं पदं प्राप्तुं भानुः प्राचीं दिशं श्रितः।
अश्रान्तः सञ्चरन्लक्ष्यं समारूढो नभस्तलम्॥५॥

कालोऽपि महतां लक्ष्ये स्वयं साधनतां व्रजेत्।
अपुष्पाचूतलतिकावसन्ते पुष्पिणी यथा॥६॥

एवं वासरतीर्थस्थां यियासोः शारदां प्रति।
कालदेहादिकं सर्वं तदाऽनुकूलतां गतम्॥७॥

क्वचिद्गच्छन्क्वचित्तिष्ठन्गृह्णन् आहारमुत्तमम्।
क्वचित्पथि शयानः स रात्रीर्निनाय सत्पथे॥८॥

दिने पदाचरन्श्रान्तं रात्रिर्मातेव सञ्गता।
स्वां केशिरः समादाय लालयामास वत्सला॥९॥

आदिशं करवन्मार्गे चलन्तं योगिपुङ्गवम्।
ग्रामीणाः स्वयमभ्येत्य दृष्ट्वा नेत्रोत्सवं व्यधुः॥१०॥

स्वयं तस्य वरीवस्यां विधातुं मार्गशाखिनः।
शिरोभिः सफलैर्नत्वा साफल्यं जन्मनो जगुः॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

पेयाच्छवारिसंपन्नाः प्रवहन्त्यः सरिद्वराः।
किञ्चित्स्थित्वा स्वयं प्रीत्या तस्मै तोयं ददुर्मधु॥ १२॥

बद्धाञ्जलिर्जलं पीत्वा नत्वा नदीमतल्लिकाः।
दर्भपाणिरदभ्रात्मा सञ्जग्राह तदाशिषम्॥ १३॥

सहस्रारस्थितां देवीं दिदृक्षोस्तस्य योगिनः।
पद्या कुण्डलिनीवाऽसीत्तत्तच्चक्रमधिष्ठिता॥ १४॥

इडामिव क्वचिद्वामां पिङ्गलामिव दक्षिणाम्।
अधिष्ठाय चरन्पद्यां सुषुम्नामाश्रितो बभौ॥ १५॥

महोच्चलक्ष्य सम्प्राप्तौ कृतबुद्धेर्महात्मनः।
जडञ्चाजडतां यातं साध्योपकरणं भवेत्॥ १६॥

बिभ्राणं धैर्यमुत्साहं दधानं शक्तिमुत्तमाम्।
वसानमेकवस्त्रं तं शयानञ्च धरातले॥ १७॥

कुर्वाणं तप उत्कृष्टं प्रीणानं प्राप्तसाधनैः।
दिदृक्षा चोदिताः प्रीत्या पौरास्तं संगता जगुः॥ १८॥

कलिकालेऽपि घोरेऽस्मिन्दुराचारमलाकुले।
एतादृशो महात्मानः सन्ति धात्री सुरा इव॥ १९॥

स्वाकृत्या नेत्ररोगांस्ते स्वाचारेण मनोरुजः।
वचसा कलिदोषांश्च निघ्नन्तीह भिषग्वराः॥ २०॥

मनोवाक्कायदोषाणां पीडनापीडिता जडाः।
आश्रयन्तु भिषग्वर्यानाप्नुवन्तु समस्थितिम्॥ २१॥

इत्येवं ते मिथो भक्त्या सल्लपन्तः सतां वरम्।
महादरभरक्लिन्नैर्लोचनैर्ददृशुर्भृशम्॥ २२॥

पथिकः सजनान्योगी क्वचिद्वाचाक्वचिद्दृशा।
क्वचित्स्थित्या समाश्वास्य चलन्तेषां हृदि स्थितः॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

अजन्माऽपि शुको देवो जन्म किं प्राप्तवान्भुवि।
इत्येवं तरुणे तस्मिन्जनानामास सन्मतिः॥२४॥

प्रह्लादं वाचि तारुण्ये शुकं लक्ष्ये ध्रुवं मुनिम्।
शंकराचार्यमाचारे धारयन्मुनिरुत्तमः॥२५॥

परात्मनः परां काञ्चित्सौन्दर्यलहरीं स्वयम्।
अवतीर्णां भुवं दिव्यां स्मारयामास सज्जनान्॥२६॥

इत्येवं स्फीतवर्चस्कमालोक्य मेनिरे मुनिम्।
अध्यात्मगगनारूढं तरुणं तरणिं जनाः॥२७॥

अयं न तरुणः किन्तु तरणः पुरतोऽस्ति नः।
तपस्यां तपनः कर्तुं तरणो भुवमागतः॥२८॥

अयं भानुर्धरां यातः सम्पृक्तः शीतरश्मिभिः।
दिवा न चन्द्रमा नूनं मुष्णन्चक्षूंषि तेजसा॥२९॥

नैतत्समस्तपस्वीनः कदाचिद्दृष्टिमागतः।
एतत्समो ह्ययं लोके एतादृग्व्रतधारणे॥३०॥

अमूर्तो मूर्तिमापन्न ईश्वरोऽनीशतां जहत्।
पद्भ्यां चरन्विभातीह सर्वेषां पुरतोऽपि नः॥३१॥

अहो बत नभो नूनमनाथं जातमित्यपि।
कवयो मेनिरे दृष्ट्वा मौनिसूर्यं भुवि स्थितम्॥३२॥

क्वचिच्छायातरूत्सङ्गे क्वचिन्मठादिके तथा।
विश्राम्यन्स क्वचिद्भुक्तस्तथाऽभुक्तः क्वचिद्व्रजन्॥३३॥

आतिथ्यं विप्रगेहेषु स्वीकुर्वन्पूतवृत्तिषु।
विप्रदत्तहविर्भोक्ता हुताशन इवाऽबभौ॥३४॥

शय्योत्थायं प्रगे भक्त्या शारदापदपङ्कजम्।
मनस्याधाय तत्पश्चात्प्रगेतनं व्यधात्कृती॥३५॥

In Public domain. Digitization Muthulakshmi Research Academy

वीक्ष्य भानुं न भोगेहमध्यासीनं प्रकाशिनम्।
लब्धमादाय भोज्यं स तरुच्छायाश्रितोऽभवत्॥ ३६॥

मध्याह्ने लब्धविश्रान्तिः पुनर्मार्गमुपाश्रितः।
आसायं प्रचलन्मार्गे सायं सन्ध्यामुपास्थितः॥ ३७॥

उद्यन्तमस्तं यन्तमादित्यदेवमद्भुतम्।
अभिध्यायन्नुपासीनः क्वचित्क्षपामचीक्षपत्॥ ३८॥

क्वचिज्ज्योत्स्नीसुधाधारां चकोर इव संपिबन्।
चन्द्रमौलिजटाजूटं चन्द्रमौलिरथाऽस्मरत्॥ ३९॥

रथायितपदद्वन्द्वो गरुडायितमानसः।
मनसा वासरां यातो महद्भिर्वासरैस्ततः॥ ४०॥

आप्यायितमनाः पूर्वं मनसा शारदां गतः।
पश्चात्कृशशरीरेण कृशानुर्वासरां गतः॥ ४१॥

गोदावरी नदी स्वच्छतोयस्नाततरूत्तमान्।
दूरादालोक्य संहृष्टः सोऽनिर्वाणगजो यथा॥ ४२॥

चन्द्रमौलिः प्रसन्नात्मा प्रसन्नाम्बुविलोकनात्।
शारदां वासरस्थां स सस्मार पदभासुराम्॥ ४३॥

व्याकृतेर्नियमान्धीरो नदीगण्डशिलोच्चयात्।
साहिती पदलालित्यं तद्वीचि सुभगाकृतेः॥ ४४॥

पद्मान्यालोक्य सस्मार शारदा पदपङ्कजम्।
वायुस्पन्दितपत्राणां निक्वणात्कच्छपीं तथा॥ ४५॥

गोदावरी पवित्राम्बु प्रतिबिम्बितचन्द्रमाः।
प्रतिबिम्बाख्यवेदान्तसिद्धान्तं तमसी स्मरत्॥ ४६॥

गौतमो गौतमीं दृष्ट्वा गोदावरीति विश्रुताम्।
जन्मसार्थक्यमापेदे मूलर्षिस्मरणात्परम्॥ ४७॥

In Public domain. Digitization Muthulakshmi Research Academy

वासराशारदा भाति भासुरा भूसुरार्चिता।
ज्ञानसरस्वती दिव्या पुण्यापुण्यवतां प्रिया॥४८॥

गोदावरी तीरमधिष्ठितां स प्राप प्रियां शारदसन्निकाशाम्।
तां वासरां व्यासमहर्षिदिव्यसाङ्गत्यभाग्यादिव पूतपूताम्॥४९॥

विबुधसन्नुततीर्थवरे मुनीन्द्रो कलितपुण्यफलेऽथ समागतः।
महितमीप्सितमाप्य परं मुदा सपदि वाचमभिष्टुतवान्स्तवैः॥५०॥

इतिमधुभारती-मधुसूदनकृत-
चन्द्रमौलीश्वरविजयनामकेकाव्ये
शारदाकृपानामकः
दशमःसर्गः
१०

In Public domain. Digitization Muthulakshmi Research Academy

एकादशः सर्गः

महेश्वरकलाविधुप्रणयिनी विभाति महसा पुरोऽत्र महिता।
विधाय विपदां शमं च सहसा पुनाति विनतानवक्रमहिमा॥ १॥

जगन्ति विपुलं विकासमभितः प्रयान्तिमहिते तवैव कृपया।
उदात्तचरिते विभासि मुदिता विभाऽपि जगतां तवैव महिमा॥ २॥

तवाननरुचा विकासिकमलं तव स्मितविभा विभासि सकलम्।
कलाऽकलपदं प्रयासि महिते कलाऽपि विनुते कलिघ्नमहिमा॥ ३॥

त्वदङ्घ्रिशरणं प्रयाति कमलं तस्तुरुचिरं विभाति भुवने।
त्वदीयनयनामृताप्तबलतः कलावितनुते सुधांशुरमिताः॥ ४॥

महेशदयिता विलाससहिता हिताय जगतां विभासि महिते।
हिताऽहितमतिं विधाय मनुजे धुनोषि सकलं मलं कलिकृतम्॥ ५॥

विरिञ्चिनयना हि ताक्षिकमले तदीयहृदये दयां वितनुषे।
तदादिभुवनं समाप्तभवनं क्रमेण लसति स्फुटार्थकलनम्॥ ६॥

विसारिजगतां विलासपदवीं तनोषि दयया दयार्द्रहृदया।
अतस्तवपदं प्रपद्यमनुजः पदं भुवि महत्प्रयाति लसितम्॥ ७॥

पदं तव पदे परात्परतरं परेशदयिते पदार्थकलिते।
पदार्थनिहिताप्रकाशपदवीं तनोषि सकलं परात्मकलया॥ ८॥

उदेति नियतं यतात्मविनुतो विभाकर इह स्थिरप्रतिगतिः।
धुनान उदितो विभुर्हृदि रुजं चकास्ति रुचिरश्चिरं हि नभसि॥ ९॥

अशेषविषयानशेषविषया विभास्यपरया विभासि दयया।
अनूनविभवार्चिताऽसि विभवे विचित्यहृदये चिताऽसि विचिते॥ १०॥

सुधामधुरसो गुडोऽपि मधुरः सुमानिरुचिराण्यपीह भुवने।
समस्तमपि ते समस्तपदवी प्रकाशनपदे प्रकाशनयुतम्॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

सदोंकृतिगतासमुच्चयरता गतागतमिहादधासि सततम्।
ततोऽप्यततवद्विवञ्च्यमनुजान् जनुर्वलयके सदा भ्रमयसि॥ १२॥

यतात्मकलिता धुनोषि हृदये अनेकजननाञ्चिताघवलयम्।
लयोऽसि जगतां सदाऽणुषुभवो भवोऽसि विलयं गतस्यजगतः॥ १३॥

पराणुगृहिणीगुहान्तरगता गतागतकलागृहीतकलना।
विराजितपदापदान्तरहिता हिताय सकलं तनोषि सततम्॥ १४॥

तवाङ्घ्रिकमलं प्रपद्य शरणं गतं सपदि मामवस्वतनयम्।
शिशोस्तु वचनं निरर्थकमपि प्रियं हि जननीमनःसुखकरम्॥ १५॥

अदस्तु वचनं मदीयहृदयं व्यनक्ति जननीपुरःशिशुकृतम्।
वचोऽमृतकलां विवर्ध्यतनये दयस्व भविकं विकासय मम॥ १६॥

अवन्ध्यकरुणा तवाति वितता न तेषु मधुरां तनोति हि गिरम्।
त्वदीयवचसा तव स्तुतिपरा तवाम्ब चरणं प्रयान्ति शरणम्॥ १७॥

मदीयहृदये पदं तव कृते कृतं धृतगिरास्थिराभव सदा।
दयार्द्रहृदये दयस्वजननि स्थिरार्थसरणिं प्रदेहि वरदे॥ १८॥

ममाश्रुकणिकाघनार्तिगलितास्तवास्तु पदयोर्जलं सुविमलम्।
मनश्च धिषणाविकासिकुसुमं तवाम्बनिहितं सुगन्धिपदयोः॥ १९॥

मतिर्विकसितापरार्थकलने क्षमापदयुगे प्रदीप इव ते।
यदेव जनुषि प्रसाधितफलं तदस्तिपदयोर्निवेदननिभम्॥ २०॥

उमादिमहनीयदेववनिता सखी भवति ते तथाऽस्ति महिमा।
शिवोऽपि वचसां परोऽपि च नुतिं प्रणीयसहसा तवेहरमते॥ २१॥

समस्तविबुधास्तवैव तरसा स्तुतिं विदधति स्वयञ्चसुभगे।
अतस्तव पुरो ममेयमुचिता स्तुतिः किमिति मे मतौ न कलितम्॥ २२॥

तथाऽपि कलुषा मतिर्विमलतां व्रजेदिति धियाकृतेति विनुतिम्।
गृहाण दयया पुनीहि तनयं तवाङ्घ्रियुगलं ममात्र शरणम्॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं गोदावरीतीरे शक्त्यावेशभरोन्मनाः।
वाचा विशुद्धया योगी तुष्टाव शारदां पराम्॥ २४॥

सहस्रारस्थितां देवीमनाहतस्थितो मुनिः।
तदाज्ञाचक्रमास्थाय दध्यौ वाचां परे स्थिताम्॥ २५॥

पद्भ्यामेवसदा मुदा विचरता वाणीपदं प्राप्तवान्
श्रीवाणी हि नदीव सुन्दरतलावर्यादरी दृश्यते।
लब्ध्वा दुर्लभमद्य भाति वपुषो श्रान्तिर्वपुर्दुर्बलं
ग्लानं तत्सहसा पतिष्णुपुरतस्तस्मान्न गच्छाम्यहम्॥ २६॥

इत्यालोच्य समीपसुन्दरतरोश्छायां वरामाश्रितः
कीटाद्युद्भवपीडनादिरहितं स्थानं च चित्वा तदा।
निद्रातुं ह्युपचक्रमे मनसि तत्प्रोद्भासि वाणी पदो
लक्ष्यं चोत्तममाश्रितस्य मनसो निद्राऽपि भद्रायते॥ २७॥

इतिमधुभारती-मधुसूदनकृत-
चन्द्रमौलीश्वरविजयनामकेकाव्ये
शारदाकृपानामकः
एकादशःसर्गः
११

In Public domain. Digitization Muthulakshmi Research Academy

द्वादशः सर्गः

प्रवासहेतोः शिथिलत्वमाप्ता तनुस्तदीया समवाप निद्राम्।
निद्राऽपि भद्राह्यनुकूलकाले तपस्विनां दर्शनहेतुभूता॥ १॥

तदा हि शय्यागतचन्द्रमौलिः क्रमाद्विनष्टस्मृतिरास योगी।
निद्रामिषेणामिषसन्निभेन स्थिरत्वमापास्य मनश्च वेगात्॥ २॥

तदा मनःसंयमयोगसिद्धिं संस्कारहेतोः समवापतूर्णम्।
शीर्णेऽपि देहे प्रससारशक्तिः कुण्डल्यभिख्या तडिदुत्तमाभा॥ ३॥

निद्रेति वक्तुं न हि शक्यते सा तमःप्रकर्षे तनुते नु निद्रा।
चेष्टाविनाशे बहिरिन्द्रियाणां न जागरा सा भवतीति तथ्यम्॥ ४॥

नवासुषुप्तिर्यत आस बोधः स्वात्मप्रधानः स्फुटजागरात्मा।
जीवन्शरीरात्मवियोगरूपां विदेहनाम्नीं खलु सोऽध्यगच्छत्॥ ५॥

अनेकजन्माञ्चितपूर्वपुण्य स्फुटप्रकाशात्मकशक्तिलाभात्।
विदेहनाम्नीं समवाप्य सिद्धिं सिद्धेश्वरः स्वर्गपदे चचार॥ ६॥

मनस्तदीयं तमसः परस्ताद् शान्तं यतस्तेन तदीयबुद्धौ।
कश्चित्प्रकाशो विततानवेगात्तत्त्वैकबोधात्मक उत्तमाभः॥ ७॥

तदा पुरस्तान्महसां महार्था सम्पुञ्जिताभाखनिराविरासीत्।
तेजो विशेषान्न बुबोध बोधी स्फुटस्वरूपेण महस्तदानीम्॥ ८॥

ओंकाररूपेण विभासमानं क्वचिच्च पुंरूपतयाप्रतीतम्।
साक्षात्कृतं तेन महोच्च तेजः क्षणेन नानाविधरूपधारि॥ ९॥

तदाह्यकस्मात्पुर आविरासीत् स्पष्टाङ्गविन्यासविलासिरूपः।
आजानुबाहुर्धृतशुभ्रवस्त्रो मन्दस्मिताभासितसुन्दरास्यः॥ १०॥

शिरोजटाजूटभराभिकम्रं व्यभासतान्तर्निहितात्मतेजः।
त्रिपुण्ड्रकाभूषितफालभागः शास्त्रार्थभाण्डारनिभस्तदाऽसीत्॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

अनेकधा प्राणगतेर्निरोधात्प्रच्छर्दनैः साधुविधारणैश्च।
तन्नासिकायाः ऋजुभासिदण्डः धर्मध्वजस्तम्भनिभो व्यलोकि॥ १२॥

निरन्तरं मन्त्रजपात्तदोष्ठौ मन्त्रानुरक्तौ विषयावरक्तौ।
हृदन्तरन्तः प्रियदेवतायाः द्वारत्वमाप्तौ जगतां सदाऽप्तौ॥ १३॥

तदोष्ठसञ्चालनमध्यकाले दन्ताङ्कुरा अस्फुटतां प्रपन्नाः।
प्रपन्नलोकार्तितमोविनाशे संलक्षिताभास्कररश्मिकल्पाः॥ १४॥

गले तदीये तुलसीदलानामामोदयुक्ता लसति स्म माला।
हस्ते व्यलासीत्स्फटिकाक्षमाला देहाक्षिमाला प्रणियन्त्रिणीव॥ १५॥

तदीयदेहोपरिराजमानं यज्ञोपवीतं सितशुभ्रतन्तु।
कृष्णाद्रिसानूपरिराजमाना व्यभान्नदीवाच्छजलप्रवाहा॥ १६॥

अधःकृताक्षस्फुरणेन देवो व्यभासतादित्यनवप्रकर्षः।
कमण्डलुर्हस्तगतो बभासे तत्त्वार्थधीकल्पशुभाम्बुपूर्णः॥ १७॥

द्रष्टुं सरामो वपुषा च कृष्णो राकाशशीसर्वकलाऽभिपूर्णः।
धरां श्रितःसन्परमात्मतेजाः स्फीतार्चिषा भास्करमत्यशेत। १८॥

कृष्णः सतन्वासितशुभ्रहासो दन्तप्रभादीपिततत्प्रदेशः।
तडिल्लतासङ्गविशेषयुक्तम् असीस्मरन्मेघवरं तदानीम्॥ १९॥

वेदान्पुराणानि च शास्त्रपूगं शारीरकं सूत्रवरं प्रमथ्य।
अभीतिमुद्राङ्कितवामहस्तो ददाति नित्यं ह्यभयं प्रजाभ्यः॥ २०॥

चिच्छक्तिरेकैव विकारहीना शुद्धाह्यनन्ता हि सदोदितेति।
चिन्मुद्रयोदञ्चितहस्तकेन प्रबोधयिष्णुः परशक्तिरूपम्॥ २१॥

प्रेम्णा समाभाषत चन्द्रमौलिं वागमृतं सप्रकिरन्स्वशब्दैः।
वत्सप्रशस्तातवगाढदीक्षा श्रीशारदा दिव्यपदार्पिताक्षा॥ २२॥

इतः समीपे सरितां वरेण्ये अनूपदेशोऽस्ति सुतार्य इष्टः।
ततः स्वयं वासरपुण्यतीर्थं गन्तुं हि शक्नोषि विना श्रमेण॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

क्वचित्तरिश्चेत्सुलभा तदा तु तया नदीशक्यतरानशंका।
नोचेत्पदाभ्यां चलकिञ्चिदग्रे अल्पाम्भसि प्राणभयं न कार्यम्॥ २४॥

इत्थं समादिश्य सदिव्यमूर्तिर् अन्तर्दधौ स्वप्नदशाविशेषे।
स्वप्नेऽपि तत्त्वप्रतिबोधमाप्तो योगी तदाज्ञां शिरसा दधार॥ २५॥

अथ प्रगेकृत्यविधिं समाप्य स्वप्नोक्तदेशं समियायजोषम्।
तदा सपोतं तटवर्तिनं स क्षेत्रज्ञमेकं सहसा ददर्श॥ २६॥

स्वप्ने यथोक्तं पुरतस्तथैव क्षेत्रेऽत्र पोतेन सहाऽयमास्ते।
सर्वं हि दैवेन विनिश्चितं सन्न ज्ञायते मूढजनेन पूर्वम्॥ २७॥

एवं हि तस्मिन्सुविचारमग्ने स पोतवाही स्वयमेवमाह।
श्रीमन्तितीर्षुर्यदि वाहिनीं त्वं साकं मया भो चलनिर्भयः सन्॥ २८॥

श्रुत्वा तदीयं वचनं तु योगी विसिष्मिये स्वप्नगतस्मृतार्थः।
तथाऽपि लज्जां समवाप्य किञ्चित्तमाहधीमान्वचनं यथार्थम्॥ २९॥

आर्याभिनन्दामि वचस्त्वदीयं परं न शक्नोमि धनं प्रदातुम्।
अकिञ्चनोऽहं पदमात्रचारः श्रीशारदा दर्शनमात्रलुब्धः॥ ३०॥

इत्यूचिवां संतमुवाचसोऽपि प्रीतिर्धने नास्ति न वाऽतिलोभः।
एकाकिना गम्यत एव तीरं त्वां नेतुमिच्छामि धनं विनाऽपि॥ ३१॥

तद्वाक्यमामोद्य परं तटं स प्राप प्रियं वासरपुण्यतीर्थम्।
माध्याह्नि कीं तत्र विधाय पूजां जग्राह तीर्थादिकमिष्टचेताः॥ ३२॥

ततः परं तेषु च पृष्टवत्सु वृत्तान्तजिज्ञासुषु पूजकेषु।
अशीश्रवत्स्वस्य चरित्रमान्तं स्वाप्नं समादेशविशेषयुक्तम्॥ ३३॥

श्रुत्वा समस्तं चरितं तदानीम् आश्चर्यमानन्दमभिप्रपन्नाः।
विलोकमानास्तु मुखानि नूनं मूकत्वमाप्ता इव तस्थिरे ते॥ ३४॥

तदोचिरे वत्समहर्षिदृश्यो व्यासः स्वयं श्रीभगवान्महार्थः।
अहो महद्भाग्यमिदं त्वदीयं यतस्तदादेशमवाप्य भासि॥ ३५॥

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यं तदाकर्ण्य मुदा स योगी परः शताः स्वाः प्रणुतीर्निवेद्य।
व्यासर्षिवर्यं मनसाऽभिगम्य प्रारिप्सितं सिद्धमिति प्रदध्यौ॥ ३६॥

औदुम्बरं वृक्षमभिप्रपन्नः प्रगे समुत्थाय विधाय वैधम्।
जपन्महामन्त्रमभीक्ष्णमिष्टं निष्ठागरिष्ठो व्रतचित्त आसीत्॥ ३७॥

सङ्गृह्य भिक्षां जननीसमक्षे तां शारदायै प्रथमं निवेद्य।
तस्मिन्दिने तावदवाप्तभिक्षो निनाय कालं घनमन्त्रदीक्षः॥ ३८॥

सकृद्दिने भैक्ष्यपलोपहारी निशोपवासी सदधार दीक्षाम्।
एवं हि तस्मिन्व्रतपूतचित्ते वर्षाणि पञ्चाऽपि च संव्यतीयुः॥ ३९॥

एकोनविंशे वयसः सवर्षे गृहं परित्यज्य व्रतं दधार।
ततः परं पञ्चसु वासरेषु प्राप प्रसादं जननीमुखाब्जात्॥ ४०॥

स्वप्ने शब्दं ललितं कञ्चिदीड्यं श्रुत्वा योगी सहसाऽवाप बोधम्।
गोदावर्याः सुतटे कञ्चिदाप्तं प्रातः प्राप्तामनुजं लोकवन्द्यम्॥ ४१॥

नाम्नाह्वाता ललितं त्वां सविप्रः किञ्चित्कार्यं शुभदं चाऽपि वक्ता।
भक्त्या विप्रं प्रियदं चानुयाहि श्रेष्ठे कार्ये विदुषां भाति निष्ठा॥ ४२॥

लब्धाऽसि दीक्षाफलमद्य विप्राद्विप्रोत्तमो देवमुखं शुभार्थे।
त्वज्जीवनं सार्थकतां प्रयायात्प्रियं प्रपद्य स्वसदाऽस्तु शं ते॥ ४३॥

इतिमधुभारती-मधुसूदनकृत-
चन्द्रमौलीश्वरविजयनामकेकाव्ये
श्रीव्यासदर्शननामकः
द्वादशःसर्गः
१२

In Public domain. Digitization Muthulakshmi Research Academy

त्रयोदशः सर्गः

स्वप्नादेशं प्राप्य संहृष्टचेताः प्रातःकाले वैधकार्यं विधाय।
गोदावर्याः प्राप नद्याः सतीरं विद्यास्थानं छात्रवत्प्रीतचित्तः॥१॥

प्राचीमाशां संश्रितं भानुबिम्बं श्रीचक्राभं दृश्यते स्म प्रभाते।
शीतो वायुः पुष्पराशीसुगन्धं वाति स्माङ्गे स्पर्शसौख्यं वितन्वन्॥२॥

संकूजन्तः पक्षिणो भोज्यहेतोः भ्राम्यन्तः खे तन्वते स्माशु पंक्तीः।
सन्ध्योपास्तेः स्थानमाश्रित्य विप्राः मन्त्रैरर्घ्यैरर्चयन्ति स्म भानुम्॥३॥

सन्ध्याकाले सौषमं रम्यरम्यं दर्शं दर्शं हर्षतश्चन्द्रमौलिः।
आत्मानं स व्यस्मरत्रम्यदर्शी सस्मारेड्यामीश्वरीं दिव्यशक्तिम्॥४॥

चन्दण्णेति स्फीतशब्दस्तदानीं कर्णप्रान्ते मञ्जुनादो जुगुञ्ज।
तत्राऽलोक्य स्फारदृष्टिः स विप्रः प्रेक्षांचक्रे विप्रवर्यं सुदर्शम्॥५॥

श्रीमन्नाम्नाऽज्ञातपूर्वं कथं वा मामाह्वातुं शक्तुषे विप्रवर्य।
जिज्ञासेऽहं सर्वमेतद् विशेषात्मर्मात्यन्तं वक्तुमर्हस्यशेषम्॥६॥

श्रुत्वा तत्स ब्राह्मणश्चन्द्रमौलिं प्रोवाचेत्थं देवतानां हि कार्यम्।
वत्स स्वप्ने ह्यस्तने शब्दरूपा काचिच्छक्तिस्त्वादिशन्मां त्वदर्थे॥७॥

नद्यास्तीरे प्रातरेव प्रयाहि प्रध्यं नाम्ना प्राह्वयक्षेमहेतोः।
तस्मै देयं ते गृहे विद्यमानं श्रीचक्रं भो श्रद्धया ह्यर्च्यमानम्॥८॥

तस्मादेतत्स्थानमाप्तोऽस्मि शीघ्रं नाम्ना त्वां चाहूतवान्स्वप्नबुद्धम्।
अत्र दृष्ट्वा त्वां च सम्हृष्टचेताः सम्प्राप्तार्थो देवदेवं नमामि॥९॥

इत्थं प्रोक्ते शङ्कितश्चन्द्रमौलिः प्राहेत्थं तं देव किञ्चिद्विवक्षा।
स्वप्नादेशः कीदृशो वेति वेत्तुं स्वान्तं श्रीमन्नूनमुत्कण्ठते मे॥१०॥

इत्युक्ते स ब्राह्मणो वेद्यवेत्ता प्राहात्मीयं चन्द्रमौलिं ह्युदन्तम्।
श्रीमाता मां स्वप्नदृष्टाऽदिदेश श्रीचक्रं ते दातुमात्मीयमर्च्यम्॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीचक्रं मे पूर्वजा भक्तियुक्ताः अर्चन्ति स्म प्रेष्ठमुद्यत्प्रकाशम्।
तत्प्राप्याहं श्रद्धया नित्यपूजां कुर्वन्नासे चक्रराजस्य भक्त्या॥ १२॥

वृद्धावस्थां कालतः प्राप्य चिन्ताग्रस्तो जातः पुत्रराहित्यहेतोः।
मत्पश्चात्तच्चक्रराजं मदीयः को वा भक्त्या मन्त्रपूतं समर्चेत्॥ १३॥

पूजाकाले कुण्ठिता जायते चेत् सर्वेषां नः पूर्वजानां च पापम्।
इत्थं चिन्तादूयमानान्तरात्मा नित्यं देवीं प्रर्थयन्नासमार्तः॥ १४॥

स्वप्ने दत्त्वा दर्शनं शब्दरूपं मां साऽवोचद्वत्सला वत्स विद्धि।
जानामि त्वां चिन्तयादूयमानं श्रीचक्रार्थे वैधपूजादिकार्ये॥ १५॥

चन्द्रण्णेति ब्राह्मणो राजयोगी नद्यास्तीरे प्रातरायास्यतीह।
निःशङ्कं त्वं चक्रराजं तु यूने तस्मै देहि प्रीयमाणाय भक्त्या॥ १६॥

श्रीचक्रस्य प्रत्यहं पूजनादिकार्यं सर्वं बोधयार्चाविधानम्।
योग्यं प्राप्य प्रीतितो देवताऽपि क्षेमाय स्यात्तस्य ते पूर्वजानाम्॥ १७॥

इत्यादेशं प्राप्य संहृष्टचेताः अत्रायातस्त्वन्मुखं द्रष्टुकामः।
दिष्ट्या दृष्टं वाञ्छितं प्राप्तमद्य क्षेमे शङ्का नाऽस्ति भो मानसे मे॥ १८॥

पुत्राभावाच्चिन्तितो जीर्णवर्ष्मारोगाक्रान्तो दीर्घकालाद्यदर्थे।
माता चिन्तां शारदा तां व्यपोह्य योग्योपायं ह्यद्यथोऽदर्शयन्मे॥ १९॥

श्रीचक्रात्मादेवतावर्णमालामाश्रित्यासौ राजते मन्त्रपूताम्।
शान्तो दान्तो धारणाध्यानयुक्तश्चक्रात्मानं पूजयेन्नित्यमेव॥ २०॥

शक्त्या साकं विद्यते शङ्करश्च मध्ये बिन्दुं ह्यादिशक्तिस्वरूपम्।
ध्येयः साम्बो बिन्दुमध्ये शिवात्मा नित्यं पूजा चक्रराजस्य कार्या॥ २१॥

इच्छाशक्तिर्ज्ञानशक्तिः क्रियेति त्रेधाशक्तिर्लासिनी विश्ववन्द्या।
तस्याः शक्तेर्विश्वमेतद्विलास इत्थं विप्रश्चन्द्रमौलिं जगाद॥ २२॥

श्रीचक्रार्चा मानसश्चन्द्रमौलिर्हस्तौ बद्ध्वा विप्रवर्यं ययाचे।
आर्यात्यन्तं मर्ममे प्रोक्तमद्य प्रोक्तं तस्मान्मानसं मेऽत्र जातम्॥ २३॥

In Public domain. Digitization Muthulakshmi Research Academy

आर्य स्वप्ने ह्यस्तने देवदेवी सर्वं नौ भो सङ्गमं ह्यादिशन्माम्।
नद्यास्तीरं गच्छ वत्साद्य तूर्णम् आह्वाता त्वां नामतः कश्चिदार्यः॥ २४॥

माशं किष्टास्तस्यरूपेऽथ शब्दे त्वत्क्षेमस्तद्वस्तयोश्चक्रनिघ्नः।
इत्थं सामामादिशद्विश्वमाता तेनात्राहं प्राप्तवानस्मि देव॥ २५॥

श्रुत्वा वाक्यं चन्द्रमौलेः स विप्रः प्रहृष्टः सन्वाक्यमेवं न्यगादीत्।
आश्चर्यं भो मामकोऽप्येवमेव स्वप्नादेशो देवदेव्याः किलाऽसीत्॥ २६॥

नद्यास्तीरं गच्छ विप्रप्रदोषे चन्द्रण्णेति त्वाह्वयस्फारदीप्तिम्।
नामग्राहं यूनमात्मप्रकाशं श्रीचक्रस्य प्रीतिमान्पूजकः सः॥ २७॥

स्वप्नादेशात्प्राप्तवान्देशमेतं कुर्वन्नासं तावता ते प्रतीक्षाम्।
शाब्दादेशस्त्वावयोरेकरूप इत्यानन्दो माति मेनैव चित्ते॥ २८॥

एवं हर्षावेगसंदृब्धचित्तौ वार्तालापे निन्यतुर्दीर्घकालम्।
यस्योदात्तो भाव एवं विधस्य क्षेमक्षामो जीवने नास्ति तस्य॥ २९॥

इत्युक्त्वा तं चन्द्रमौलिं स विप्रः नद्यास्तोयं नीतवान्भक्तिनम्रः।
स्थित्वा तोये नाभिमात्रप्रमाणे तस्मै प्रादात्कुङ्कुमोद्भासिचक्रम्॥ ३०॥

श्रीचक्रं भो देवतानाञ्च वर्यं पीयूषाभं प्राप्तवान्भाग्यनुन्नः।
पूजा नित्यं भक्तिभावेन कार्या माऽस्मिन्कश्चिज्जायतां ते प्रमादः॥ ३१॥

अस्वास्थ्यं चेत्तोयमात्रेण भक्त्या पूजा कार्या कार्यतां वाऽभिषेकः।
इत्थं प्रोक्ते चन्द्रमौलिस्त्वरेण प्रष्टुं ये ते चक्रराजस्य पूजाम्॥ ३२॥

तच्छ्रुत्वा स ब्राह्मणो मन्दहासी प्रेम्णोऽवाच प्रेष्ठ मे रोचसे त्वम्।
किन्त्वस्थाने देवतापूजनादि प्रोक्तं भूयान्निष्फलं सर्वथैव॥ ३३॥

तस्माद्गत्वा मन्दिरं देवतायाः स्थित्वा मातुः सन्निधौ भक्तियुक्तः।
मत्तो रीतिं शिक्ष चक्रार्चनायाः शं ते भूयाच्चक्रराजे प्रसन्ने॥ ३४॥

इत्यादेशाच्चन्द्रमौलिस्त्वरेण प्राप्तो दिष्ट्या मन्दिरान्तर्जनन्याः।
तत्र स्थित्वा भक्तिभावेन विप्रात् श्रीचक्रस्य प्राप पूजाविधानम्॥ ३५॥

In Public domain. Digitization Muthulakshmi Research Academy

साष्टाङ्गं तं विप्रवर्यं प्रणम्य कार्तेज्यं स्वं भक्तिनम्रो निवेद्य।
श्रीचक्रास्थाप्राप्तशक्तिप्रतिष्ठः प्रीत्या चक्रे नैजदेशं प्रतस्थे॥ ३६॥

वर्षे श्रीमानायुषः पञ्चविंशे ग्रामं प्राप्तःपितृसेवामभीप्सन्।
काले ताते देहधर्मं प्रयाते मातुः प्रीत्या चन्द्रमौलिर्जिजीव॥ ३७॥

चन्द्रय्यार्यश्चन्द्रमौलीश्वरश्च चन्द्रस्वामीत्यूढभावाः प्रपन्नाः।
भक्त्या प्रेम्णा चाह्वयन्तश्च नित्यं तत्सेवायां धन्यतां तेऽन्वभूवन्॥ ३८॥

नाऽस्थाचित्ते लौकिके दोषयुक्ते द्वन्द्वैर्नाऽपि क्षीणवृत्तेर्विकारः।
तत्त्वज्ञाने सर्वथा चैकनिष्ठा तस्मिन्नित्यं रेजिरे नित्यसिद्धे॥ ३९॥

कार्ये याञ्चा कार्यसिद्धेः प्रयत्नः सिद्धौ मोदः सिद्धिनाशे च खेदः।
माने तोषश्चापमाने च रोषः सिद्धे तस्मिंस्ते पदं नैव चक्रुः॥ ४०॥

मौनव्याख्या भक्तसन्देहहर्त्री सिद्धार्थानां भूषणं मौनमेव।
इत्याबुध्य क्षीणवृत्तिः स योगी मौने कालं नीतवान् शान्तचित्तः॥ ४१॥

तस्मिन्काले चन्द्रभागेति नम्री तत्सेवायां जीवनं नेतुमैच्छत्।
नित्यं भक्त्या सन्निधिं प्राप्य बाला सेवाकार्ये जीवनार्तिं जहार ॥४२॥

सैवाग्रे स्वान्श्रीगुरोर्दिव्यगाथां लीलावृत्तं सर्वमावेदयन्ती।
तस्मिन्भक्तिं वर्धयामास लोके तत्साफल्यं दर्शयामास काले॥ ४३॥

ब्राह्मे काले प्रातरुत्थाय योगे देहं चित्तं भूरि संसाध्य योगी।
गायत्रीं वै सम्यगाधाय चित्ते सावित्रं तं मन्त्रराजं जजाप॥ ४४॥

श्रीचक्रार्चातत्परोऽकुण्ठभक्त्या आमध्याह्नं कालमेवं निनाय।
मध्याह्नोर्ध्वं भोजनं चाऽपि कृत्वा किञ्चित्कालं वामकुक्षिर्बभूव॥ ४५॥

एवं दैनन्दिनेकार्ये कालोऽनायि महात्मना।
आध्यात्मिकी परा निष्ठा बभौ तस्मिन्विना श्रमम्॥ ४६॥

प्राकृते भाषणे चित्तं नैव रेमे महीयसः।
सर्वदा सर्वदा भक्त्या संश्रिता परदेवता॥ ४७॥

In Public domain. Digitization Muthulakshmi Research Academy

क्षुद्रवृक्षस्थितोऽप्यन्यं चकोरो न हि याचते।
चन्द्रांशुभ्यो ऋते नान्यत्तस्योज्जीवनकारणम्॥४८॥

इत्थं लोकविधानेभ्यो विरक्तो योगिपुङ्गवः।
श्रीचक्रार्चनमाश्रित्य कालं स दूरतोऽक्षिपत्॥४९॥

श्रीमद्भागवतं तस्य नप्त्र्याश्च जीवनं परम्।
तस्मात्सदा मुदामग्नौ श्रीमद्भागवते परे॥५०॥

अशीतिवर्षाणि तथा व्यतीत्य ग्रामे चिरं योगबलादुषित्वा।
कालेन जीर्णां खलु देहवल्लीं विलोक्य वैराग्यपदं सभेजे॥५१॥

इतिमधुभारती-मधुसूदनकृत-
चन्द्रमौलीश्वरविजयनामकेकाव्ये
श्रीचक्रदीक्षानामकः
त्रयोदशःसर्गः
१३

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्दशः सर्गः

प्राचीं श्रित्वा शुभ्रदीधित्युपेतो नैशंभानुस्तामसं हन्ति रक्तः।
पश्चात्कृत्वा लोकमालोकपूर्णं काले चाद्रिं पश्चिमं याति शान्तः॥ १॥

बीजं क्षेत्रे ह्यङ्कुरत्वं प्रपद्य भिन्नैः रूपैः सन्ततं भाति काले।
पुष्पत्यद्धाफुल्लति स्फाररूपे अन्तेऽवश्यं जीर्णतां याति कालात्॥ २॥

लोके स्थायी नास्ति नित्यं वसन्तो हेमन्तोऽपि प्राणिमात्रप्रसिद्धः।
आशा वेद्यां कालबालोऽत्र लीलां तन्वन् नित्यं क्रीडतीव प्रतीतः ॥ ३॥

काले माता चन्द्रमौलीश्वरस्य वेदायुः सा प्राप देहं जहौ च।
तस्यां भक्त्या सोऽपि लेभे विरक्तिं सन्न्यासार्थे मानसं संननाह॥ ४॥

सन्न्यासः स्यात्संहतिः सत्पदार्थे सन्न्यासः स्याद्ब्रह्मभावोऽत्र लोके।
सन्न्यासेन प्राप्नुते मानवः शं तस्माद्देहं त्यक्तुमिच्छामि तुर्ये॥ ५॥

इत्यालोच्य क्षीणसत्त्वोऽपि देहे सत्त्वे चित्तं संनिधायोत्तमौजाः।
आहूयाप्तां चन्द्रभागां स नम्रीं प्रेम्णा तस्यै मानसं संजगाद॥ ६॥

देहः प्राप्तः प्राकृतो दैवहेतोः रोगादीनां वेदना नास्ति देहे।
वर्षाणां वै प्राप्तमेवं शतं रे नेदीयान्मे काल एवं विधस्य॥ ७॥

तत्त्वज्ञानान्नैव भीतिः कृतान्ताद्भीतोऽज्ञानी केवलं भोगरक्तः।
साकं तन्वामृत्युरप्यागतो नो मृत्युर्मित्रं जीवतां नः सहायः॥ ८॥

मृत्योर्भीतिर्नास्ति मे चन्द्रभागे तस्मादीहे देहमेतं प्रहातुम्।
देहं तुर्ये चाश्रमे पावितं मे कर्तुं वाञ्छा तीव्रतीव्रा दुनाति॥ ९॥

प्राचां धर्मे त्वाश्रमाः सन्ति वत्से नाऽहं धर्मं हातुकामोऽस्मि वर्यम्।
तस्मात्तुर्ये पूतजन्माजिहासे प्रेप्साम्यार्यं प्रेष्ठमार्गं त्वरेण॥ १०॥

मुक्षीयमृत्युवदनात्सुखितो यथाऽहं कर्तुं तथागुणिनमद्यकुरुष्व यत्नम्।
प्राणोत्क्रमो भवतु तुर्यदशाविशेषे निर्वाणमेतु मम जीवनदीप एषः॥ ११॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्याः पुरः स्वां प्रकटय्य वाञ्छां गतार्धभारोऽभवदीप्सितार्थे।
प्रायो मनःस्वीयजनाय पूर्णमाविष्कृतं नष्टरुजं जनानाम्॥ १२॥

वाञ्छां तदीयहृदयार्तिवहां नितान्तं
विज्ञाय साऽपि परिदेवितमानसाऽसीत्।
आज्ञेति वाक्यमवधार्य शिरोऽवकम्प्य
ग्लानिं नियम्य गुरुपादतलोपविष्टा॥ १३॥

आर्य स्थिरेति भवदीयमतिं विवेद्य
प्राणाः गता इव रुजामनसो दुनाति।
जानामि जीवनमिदं तटिदाभमेव
प्रीतिः परं न गुरुदेव विहीयतेऽस्मिन्॥ १४॥

जन्मेदमेव भवतान्नियतं न मृत्युः
सर्वं च सुस्थिरतरं भवतात्सदैव।
इत्थं विचारकलुषं खलु मानसं मे
सम्पावितं विमलबोधबलेन नूनम्॥ १५॥

दिष्ट्या समीपतरवर्तिमठेऽवधूतः
कृष्णानदीतटनिवासि यतिर्महात्मा।
श्रीवासुदेव इति कीर्तितनामधारी
आनन्दयुक्तयतिनामधरोऽस्ति कश्चित्॥ १६॥

तं प्रार्थ्य भवदीयपवित्रकार्ये
मार्गं गवेषयितुमस्ति मनो ममाग्रे।
आशीर्विशेषसहितां हितपूतकार्ये
आज्ञां करोतु गुरुकार्यफलाय तूर्णम्॥ १७॥

इत्थं निवेद्य गुरुपादसदाऽनुरक्ता
मुक्ता जगाम मठमेव तथाऽनुयुक्ता।
युक्तां तदीयहृदयस्थितकामनां स
प्रोक्तां विवेदमुमुदे च पवित्रकार्ये॥ १८॥

In Public domain. Digitization Muthulakshmi Research Academy

धर्मे तदीयमतिरत्र शुभावहावः
तुर्याश्रमे जननसार्थकता वरिष्ठा।
अम्बाऽहमस्मि कतिचिद्दिनमात्रवासी
वाराणसीं जिगमिषुस्त्वचिरात्पवित्राम्॥ १९॥

माग्लानिरस्तु मनसस्तव वच्मि मार्गं
प्रत्यागतिर्मम पुनस्त्वित एव काले।
प्रत्यागमं पुनरिह प्रथिते यदाऽपि
वाञ्छां तदा तव गुरोः सुहितां पृणामि॥ २०॥

इत्थं यतीशवचनामृतजीविताशा
गत्वा पितामहपदं खलु चन्द्रभागा।
सर्वं मुदाह्य कथयद्यतिराजवाक्यं
श्रीचन्द्रमौलिमनसः प्रियमात्मनीनम्॥ २१॥

कालेन पूर्वगदितं वचनं स्मरन्स
स्वामी च कोटकदिरं पुनराजगाम।
चित्तं निसर्गमहितं महतां प्रसन्नं
योग्ये फलाय मनुजे नियतोत्सुकं च॥ २२॥

वर्षे विरोधिशुभनामयुते पवित्रे
आषाढमासघनपूर्णिमवासरे सः।
श्रीवासुदेवयतिराट्ट्वलुचन्द्रमौलिं
तुर्याश्रमार्पितपदं सदयं चकार॥ २३॥

श्रीस्वामिवर्यसततार्चितपूतदेशे
शैवालये विहितसर्वशुभक्रिये च।
श्रीकोंडयार्यवरनामकसन्मनुष्यात्
प्राप्ते सुदैववशतः खलु भूमिभागे॥ २४॥

नानापवित्रघनतीर्थगतं गृहीत्वा
अष्टोत्तरेण शतकुम्भचयेन तोयम्।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवासुदेवयतिवर्यपवित्रवाक्यात्
स्नातः सदीक्षितपदं समवाप योगी॥२५॥

वैधेनमन्त्रपरिपूतजलाभिषिक्तः
आनन्दयुक्तपुरुषोत्तमयोगिनाम्ना।
श्रीचन्द्रमौलिरभिपूजितदेवदेवो
तुर्याश्रमेन जनिसार्थकतां प्रपेदे॥२६॥

तस्मात्परं नियतमन्त्रजपानुरक्तो
नक्तं दिवं परमयोगगतिं समाप्य।
सुषुम्नया शिरसि चक्रवरं प्रविश्य
तस्थौ चिरं महितयोगदशाविशेषे॥२७॥

मूलस्थितं तदनुचक्रमभिप्रपद्य
प्राप्याऽभिजागरणमीषदिवस्थितायुः।
मामत्कृते कुरुत शोकमहं समर्थो
योगं श्रितः परमभाग्यबलात्कृतार्थः॥२८॥

एकं दिनं तदनु चैकनिशां च सम्यक्
तस्मात्परं दिवसमेकमथोऽवलोक्य।
बाह्या स्मृतिर्यदि मयि क्षयतां प्रयाता
जानीथ योगपदवीं परमां प्रपन्नम्॥२९॥

इत्थं निवेद्य वरयोगगुहां प्रविष्टः
स्थाने विशिष्टविधया महितासनस्थः।
प्राणान्नियम्य चरमे प्रविवेश चक्रे
कालाद्बहोरपि पुनर्बहिरागतो न॥३०॥

तद्योगशान्तपदवीमधिवर्तमानं
ज्ञात्वा स भक्तनिवहः परभक्तियुक्तः।
तत्स्थानके वरसमाधिपदं पवित्रं
निर्माय चार्चनविधिं विदधुर्विधिज्ञाः॥३१॥

In Public domain. Digitization Muthulakshmi Research Academy

दीक्षादिनात्समारभ्य दिनानि तस्य योगिनः।
अष्टौ तथा व्यतीतानि शुभानि योगसंस्थितौ॥ ३२॥

विरोधिनामवर्षस्य शुचौ कृष्णाष्टमी तिथौ।
जीवत्समाधिमापन्नं निश्चिक्युर्भक्ततल्लजाः॥ ३३॥

उपवेशस्थितावेव संस्थिते निश्चलात्मनि।
गन्धकाष्ठैस्तथासम्यक् निश्चलां विदधुस्तनुम्॥ ३४॥

गन्धं कर्पूरचूर्णेन सुगन्धिना सुमिश्रितम्।
लवणेन सुगन्धीनि द्रव्याणि मिश्रितानि च॥ ३५॥

शरीरं परितस्तस्य सम्यक्तेव्यधुरन्ततः।
पुनः पूजां विधायादौ पुष्पैः सुगन्धमिश्रितैः॥ ३६॥

पश्चात्तस्य शरीरस्य पार्श्वयोरुभयोरपि।
दीपौ प्रज्वाल्य तैलेन स्थापयामासुरुत्तमाः॥ ३७॥

कण्ठे च पुष्पमालाऽघ्र्या स्थापिता सद्गुरोरथ।
एवं सदर्चनापूर्णा कृताशास्त्रविधानतः॥ ३८॥

उपरिष्टात् शैलखण्डेन पिहिता सा गुहोत्तमा।
चन्द्रभागाविधिं सर्वमचीकरत्स्वयं शुभम्॥ ३९॥

वर्षे गते पुनःसैव शिलाखण्डं गुहागतम्।
अपनिनीषुरागत्य समाधिं तमवैक्षत॥ ४०॥

आश्चर्यं तत्र यथापूर्वं माला साऽम्लानतां गता।
ज्वलन्तौ च तथा दीपौ तया सर्वमवेक्षितम्॥ ४१॥

विस्मयानन्दसंमिश्रं दृश्यमालोक्य सुन्दरम्।
अकस्मात्मुखतस्तस्याः निर्गतः शब्द उत्तमः॥ ४२॥

समर्थो मद्गुरुः साक्षादिति भक्त्याह्युदीरिते।
तत्रस्थधार्मिका भक्त्या प्रणेमुः सद्गुरुं शिवम्॥ ४३॥

In Public domain. Digitization Muthulakshmi Research

पुनः शिलां सुसंस्थाप्य श्रीचक्रं च शिलोपरि।
आराधनं गुरोर्नित्यं समाधिस्थस्य चक्रिरे॥४४॥

वर्षाणां षष्टिमप्येवं सद्गुरोरर्चने शुभम्।
निनाय चन्द्रभागा सा तदैकमनसा सदा॥४५॥

कदाचिद्दुहितुर्गेहं गतायाः दर्शनाय हि।
विनाऽस्वास्थ्यं गताः प्राणाः सद्गुरोः पदसन्निधिम्॥४६॥

तदा ग्रामेऽप्यवालोकि समाधिस्थलकेऽद्भुतम्।
कयाचिच्चन्द्रभागम्मा प्रविशन्ती गुरोः पदम्॥४७॥

धन्यः स वंशोगुरुवेणुमूलं तनोति सर्वत्र सुबोधनादम्।
तं मारुतो वाति नयन्दिगन्ते धन्याः मुदं केचिदिहाप्नुवन्ति॥४८॥

धन्यः श्रीसद्गुरुः साक्षाद्धन्यः स वंश उत्तमः।
धन्या सा चन्द्रभागम्मा धन्यं तीर्थं तदात्मकम्॥४९॥

योगाग्नौ स्वं देहमातप्य मौनी व्यासादीनां दर्शनेनाऽपि शुद्धः।
वाग्देवीं तां वासरा संस्थितां च प्रीत्या वेशात्साधुचक्रे प्रसन्नाम्॥ ५०॥

जीवन्नेव समाधिस्थः धैर्यं दत्ते स योगिराट्।
पूरयन्कष्टकाले च जीवतां कामनाः शुभाः॥५१॥

एवं गौतमगोत्रस्य पावित्र्यं सर्वविश्रुतम्।
कृतवन्तं गुरुं भक्त्या ह्यस्तौषं काव्यरूपतः॥५२॥

जातोऽस्मि गौतमे गोत्रे पेन्नावंशेऽतिपावने।
नृसिंहाख्यः पिता माता वर्षन्ती मधुभारती॥५३॥

जन्म मे सार्थकं कर्तुं नानाग्रन्थानरीरचम्।
नानाशास्त्रप्रसूनोत्थमजिघ्रं गन्धमुत्तमम्॥५४॥

ज्ञानेश्वरकृतां पुण्यां ज्ञानेश्वरीति विश्रुताम्।
गीताव्याख्यां पुनर्भक्त्या संस्कृतेनाऽप्यवादिषम्॥५५॥

In Public domain. Digitization Muthulakshmi Research Academy

मधुराद्वैतसिद्धान्तसारामृतप्रदायिनः।
ज्ञानेशाख्यगुरोः शक्तिर्गुलाबस्य त्वियं नमे॥५६॥

अतोऽहं प्रश्रितः सर्वं तयोस्तु पादयोर्दधे।
तावेवैतन्महाकाव्यसम्मूर्तौ कारणं परम्॥५७॥

इतिमधुभारती-मधुसूदनकृत-
चन्द्रमौलीश्वरविजयनामकेकाव्ये
सजीवसमाधिनामकः
चतुर्दशःसर्गः
१४

In Public domain. Digitization Muthulakshmi Research Academy

कादम्बरी-कथा-सारः

कथामुखम्

पुरा शूद्रकनामकः पराक्रमी गुणवान् च कश्चन राजा आसीत् । तस्य आस्थाने विविधकलासु निष्णाताः पण्डिताः च भवन्ति स्म। स्वयं रसिकः स राजा विविधकाव्यगोष्ठीः कुरुते स्म । तस्य पराक्रमेण आकृष्टा सती राजलक्ष्मीः तेनैव सह भवति स्म । विदिशा नाम्नी नगरी तस्य राजधानी आसीत्। तत्र धर्मः सदा विलसति स्म। तां नगरीं परितः वेत्रावती नामिका नदी प्रवहति स्म।

सः राजा स्वपराक्रमेण समस्तं भूमण्डलमेव जितवान् । तेन कारणेन तस्य राज्यभारस्य चिन्ता नासीत्। सः सामन्तराजैः दीयमानं सन्मानं स्वीकृत्य लीलया राज्यपालनं करोति स्म । तस्य अमात्याः प्रज्ञावन्तः, कुलीनाः, नीतिशास्त्राज्ञाः, निर्मलाः, लोभरहिताः, स्निग्धाः, प्रबुद्धाश्च आसन् । तस्य विनोदक्रीडासु तस्य मित्राणि इतरे राजकुमाराः च तेन सह भवन्ति स्म। ते अपि राजकुमाराः शूद्रकेन समानैः वयोविद्यालङ्कारैः भूषिताः, महाराजपुत्राः, प्रौढमतयः, समयज्ञाः, चतुराः, काव्यादि-क्रियासु निपुणाः, पराक्रमिणश्च आसन्। राजा अपि तैः सह विविधवाद्ययुक्तेन सङ्गीतेन किं वा मृगयाव्यापारेण किं वा पण्डितगोष्ठ्या, किं वा काव्यरचनेन, शास्त्रालापेन, पुराणादिश्रवणेन, गुरुशुश्रूषया वा दिवसं नयति स्म ।

शुकप्रवेशः

एकदा सूर्योदयसमये प्रतीहारी राजानं शूद्रकम् उपसृत्य प्रणम्य च दक्षिणदेशात् काचन चण्डालकन्यका पञ्जरस्थितं शुकमादाय राजानं द्रष्टुम् आगता इति स च शुकः बहूनाम् अद्भुतानां निदानमिति सा च तं शुकं राज्ञे उपायनीकर्तुम् इच्छति इति च उक्तवती । तदा प्रवेश्यताम् इति राजा आदिष्टवान् । सा च प्रतीहारी गत्वा चण्डालकन्यकां प्रवेशितवती ।

सा चण्डालकन्यका सभान्तः प्रविश्य राजानं दृष्टवती राजा अपि मां पश्यतु इति इच्छया सा स्वहस्तस्थितेन वेणुदण्डेन एकवारं सभाकुट्टिमम् आहतवती । तदा सर्वेषां राज्ञां नयनानि चण्डालकन्यकां प्रति आकृष्टानि । राजा अपि तां दृष्टवान्। तदा

 In Public domain. Digitization Muthulakshmi Research Academy

प्रतीहारी ताम् *दूरादेव पश्यतु पश्यतु* इति उक्तवती। तस्याः चण्डालकन्यकायाः पुरतः एकः चण्डालवृद्धः चलति स्म। सः वृद्धः सन् अपि कर्कशशरीरः, धवलवस्त्राणि धृतवान् आसीत्। तथैव तस्याः पृष्ठतः एकः चण्डालबालकः आसीत् । तस्य बालकस्य हस्ते कश्चन पञ्जरः तस्मिन् च शुकः आसीत्। सा कन्यका प्रगल्भवनिता इव राजानं प्रणम्य स्थिता । तदा तया सह आगतः वृद्धः पञ्जरगतं शुकमादाय राज्ञे निवेद्य एवम् उक्तवान्।

महाराज! अयं वैशम्पायनामकः शुकः बहूनाम् आश्चर्याणां कारणम्। एषः शुकः सकलवेदशास्त्रार्थं जानाति । अयं राजनीतिप्रयोगे अपि कुशलः। स्वयं पुराणकथाः इतिहासकथाः च वक्तुं शक्नोति । सुभाषितानि अभ्यस्यति स्वयं करोति च। वाद्यानि वादयति । नृत्यं करोति। चित्राणि रचयति। अपि च प्रणये कुपितानां कामिनीनां मनः प्रसादयितुं समर्थः अस्ति। गजलक्षणानि, अश्वलक्षणानि, पुरुषलक्षणानि, उत्तमस्त्रीलक्षणानि च जानाति । यथा सर्वरत्नानां स्थानं समुद्र तथा भवान् भुवने सर्वरत्नानां भवतु इति स्थानम्। अयम् अपि शुकः पक्षिरत्नम्, अतः भवतः सविधे भवते समर्पयितुम् आनीतवन्तः । कृपया भवान् स्वीकरोतु इति उक्त्वा राज्ञः पुरतः पञ्जरं स्थापयित्वा अपसृतः अभवत् ।

तदा सर्वेषां आश्चर्यं जनयन् सः शुकः राज्ञः अभिमुखः भूत्वा दक्षिणचरणम् उन्नमय्य अतिस्पष्टया वाण्या *जयोऽस्तु* इति उक्त्वा आर्याम् एताम् पठितवान् -

स्तनयुगमश्रुस्नातं समीपतरववर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ।

(अर्थः - हे राजन् ! भवतः रिपुस्त्रीणां स्तनयुगम् अश्रुस्नातं, हृदयशोकाग्नेः समीपतरवर्ति, विमुक्ताहारं (च सत्) व्रतम् इव चरति। अत्रभवान् पराक्रमी अतः यदा भवतः शत्रवः भवता युद्धे निहताः तदा शत्रुभार्याः अनाथाः जाताः। तेषां स्तनयुगम् अश्रुभिः स्नातम् अभवत्, तत् हृदयशोकाग्नेः अधिकसमीपे भवति। मुक्ताहारः अपि विगतः स्तनयुगात् । अतः स्तनयुगं स्नानेन, अग्निसमीपवासेन, विमुक्त-आहारेण च व्रतं चरतीव भाति)

In Public domain. Digitization Muthulakshmi Research Academy

शुकस्य आर्यां श्रुत्वा राज्ञः विस्मयः संजातः। सः कुमारपालितनामकं प्रधानामात्यं पृष्टवान्- *भवद्भिः श्रुतं खलु । अयं शुकः अतिस्पष्टं वदति इत्येव प्रथमं महदाश्चर्यम्। तत्रापि मनुजः इव अभिमतविषये आर्यां वदति। प्रायः पशवः आहार-निद्रा-भय-मैथुनमात्रं जानन्ति इति प्रसिद्धम् । इदं तु महत् चित्रम्* इति उक्तवान्।

तदा सः प्रधानमात्यः स्मितवदनः राजानम् उक्तवान् - *देव अत्र चित्रं किमस्ति? शुकसारिकादयः पक्षिणः यथा श्रृण्वन्ति तथा उच्चारयन्ति। कदाचित् पूर्वजन्मसंस्कारवशात् किंवा शिक्षयितुः प्रयत्नविशेषेण कुत्राचित् अतिशयः भवितुम् अर्हति । एवं हि श्रूयते यत् पूर्वकाले एतेषाम् अपि मनुष्याणामिव वाणी आसीत् परम् अग्निदेवतायाः शापेन सा वाणी अदृश्या अभवत्* इति उक्तवान् ।

राज्ञः मध्याह्नचर्या

तदा मध्याह्नसमयं सूचयन् पटहनादः शङ्खध्वनिः च जातः। तत् श्रुत्वा राजा स्नानार्थं गन्तुकामः सभां विसृज्य आस्थानमण्डपात् उत्थितः । सः राजलोकं विसृज्य विश्रम्यताम् इति चण्डालकन्यकाम् उक्तवान्। वैशम्पायनम् अन्तःपुरस्य अभ्यन्तरे प्रवेशयन्तु इति परिचारिकाम् आदिश्य आप्तैः कतिपयैः राजपुत्रैः सह अन्तः गतवान्। स्नानं निर्वर्त्य शुभ्रे धवलवस्त्रे धृत्वा सूर्याय अर्घ्यं समर्पितवान्। तत्पश्चात् पशुपतिपूजां कृत्वा अग्निकार्यं च सम्पाद्य आभूषणादिकं धृत्वा भोजनं कृतवान्। तदनन्तरं ताम्बूलादिकं सेवित्वा आस्थानमण्डपं गतवान्। तत्र च तैः तैः योग्यपुरुषैः सह आलापादिकं कृत्वा तदनन्तरं वैशम्पायनं प्रवेशयितुं प्रतीहारीम् आदिष्टवान्।

प्रतीहारी राजाज्ञया गत्वा पञ्जरस्थं शुकम् आनेतुं कञ्चुकिनमुक्तवती । सः पञ्जरम् आनीय राज्ञः पादमूले स्थापयित्वा *वैशम्पायनस्य भोजनमभवत्* इति निवेद्य च गतवान्। *शुकोऽयम् अभिमतम् आहारं प्राप्तवान् वा* इति पृष्ट्वा राजा कुतूहलेन शुकमुद्दिश्य- *कस्मिन् देशे भवतः जन्म जातम् ? मातापितरौ कौ? कथं वेदशास्त्रादिपरिचयः अभवत् ? अयं पूर्वजन्मनः संस्कारः वा? पक्षिरूपेण भवान् कश्चन मायावी गूढरूपेण वसति वा ? पूर्वं कुत्र वासः कृतः? पञ्जरे बन्धनं कथं जातम्? चण्डालानं हस्ते वा कथम् आगतः? अस्माकम् आस्थाने कथम् आगमनं जातम्* इति पृष्टवान्। तदा सः शुकः मुहूर्तम् इव ध्यात्वा स्वकथाम् एवं श्रावितवान् ।

CC-0. In Public Domain. Digitization Muthulakshmi Research Academy

वैशम्पायनकथा

देव! मध्यदेशस्य अलङ्कारम् इव भुवः मेखला इव विस्तीर्णा, पूर्वापरसमुद्रतीरव्याप्ता च विन्ध्याटवी विद्यते । तत्र बहुविधवृक्षाः उन्नताः, फलपुष्पवन्तः पशुपक्षिगणेन सेविताः च सन्ति । तस्यां विन्ध्याटव्यां बहूनि लतामण्डपानि, बहवः कण्टकद्रुमाः बहवः प्राणिनः च भवन्ति । तस्यां विन्ध्याटव्यां भार्यया लोपामुद्रया सह अगस्त्यमहर्षिः वसति स्म। दृढदस्युनामकः तस्य पुत्रोऽपि तत्र एव वसति स्म । तस्य महर्षेः आश्रमपदं पवित्रगोदावरीनद्या परिगतम् आसीत्।

तस्मिन् गोदावरीतटप्रदेशे एव भगवान् श्रीरामचन्द्रः सीतया लक्ष्मणेन च कञ्चित्कालं सुखं वासं कृतवान् । एवंविधस्य अगस्त्याश्रमस्य समीपे पम्पानामकं पद्मसरः विद्यते। विशाल अगाधश्च अयं जलाशयः विविधैः कमलादि-पुष्पप्रकारैः शोभितः। तस्य तटे वनराजयः प्रवर्धिताः । विविधाः प्राणिनः पम्पाजलाशयस्य जलं पातुं प्रतिदिनम् अत्र आगच्छन्ति ।

एतादृशस्य पद्मसरसः पश्चिमे तीरे कश्चन महान् शाल्मलीवृक्षः वर्तते। अयं जीर्णः वृक्षः । अस्य वृक्षस्य शाखासु, कोटरेषु, मूले, पत्रान्तरेषु, कोटरोदरेषु, स्कन्धानां सन्धिभागेषु जीर्णवत्कलानां विवरेषु च अनेकानि शुककुलानि निर्भयं प्रतिवसन्ति। ते शुकाः प्रतिदिनम् आहारार्थं प्रातःकाले अन्यत्र गत्वा आहारम् आनीय नीडेषु वर्तमानेभ्यः स्वपोतेभ्यः यच्छन्ति। एते महता प्रेम्णा स्वानि अपत्यानि रक्षन्तः वृक्षस्य क्रोडान्तः अपत्यानि स्थापयित्वा स्वयं निशां नयन्ति।

तस्य शाल्मलीवृक्षस्य एव एकस्मिन् जीर्णकोटरे मम वृद्धः पिता मात्रा सह वसति स्म। दैववशात् मम मातापित्रोः अहम् एक एव पुत्रः अभवम्। मम जन्मनः समनन्तरं तीव्रया प्रसववेदनया मम माता दिवङ्गता। तदा प्रभृति पिता एव मम पालनं कृतवान्। स्वयं गत्वा आहारादिकम् आनेतुम् असमर्थः सः तत्र क्रोडमुखे पतितान् धान्यकणान् मह्यं दत्त्वा अवशिष्टं च स्वयं भुक्त्वा जीवति स्म ।

एकदा प्रभातकाले सर्वे शुकाः आहारान्वेषणे दिगन्तरेषु गताः । तदा अहं शिशुः। मम पित्रा सह कोटरे एव आसम् । तदा सहसा तस्मिन् प्रदेशे मृगयायाः महान् कोलाहलध्वनिः जातः । भूकम्पः जात इव अभवत् । अहं तादृशं ध्वनिं कदापि न

In Public domain. Digitization Muthulakshmi Research Academy

श्रुतवान् आसम् । मम कर्णौ स्फुटितौ इव अभवताम् । अहं कम्पमानः भयेन किमपि कर्तुम् अशक्तः पितुः जराशिथिलं पक्षपुटान्तरं प्रविष्टः। तदनन्तरं मारयन्तु, अन्विष्यन्तु, धावन्तु, अनुसरन्तु, गृह्णन्तु, इत्यादिकोलाहलेन साकं धावन्तः शबराः मृगयाव्यापारे बहून् प्राणिनः मारितवन्तः । मातङ्गनामकः कश्चन दृढशरीरः युवकः तेषां सेनापतिः आसीत्। ते सर्वे मृगयां कृत्वा श्रान्ताः अभवन्। सः युवकः सेनापतिः अस्माकं वृक्षस्य मूले किञ्चित्कालं विश्रम्य परिचरैः दत्तम् आहारादिकं सेवित्वा ससैन्यः ततः गतवान्।

शबरेषु तेषु एकतमः जरच्छबरस्तु अभीष्टं हरिणमांसम् अप्राप्य मांसार्थी तस्य वृक्षस्य मूले एव स्थितः । सर्वे यदा गताः तदा सः सोपानैः इव लीलया वृक्षम् अधिरुह्य कोटरेषु स्थितानां शुकशिशूनां मांसं खादितुम् इच्छन् तान् गृहीत्वा मारयित्वा च अधः अपातयत्। यदा तस्य हस्तः अस्माकं कोटरे प्रविष्टः । वृद्धः सन् अपि मम पिता तस्मिन् समये किमपि कर्तुम् असमर्थः चञ्चुपुटेन तस्य हस्ते प्रहारं कृतवान्। मां स्वस्य पक्षपुटेन आच्छादितवान्। एवम् अनेकान् मोघयत्नान् कृतवान् । तथापि सः क्रूरः शबरः मम पितरं मारयित्वा अधः क्षिप्तवान्। तातस्य पक्षपुटमध्ये वर्तमानः अहं तातस्य शरीरेण साकम् अधः शुष्कपत्राणां राशेः उपरि पतितः। अनन्तरं सः वृक्षात् अवतीर्य सर्वान् शुकशिशून् संगृह्णन् आसीत्। तावता अहं कथञ्चित् समीपतरवर्तिनः तमालवृक्षस्य मूलदेशम् अविशम्। सः नृशंसः माम् अलक्षयित्वा अवशिष्टानां शुकशिशूनां मृतशरीराणि एकस्मिन् पर्णपुटे आबध्य ततः निर्गतः ।

अहं पितुः मरणेन अतीव दुःखितः अभवम् । वृक्षस्य उपरिष्टात् कोटरात् अहम् अधः पतित इति कारणेन अवयवेषु कम्पः दौर्बल्यं च आगतम्। भयकारणेन मम महती पिपासा जाता। तदा सः पापी पुनः आगच्छेत् इति शङ्कमानः शनैः शनैः तस्मात् तरुमूलात् निष्क्रम्य समीपस्थजलाशयसमीपं गन्तुम् उपक्रान्तः। परन्तु मम पक्षौ एव न उत्पन्नौ इति कारणेन उड्डयितुम् अशक्तः कथञ्चित् आत्मानं पक्षपाल्या संधारयन् तातस्य मरणानन्तरमपि जीवन्तं माम् अनेकथा अधिक्षिपन् अग्रे सर्तुं प्रयत्नं कृतवान्। सः ग्रीष्मकालः । आकाशे सूर्यः स्वकिरणैः अग्निधूलिम् अधः क्षिपति वा इति भाति स्म । अधः आतपतीव्रतावशात् धूलिः अपि उत्तप्ता आसीत्। तदा मम

In Public domain. Digitization Muthulakshmi Research Academy

मरणम् आसन्नम् इत्येव अहं निश्चितवान्। कथञ्चित् सरस्तीरं प्रति सरतः मम अवयवेषु दौर्बल्यं वर्धितम्। पिपासया च मोह इव जातः।

जाबालि-आश्रमप्रवेशः

तस्मिन् समये हारीतनामकः कश्चन मुनिकुमारकः अन्यैः मुनिबालकैः सह तत्र स्नानार्थम् आगच्छति स्म । सः परमतपस्विनः जाबालिमहर्षेः पुत्र आसीत्। तस्य महर्षेः आश्रमपदं समीपे एव वर्तते स्म । सः मुनिकुमारः तेन मार्गेण सरस्तीरं गच्छन् मार्गे आसन्नमरणं मां दृष्टवान्। तस्य मनसि दया जाता । तदा सः मां सरस्तीरं नीत्वा मम मुखम् उन्नमय्य कतिपयान् जलबिन्दून् अपाययत् । शीतोपचारं च कृत्वा सः माम् एकस्य नलिनीपलाशस्य जलशिशिरच्छायायां स्थापयित्वा स्नानविधिं कृतवान्। स्नानसमाप्तेः अनन्तरं सः प्राणायामं कृतवान्, अघमर्षणसूक्तानि च पठितवान्। सूर्याय रक्तारविन्दैः अर्घ्यं दत्त्वा कमण्डलुना जलं स्वीकृत्य मां च गृहीत्वा स तपोवनस्य अभिमुखं प्रस्थितः ।

एवं किञ्चिद् दूरं तेन नीतः अहम् तस्य पवित्रम् आश्रमपदं दृष्टवान् । तत् आश्रमपदं सदा फलवद्भिः पुष्पवद्भिः च काननैः शोभितम् आसीत्। सर्वतः मुनयः समित्-कुश-कुसुम-मृदादिकानि यज्ञोपकरणानि गृहीत्वा आश्रमस्य अन्तः प्रविशन्तः आसन्। अग्निहोत्रकार्यं तत्र प्रचलति स्म । तत्र बह्व्यः दीर्घिकाः आसन्। ते मुनयः आश्रमस्य उटजानाम् अजिरप्रदेशे श्यामाकधान्यम् उच्छुष्कं कर्तुं स्थापितवन्तः आसन्। समीपे ब्रह्मचारिणः अध्ययनं कुर्वन्ति स्म । तेषां वेदोच्चारणं सततं श्रुत्वा तत्रस्थाः शुकसारिकाः अपि प्रतिवदन्ति स्म । तत्र स्थापितानि बलिपिण्डानि अरण्यकुक्कुटाः भुञ्जते स्म । समीपवर्तिनः वापीहंसाः नीवारबलिं भक्षयन्ति स्म। केचन वटवः ध्यानं कुर्वन्ति स्म । अपरे वल्कलानि क्षालयन्ति स्म। एवं सर्वे ते मुनयः भिन्नभिन्नव्यापारेषु व्यग्राः आसन्। तैः तत् आश्रमपदं अपरं ब्रह्मलोकम् इव अतिरमणीयम् आसीत्।

जाबालिमहर्षिवर्णनम्

तस्य आश्रमपदस्य मध्यभागे एकः रक्ताशोकवृक्षः आसीत्। तस्य छायायाम् एकः तेजस्वी महर्षिः उपविष्टः आसीत्। स एव जाबालिमहर्षिः । तं परितः इतरे

In Public domain. Digitization Muthulakshmi Research Academy

मुनयः समुपविष्टाः आसन्। सः महर्षिः कृशः अपि अतीव तेजस्वी भूलोके अपरः सूर्य इव, ब्रह्मदेव इव प्रकाशमान आसीत् । तं दृष्ट्वा अहं चिन्तितवान् यत् *एतादृशानां महात्मनां तेजः एव जगद् रक्षति। एतेषां नामग्रहणम् एव पुण्यकरं चेत् दर्शनं ततोऽपि पुण्यकरं भवति एव । एतस्य महात्मनः जन्मना धन्या जाता वसुन्धरा । अस्य समीपे वसन्तः एते सर्वे अपि मुनयः पुण्यवन्तः । यतः एते सर्वदा अस्य महोदयस्य मुखात् निर्गच्छन्तीं वाङ्मधुधाराम् आस्वदन्ते । अस्य महर्षेः तपः प्रभावेन अत्र अग्नयः स्वयं ज्वालाहस्तैः आहुतीः स्वीकुर्वन्ति । अस्य महर्षेः हृदये तावत् षड्रिपुवर्गः न भवति एव । अस्य सविधे सर्वं द्वेषं परित्यज्य सर्वे प्राणिनः परस्परसौहार्देन जीवन्ति । अत्र न केवलं प्राणिनः वृक्षा अपि तप आचरन्ति इव भाति* इति ।

अहम् एवं चिन्तयन् आसम् । तावता कालेन हारीतमुनिः मां तस्य अशोकतरोः अधः छायायाम् एकस्मिन् प्रदेशे स्थापितवान्। पश्चात् पितुः पादौ गृहीत्वा अभिवादनं च कृत्वा तस्य समीपे कुशासने उपविष्टः । तदा मां दृष्ट्वा सर्वे मुनयः- कुतः प्राप्तः अयं शुकशिशुः- इति हारीतमुनिं पृष्टवन्तः। *-कस्यचिद् वृक्षस्य कोटरात् पतितः अयं अजातपक्षकारणेन वृक्षाग्रं पुनः प्राप्तुम् अशक्तः स्यात् । अथवा कस्यचित् श्येनस्य मुखात् पतितः स्यात् । वयं तपस्विनः तं वृक्षम् आरोढुं न शक्नुमः इति कारणेन अहम् एतम् अत्र आनीतवान्। यावत्पर्यन्तम् अस्य पक्षौ न आगच्छतः तावत्पर्यन्तम् अयम् अत्र एव भविष्यति । तदनन्तरं कुत्रापि गच्छेत् अत्र वा तिष्ठेत्-* इति सः तान् उक्तवान् ।

एतावत् श्रुत्वा भगवतः जाबालिमहर्षेः मनसि कुतूहलमिव जातम्। सः शान्तया दृष्ट्या अनेकवारं मां दृष्टवान्। अनन्तरं किञ्चिद् आलोच्य *स्वस्य अविनयस्य फलं अयं शुकशिशुः अनुभवति* इति उक्तवान् । सः त्रिकालदर्शी इति सर्वे जानन्ति । अतः- *कीदृशः अविनयः अनेन कृतः अयं कः, किमर्थं शुकः अभवत्-* इत्यादिकं ज्ञातुकामाः सर्वे मुनयः तं महर्षिं पृष्टवन्तः।

तदा स महर्षिः - *अस्माकं स्नानसमयः संप्राप्तः । सर्वे स्नानादिकं कृत्वा अपराह्णे अत्र आगच्छन्तु। अहम् एतस्य शुकस्य वृत्तान्तम् आवेदयिष्यामि। तदा*

In Public domain. Digitization Muthulakshmi Research Academy

अयम् अपि शुकः स्वप्नवृत्तान्तम् इव पूर्ववृत्तान्तं सर्वं स्मरिष्यति -इति उक्त्वा ततः उत्थाय गत्वा दिवसोचितं कार्यं निर्वर्तितवान् ।

तावता सन्ध्यासमयः प्राप्तः । सूर्यः पश्चिमदिशम् अवलम्बमानः दृष्टः। पश्चिमसमुद्रजले सूर्यस्य बिम्बं समुद्रे शयनं कुर्वतः विष्णुदेवस्य नाभिकमलम् इव दृश्यते स्म। अनतिकाले एव सूर्यः अदृश्यः अभवत्। सन्ध्यायाः पाटलवर्णः पश्चिमदिशि व्याप्तः अभवत्। आश्रमपदे होमधेनूनां दोहनक्रियायाः ध्वनिः मनोहरः आसीत्। मुनिकुमाराः अग्निहोत्रवेदीषु हरितकुशान् विकिरन्ति स्म । दिग्देवताबलिं विक्षिपन्ति स्म। सूर्यः यदा पश्चिमसागरे पतितः तस्य पतनस्य वेगेन उत्थिताः जलकणाः इव आकाशे तारकाः दृश्यन्ते स्म। मुनिजनैः दत्तेन अर्घ्यजलेन क्षालितः इव आकाशात् सन्ध्यारागः गलितः।

कतिपयक्षणानन्तरे मुनीनां हृदयानि त्यक्त्वा सर्वत्र अन्धकारः व्याप्तः । तदनन्तरम् आकाशे पूर्वदिशि चन्द्रबिम्बं दृष्टम्। परमशिवस्य मस्तकात् गङ्गा इव चन्द्रबिम्बात् ज्योत्स्ना पृथिव्यां पतिता मनोहरी आसीत् । शनैः शनैः चन्द्रः दूरोदितः अभवत् । सर्वः अपि प्रदेशः ज्योत्स्नाधूलिसमूहेन धवलीकृतः अभवत् । रात्रेः आरम्भे प्रवहन्तं शीतवायुं आश्रममृगाः सुखम् एकत्र उपविष्टाः अभिनन्दन्ति स्म । शनैः शनैः रोमन्थम् अभ्यस्यन्तः ते मृगाः निद्रातुम् उपक्रान्ताः अभवन् । तदा मम भोजनम् अभवत्। हारीतः माम् आदाय अपरैः मुनिजनैः सह पितुः समीपं गतवान्। तस्मिन् समये जाबालिमहर्षिः ज्योत्स्नया उद्भासमाने एकस्मिन् प्रदेशे उपविष्टः आसीत्। जालपादनामकः कश्चन शिष्यः तं मन्दम् उपवीजयन् आसीत्। हारीतः पितुः समीपं गत्वा -*सर्वे तापसाः शुकस्य कथां श्रोतुम् इच्छन्ति । त्रिकालज्ञानी भवान् अस्य शुकस्य वृत्तान्तम् आवेदयतु- इति प्रार्थितवान्।सर्वे अपि शुककथां श्रोतुम् सोत्कण्ठा वर्तन्ते* इति जाबालिमहर्षिः ज्ञातवान्।

सः पुरतः वर्तमानं मां दृष्ट्वा मम कथां श्रावयितुम् उपक्रान्तः-

चन्द्रापीडकथा

अवन्तिदेशेषु उज्जयिनी नाम नगरी अस्ति । अतिपवित्रायां नगर्याम् अस्यां महाकालमन्दिरं वर्तते । विश्वकारणस्य महाकालस्य दर्शनार्थं सर्वः अपि देवतागणः

In Public domain. Digitization Muthulakshmi Research Academy

अस्याम् नगर्यां सर्वदा वसति । अत्र एव राजा तारापीडः वसति स्म। सः कीर्त्या पराक्रमेण बुद्ध्या कान्त्या उत्साहेन शास्त्रज्ञानेन च महान् आसीत्। तस्य शासने प्रजाः सुखेन जीवन्ति स्म । तस्य शुकनासनामकः अमात्यः आसीत्। प्रज्ञावान् सः शुकनासः राजानं प्रति आशैशवात् प्रीतिं धारयति स्म । मन्त्राङ्गे निपुणस्य तस्य साहाय्येन राजा स्थिरं प्रजाः पालयति स्म। सर्वान् राजभोगान् अनुभवन् अपि सः संयमी आसीत्। यस्य राज्ञः शासने प्रजाः प्रमुदिताः जीवन्ति यस्य च राज्ञः महीप्रयोजनं परिसमाप्तं वर्तते तस्य राज्ञः विषयोपभोगलीला तस्य भूषणमेव भवति । अन्येषां तु सा विडम्बना एव खलु। सः तारापीडो राजा अन्तरा स्वदर्शनं ददाति स्म। तेषु तेषु निमित्तेषु सिंहासनं च आरूढः भवति स्म।

प्रज्ञाबलः अमात्यः शुकनासः महान्तं राज्यभारम् अनायासेन एव अभरत्। तस्य विषये अपरेषां राज्ञाम् अपि राजनि इव महान् आदरः आसीत्। तस्मिन् समर्थे अमात्ये राज्यभारं न्यस्य तारापीडः निश्चिन्तः आसीत्। परन्तु तस्य पत्न्याः विलासवत्याः च मनसि अनपत्यतादुःखम् आसीत्। तस्याः दुःखम् आलोक्य विचलितः तारापीडः ताम् आश्वास्य अपत्यं प्राप्तुं बहुविधानि धार्मिककृत्यानि कृतवान्।

एकदा सः रजन्याः चरमे भागे स्वप्ने स्वपत्न्याः मुखे प्रविशन्तं चन्द्रं दृष्टवान्। प्रभाते सः अमात्यं शुकनासम् आहूय तं स्वप्नं कथितवान्।

तदा आनन्दपरवशः शुकनासः- मम पत्न्या मनोरमाया अङ्के चन्द्रः एकं विकसितं पुण्डरीकं स्थापितवानिति मया अपि स्वप्नः दृष्टः । एतादृशाः स्वप्नाः सफलाः भवन्ति । निश्चयेन भवतः अपत्यं भविष्यति -इति तं समाश्वासितवान्।

अचिरात् एव विलासवती, शुकनासपत्नी मनोरमा च अपत्यसुखं प्राप्तवत्यौ। दशमे अहनि पुण्यमुहूर्ते तारापीडः स्वसुतस्य चन्द्रापीड इति नाम कृतवान्। अपरस्मिन् दिने शुकनासः स्वसुतस्य वैशम्पायन इति नाम कृतवान् । स्वपुत्रस्य कृते तारापीडः नगराद् बहिः सिप्रानद्याः तीरे एकं महत् विद्यामन्दिरं निर्मापितवान्। तत्र महती व्यायामशाला अपि आसीत्। तत्र चन्द्रापीडः वैशम्पायनः च विद्याभ्यासम् आरब्धवन्तौ । तारापीडः प्रतिदिनं भार्यया सह तत्र गत्वा पुत्रम् आलोकयति स्म।

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रापीडः योग्यैः आचार्यैः पाठिताः सर्वाः विद्याः लीलया अधिगतवान् । सः प्रांशुः अतीव बलवान् च आसीत् । वैशम्पायनः तस्य द्वितीयं हृदयम् इव आसीत्। तं क्षणमपि विहाय सः स्थातुं न शक्नोति स्म। एवं वैशम्पायनेन साकं चन्द्रापीडः तस्मिन् विद्यामन्दिरे दशवर्षाणि यावत् शास्त्राणि अधीतवान्। कलाः सकलाः शिक्षितवान्।

षड्वर्षीयः विद्यामन्दिरं प्रविश्य दशवर्षाणि यावत् विद्याः अभ्यस्य चन्द्रापीडः षोडशवर्षीयः यदा अभवत् तदा तारापीडः तस्य मेलनेच्छया बलाहकनामानं बलाधिपतिं पुत्रस्य समीपं प्रेषितवान्। सः अधिपतिः चन्द्रापीडस्य समीपं गत्वा राज्ञः संदेशं श्रावयित्वा राजप्रेषितम् इन्द्रायुधनामकम् अश्वं चन्द्रापीडाय समर्पितवान्। तं दिव्यम् अश्वं विलोक्य चन्द्रापीडः आश्चर्यचकितः अभवत् । कोऽपि महात्मा केनापि शापेन एवम् अश्वरूपं प्राप्तवान् स्यात् इति सः चिन्तितवान् । बहिः प्रतीक्षां कुर्वतः राजकुमारान् संमान्य चन्द्रापीडः अश्वम् अधिरूह्य वैशम्पायनेन सह नगराभिमुखः प्रस्थितः ।

अपरमन्मथ इव राजकुमारः नगरम् आगत इति ज्ञात्वा नगरे सर्वेषां नागरिकानाम् आनन्दातिरेकः जातः । सर्वत्र तस्य स्वागतं कर्तुं महान् जनसंमर्दः संगतः अभवत् । युवतिजनानां हृदयानि आकृष्य चन्द्रापीडः राजद्वारं प्राप्य अश्वात् अवतीर्य वैशम्पायनेन सह पितुः समीपं गतवान्। तदा तारापीडः हंसधवलशयनतले सुखेन उपविष्टः आसीत्। पुत्रम् आगतं दृष्ट्वा हर्षोद्रेकेण तारापीडः द्रागेव भुजयुगलं प्रसार्य विनयेन अवनतम् पुत्रम् प्रेम्णा आलिङ्गितवान् । पुत्रेण सह आगतं वैशम्यायनम् अपि सः वात्सल्येन आलिङ्गितवान्।

चन्द्रापीडः पितुः समीपे क्षितितले एव उपविष्टः । तदनन्तरं मातुः संदर्शनार्थम् अन्तःपुरम् गतवान्। चन्द्रापीडः अन्तःपुरे मातुः दर्शनं प्राप्य तस्याः आशिषः च लब्ध्वा तदनन्तरं अमात्यम् शुकनासं द्रष्टुं गतः। शुकनासगृहद्वारस्य बहिः एव सः अश्वात् अवतीर्णः वैशम्पायनेन सह शुकनासभवनं प्रविष्टः। अनेकेषां राज्ञां मध्ये उपविष्टम् अपरं पितरम् इव वर्तमानं शुकनासं सः शिरसा वन्दितवान्। चन्द्रापीडं वैशम्पायनं च गाढम् आलिङ्गितवान् शुकनासः। तदनन्तरं रत्नासनम् अपि परिहाय

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रापीडः शुकनासस्य पुरतः भूमौ एव उपविष्टः । वैशम्पायनः अपि तत्पार्श्वे उपविष्टः। एतद् दृष्ट्वा सर्वेऽपि राजानः स्वानि आसनानि विहाय भूमौ उपविष्टाः अभवन् । तदा शुकनासः चन्द्रापीडं बहुधा अभिनन्दितवान्। ततः राज्यभारं वोढुम् अयं योग्यसमय इति उपदिष्टवान्।

ततः विसर्जितः चन्द्रापीडः परेद्युः पित्रा अभ्यनुज्ञातः सेनापरिवृतः वनं गतवान्। तत्र मृगयां विधाय मृगयावृत्तान्तं परस्परं कथयद्भिः राजकुमारकैः सह मध्याह्ने भवनम् आगतः।

परस्मिन् दिने विश्राम्यन्तं राजकुमारकम् उपसृत्य कैलासनामकः कञ्चुकी एकां कन्यकां दर्शयित्वा निवेदितवान् - *कुमार, महादेवी विलासवती संदिष्टवती यत् - इयं खलु कन्यका कुलूतेश्वरदुहिता । पूर्वं तव पित्रा कुलूतेश्वरम् अवजित्य एषा बालिका अन्तःपुरम् आनीय परिचारिकामध्ये स्थापिता। अहम् एतां पुत्रीम् इव पालितवती । इदानीम् एषा तव ताम्बूलकरङ्कवाहिनी भवतु इति मया प्रेषिता । एतां त्वं परिचारिकादृष्ट्या मा पश्य। बालाम् इव, शिष्याम् इव, सुहृदम् इव एनां पश्य* -इति।

एतं सन्देशं प्राप्य चन्द्रापीडः तथास्तु इति उक्त्वा कञ्चुकिनं ततः विसर्जितवान्।

एवं कतिपयदिनानि गतानि । तरुणं योग्यं च कुमारं दृष्ट्वा तारापीडः तस्य राज्याभिषेकं कर्तुम् उद्युक्तः अभवत्।

एकदा स्वसमीपम् आगतं विनीतम् अपि कुमारं विनीततरं कर्तुं शुकनासः तस्मै एवम् उपदेशं प्रदत्तवान्।

शुकनासेन कृतः उपदेशः

तात चन्द्रापीड! त्वं सर्वम् अपि शास्त्राचयं जानासि अतः मया अल्पमपि उपदेष्टव्यं न विद्यते। यौवनं, धनसम्पत्तिः, अधिकारः इति त्रयम् अपि कष्टदायकं भवति। गर्भेश्वरत्वं, अभिनवतारुण्यं, अमानुषशक्तिः इति महती इयम् अनर्थपरम्परा। एकैकमपि हानिकरं चेत् सर्वेषां समवायः कीदृशः भवेत् इति किं वक्तव्यम्। शास्त्राणि अधीत्य अपि यौवने बुद्धिः कलुषिता भवति। विषयानुरक्तिः प्रायः जनान् अन्धान्

In Public domain. Digitization Muthulakshmi Research Academy

करोति । परन्तु त्वत्सदृशा एव उपदेशग्रहणार्थं योग्याः भवन्ति । अमलमपि गुरुवचनम् अयोग्यस्य कर्णं प्रविश्य जलमिव महत् शूलं जनयति खलु ।

गुरूपदेशः नाम मानवानां सर्वपापनाशकम् अजलं स्नानम्। अजरं वृद्धत्वम्। विशेषतः राज्ञाम् । परं विरलाः राज्ञाम् उपदेष्टारः। जनाः राज्ञः कोपभयात् तस्य विरुद्धं वचनं न वदन्ति । राजप्रकृतिः विह्वला भवति। तत्र राजलक्ष्मीः सर्वान् अन्धान् करोति। राजलक्ष्मीः सर्वान् उन्मत्तान् करोति । एषा न परिचयं रक्षति न शीलं पश्यति न अभिजनम् ईक्षते न श्रुतम् आकर्णयति न आचारं पालयति न लक्षणं प्रमाणी करोति। गन्धर्वनगरलेखा इव एषा पश्यतः नश्यति । राजलक्ष्मीः तृष्णां संवर्ध्य राजकुलानि नाशयति । राजलक्ष्म्याः मोहेन महान्तः अपि राजानः सर्वेषाम् अविनयानां स्थानं भवन्ति। दाक्षिण्यं त्यजन्ति। परलोकं न गणयन्ति। सत्यं परित्यजन्ति। साधुवादान् न शृण्वन्ति । ग्रहपीडाग्रस्ताः इव मुखविकारान् दर्शयन्ति। राजलक्ष्म्याः प्राप्त्या केचन भोगेषु दिवसान् नयन्ति । साधारणाः मर्त्याः अपि लक्ष्मीं प्राप्य दिव्यांशावतीर्णा इव व्यवहरन्तः परोक्षे सर्वजनानाम् उपहासपात्रतां व्रजन्ति । ते च प्रभवः हितवादिने कुप्यन्ति सचिवोपदेशाय च असूयन्ति । यः अन्यकार्याणि विहाय अञ्जलिं बद्ध्वा अत्मानं स्तौति माहात्म्यं च उद्भावयति तम् एव राजानः अभिनन्दन्ति आलपन्ति, पार्श्वे कुर्वन्ति, संवर्धयन्ति मित्रताम् उपयान्ति शृण्वन्ति तत्र ऐश्वर्यं वर्षन्ति च।बहुमन्यन्ते च तस्य वचनम् । कुमार एतादृशे महामोहकारिणि यौवने वर्तमानस्त्वं तथा प्रयत्नं कुरु यथा उपहासपात्रतां वा निन्दापात्रतां वा शोकपात्रतां वा न यायाः । धूर्तवचनं यथा न भवेत् तथा सावधानेन मनसा व्यवहर। त्वं प्रकृत्या धीरः । तथापि लक्ष्मीः धीरमपि कलुषयति । राज्याभिषेकात् अनन्तरं शत्रून् जित्वा पूर्वं पित्रा जितम् अपि राज्यं स्वपराक्रमेण विजयस्व । अयं योग्यः कालः तव प्रतापं दर्शयितुम् - इति शुकनासः चन्द्रापीडम् उपदिष्टवान्।

तेन उपदेशेन चन्द्रापीडस्य मनः प्रक्षालितम् इव अभवत् । आनन्देन सः ततः आज्ञां प्राप्य स्वभवनम् आगतः । ततः कतिपयदिवसाः गताः ।

तदा राजा चन्द्रापीडस्य अभिषेकार्थं दैवज्ञेभ्यः शुभमुहूर्तं ज्ञात्वा सर्वसंभारान् सज्जीकारितवान्। ततः सर्वाभ्यः नदीभ्यः आनीतेन मन्त्रपूतेन जलेन चन्द्रापीडस्य

In Public domain. Digitization Muthulakshmi Research Academy

राज्याभिषेकं कृतवान्। चन्द्रापीडः विविधैः अलङ्कारैः भूषितः सन् सिंहासनम् आरूढवान्। तदा तस्य दिग्विजययात्रां सूचयन् प्रस्थानदुन्दुभिः ध्वनितः अभवत्। तं ध्वनिं श्रुत्वा चन्द्रापीडः नरपतिसहस्रैः आस्थानमण्डपात् निर्गतः।

सैन्यप्रस्थानम्

तदा पत्रलेखा बहिः करेणुम् एकाम् अधिष्ठाय सिद्धा आसीत्। तया सह चन्द्रापीडः अभिप्रस्थितः अभवत्। अनन्तरं वैशम्पायनः अपि अपरां करेणुम् अधिष्ठाय चन्द्रापीडस्य समीपम् आगतः। एवं द्वौ अपि ससैन्यं पूर्वदिशम् प्रति प्रस्थितौ।

तस्य सैन्यस्य प्रस्थानेन तदा अकस्मात् एव रजः संवर्धमानं सत् सर्वत्र प्रसृतम्। सर्वाः दिशः रजसा आलिप्ताः अभवन् । दिवसः मृण्मय इव अभवत् । किञ्चित्कालानन्तरं रजः शान्तम् अभवत्। दिक्षु आलोकः उपजातः।

तदा समुपजातविस्मयः वैशम्पायनः सर्वत्र अवलोक्य चन्द्रापीडस्य समीपम् आगत्य उक्तवान्- युवराज! तारापीडेन किमपि जितं नास्ति इति नास्ति यत् भवान् इदानीं जयेत्। तातेन महाराजेन सर्वा अपि पुथिवी जिता खलु - इति।

तावता कालेन युवराजः आवासभूमिं प्राप्तवान् । तत्र यथोचिताः क्रियाः निर्वर्तितवान्। रात्रौ तत्र पत्रलेखया वैशम्पायनेन च आलापं कुर्वन् सः जाग्रत् एव रात्रिं नीतवान् । प्रातः सेनासहितः प्रस्थितः । तेन च सैन्येन आसमुद्रं सर्वा पृथिवी विचरिता। क्रमेण सर्वाः दिशः जिताः । हेमकूटवासिनां किरातानां सुवर्णपुरं नाम निवासस्थानं च जित्वा गृहीतवान्। एवं वर्षत्रयेण सर्वां पृथिवीं जित्वा बहुभ्यः दिनेभ्यः पृथिवीपर्यटनात् श्रान्तां स्वसेनां विलोक्य चन्द्रापीडः तत्र कतिपयदिवसान् यावत् विश्रमितुम् इष्टवान्। एवं सः ससैन्यः तत्र वासं कर्तुम् अतिष्ठत्।

किन्नरमिथुनम्

तेषु दिवसेषु एकदा चन्द्रापीडः इन्द्रायुधनामकं स्वम् अश्वम् आरुह्य मृगयार्थं निर्गतः। सः कानने विचरन् शैलशिखरात् अवतीर्णं किन्नरमिथुनं यदृच्छया अपश्यत्। तस्य मिथुनस्य दर्शनम् अपूर्वम् आसीत्। अतः कुतूहलेन सः अश्वेन किञ्चित्तस्य समीपं गतः। तस्य आगमनाद् भीतं तत् किन्नरमिथुनं ततः प्रधावितम् अभवत्। तस्य

 Public domain. Digitization Muthulakshmi Research Academy

दर्शने ग्रहणे च चन्द्रापीडस्य इच्छा वर्धिता। सः पार्ष्णिप्रहारेण अश्वस्य वेगं वर्धयित्वा तत् अनुधावितः। तेन सः सैन्यात् दूरं गतः। तस्मात् प्रदेशात् पञ्चदशयोजनमात्रमार्गं गतः। तत् किन्नरमिथुनम् अनुधावन् चन्द्रापीडः एकस्य शिखरस्य अग्रभागम् आरूढः अभवत्।

शिखराग्रं प्राप्य चन्द्रापीडः किन्नरमिथुनात् दृष्टिं निर्वर्त्य पर्वतशिलावशेन कुण्ठितगतिः सन् अश्वखलीनं गृहीत्वा तस्य च वेगं निरुध्य श्रमवशात् स्विद्यन्तम् अश्वं दृष्ट्वा आत्मनः अभिनिवेशम् अधिक्षिप्तवान्। किन्नरमिथुनं गृहीतम् अगृहीतं वा तेन किं भवेत् इति सः तदा विचार्य स्वचेष्टां निर्भर्त्स्य परितः दृष्टवान् ।

कश्चन मनुष्यः दृष्टः चेत् सुवर्णपुरमार्गं प्रक्ष्यामि इति चिन्तितवान्। सुवर्णपुरम् उत्तरेण अरण्यं ततः कैलासपर्वत इति पूर्वं सः श्रुतवान् आसीत्। अयमेव कैलासपर्वत इति सः ज्ञातवान् । कथञ्चित् इतः कल्पनां कृत्वा दक्षिणाम् दिशम् उद्दिश्य मया गन्तव्यम् । तदा स्वर्णपुरं प्राप्नुयाम् इति सः अश्वं तस्यां दिशि चालितवान्। परम् अयम् अश्वः अहं च आयासितौ पिपासितौ इति हेतोः प्रथमं जलस्थालं पश्येयम् यत्र अश्वस्य मम च पिपासानिवृत्तिः विश्रान्तिः च भवेतामिति सर्वत्र अन्विष्यन् एकं मदजलसिक्तं मार्गं विलोक्य तेन मार्गेण गच्छन् एकं तरुखण्डं दृष्टवान्। तन्मध्ये गत्वा सः अतिमनोहरं दृष्टेः आल्हादकं महत् अच्छोदसरः दृष्टवान्।

अच्छोदसरः

तस्य महतः अच्छोदसरोवरस्य दर्शनेन सः नितराम् आनन्दितः अभवत् । अस्य दर्शनार्थम् एव अहं किन्नरमिथुनेन अत्र बलाद् आनीतः इत्यपि चिन्तयित्वा सः तस्य सरसः दक्षिणतटात् जलम् अवतीर्णः । अश्वस्य आयासं स्नानेन जलपानेन च दूरीकृत्य स्वयं वृक्षस्य अधस्तात् निषण्णः विश्रान्तः अभवत् ।

तदा आदौ उत्कर्णेन अश्वेन कश्चन गीतध्वनिः श्रुतः । वीणाझंकारमिश्रं तत् अमानुषं गीतम् आसीत् । तदनन्तरं चन्द्रापीडः अपि तं शब्दं श्रुत्वा कुतोऽयं संभूतः गीतशब्दः इति कुतूहलेन परितः दृष्ट्वा अपि किमपि न दृष्टवान्। ततः स उत्थाय इन्द्रायुधम् आरुह्य पश्चिममार्गेण तं गीतध्वनिं अनुसृत्य प्रस्थितः। अचिरादेव सः महद्भिः पादपैः उपशोभितं तस्य सरसः पश्चिमे तीरे शून्यं शिवालयम् एकम् अपश्यत्।

In Public domain. Digitization Muthulakshmi Research Academy

तच्च प्रविश्य तत्र चतुर्मुखं भगवन्तं त्रयम्बकमपश्यत् । तस्य दक्षिणां मूर्तिम् आश्रित्य अभिमुखम् आसीना आसीत् काचित् दिव्ययोषित् ।

महाश्वेतावृत्तान्तः

सा दिव्यकन्यका महाश्वेतानाम्नी काचित् गन्धर्वराजपुत्री । यथा नाम तथा तस्याः रूपम् दिव्यम् आसीत् । स्वशरीरकान्त्या सा तं प्रदेशं दन्तमयम् इव करोति स्म । तया कान्त्या सा मूर्तीभूता शरत्कालस्य ज्योत्स्ना इव आसीत्। सा श्वेतगङ्गा इव धर्म इव क्षीरोदधिदेवता इव प्रकाशमाना आसीत्। उत्सङ्गे दन्तमयीं वीणां धृत्वा सा तां दक्षिणकरेण आस्फालयन्ती आसीत्। सा पाशुपतव्रतं स्वीकृत्य त्रिलोचनस्य आराधनं कुर्वती तत्र देवालये उपविष्टा आसीत् ।

चन्द्रापीडः अश्वात् अवतीर्य तरुशाखायाम् अश्वं बद्ध्वा भगवन्तं त्रिलोचनं प्रणम्य पुनः तां दिव्यकन्यकाम् अनिमेषनेत्राभ्यां दृष्टवान्। तस्याः रूपलावण्यसंम्पदं दृष्ट्वा तस्य मनसि विस्मयः जातः । तस्याः प्रशान्तरूपेण सः नितरां प्रभावितः अभवत्। अस्याः दिव्यतायाः विषये मम संशयः न अस्ति । एतस्याः आकृतिः एव एषा अमानुषी इति अनुमानस्य अवकाशं कल्पयति । मम आगमनं ज्ञात्वा एषा इतः कैलासशिखराग्रं गच्छेत् आकाशं वा उत्पतेत् ततः पूर्वम् एव अहम् एताम् उपसृत्य अस्याः वृत्तान्तं पृच्छानि इति तस्याः गीतस्य समाप्तिं प्रतीक्षमाणः तत्र एव स्थितः।

गीतसमाप्तेः अनन्तरं सा कन्यका समुत्थाय प्रदक्षिणीकृत्य महेश्वरं नमस्कृत्य यदा चन्द्रापीडं परिवृत्य दृष्टवती तदा तया स्वभावधवलया दृष्ट्या चन्द्रापीडः समाश्वासित इव पुण्यैः स्पृष्ट इव, तीर्थजलैः प्रक्षालित इव तपोभिः पवित्रित इव शुद्ध इव अभवत् ।

सा तम् अतिथिं मत्वा स्वागतादिकं कृतवती । चन्द्रापीडः भक्त्या ताम् प्रणम्य भगवति यथा आज्ञापयसि इति उक्तवान् ताम् अनुसृतवान् च । पदशतमात्रम् इव गत्वा लतासमूहेषु गुहां प्राप्तवान् । सा कन्यका वीणां स्थाने न्यस्य पर्णपुटेन निर्झरजलम् आदाय तस्य समीपम् आगता। सः गुहायाः द्वारि शिलातले उपविष्टः ताम् अपि उपवेष्टुं प्रार्थितवान्। सा अपि तस्य अतिथिसत्कारं कृत्वा अन्यस्य शिलातलस्य उपरि उपविष्टा। तदनन्तरं सा तस्य तत्र आगमनादिकं पृष्टवती ।

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

तदा चन्द्रापीडः दिग्विजयात् आरभ्य किन्नरमिथुनस्य अनुसरणपर्यन्तम् आत्मनः वृत्तन्तं कथितवान्।

भिक्षाकाले वृक्षेभ्यः फलानि स्वयम् एव पतितानि अभवन्। तत् दृष्ट्वा चन्द्रापीडः आश्चर्यचकितः अभवत्। तपसाम् असाध्यं नास्ति इति सः तदा साक्षात्कृतवान्।

तया दत्तानि फलानि भुक्त्वा जलं च पीत्वा शिलातले उपविष्टां तां कन्यकाम् उपसृत्य सविनयम् उक्तवान् -

भगवति! मनुष्यसुलभं लाघवं मां एवं प्रश्नान् प्रष्टुं प्रेरयति। यदि अतिखेदकरं नास्ति तर्हि स्वस्य वृत्तान्तस्य कथनेन मां भवती अनुगृह्णातु । मरुताम् ऋषीणां गन्धर्वाणां गुह्यकानाम् अप्सरसां वा केषां कुले भगवत्याः जन्म अभवत्। नवे वयसि अस्मिन् गहनारण्ये व्रतं कथं स्वीकृतम्। प्रसीदतु । सर्वम् आवेदयतु इति –

तत् श्रुत्वा सा कन्यका किमपि चिन्तयन्ती तूष्णीं स्थित्वा ततः आमीलितलोचना रोदितुम् आरब्धवती ।

तां तथा रुदितां दृष्ट्वा चन्द्रापीडस्य मनसि खेदः जातः । सर्वथा केनापि महता कारणेन अत्र भाव्यम् इति सः ज्ञातवान्। ततः उत्थाय सः तस्याः मुखप्रक्षालनाय जलम् अञ्जलिना आनीतवान्। सा तेन जलेन नेत्रे प्रक्षाल्य वस्त्रस्य उपान्तेन च वदनम् अपमृज्य दीर्घं निःश्वस्य शनैः वक्तुम् आरब्धवती –

महाश्वेतायाः कथा

राजपुत्र! मम मन्दभाग्यायाः जन्मनः प्रभृति वैराग्यवृत्तान्तस्य श्रवणेन किं फलम्। तथापि यदि महत् कुतूहलं तर्हि कथयामि ।

देवलोके अप्सरसः नाम कन्यकाः सन्ति इति श्रुतं खलु । तासाम् अप्सरसां चतुर्दशकुलानि सन्ति। तेषु दक्षस्य प्रजापतेः मुनिः अरिष्टा च इति द्वाभ्यां कन्यकाभ्यां गन्धर्वैः सह कुलद्वयं जातम्। मुनेः तनयः षोडशः चित्ररथः नाम सः गन्धर्वाणाम् अधिपतिः। भारतस्य उत्तरदिशि किंपुरुषनामके वर्षे हेमकूट इति तस्य निवासः । तेन एव इदं चैत्ररथं नाम सुन्दरं काननं निर्मितम् । अतिमहत् अच्छोदसरः खानितम् । इदं

In Public domain. Digitization Muthulakshmi Research Academy

च पशुपतिमन्दिरं निर्मापितम् । अरिष्टायाः षट् पुत्राः। तेषां ज्येष्ठः हंसः चैत्ररथेन अभिषिक्तः गन्धर्वराजः । तस्य पत्नी गौरी । तयोः अहम् एका एव पुत्री ।

महाश्वेता-पुण्डरीकप्रणयः

तरुणी अहम् एकदा वसन्तकाले मात्रा सह स्नानार्थम् अच्छोदसरः गता। तत्र तीरस्थतरुतलेषु सखीजनेन सह विचरन्ती अहम् अनाघ्रातपूर्वं दिव्यं पुष्पगन्धं आघ्रातवती। तस्य सुमगन्धस्य मूलम् अन्विषन्ती कतिचित्पदानि गत्वा तेजस्विनम् अपरमन्मथम् इव सुन्दरं मुनिकुमारकं दृष्टवती। सः अपरेण मुनिकुमारकेण सह स्नानार्थम् आगतः। अपरः मुनिकुमारः कुसुमानि उच्चिन्वन् आसीत्। तस्य प्रथमस्य मुनिकुमारकस्य कर्णाभरणरूपेण एका कुसुममञ्जरी विराजते स्म । अस्याः कुसुममञ्जर्याः अयं दिव्यः परिमलः इति अहं ज्ञातवती । तस्य मुनिकुमारस्य सौन्दर्यातिशयेन अहं परवशा अभवम् । तस्य विषये मम मनसि प्रणयः जातः । परन्तु अयं तावत् मुनिजनः । अयोग्यं व्यवहारं कुर्वतीं माम्कदाचित् शपेत् इति भिया ततः अपसर्तुम् उपक्रान्ता। तथापि पूज्यानां पूजा करणीया इति जानन्ती तस्मै प्रणामम् अकरवम्। तदा तस्यापि मुनिकुमारकस्य मां दृष्ट्वा प्रणय इव जातः । तस्य हस्तगता अक्षमाला कम्पिता।

अहम् अपरं मुनिकुमारकम् उपगम्य तस्य वृत्तान्तम् अपृच्छम्। तदा ज्ञातं यत् सः मुनिकुमारकः लक्ष्म्या श्वेतकेतवे प्रदत्तः पुण्डरीकनामकः व्रतधारी। नन्दनवनदेवता स्वयम् एतस्मै इयां पुष्पमञ्जरीं दत्तवती इति। तत् श्रुत्वा प्रथमः मुनिकुमारकः पुष्पमञ्जरीविषये मम आसक्तिं ज्ञात्वा तां मह्यं दत्तवान्। यदा सः तां मञ्जरीं मम श्रवणपुटे कृतवान् तदा मम शरीरं पुलकितम् अभवत् । तस्य च हस्ततः अक्षमाला विगलिता । सः गलितां ताम् अक्षमालां न दृष्टवान्। अहं तां गृहीत्वा कण्ठमालां कृत्वा तं प्रदेशं विहाय मातुः समीपं गन्तुम् उद्युक्ता।

तदनन्तरं द्वितीयः मुनिकुमारः मित्रस्य पुण्डरीकस्य मनोविकारं ज्ञात्वा *तापसजनानाम् अयम् अयोग्यः व्यवहारः* इति तम् उपदिष्टवान् । मां च दृष्ट्वा सः *एवम् आचरितुं न अर्हसि* इति उक्तवान्।

In Public domain. Digitization Muthulakshmi Research Academy

अहमपि क्षमां प्रार्थ्य पुण्डरीकस्य प्रसारिते पाणी कण्ठात् उन्मुच्य मालां तत्र निधाय स्नातुं गता।

स्नानानन्तरं कथमपि कन्यान्तःपुरं प्रविष्टा अहं तमेव मुनिकुमारकं ध्यायन्ती सर्वकार्येषु अनासक्ता निःस्पन्दं स्थिता। तस्य प्रणयेन अहं नितरां परवशा अभवम्। तम् अप्राप्य न जीविष्यामि इति मम मनसि अधीरता जाता। अहम् एवं चिन्तयन्ती यदा आसम् तदा तरलिका नाम मम सखी मम समीपम् आगत्य तेन प्रथममुनिकुमारकेण दत्तम् इति पत्रम् एकं मह्यं दत्तवती।

तस्मिन् पत्रे तस्य प्रणयस्य आविष्कारः कृतः आसीत्। सः अपि अहम् इव मदनावस्थाम् अनुभवति इति ज्ञात्वा मम महान् आनन्दः जातः । कथं कदा च तेन तत् पत्रं दत्तम् इति तां सखीं वारं वारं पृच्छन्ती तस्य कथया एव अहं दिवसं नीतवती।

सायंसमये छत्रग्राहिणी आगत्य कश्चन मुनिकुमार अक्षमालाम् उपयाचितुम् भवतीं द्रष्टुम् आगतः इति निवेदितवती । मुनिकुमारः इति नामग्रहणात् एव सः एव आगतः इति शङ्कमाना तं प्रवेशयतु इति कञ्चुकिनम् आदिष्टवती।

कञ्चुकी गत्वा तम् अन्तः आनीतवान्।

योग्यासने तम् उपावेश्य प्रणम्य भूमौ एव अहम् उपविष्टा । तस्य द्वितीयमुनिकुमारस्य कपिञ्जल इति नाम आसीदिति विदितवती । सः मां दृष्ट्वा पुण्डरीकस्य मदनावस्थां वक्तुम् आरब्धवान्- *भवति! भवत्याः प्रणयेन परवशः मम सुहृद् भवतीम् अप्राप्य प्राणान् न धारयिष्यामि इति गत्वा प्राणपरित्यागाय सिद्ध इव एकत्र उपविष्टः । मया धर्मः उपदिष्टः तथापि सः भवत्याः प्रणयेन मूढः किमपि न श्रुतवान् । तस्य प्राणाः रक्षणीयाः इति अहं मदनज्वरपीडितस्य तस्य यथोचितं प्रतीकारं कल्पयित्वा अत्र आगतः । तस्य अवस्थां ज्ञात्वा अनुरागस्य सदृशम् आचरितुं भवती प्रभवति* इति ।

अहं तत् श्रुत्वा अतीव आनन्दिता पुनरपि मोहपरवशा जाता । अहम् प्रत्युत्तरं दातुम् अशक्ता इव किमपि चिन्तयन्ती आसम् । तदा माता आगच्छन्ती

In Public domain. Digitization Muthulakshmi Research Academy

अस्ति इति प्रतीहारी ससंभ्रमम् आगत्य कथितवती । तत् श्रुत्वा तत्र स्थितिः उचिता न भवेत् इति कपिञ्जलः ततः उत्थाय प्रयातः ।

माता आगत्य मया सह किम् आलपितवती इत्यपि न ज्ञातवती अहम् । तस्य पुण्डरीकस्य चिन्ता मां बाधते स्म ।तदा कर्तव्यमूढा पुण्डरीकविषये तरलिकाम् अपृच्छम् ।

तावता कालेन रात्रिः अभवत् । चन्द्रः आकाशे विराजमानः अभवत् । पुण्डरीकस्य स्थितिं चिन्तयन्ती अहं मूर्छिता अभवम् । यदा नेत्रे उन्मीलिते तदा तरलिका रुदती मां दृष्ट्वा मुनिकुमारस्य उपसरणम् एव मम कृते प्रतीकारः इति उपदिष्टवती ।

ततः अहं रक्तांशुकेन शिरोऽवगुण्ठनं कृत्वा अन्यैः न उपलक्ष्यमाणा पुण्डरीकेण भूषितं वनप्रदेशम् उद्दिश्य तरलिकया सह प्रस्थिता।

पुण्डरीकस्य मरणम्

तत्र तत्तटस्य पश्चिमे भागे कस्यचन पुरुषस्य रुदितध्वनिम् इव अहम् उपलक्षितवती । अशुभस्य शङ्कया मम मनसि विषादः जातः। किमिदम् इति तरलिकां वदन्ती त्वरितगत्या अहम् अग्रे गता।

तदा *-हा हतोस्मि हा वञ्चितोऽस्मि किमिदम् अकृत्यम् आचरितम्। आः पापे महाश्वेते किम् अनेन मम मित्रेण ते अपकारः कृतः-* इत्यादि विलपन्तं कपिञ्जलम् अहं श्रुतवती ।

अग्रे च गत्वा मन्दभाग्या गतप्राणं पुण्डरीकं तत्र दृष्टवती । ससंभ्रमं धावित्वा तम् उपसृत्य किं किं प्रलपितवती कथं विलपितवती अहं न ज्ञातवती परं बहुधा विलपन्ती आत्मानम् निन्दन्ती तं मुहुर्मुहुः चुम्बितवती मुहुः मुहुः कण्ठे च गृहीत्वा आक्रोशितवती । अशिक्षितानि तानि रुदितानि चाटुसहस्राणि च कुतो जातानि इति अद्यापि न जानामि। महत् दुःखम् आसीत् महती च मूर्छा जाता।

 Public domain. Digitization Muthulakshmi Research Academy

इति कथयन्ती एव महाश्वेता पुनः अतिकष्टाम् अवस्थां स्मृत्वा मूर्छां प्राप्य वेगात् अधः पतन्ती आसीत् । तदा चन्द्रापीडः तां वेगेन धृतवान् । शीतोपचारैः तस्याः संज्ञां ग्राहितवान् ।

यदा सा चेतनां लब्धवती तदा चन्द्रापीडः आत्मनः श्रवणकुतूहलं तस्याः दुःखकारणम् इति ज्ञात्वा क्षमां याचितवान् ।

सा तम् आश्वास्य अवशिष्टां कथां श्रावितवती –

तथा अहं चन्द्रापीडस्य शरीरस्य पार्श्वे बहुधा आक्रोशितवती। प्राणत्यागार्थं चितां ज्वालयितुम् अहं तरलिकाम् आदिष्टवती च। तत्रान्तरे चन्द्रमण्डलात् निर्गत्य आकाशात् अवतीर्णः कश्चन दिव्याकृतिः महापुरुषः बाहुभ्यां चन्द्रापीडम् उत्क्षिपन् - *वत्से महाश्वेते प्राणत्यागं मा कुरु। पुनरपि तव अनेन सह भविष्यति समागमः* - इति माम् आश्वासयन् गगनम् उत्पतितः। अहं संभ्रमेण कपिञ्जलमुखं दृष्टवती। स च -*अरे दुरात्मन् मम सखायं स्वीकृत्य कुत्र यासि* -इति वदन् उन्मुखः अन्तरिक्षम् उत्पतितः । पश्यन्त्या मम पुरतः सर्वे ते अन्तरिक्षे नक्षत्रगणमध्यं प्रविष्टाः अभवन् । तरलिकया उपदिष्टा अहं पुनः समागमस्य आशया प्राणान् धृतवती। तां पापकारिणीं कालरात्रिसमां रात्रिं वर्षसहस्रायमाणां तस्मिन्नेव सरस्तीरे तरलिकया सह नीतवती । प्रातः उत्थाय सरसि स्नात्वा चन्द्रापीडस्य प्रणयेन तस्य कमण्डलुं स्वीकृत्य, वल्कलानि धृत्वा अक्षमालाम् आदाय सर्वान् आत्मीयान् परित्यज्य ब्रह्मचर्यं गृहीत्वा त्रिलोचनस्य शरणं गता ।

परेद्युः तातः सर्वं वृत्तान्तं श्रुत्वा मात्रा सह आगत्य मम व्रतदीक्षां विरमयितुं महान्तं यत्नं कृतवान्। अहं धृतव्रता दृढनिश्चयं कृतवती इति ज्ञात्वा तत्र एव बहून् दिवसान् यावत् उषित्वा दुःखेन स्वनगरं गतः। अहं च तदा प्रभृति ब्रह्मचर्यव्रतं पालयन्ती अत्र परमशिवसेवायां दिनानि यापयामि।

अहम् एवंविधा पापकारिणी मन्दभाग्या निरालम्बना निःसुखा च इति स्वम् उदन्तं श्रावयित्वा महाश्वेता मुक्तकण्ठम् उच्चैः रुदितवती। प्रथमम् एव तस्याः विषये चन्द्रापीडस्य महान् आदरः आसीत्। तस्याः वृत्तान्तश्रवणेन तस्य आदरः वर्धितः।

In Public domain. Digitization Muthulakshmi Research Academy

भगवति प्रणयोचितम् एव भवती कृतवती । प्राणानां त्यागस्य अपेक्षया पुनःसमागमस्य आशया जीवितुम् अर्हति । बलवान् खलु विधिः । धीराः आपदम् अतितरन्ति इत्यादिभिः मृदुवचनैः तां सान्त्वयित्वा अञ्जलिना जलम् आनीय मुखं प्रक्षालयतु इति तां प्रार्थितवान्। महाश्वेता तथा कृतवती ।

तावता कालेन सन्ध्यासमयः अभवत् । महाश्वेता उत्थाय भगवतीं पश्चिमसन्ध्याम् उपास्य वल्कलशयनीये उपविष्टा । चन्द्रपीडः अपि सन्ध्यावन्दनं समाप्य शिलातले मृदुभिः लतापल्लवैः शय्यां कल्पितवान्। तत्र उपविष्टः पुनः पुनः मनसि महाश्वेतायाः वृत्तान्तम् एव अनुभावितवान्। कुतूहलेन च शनैः सा तरलिका कुत्र गता इति महाश्वेतां पृष्टवान्। तदा महाश्वेता कथितवती –

कादम्बरी

गन्धर्वराजः चित्रारथः अप्सरसां कुले जातां मदिरानामकां कन्यां पत्नीं कृतवान्। तयोः पुत्री जाता । तस्याः नाम कादम्बरी । सा मम बालमित्रम् द्वितीयम् एव हृदयम्। मम दुःखावस्थया विषण्णा सा अपि मम दुःखसमाप्ति पर्यन्तं विवाहं न करिष्यामि इति शपथं कृतवती । तस्याः घोरशपथं विदित्वा महाराजः चित्रारथः दुःखितः ताम् अनुनेतुं मां प्रार्थयमानः सन्देशं प्रेषितवान्। अहं च तं संदेशं प्राप्य पुनश्च दुःखिता। कादम्बरीम् अनुनेतुं मम संदेशेन सह तरलिकां कादम्बर्याः समीपं प्रेषितवती। सा इतः निर्गता अनन्तरम् एव भवान् अत्र आगतः -

इति महाश्वेतया कथितं श्रुतवान् चन्द्रापीडः ।

तदा चन्द्रः आकाशमध्यं प्रविष्टः प्रकाशते स्म । निद्रामग्नां महाश्वेतां विलोक्य चन्द्रापीडः स्वजनान् वैशम्पायनादीन् स्मृतवान्। इदानीं ते सर्वे मम विषये किं चिन्तयन्तः स्युः इति आलोचनमग्न एव निद्रां यातः ।

प्रातःकाले दैनन्दिनं समाप्य महाश्वेता चन्द्रापीडश्च उपविष्टौ तदा तरलिका केयूरकनामकेन गन्धर्वदारकेण सह तत्र आगता। नूनपुरुषः कोऽयम् इति पृष्ट्वा सा चन्द्रापीडस्य विषये सर्वं ज्ञातवती । केयूरकः चन्द्रापीडस्य दिव्याकृतिं दृष्ट्वा प्रभावितः अभवत् ।

In Public domain. Digitization Muthulakshmi Research Academy

जपं समाप्य महाश्वेता कादम्बर्याः विषये तरलिकां पृष्टवती। तदा तरलिकया चोदितः केयूरकः कादम्बर्याः संदेशं श्रावितवान् यत् *कथमपि कादम्बरी महाश्वेतायाः दुःखकाले पाणिं न ग्राहयिष्यति* इति। तत् श्रुत्वा महाश्वेता *अस्तु अहम् एव आगत्य यथार्हम् आचरिष्यामि* इति उक्त्वा केयूरकं ततः प्रेषितवती । अनन्तरं रमणीयं हेमकूटं तत्रस्थान् आत्मीयान् जनान् च द्रष्टुम् आगच्छतु इति चन्द्रापीडं प्रार्थितवती । एकदिनं विश्रम्य द्वितीयदिनस्य प्रातः भवान् गन्तुम् अर्हति इति सा यदा उक्तवती तदा चन्द्रापीडः तया सह गन्धर्वलोकं गन्तुं स्वस्य सिद्धतां प्रकटितवान्। सर्वे च ते गन्धर्वनगराय प्रस्थिताः।

कादम्बरी-दर्शनम्

क्रमेण ते हेमकूटं गत्वा कन्यान्तःपुरं प्राप्तवन्तः। महाश्वेतायाः आगमनेन कादम्बर्याः सखीजनानां च महान् संभ्रमः जातः । महता आदरेण ताः स्वागतादिकं कल्पितवत्यः । ततः अग्रे कादम्बरीभवनसमीपं सर्वे गताः । मन्दिरान्तः एकस्मिन् मण्डपे मध्यभागे उपविष्टा अतिलोकसुन्दरीं कादम्बरीं चन्द्रापीडः दृष्टवान्। सा तस्मिन् समये चन्द्रापीडस्य विषये केयूरकं पृच्छन्ती आसीत्।

कादम्बर्याः सौन्दर्यातिशयेन नितराम् आकृष्टः चन्द्रापीडः आत्मनः प्रणयावस्थाम् अनुभूतवान्। तस्याः सौन्दर्यमहत्त्वम् अन्तः एव श्लाघमानः कादम्बरीमुखे चक्षुः स्थापितवान् कादम्बरी तदा तं दृष्ट्वा अयम् एव केयूरकेण आवेदितः महापुरुषः इति ज्ञात्वा ससंभ्रमम् उत्थिता। चन्द्रापीडस्य दर्शनेन च तस्याः लज्जा जाता। हस्तयोः कम्पः आरब्धः। कथमपि कतिपयपदानि अग्रे चलित्वा सा महाश्वेताम् उपगम्य ताम् आदरेण आलिङ्गितवती । महाश्वेता च कादम्बर्याः आलिङ्गनसौख्यम् अनुभूय महाराजस्य चन्द्रापीडस्य परिचयं कारितवती । अयं मम सुहृत् इति यदा महाश्वेता उक्तवती तदा चन्द्रापीडः प्रणामं कृतवान् । कादम्बरी ससंभ्रमं चन्द्रापीडं प्रणम्य महाश्वेतया सह पर्यङ्के उपविष्टा। परिजनेन ससंभ्रमम् उपनीतायां पीठिकायां चन्द्रापीडः उपविष्टः। परिजनेन आनीतेन जलेन कादम्बरी महाश्वेतायाः चरणौ प्रक्षाल्य उत्तरीयांशुकेन अपमृज्य पुनः पर्यङ्के उपविष्टा । कादम्बर्याः सखी मदलेखानाम्नी चन्द्रापीडस्य चरणौ प्रक्षालितवती। महाश्वेतायाः

In Public domain. Digitization Muthulakshmi Research Academy

अनामयादिकं पृष्टवती कादम्बरी । तत्पश्चात् कादम्बर्या दत्तं प्रणयपूर्णं ताम्बूलं गृहीतवान् चन्द्रापीडः। अत्रान्तरे राजा चित्रारथः राज्ञी मदिरा च महाश्वेतां द्रष्टुम् इच्छतः इति कञ्चुकिमुखात् श्रुत्वा महाश्वेता प्रस्थिता सती चन्द्रापीडेन कुत्र आस्यताम् इति कादम्बरीं पृष्टवती।

कादम्बर्याः निदेशननानुसारं चन्द्रापीडस्य वासः कादम्बर्याः प्रासादस्य समीपे वर्तमाने प्रमदवनस्थिते मणिभवने कल्पितः अभवत्। महाश्वेता महाराजस्य दर्शनार्थं गता। चन्द्रापीडः अपि तया सह निर्गत्य मणिभवनं गतः।

कादम्बरी- चन्द्रापीड-प्रणयः

कादम्बरी सत्वरं स्वप्रासादं गता शयनीये निपत्य चन्द्रापीडं स्मरन्ती लज्जां प्राप्तवती ।चन्द्रापीडः अपि मणिगृहं प्रविश्य कादम्बर्याः प्रणयचेष्टाः स्मरन् बहुधा वितर्कितवान्। अयं मानुषसुलभः मम भ्रमः स्यात् इति च तेन चिन्तितम् । उपवनम् आलोकितुं तस्य कुतूहलः जातः। सः क्रीडापर्वतम् अधिरूढः । तदा कादम्बरी अपि मदनपरवशा सौधस्य उपरितलं गता ततः चन्द्रापीडं पश्यन्ती आसीत्। चन्द्रापीडः अपि ताम् आलोकयन् स्थितः । एवं महान् कालः व्यतीतः। तत्रान्तरे प्रतीहारी आगत्य महाश्वेता प्रत्यागता इति निवेदितवती । तदा सौधतलात् कादम्बरी, क्रीडापर्वताग्रात् च चन्द्रापीड: अवतीर्य दिवसकार्यं समापयितुं गतौ।

चन्द्रापीडः दिवसकर्म समाप्य लतामण्डपे मरकतशिलातले उपविष्टः। तदा अपरस्य चन्द्रस्य प्रकाशः जातः । कुतूहलेन चन्द्रापीडः यदा दृष्टवान् तदा प्रकाशमानम् एकं महान्तं रत्नहारम् आदाय अनुरागेण आगच्छन्ती तरलिका दृष्टा। सा चन्द्रापीडम् उपसृत्य -*कादम्बरी भवति अनुरक्ता अतः तस्याः अनुरागः न वितथी कर्तव्य*- इति कथयित्वा तं हारम् उपायनी कृतवती।

कादम्बर्याः प्रणयचिह्नं तं हारम् अङ्गीकृत्य चन्द्रापीडः अतीव आनन्दितः। सन्ध्यासमयात् अनन्तरं कादम्बरी चन्द्रापीडश्च अवतीर्णौ। रात्रौ चन्द्रप्रकाशे केयूरकः आगत्य देवी कादम्बरी देवं द्रष्टुम् आगता इति कथितवान्।

 Public domain. Digitization Muthulakshmi Research Academy

तदा मदलेखया दत्तं हस्तावलम्बं प्राप्य कादम्बरी आगता। सा चन्द्रापीडस्य पुरतः भूतले उपविष्टा । चन्द्रापीडः अपि भूतले उपविष्टः । सर्वाः च उपविष्टाः सख्यः। तदा मुहूर्तम् इव स्थित्वा वक्तुम् आरब्धवान् चन्द्रापीडः-

देवि! अस्य अनुग्रहस्य योग्यताम् अहम् आत्मनि न पश्यामि एव। भवत्याः दृष्टिपातमात्रोण प्रीतः अहं दासजनः । एतावता अनुग्रहेण अतीव मुदितं मम मानसम्। मम जीवनं भवत्याः अधीने भवति । एतत् शरीरं एतानि इन्द्रियाणि इदं जीवितम् इति यत् इच्छति तत् परिगृह्य माम् अनुगृह्णातु - इति ।

चन्द्रापीडस्य वचनं श्रुत्वा मदलेखा सस्मितम् उक्तवती-*कुमार! खिन्ना भवति सखी कादम्बरी! न योग्यम् एतद् वचनम्। एतेन विना अपि भवन्तं परिगृहीतवती सखी* - इति ।

तदनन्तरं भारतवर्षस्य उज्जयिनीनगर्याः चन्द्रापीडस्य परिवारस्य च वृत्तान्तं पृष्ट्वा चन्द्रापीडात् तत् सर्वं ज्ञातवती । तदनन्तरं महाश्वेता शयनार्थं सौधशिखरं गता।

चन्द्रापीडः तत्र एव शिलातले उपविष्टः मुहुः मुहुः कादम्बर्याः निष्कारणप्रणयं महाश्वेतायाः सुजनतां स्मृत्वा आनन्दपरवशः अभवत् । मदलेखायाः महानुभावतां तस्य राज्यस्य रम्यतां भावयित्वा तां रात्रिं तथा नीतवान्। प्रातःकाले च मुखं प्रक्षाल्य सन्ध्यावन्दनं च विधाय चन्द्रापीडः केयूरकं कादम्बरी कुत्र वर्तते इति पृष्टवान् ।

सः गत्वा तद्विदित्वा च प्रत्यागत्य निवेदितवान् - कादम्बरी महाश्वेतया सह सौधवेदिकायाम् उपविष्टा- इति ।

तदा चन्द्रापीडः तत्र गत्वा महाभारतादिकथाकलापैः दिवसं नयन्तीं कादम्बरीं दृष्ट्वा महाश्वेतायाः च मुखं पश्यन् मन्दहासं कृतवान्। महाश्वेता अपि चन्द्रापीडस्य अभिप्रायं ज्ञात्वा कादम्बरीम् उक्तवती- *सखि! कुमारस्य वृत्तान्तम् अज्ञात्वा दुःखम् अनुभवति राजलोकः तत्र। अत इदानीं कुमारः गन्तुम् इच्छति। भवती अनुजानातु गमनाय* -इति।

In Public domain. Digitization Muthulakshmi Research Academy

कादम्बरी तदा गन्धर्वकुमारान् आहूय चन्द्रापीडस्य गमनाय सर्वसिद्धतां कृतवती । चन्द्रापीड: उत्थाय प्रथमं महाश्वेतां ततः कादम्बरीं प्रणम्य कादम्बर्यै स्वप्रेम निवेद्य केयूरकेण आनीतम् अश्वम् आरुह्य हेमकूटात् प्रस्थितः।

चन्द्रापीडस्य स्वदेशप्रस्थानम्

अचिरात् एव स्वं स्कन्धावार प्राप्य सः गन्धर्वकुमारान् प्रतिप्रेष्य स्वयं वैशम्पायनस्य पुरतः उपविश्य गन्धर्वलोकस्य कादम्बर्याः, महाश्वेतायाः च कथाभिः दिवसं नीतवान्।

अपरेद्युः प्रातःकाले प्रतीहारेण सह केयूरकः प्रविष्टः । तं दृष्ट्वा महता आनन्देन चन्द्रापीडः प्रत्युत्थाय तम् आदरेण आलिङ्ग्य कादम्बर्याः महाश्वेतायाश्च कुशलं पृष्टवान् । केयूरकः स्ववस्त्रान्तः वर्तमानं कादम्बर्या प्रेम्णा प्रेषितं पूगीफलं मलयजगन्धः ताम्बूलीदलानि इत्यादिकं दत्त्वा महाश्वेताप्रभृतयः सर्वे अपि बान्धवा भवन्तं द्रष्टुकामाः वर्तन्ते इति कथयित्वा चन्द्रापीडस्य हस्ते एकं हारं स्थापयित्वा अयं हारः भवता तत्र विस्मृत इति उक्तवान्।

चन्द्रपीडः तत् सर्वम् अपि महाप्रसादम् इव शिरसि कृत्वा विलेपनेन शरीरं विलिप्य हारं कण्ठे अकरोत् । तदनन्तरं केयूरकेण सह गन्धमादनगजस्य मन्दुरायाः च दर्शनं कृतवान्। स्वस्य इन्द्रायुधनामकस्य अश्वस्य पार्श्वे स्थितः कादम्बरीवृत्तान्तं पृष्टवान्। केयूरकः अपि कादम्बर्याः प्रणयातिशयं सविवरं कथितवान्। भवतः गमनानन्तरं देवी कादम्बरी महत्या शिरोवेदनया पीडिता दारुणेन ज्वरेण पीडिता केनापि मानसिकेन व्याधिना तप्ता इव तिष्ठति। सा भवतः वार्तां ज्ञातुं माम् आदिष्टवती इति केयूरकेण कथितं श्रुत्वा चन्द्रापीडः सत्वरम् अश्वम् आरुह्य जवेन कादम्बरीभवनं प्राप्तः । तत्र शीतसौधमध्ये विरहवेदनया खिन्नां शीतोपचारान् प्राप्नुवन्तीं कादम्बरीं दृष्टवान्।

कादम्बरी अपि चन्द्रापीडस्य आगमनेन महान्तम् आनन्दम् अनुभवन्ती ससंभ्रमं स्वस्मात् कुसुमशयनात् उत्थिता । चन्द्रापीडः तां प्रणम्य उपविष्टः । तदा केयूरकः चन्द्रापीडेन सह आगतायाः पत्रलेखायाः परिचयं कारितवान्। चन्द्रापीडः कादम्बर्या सह प्रणयवार्तालापं कृत्वा महान्तं कालं स्थित्वा तस्याः भवनात् निर्गतः ।

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

देवी कादम्बरी पत्रलेखां निवर्त्यमानाम् इच्छति इति केयूरकस्य मुखात् श्रुत्वा चन्द्रापीडः तथास्तु इति उक्त्वा स्वयं स्कन्धावारं प्रति प्रस्थितः । तदा तारापीडमहाराजस्य सकाशात् प्राप्तं पत्रं लेखहारकः तस्मै दर्शितवान् । चन्द्रापीडस्य वियोगेन दुःखितौ मातापितरौ तं शीघ्रं द्रष्टुम् इच्छतः इति पत्रात् ज्ञातवान् सः वैशम्पायनः अपि तादृशमेव पत्रं पितृभ्यां प्राप्तवान्।

अथ चन्द्रापीडः मेघनादनामानम् बलाहकपुत्रम् आहूय भवता पत्रलेखया सह आगन्तव्यम् इति आदिश्य कादम्बर्यै केयूरकमुखेन संदेशं प्रेषितवान् - *देवि भवत्या महान् प्रणयातिशयः दर्शितः । गुरोः आज्ञया अहम् उज्जयिनीं गतोऽस्मि । मम प्रणामाः कथनीयाः*- इति।

जरद्द्रविडः

सः तथा प्रस्थाय दिवसप्रवासेन महत्या अटव्या प्रयाणं कृतवान्। सायङ्काले च एकत्र चण्डिकालये उपविष्टं जरद्रविडधार्मिकम् कञ्चन दृष्टवान् । तस्य च वृद्धस्य द्रविडधार्मिकस्य चेष्टाभिः सर्वे विनोदिताः। कुमारः चण्डिकां प्रणम्य यदा प्रशान्तप्रदेशम् अन्विष्यन् परिचरितः तदा कुपितः अयं वृद्धधार्मिकः आरटन् आक्रोशन् च दृष्टः। कुमारः तं पृष्ट्वा तस्य मुखात् तस्य वृत्तान्तं ज्ञातवान्। रात्रौ तत्र एव शयनीयं कल्पयित्वा परिजनैः कुमारः निवेदितः।

तत्र विश्राम्यन् राजकुमार केवलं किंपुरुषयस्य स्मरणेन कादम्बर्या मधुरस्मृत्या च निशां नीतवान्।

उषसि पुनः प्रस्थाय अल्पैः एव दिवसैः उज्जयिनीं समागतः । राजकुमारः समागत इति श्रुत्वा उज्जयिनीनगरी एव मूर्तिमती प्रहृष्टा इव अभवत्। सर्वे पौराः आनन्दातिशयं दर्शितवन्तः । सर्वत्र उत्सव इव प्रादुरभवत्। तारापीडः अपि बहुभिः राजकुमारैः सह पुत्रस्य स्वागतं कृतवान्। चन्द्रापीडः दूरात् एव पितरं दृष्ट्वा अश्वात् अवतीर्य पितरं प्रणम्य अन्यान् मान्यवरान् च नमस्कृत्य राज्ञा सह मातुः भवनं गतवान्। तत्र सः दिग्विजयेन संबद्धाभिः अनेककथाभिः सर्वेषां मनांसि आकृष्य ततः शुकनासस्य भवनं गतः । तत्रापि वैशम्पायनस्य कुशलम् आवेद्य कञ्चित्कालम्

In Public domain. Digitization Muthulakshmi Research Academy

उषित्वा स्वभवनम् आगतः। तत्र स कादम्बरी-विरहेण पीडितः पत्रलेखायाः आगमनम् एव प्रतीक्षमाणः दिवसान् नीतवान्।

कतिपय-दिवसाः एवं गताः । एकदा मेघनादः आगत्य पत्रलेखायाः आगमनं राजकुमाराय निवेदितवान् । चन्द्रापीडः आनन्दितः स्वयं गत्वा पत्रलेखां स्वागतीकृत्य महाश्वेतायाः कादम्बर्याः च कुशलं पृष्टवान्। तस्याः सकाशात् किंपुरुषाणां कुशलादिकं ज्ञात्वा तां ततः एकान्तप्रदेशं नीतवान्। तत्र सावकाशं सविवरं च कादम्बर्याः प्रणयातिशयं कथयितुं तां सः प्रार्थितवान्।

तदा पत्रलेखा कथितवती –

कादम्बरीमदनावस्था

देव! भवद्गमनात् अनन्तरं तत्र अहं सुखेन वासं कृतवती । एकदा देवी कादम्बरी मां वल्लभबालोद्यानं नीतवती । तत्र वनवेदिकाम् अधिरूढा सुचिरं चिन्तयन्ती स्थिता । तस्याः नेत्रायोः काचन विषादच्छाया मया लक्षिता। मया प्रार्थिता अपि सा स्वविषादस्य कारणं वक्तुं न शक्ता। ततः कथञ्चित् आत्मानं निगृह्य सा स्वदुःखस्य कारणं कथितवती । एतया अवस्थया च अहं प्राणान् त्यक्ष्यामि इति कादम्बरीकथितं श्रुत्वा पत्रलेखा आदौ भीता कम्पिता उद्विग्ना च अभवत् । परन्तु शनैः शनैः तां पृष्ट्वा सा ज्ञातवती यत् कादम्बरी मदनपीडिता चन्द्रापीडस्य विरहेण दुःखिता इति । तदनन्तरं सा परमं प्रहृष्टा चन्द्रापीडस्य भाग्यम् अभिनन्दन्ती कादम्बरी बोधितवती यत्-अयं मदनदेवस्य एव प्रतापः न तु राजकुमारस्य चन्द्रापीडस्य दोषः- इति । भवती माम् इदानीं तत्र प्रेषयतु यत्र भवत्याः हृदयवल्लभः वर्तते। अहं भवत्याः प्रणयावेगं तत्र निवेदयिष्यामि–

इति पत्रलेखया कथितं वचनम् अमृतम् इव कर्णपुटैः पीत्वा आनन्दपूर्णेन चक्षुषा पत्रलेखाम् अभिनन्द्य *किं संदिशानि किम् आलपानि मम सर्वम् अपि वचनं परिहासाय भवेत् किं वदानि अशिक्षिताः प्रणयचेष्टा इति कारणेन सर्वथा संकोचं बालसहजां लज्जां च अनुभवामि* इत्यादि कादम्बरी कथयन्ती आसीत्। -

महाकवि-बाणभट्ट-रचित-कादम्बर्याः
पूर्वभागः समाप्तः

In Public domain. Digitization Muthulakshmi Research Academy

कादम्बरी-उत्तरभागः

तत् श्रुत्वा अहं चिन्तितवती - *सत्यमेव गरीयः खलु जीवितालम्बनम् इदम्। मन्मथहतकेन पीडिता इयं देवी कीदृशीं दशाम् अनुभवति* - इति । तदा तत्र दीपिकाधारिण्यः आगत्य दीपिकाः प्रज्वालितवत्यः ।

तासां प्रकाशे अहं देवीं विज्ञापितवती - *भवती चन्द्रापीडाय कुपितुं न अर्हति। एषा अहम् चन्द्रापीडम् आदाय प्रत्यागमिष्यामि*- इति ।

तया तथा अनुमता अहं भवत्सकाशम् आगता। देव! भवान् वत्सलः तथापि देवीं दूरीकुर्वता किमनुचितं भवता कृतम् इति पत्रलेखावचनं श्रुत्वा धीरोऽपि चन्द्रापीडः पर्याकुलः अभवत्। *मम एव दुश्चेष्टितम् इदम् यत् देव्या कादम्बर्या मानसः खेदः अनुभूत* इति चन्द्रापीडः पत्रलेखाम् उक्तवान् । -

तदा प्रतीहारी प्रविश्य प्रणामं कृत्वा निवेदितवती यत् *देवी विलासवती पत्रलेखया सह आयातं चन्द्रापीडं द्रष्टुम् इच्छति* इति ।

तत् आकर्ण्य चन्द्रापीडः पितृवात्सल्यं ज्ञात्वा कादम्बरीप्रणयं च स्मरन् मातुः संमुखे स्थित्वा तस्याः प्रणयभरिताः कथाः श्रुतवान्। तटे भ्रमणं कृतवान्। तत्र शिवालयं प्रति आधावतः अश्वान् विलोकितवान्। स्वयं कार्तिकेयालये स्थित्वा परिजनेषु एकतमं प्रेषयित्वा तुरङ्गमवृत्तान्तं ज्ञातुम् इष्टवान्। तदा दूरात् अश्वम् अधिरुह्य आगच्छन्तम् एकं पुरुषं दृष्ट्वा पत्रलेखे अयम् केयूरक इव भाति इति उक्तवान्।

सत्यं सः केयूरक एव आसीत्। तस्य मुखे विषादशून्यता दृष्टा। सः अश्वात् अवतीर्य दर्शनेन एव कादम्बर्याः कष्टदशाम् आवेदयति स्म। तम् आलिङ्ग्य कुशलं पृष्ट्वा चन्द्रापीडः करिण्याः उपरि तम् उपावेश्य पत्रलेखया सह स्वं भवनं गतः । तत्र विश्रान्तं केयूरकं वल्लभोद्यानं नीत्वा परिजनेभ्यः दूरे एकान्ते उपवेश्य तम् एवं पृष्टवान् केयूरक का वार्ता कादम्बर्याः महाश्वेतायाः चः इति।

तत् श्रुत्वा केयूरकः *किम् कथयानि? पत्रलेखां तत्र त्यक्त्वा यदा भवान् गतः ततः अनन्तरं महाश्वेता च तपसे आश्रमपदम् एव गता। देवी कादम्बरी च सर्वाः दिशः*

In Public domain. Digitization Muthulakshmi Research Academy

शून्याः पश्यन्ती दिवसान् नीतवती । एकदा मां विषादगर्भाभ्यां नेत्राभ्यां दृष्टवती तेन तस्याः संदेशं ज्ञात्वा तस्यै अनिवेद्य एव देवपादमूलम् अहम् आगतः इति कथितवान्।

तत् श्रुत्वा चन्द्रापीडः मूर्छितः इव अभवत्। संज्ञां प्राप्य सः *अलमनेन प्रसङ्गेण अहम् इतः अपि श्रोतुं न शक्नोमि* इति तं निवारितवान् । ततश्च पुनः कादम्बर्याः दर्शनार्थं गन्तुं मनः कृतवान्। परन्तु राज्याभिषिक्तेन मया पितृभ्याम् अनिवेद्य गमनं अयोग्यम् इति चिन्तयन् पर्याकुलितः अभवत्। एतस्मिन्नन्तरे स्कन्धावारः समीपम् आगतः इति वार्ता श्रुता । ततः प्रियमित्रस्य वैशम्पायनस्य प्रत्यागमनवार्ताम् अपि ज्ञात्वा चन्द्रापीडस्य चिन्ता अपगता। अतीव आनन्दितः सः केयूरकम् आहूय स्वम् आनन्दं कथितवान्।

तर्हि चन्द्रापीडस्य आगमनं तत्र श्रावयिष्यामि इति उक्त्वा गन्तुम् उद्युक्तः अभवत् केयूरकः ।

चन्द्रापीडः अपि मेघनादम् आहूय यत्र पत्रलेखया सह भवान् वासम् अकरोत् तत्र केयूरकेण सह गच्छतु इति तम् आदिष्टवान्। पत्रलेखाम् आहूय स्वसन्देशेन सह कादम्बरीं प्रतिं यातुम् आदिष्टवान्। मम आगमनपर्यन्तं देव्या प्राणसन्धारणाय एव यत्नः करणीयः इति चन्द्रापीडस्य प्रणयसंदेशं गृहीत्वा पत्रलेखा केयूरकेण सह प्रस्थिता । प्रत्यागतं वैशम्पायनं स्वागती कर्तुं पितुः अनुज्ञायै चन्द्रापीडः पितुः समीपं गतः।

यौवनसम्पदा प्रकाशमानं चन्द्रापीडं दृष्ट्वा तारापीडः अयं विवाहयोग्यं वयः प्राप्तवान् अतः देव्या सह विचार्य परिणयः करणीय इति तम् अभिप्रायं शुकनासाय निवेदितवान् । तत् श्रुत्वा चन्द्रापीडः अपि कादम्बर्याः प्राप्त्यै योग्यः समयः आसन्न इति विदित्वा आनन्दितः अभूत्।

परेद्युः परिजनैः सह चन्द्रापीड स्वयं स्वम् इन्द्रायुधनामकम् अश्वम् अध्यारूढः वैशम्पायनसंगमनाय इशपुरमार्गेण प्रस्थितः। योजनत्रयं यावत् लङ्घयित्वा सः स्कन्धावारं दृष्टवान् । अन्तः प्रविश्य *वैशम्पायनः कुत्र* इति पृष्टवन्तं चन्द्रापीडं भीता इव परिचारिकाः *क्व वैशम्पायन* इति उत्तरम् दत्तवत्यः।

 Public domain. Digitization Muthulakshmi Research Academy

वैशम्पायनप्रसंगः

तत् उत्तरं श्रुत्वा स्तब्ध इव जड इव गतप्राण इव अभवत् चन्द्रापीड । तदा सर्वे राजानः तम् उपावेश्य उक्तवन्तः –*वैशम्पायनः प्रयाणादिने अच्छोदसरसि स्नात्वा शिवालये भगवन्तं महेश्वरं प्रणम्य गन्तुं निश्चित्य पद्भ्याम् एव सरस्तीरं गतः । तत्र लतामण्डपे विचरन् कमपि जन्मान्तरवृत्तान्तं स्मरन् इव शून्य एव स्थितः। ततश्च एतत् स्थलं त्यक्त्वा अहं न आगमिष्यामि भवन्तः चन्द्रापीडमहाराजं गच्छन्तु इति अस्मान् उक्तवान्। वयम् अपि तस्य वैराग्यस्य कारणम् अज्ञात्वा तं सपरिकरं तत्र विहाय निर्गताः*- इति ।

तेषां मुखात् वैशम्पायनस्य वृत्तान्तं श्रुत्वा चन्द्रापीडः आश्चर्यचकितः स्वयं तत् कारणं ज्ञातुम् इष्टवान् । पुनः चिरं चिन्तयित्वा सपरिवारं वासभवनम् आगतः। ततः उज्जयिनीं गतः वैशम्पायनस्य अनागमनस्य वार्तया खिन्नयोः पित्रोः शुकनासमनोरमयोश्च दुःखपूर्णानि कोपसहितानि वचनानि श्रुत्वा आत्मानं दोषिणं भावितवान्। तदा वैशम्पायनम् आनेतुं निश्चित्य पितुः आज्ञां प्राप्तवान्।

यत्र महाश्वेता तत्र एव अयं वैशम्पायन इति मनसि कृत्वा नगर्याः निर्गतः सः सिप्रानद्याः तटे एकत्र निवासं कल्पितवान्।

दिवानिशं वैशम्पायनस्य स्मरणेन नितरां दुःखितम् अभवत् चन्द्रापीडस्य मनः।

तदा वृष्टिकालः समागतः । सर्वदा वैशम्पायनस्य कादम्बर्याः च स्मरणेन कुत्रापि चन्द्रापीडस्य मनसः शान्तिः न आसीत् । एकदा सपरिवार दिने भ्रमन् पुरतः आगच्छन्तं मेघनादं दृष्ट्वा -*वैशम्पायनः दृष्टः वा*-इति तं पृष्टवान्।

-वैशम्पायनं द्रष्टुं भवता प्रेषितः अहं तत्र न प्राप्तः तदभ्यन्तरे जलदकालः प्राप्तः । अच्छोदसरः वयं न प्राप्ताः परं पत्रलेखा केयूरकः च मां निवर्तितवन्तौ । ततः अहम् अत्र आगतः पत्रलेखा अपि अचिरात् आगमिष्यति -इति च मेघनादः निवेदितवान् ।

In Public domain. Digitization Muthulakshmi Research Academy

वर्षासु चन्द्रापीडः वैशम्पायनस्य अन्वेषणे स्वयम् एव प्रस्थितः अच्छोदसरसः तीरं प्राप्तः । वैशम्पायनः कदाचित् एतान् दृष्ट्वा अपसर्पेत् इति शङ्कया सर्वान् जागरूकान् कृतवान्। स्वयं च परिभ्रमन् चन्द्रापीडः अत्र महाश्वेतायाः आश्रमं गतः । तत्र महाश्वेता तरलिकया धृतशरीरा धवलशिलातले उपविष्टा आसीत्। चन्द्रापीडं दृष्ट्वा अपि तस्याः मुखे हर्षलेशः अपि न जातः । तदा चन्द्रापीडः मनसि शङ्कामान एव ताम् उपसृत्य प्रणामं कृतवान्। किम् एतत् इति तरलिकां पृष्टवान् । सा तु महाश्वेतायाः मुखम् एव दृष्टवती ।

शापकथनम्

तदा कोपं निगृह्य महाश्वेता शनैः जातं वृत्तान्तं कथितवती -

महाभाग! किम् आवेदयेत् इयं वराकी। अहम् एव आवेदयामि इदं दुःखम्। कादम्बर्याः सकाशात् अत्र तपः कर्तुम् आगता अहम् । अत्र एव भवत्सदृशम् एकाकिनं कञ्चन युवकं दृष्टवती । स च मां दृष्ट्वा प्रणयवचनैः मां किमपि कथयितुं प्रयत्तवान्। तदा अस्य दुष्कृतस्य फलम् अयम् अनुभविष्यति इति तरलिकाम् उक्त्वा एषः निवारणीयः इति सूचितवती । एकदा गाढरात्रौ निद्रामग्नां तरलिकां विहाय अहम् एका बहि चन्द्रिकायाम् उपविष्टा । चन्द्रमसि दृष्टिं निधाय पुण्डरीकस्य कपिञ्जलस्य च वृत्तान्तं स्मरन्ती आसम्।

तदा ज्योत्स्नाप्रकाशे अहं तत्र स्थितं तं युवकं दृष्टवती। उन्मतः अयं पाणिना अपि मां स्पृशेत् तर्हि मया इदं शरीरं विसर्जनीयम् एव भवेत् तदा पुण्डरीकस्य समागमाशा न भविष्यति इति अहं भीता अभवम्। स तु एवं चिन्तयन्तीम् एव माम् उपसृत्य प्रणयव्यथां कथयितुम् उद्युक्तः अभवत् । तदा तस्य वचनानि शल्यानि इव अभान् । क्रोधेन अहं -तादृशं वदन् त्वं न लज्जसे इति आश्चर्यम् । शुक इव वदन् त्वं शुकजातौ पत -इति तं शप्तवती।

मम वचनात् समनन्तरम् एव सः छिन्नः वृक्षः इव भूमौ पतितः। तदनन्तरं तत्परिजनात् श्रुतवती यत् असौ महाभागस्य एव मित्रम् भवति इति । इति उक्त्वा रुदती महाश्वेता अधोमुखी अभवत्।

 In Public domain. Digitization Muthulakshmi Research Academy

तत् श्रुत्वा प्रथमम् एव कादम्बर्याः वैशम्पायनस्य च वियोगदुःखेन च पीडितस्य चन्द्रापीडस्य हृदयं शोकावेगेन स्फुटितम् अभवत्। सः छिन्नः वृक्षः इव सहसा भूमिं प्राप्तः । तरलिका सत्वरं महाश्वेतायाः शरीरं विहाय चन्द्रापीडस्य शरीरं धर्तुम् उत्थिता । चन्द्रापीडं पतितं दृष्ट्वा सर्वे परिजनाः सकोलाहलं महाश्वेतां निन्दितुम् आरब्धवन्तः । इन्द्रायुधः अपि अचेतनं चन्द्रापीडं दृष्ट्वा शोकेन स्वस्य अश्वत्वं त्यक्तुम् उद्युक्त इव अभवत्। तदा एव चन्द्रापीडस्य दर्शनार्थं पत्रलेखया सह आगता कादम्बरी अपि तत्र भूमौ पतितं निश्चेष्टं चन्द्रापीडस्य शरीरं दृष्टवती ।

गतप्राणं चन्द्रापीडं दृष्ट्वा कादम्बर्या मूर्छा इव जाता । पत्रलेखा तु अचेतना अधः पतिता। चिरात् लघुसंज्ञा अपि कादम्बरी स्तब्धा इव शून्यं पश्यन्ती स्थिता । मदलेखा शोकं निरोद्धुं प्रार्थितवती ।

कादम्बरी शून्यहृदयेन विहस्य उक्तवती–

अयि उन्मत्ते! कठिनं मम हृदयं न स्फुटति। सर्वान् परित्यज्य मम संगमनाय अत्र आगतः मम प्रियतमः अद्य माम् अपि परित्यज्य स्वर्गं गच्छति। अस्मिन् समये रोदनेन अहं कथम् अमङ्गलं कुर्याम्? अस्मिन् समये मरणम् एव जीवितम्। जीवितम् एव मरणम्। मम उपरि तव स्नेहः चेत् मम विरहं सर्वे यथा न जानीयुः तथा गत्वा त्वया करणीयम्- इति मदलेखाम् उक्त्वा उपसृत्य महाश्वेताम् आलिङ्ग्य भणितवती - प्रियसखि ! तव तु कथमपि पुनःसमागमस्य प्रत्याशा विद्यते । मम तु सर्वतः हताशायाः नास्त्येव प्रत्याशा। मिलावः जन्मान्तरे- इति उक्त्वा चन्द्रापीडस्य शरीरम् अर्चित्वा तस्य चरणौ आर्द्राभ्यां कराभ्याम् अत्क्षिप्य अङ्केन धृतवती । तदा तस्याः स्पर्शेन इव चन्द्रापीडस्य शरीरात् अव्यक्तरूपं चन्द्रधवलं किमपि ज्योतिः उद्गतम्।

आकाशवाणी

आकाशवाणी च स्फुटं श्रुता -*वत्स महाश्वेते! तव पुण्डरीक शरीरं मम लोके रक्षितं वर्तते । तव समागमः भविष्यति तिष्ठ। एतस्य संस्कारः न करणीयः। सर्वथा समागमपर्यन्तं शरीरम् इदं रक्षणीयम्*- इति।

सर्वे तत्रस्थाः तां वाणीम् अद्भुतम् इव श्रुतवन्तः ।

In Public domain. Digitization Muthulakshmi Research Academy

पत्रलेखा तु तदा एव संज्ञां प्राप्य इन्द्रायुधस्य समीपं धावित्वा देवेन विना तव अपि अवस्थानं न योग्यम् इति वदन्ती एव तेन अश्वेन सह अच्छोदसरसि आत्मानं क्षिप्तवती ।

द्वितीयम् अद्भुतं तदा तत्र जातम्।

कपिञ्जलः शापवृत्तान्तः च

पत्रलेखायाः इन्द्रायुधस्य च निमज्जनानन्तरम् एव तस्मात् सरसः जलात् एकः तेजस्वी तापसबालकः सहसा एव उत्थितः। सः महाश्वेतायाः समीपं गत्वा *राजपुत्रि अपि मां प्रत्यभिजानासि* इति पृष्टवान् । सा तस्य वदनं विलोक्य *भगवन् कपिञ्जल, कथं न। देवेन विना त्वम् एकाकी कथम् अत्र आगतः ? सः कुत्र नीतः किमर्थं वा नीतः तस्य का वार्ता* इत्यादिकं पृष्टवती ।

सः आश्चर्यचकितान् सर्वान् दृष्ट्वा ताम् उक्तवान् -

गन्धर्वराजपुत्रि! श्रूयताम्! तदा पुण्डरीकम् आदाय गच्छन्तं पुरुषं दृष्ट्वा क्व मम प्रियवयस्यं गृहीत्वा यासि इति वदन् तं पुरुषम् अनुसरन् उत्पतितः। सः उत्तरम् अदत्त्वा आकाशमार्गेण चन्द्रलोकं गतः । तत्र महोदयानामक-सभायां महति पर्यङ्के च पुण्डरीकस्य शरीरं स्थापयित्वा -कपिञ्जल! अहं चन्द्रमाः पुरा तव मित्रेण अहं इन्दुहतक यथा अहं त्वया करैः संतापितः म्रिये तथा त्वम् अपि कर्मभूमौ भारते वर्षे जन्मनि जन्मनि उत्पन्नानुरागः समागमस्य सौख्यम् अप्राप्य वेदनाम् अनुभूय प्राणान् त्यक्ष्यसि इति शप्तः।

अपराधं विना तेन शप्त इति कोपेन अहम् अपि झटिति- *त्वम् अपि अहम् इव सुखं दुःखं च अनुभविष्यसि* -इति प्रतिशापम् अस्मै दत्तवान्। ततः अनन्तरम् एव चिन्तितवान् यत् *अयं पुण्डरीकः महाश्वेतया स्वयं वृतः । इयं च महाश्वेता मम किरणेभ्यः जातात् अप्सरसः कुलात् उत्पन्ना। अनेन स्वयंकृतात् दोषात् मनुष्यलोके वारद्वयम् अवश्यं जन्म स्वीकर्तव्यम्। अन्यथा जन्मनि जन्मनि इति तेन कथितस्य शापवचनस्य सार्थकता न भवति। शापदोषस्य निवृत्तिपर्यन्तम् अस्य शरीरं रक्षणीयम् इति शरीरम् एतत् अत्र आनीतवान्। अधुना त्वं गत्वा वृत्तान्तम् एनं श्वेतकेतवे*

In Public domain. Digitization Muthulakshmi Research Academy

निवेदयातपस्वी सः अस्य प्रतिक्रियां करिष्यति इति मां कथयित्वा मां ततः विसर्जितवान्।

ततः निर्गतः अहं प्रियमित्रस्य विरहदुःखेन अन्धः इव आकाशमार्गे गच्छन् अपरम् एकं वैमानिकम् अलङ्क्रयम् ।

स च माम् *अश्वः भव* इति शप्तवान्।

दुःखेन अहं तम् उपसंहाराय प्रार्थितवान् तदा सः *त्वम् अश्वः भूत्वा यस्य वाहनं भविष्यसि तस्य स्वामिनः अवसाने स्नात्वा पूर्वरूपं प्राप्स्यसि* इति अनुगृहीतवान्।

भगवन्! यदि एवं ततो विज्ञापयामि! शापवशात् मम प्रियमित्रं पुण्डरीकः भूमौ उत्पत्स्यति । तेन सह अवियोगेन मम कालः यायात् इति तं वरं प्रार्थितवान्।

सः वैमानिकः दिव्येन चक्षुषा अवलोक्य *उज्जयिन्यां तारापीडस्य पुत्ररूपेण चन्द्रमाः उत्पत्स्यति । तव मित्रं पुण्डरीकः अपि मन्त्रिणः पुत्ररूपेण उत्पत्स्यति। त्वम् इतः चन्द्रावतारस्य राजकुमारस्य वाहनं भविष्यसि* इति उक्तवान्।

तदा एव अहं समुद्रे पतितः ततः अश्वः भूत्वा निर्गतः । तथापि मम ज्ञानं न नष्टम्। अहम् एव चन्द्रापीडं किंनरमिथुनस्य दर्शनाय नीत्वा अत्र प्रापितवान्। अधुना तव शापाग्निना दग्धः अन्यः नास्मि । मम मित्रस्य पुण्डरीकस्य अवतारः एव इति तस्य वचनं श्रुत्वा महाश्वेता दुःखातिशयेन रुदती भूमौ पतिता।

ताम् आश्वासयन् कपिञ्जलः उक्तवान् -

गन्धर्वराजपुत्रि! अत्र तव दोषः नास्ति । शापस्य प्रभावात् एतत् सर्वं जातम्। सम्यक् कृतस्य तपसः असाध्यं न विद्यते। तपसा त्वं पुण्डरीकम् अवाप्स्यसि इति समाश्वासितवान्।

कादम्बरीं दीनमुखीं च दृष्ट्वा पत्रलेखावुत्तान्तस्य प्रश्ने कृते *राजपुत्रि जले पातात् अनन्तरं तस्याः किम् अभवत् इति न जाने । एतत् सर्वं ज्ञातुम् अहं मम पितुः श्वेतकेतोः पादमूलं गच्छामि* इति उक्त्वा आकाशम् उत्पतितः । तस्य गमनात्

In Public domain. Digitization Muthulakshmi Research Academy

अनन्तरं कादम्बरी दुःखं निरूध्य महाश्वेताम् उक्तवती *प्रियसखि त्वम् एव मम गुरुः । कथय किं करवाणि* - इति तत् श्रुत्वा सा *सखि किम् अन्यत् करणीयम्। अप्रत्यक्षाः देवताः प्रतिमारूपेण पूजिताः भवन्ति। अत्र तु साक्षात् चन्द्रस्य अवतारः तव अङ्के विद्यते* इति कथितवती ।

तदा कादम्बरी चन्द्रापीडस्य शरीरम् उत्थाप्य एकस्मिन् दोषरहिते शिलातले स्थापयित्वा स्वयं वेषभूषादिकं परित्यज्य शुद्धवस्त्राद्वयं धृत्वा तत्र एव दिनानि नीतवती।

चन्द्रापीडस्य शरीरे तावत् कोऽपि दोषः न उत्पन्नः इति सर्वेषाम् अपि अद्भुतम् इव आसीत्।

कादम्बरी एकदा मदलेखाम् उक्तवती- *त्वं गत्वा मम वृत्तान्तं पितृभ्यां निवेदय! यथा तौ दुःखातिरेकं न प्राप्नुतः तथा कुरु*- इति संदेशं दत्त्वा तां प्रेषितवती।

ततः वृष्टिकालः गतः । एकदा मेघनादः कादम्बरीसमीपम् आगतः। तारापीडः विलासवती शुकनास इत्याद्याः चन्द्रापीडस्य दर्शनार्थम् उत्सहन्ते। तैः चन्द्रापीडं प्रति राजपुरुषाः प्रेषिताः तानहं देव्याः संमुखे आनयानि इति कादम्बरीं पृष्टवान्।

प्रविशन्तु ते । परं चन्द्रापीडः अच्छोदसरसः तीरे तिष्ठति इति तैः वक्तव्यम्। शरीरविनाशस्य वृत्तान्तः न कथनीयः इति कादम्बरी तान् उक्तवती । ते तथेति ताम् उक्त्वा उज्जयिनीं गताः।

वार्ताहरैः अच्छोदसरसः तीरे राजकुमारः दृष्ट इत्येव वार्ता कथिता । तारापीडः विलासवती च तां श्रुत्वा दुःखम् अनुभूतवन्तौ। तदा कादम्बर्याः सकाशात् मेघनादेन प्रेषितः दूतः त्वरितकनामकः आगत्य सर्वं वृत्तान्तं कथयितुम् आरब्धवान्।

चन्द्रापीडस्य हृदयं स्फुटितम् इति श्रुत्वा एव तारापीडस्य दुःखं वर्धितम्। *इतोऽपि न श्रोष्यामि* इति उक्त्वा सः प्राणत्यागं कर्तुम् उद्युक्तः अभवत्। तदा त्वरितकः शापनिवृत्तिविषये अपि अद्भुतम् इव तं वृत्तान्तं श्रावितवान्।

तेन सर्वे समाश्वासिताः अभवन् ।

In Public domain. Digitization Muthulakshmi Research Academy

शुकनासः अपि राजानं सान्त्वयन् उक्तवान् –

देव! एतत् सर्वथा असंभवं नास्ति । देवताः मनुष्ययोनौ जायन्ते। किं च देवेन भवता देव्याः उदरं प्रविशन् चन्द्रः दृष्टः। मयापि स्वप्ने पुण्डरीकस्य दर्शनं जातम्। अत एतौ शापवशात् जातौ इत्यत्र नास्ति संदेहः। अतः कुशलस्य वर्धनाय अकुशलस्य च शमनाय प्रयत्नः कार्यः इति । तदुक्तं श्रुत्वा तारापीडः दुःखितः अभवत्। देवी विलासवती मनोरमा च दुःखिते आस्ताम्। सर्वे एव अच्छोदसरसः प्रदेशं गन्तुं सिद्धाः अभवन् । कतिपयैः दिवसैः सर्वे ते अच्छोदसरसः प्रदेशं प्राप्ताः ।

दूरात् एव राजलोकं दृष्टवन्तौ तौ तारापीडः विलासवती च। राजा मेघनादं चन्द्रापीडवृत्तान्तं पृष्टवान् *राजकुमारः दिने दिने नवां कान्तिं प्राप्य वर्धते परं शरीरेण निश्चेष्टः तिष्ठति* इति मेघनादस्य मुखात् विदित्वा तारापीडः विलासवतीम् आश्वासितवान्। द्वौ अपि महाश्वेतायाः समीपं गती । तयोः आगमनस्य वार्तां ज्ञात्वा दुःखिता स्वापराधेन लज्जिता च महाश्वेता धावित्वा गुहाभ्यन्तरं प्रविष्टा कादम्बरी तु सखीजनं विसृज्य मोहान्धकार पुत्रस्य प्राप्ता । शुकनासेन सह राजा आश्रमं प्रविष्टः । गतचेतनं शरीरं दृष्ट्वा देवी विलासवती परमं दुःखं प्राप्य उच्चैः रोदनम् आरब्धवती। तदा ताम् अनुनीय राजा आवाभ्यां शुकनासः मनोरमा च संधारणीयौ इति ताम् उक्तवान्।

कुत्र मे वत्सस्य जीवितनिबन्धनं वधूः इति विलासवती पृष्टवती ।

तत् श्रुत्वा शून्यहृदया कादम्बरी ताम् उपसृतवती । ताम् अङ्के आदाय विलासवती मातः त्वं समाश्वसिहि ! *त्वम् अमृतमयीव मम पुत्रं रक्षसि* इति उक्तवती।

तदा चन्द्रापीडस्य नामग्रहणेन इव लब्धसंज्ञा कादम्बरी सत्वरं गुरूणां वन्दनं कृतवती । *आयुष्मति दीर्घकालम् अविधवा भव* इति आशीर्वादं प्राप्य सा तत्र एव स्थिता ।

राजा मुहुः मुहुः पुत्रस्य शरीरं स्पृष्ट्वा आलिङ्ग्य चुम्बित्वा दृष्ट्वा च आनन्दितः मदलेखाम् आहूय *स्पर्शनसुखं प्राप्तम् आवाभ्याम्। अस्तु अस्माभिः अत्र स्थित्वा*

In Public domain. Digitization Muthulakshmi Research Academy

किमपि करणीयं नास्ति । अतः वधूः एव अत्र अस्य पार्श्वे तिष्ठतु इति उक्त्वा वासस्थानं गतः।

ततश्च राजलोकम् आहूय वानप्रस्थस्य स्वीकारः तेन कृतः। सर्वभोगान् परित्यज्य देव्या विलासवत्या शुकनासेन मनोरमया परिवारेण च सह तस्मिन् वने वासम् आरब्धवान् । प्रतिदिनं च चन्द्रापीडस्य मुखकमलं पश्यन् सः दिनानि नीतवान्।

कथायाः उपसंहारः

इति वैशम्पायनस्य कथां कथयित्वा भगवान् जाबालिः सर्वान् तान् मुनीन् दृष्ट्वा *कथारसात् अतिदूरम् अतिक्रान्तः अस्मि । अयं स एव कामेन पीडितः स्वस्य एव अविनयस्य फलम् अनुभवितुं शुकजातौ जातः शुकनासस्य पुत्रः वैशम्पायनः* इति कथितवान्।

तत् श्रुत्वा एव मम ज्ञानं प्रत्यागतम् । लज्जमान इव शनैः भगवन्तं प्रार्थितवान् *प्रसीदतु भगवन्। मम पक्षिणः अपि प्रियवयस्येन सह एकत्र वासः भवतु* इति ।

तत् श्रुत्वा पुनः कुपितः सः महामुनिः- *दुरात्मन् अधुनापि अविनयं भजसि पक्षौ न अद्यापि उद्भिन्नौ। प्रथमं संचरणाय योग्यः भव तदनन्तरं च मां प्रष्टुम् अर्हिष्यसि* इति उक्तवान्।

कुतूहलेन हारीतः पितरं पृष्टवान् *तात! महान् विस्मयः मम भवति । दिव्यलोके संभूतस्य स्वल्पम् आयुः कथम् ? मुनिजातौ वर्तमानस्य च तादृशी कामपरता कथम् जाता? इति अस्मान् कथयतु भवान्* इति।

तदा सः महामुनिः समाहितवान्- *स्पष्टम् एव वर्तते वत्स! अयं अल्पसारात् स्त्रीवीर्यात् एव उत्पन्नः । आयुर्वेदेऽपि श्रूयते यत् अल्पसारात् स्त्रीवीर्यात् गर्भे वा म्रियते, मृतः वा जायते, जातः वा दीर्घकालं न जीवति इति । अधुना अपि अल्पायुः एषः शापस्य अवसाने अक्षयम् आयुः प्राप्स्यति* इति।

In public domain. Digitization Muthulakshmi Research Academy

अहं भगवतः जाबालेः वचनं श्रुत्वा शिरः अवनम्य प्रणामं कृत्वा उक्तवान्- *भगवन्! अहं पक्षिजातौ जातः किमपि कर्तुम् असमर्थः । मम वक्तुम् अपि सामर्थ्यम् इदानीम् एव भवताम् अनुग्रहेण संप्राप्तम्। अन्यस्मिन् जन्मनि अहं कथं भवेयम् इति कदा ज्ञास्यामि ?* इति ।

तत् श्रुत्वा स महर्षिः *यदा ज्ञास्यसि तदा ज्ञास्यसि अधुना गतप्राया रजनी अग्निकार्यसमयः च समासन्नः। अधुना अत्र एव इयं कथा आस्ताम्* इति उक्त्वा गोष्ठीं भङ्क्त्वा उत्थितः ।

तावत्पर्यन्तं कथायाः रसास्वादे निमग्नाः समयं च न ज्ञातवन्तः तापसाः कथां स्मृत्वा हा कष्टम् इति वदन्तः स्वस्थानं गताः । हारीतः मां नीत्वा एकत्र स्थापयित्वा स्वयं प्रातःकाले करणीयं कर्तुं गतः ।

तदा अहं चिन्तितवान्- *एतादृशं मुनिजन्म दुर्लभम्। अहं तिर्यग्योनौ जातः कथम् आत्मानम् उद्धरेयम्। अधुना प्राणानां परित्यागः योग्यः* इति।

तदा स्मितेन मुखेन हारीतः प्रविश्य *पितुः श्वेतकेतोः सकाशात् कपिञ्जलः माम् अन्विष्य आगतः* इति अभिहितवान्। *आनन्देन तं द्रष्टुम् इच्छामि* इति अहं यदा उक्तवान् तदा हारीतः मां भगवतः जाबालेः सकाशं नीतवान्।

जन्मान्तरे अपि तं दृष्ट्वा प्राणाः मम प्रत्यागताः इव अभवन्। सखे द्वयोः जन्मनोः अनन्तरम् अपि त्वां दृष्ट्वा मम मनः उद्विग्नं भवति। उत्थाय बाहू प्रसार्य आलिङ्गनं कर्तुम् इच्छामि इति अहम् उक्तवान्। स तु मम चरणौ तस्य शिरसि स्थापयित्वा उच्चैः रोदनं कृतवान्। तदा तस्य सान्त्वनं कुर्वन् अहं तम् एवम् उक्तवान् - *सखे ! कपिञ्जल! पापिनः मम एतत् युज्यते। त्वं तु बालः अपि एतैः दोषैः न स्पृष्टः असि। अधुना कथय का वार्ता पितुः। मम वृत्तान्तं श्रुत्वा कुपितः वा किम् उक्तवान्* इति।

तदा कपिञ्जलः माम् उक्तवान् –

सखे ! तातः पूर्वम् एव सर्वं जानाति अतः मम अश्वरूपस्य निवृत्तेः समनन्तरम् अहं तस्य एव पादमूलं गतः । तदा दुःखपूर्णं मां दृष्ट्वा सः वत्स! अयं तव

In Public domain. Digitization Muthulakshmi Research Academy

दोषः न अस्ति । तस्य जन्मनः अनन्तरं मया प्रतीकारःकरणीयः आसीत्। प्रतीकारं न कृतवान्। त्वम् अत्र एव तिष्ठ । काले अहम् एव वदिष्यामि त्वया कुत्र गन्तव्यम् इति। अद्य माम् आहूय भगवतः जाबालेः आश्रमं गन्तुम् आज्ञप्तवान्। तेन अहम् अत्र आगतः इति।

सः तथा वदन् मम अवयवान् स्पृशन् च दुःखितः अभवत्।

कपिञ्जलं तस्याम् अवस्थायां दृष्ट्वा अहं *सखे! मम कृते त्वया सर्वं दुःखम् अनुभूतम्। अश्वरूपेण जन्म प्राप्तम् अपि । अहं तु पापी* इत्यादिकं वदन् पूर्ववृत्तान्तस्य कथनेन कालं यापितवान्।

मध्याह्ने कपिञ्जलः भोजनं कृत्वा मम समीपम् आगतः- *अहं गमिष्यामि! इतः त्वया न चलितव्यम् इति तातपादानाम् आदेशं श्रावयितुम् आगतः एव* इति उक्त्वा प्रस्थितः।

तदा प्रभृति हारीतः एव मम संवर्धनं कृतवान्। कतिपयैः दिवसैः मम पक्षौ संजातौ ।

एकदा अहं चिन्तितवान् *मम पक्षौ जातौ । ज्ञानम् अपि वर्तते । चन्द्रापीडस्य जन्म विषये न जानामि चेदपि महाश्वेतायाः वासस्थानं जानामि खलु। तत्र एव गत्वा तिष्ठामि* इति उत्तरां दिशं लक्ष्यीकृत्य आकाशमार्गेण प्रस्थितः किञ्चिद् दूरमेव गतः श्रान्तः अभवम्।

एकत्र जलं पीत्वा विश्रान्तः । किञ्चित्समयात् अनन्तरं यदा चक्षुषी उन्मीलितवान् तदा पुरतः एकः चण्डालः मां पञ्जरे बद्ध्वा स्थितः । मया पृष्टः सः माम् उक्तवान् *त्वां खादितुम् अस्माकम् इच्छा नास्ति । तव विषये श्रुत्वा मम स्वामिनः पुत्री अतीव आकृष्टा त्वां प्राप्तुम् इच्छति। भाग्यात् अद्य त्वं प्राप्तः । वयं त्वां तत्र नयामः* इति ।

तत् श्रुत्वा अहम् अतीव दुःखितः अभवम् । मम अविनयस्य फलं च बहुधा निन्दितवान्। स तु चण्डालः मां तेषां पट्टणं नीत्वा तस्य स्वामिनः पुत्र्यै दत्तवान्। सा मां दृष्ट्वा *आः पुत्रक प्राप्तोसि अधुना कुत्र गच्छसि तव कामचारित्वं दूरीकरिष्यामि*

 Public domain. Digitization Muthulakshmi Research Academy

इत्यादिकम् उक्त्वा एकस्मिन् दारुपञ्जरे मां स्थापितवती । अहम् अपि मम विधिं निन्दन् तत्र प्रविष्टः। एते च मम वाचा आकृष्टाः मां गृहीतवन्तः । अहं मौनम् एव आश्रयामि चेत् निर्वेदात् कदाचित् मां मुञ्चेयुः। मम अस्याः स्थितेः कारणं मम इन्द्रियाणाम् अनिग्रहः खलु इदानीं सर्वाणि इन्द्रियाणि निग्रहीष्यामि इति चिन्तितवान्। चण्डालैः आनीतं पानीयं भोज्यं वा न भुक्तवान् -

तदा सा चण्डालकन्यका माम् आदरेण दृष्ट्वा *उत्कृष्टतमां जातिं प्राप्य इदानीं पक्षियोनौ जातः असि । चण्डालस्य हस्तात् आनीतम् आहारादिकं न स्वीकरिष्यामि इति कः ते आग्रहः । जीवनं धारयितुं गृहाण एतत्* इति उक्तवती।

चण्डालानां मुखात् तादृशानि वचनानि अपेक्षितानि वा योग्यानि वा न आसन्। अतः अहं चकितः आहारादिकं गृहीतवान्। परन्तु मौनं न त्यक्तवान्।

एवम् अहं तत्र एव तरुणः जातः । एकदा प्रातःकाले यदा अहं नेत्रद्वयम् उन्मीलितवान् तदा मम पुरतः देवनगरम् इव नगरम् आसीत्। अहम् अपि कनकपञ्जरे आसम्। किमेतत् इति मम प्रश्नात् पूर्वमेव सा माम् आदाय भवतः पादमूलम् आगता। एषा का किमर्थं मां गृहीतवती, केन कारणेन वा अत्र आनीतवती इत्यादि अहम् अपि न जानामि। भवान् इव अहम् अपि एतत् श्रोतुम् उत्कण्ठितः अस्मि -इति।

शुकरूपी वैशम्पायनः एवं स्वां कथां यदा श्रावितवान् तदा शूद्रकराजः प्रतीहारीम् आहूय चण्डालकन्यकाम् आस्थाने प्रवेशितवान् । सा शोभायमाना तत्र प्रविश्य राजानम् उक्तवती -

भुवनभूषण! कादम्बर्याः नयनानन्द चन्द्र ! त्वया अस्य दुर्मतेः पूर्वजन्मनः वृत्तान्तः श्रुत एव। पित्रा निषिद्धः अपि अयं कामान्धः वधूसमीपं प्रस्थितः । अहम् अस्य दुरात्मनः जननी लक्ष्मीः । एवं प्रस्थितम् एतं दिव्यनेत्रेण ज्ञात्वा एतस्य पिता माम् एतम् अनुसर्तुम् आदिष्टवान्। एषः प्रायश्चित्तम् अनुतापं च विना एवमेव इतः अपि निकृष्टयोनौ पतिष्यति। अतः रक्ष इति तस्य आदेशं स्वीकृत्य मया सर्वं कृतम् अधुना सर्वं तत् कर्म परिसमाप्तम्। लोकसंपर्कं परिहर्तुम् अहं चण्डालजातिं स्वीकृतवती। अयं शापावसानस्य समयः । तत् भवन्तौ द्वौ अपि स्वशरीरे परित्यज्य प्रियजन-संगमसुखं प्राप्नुताम् इति।

In Public domain. Digitization Muthulakshmi Research Academy

तस्याः वचनं श्रुत्वा राजा शूद्रकः आत्मानं चन्द्रापीडं ज्ञातवान्। पुरतः शुकरूपे वर्तमानः वैशम्पायननामकः पुण्डरीकः इति ज्ञातवान्। तदा कादम्बर्याः स्मरणं जातम् । तस्मिन् एव क्षणे शरीरं विहाय तस्य प्राणाः उत्क्रान्ताः। अपि च वैशम्पायनस्य शरीरात् अपि प्राणाः उत्क्रान्ताः ।

तत्र महाश्वेतायाः आश्रमे चन्द्रापीडस्य शरीरं रक्षन्ती कादम्बरी सुरभिमासे तदा तं जीवन्तम् इव आलिङ्गितवती । तेन तस्याः प्रणयमयेन कण्ठग्रहेण अमृतस्य सेकः इव अभवत् । सपदि चन्द्रापीडशरीरे जीवितं पुनः प्राप्तम्। सुप्तः अधुना प्रतिबुद्ध इव सर्वेषाम् अङ्गानां चेष्टाः प्राप्य आत्मानं कण्ठे गृहीतवतीं कादम्बरी महता प्रेम्णा कण्ठे गृहीत्वा अवलोकितवान् । सा तु भयेन कम्पमाना ग्रहीतुं मोक्तुं वा न पारयन्ती तं दृष्टवती।

तां तस्याम् अवस्थायां वर्तमानां दृष्ट्वा चन्द्रापीडः आनन्दपूर्णेन वचसा उक्तवान्प्रिये! भयं मास्तु। अनेन तव कण्ठग्रहेण पुनर्जीवितः अस्मि। मम शापदोषः अद्य नष्टः । मानुषं शूद्रकनामकं शरीरं त्यक्त्वा पुनः आगतः । तव प्रियसख्याः महाश्वेतायाः अपि प्रियतमः मया सह एव शापनिवृत्तिं प्राप्तवान् इति।

तस्य वचनस्य समाप्तौ पुण्डरीकः महाश्वेतया सह तत्र आगतः। तस्य पार्श्वे कपिञ्जलः आसीत्।

दूरात् एव महाश्वेतां दृष्ट्वा आनन्देन धावितवती कादम्बरी अश्रुमुखी ताम् आलिङ्गितवती । चन्द्रापीडः अपि पुण्डरीकं आलिङ्गितवान्। तदा केयूरकः एताम् आनन्दवार्तां श्रावयितुं हेमकूटं गतः । मदलेखा अपि धावित्वा तारापीडस्य विलासवत्याः च समक्षं गत्वा चन्द्रापीडः वैशम्पायनेन सह पुनरुज्जीवितः इति कथितवती । आनन्देन सर्वे एकत्र संमिलिताः।

पुत्र तव शापदोषात् अहं तव पिता जातः । त्वम् जगद्वन्दनीयः मयापि नमस्कार्यः इति तारापीडः चन्द्रापीडस्य पादयोः पतितः । चन्द्रापीडस्य माता विलासवती तावत् पुत्रप्रेम्णा तस्य शिरसि ललाटे कपोलयोः च चुम्बित्वा आनन्दं प्रकटितवती । तदा चन्द्रापीडः पुण्डरीकं दर्शयित्वा *एषः भवतोः वैशम्पायनः* इति शुकनासं मनोरमां च उक्तवान्। पुण्डरीकः विनयेन नम्रवदनः अभवत् । संदेशं

In Public domain. Digitization Muthulakshmi Research Academy

श्रावितवान् तदा कपिञ्जलः प्रविश्य श्वेतकेतुमहर्षेः संदेशं श्रावितवान् -*अयं पुण्डरीकः मया केवलं सवंर्धितः । वैशम्पायन एव इति एनं मत्वा भवन्तौ एतं रक्षताम्। परः इति अयं न उपेक्षणीयः इति* तं श्रुत्वा सर्वे अपि नितराम् आनन्दिताः।

एवं रात्रिः गता प्रभातम् अभवत्। प्रातः एव चित्ररथः मदिरया साकं, हंसः च गौर्या साकं तत्र आगतौ । चन्द्रापीडस्य कादम्बर्या सह वैशम्पायनस्य महाश्वेतया च सह विवाहः हेमकूटे अभवत्। विवाहेन समं राज्यं प्राप्य चन्द्रापीडः वैशम्पायनः च आनन्दितौ अभवताम् । तदा विषण्णा कादम्बरी *पत्रलेखा कुत्र* इति चन्द्रापीडं पृष्टवती।

सा रोहिणी एव शापवशेन जायमानं मां चन्द्रमसम् अनुसृत्य आगत्य मनुष्यजन्म प्राप्तवती । जन्मान्तरस्य प्राप्तिसमये अहं तां चन्द्रलोकं प्रेषितवान् इति चन्द्रापीडः कथितवान्।

ततः दशरात्रं तत्र स्थित्वा चन्द्रापीडः उज्जयिनीम् आगत्य पुण्डरीके राज्यभारं न्यस्य पित्रोः पादसेवार्थम् आश्रमं गतवान् । एवं क्वचित् उज्जयिन्यां, क्वचित् हेमकूटे, क्वचित् हिमसरसि, क्वचित् चन्द्रलोके इति अभिमतेषु स्थानेषु कादम्बर्या सह विहरन् प्रणयस्य परां काष्ठाम् अनुभूतवान्।

चन्द्रापीडः कादम्बरी, पुण्डरीकः महाश्वेता इति सर्वे सुखानि अनुभवन्तः आनन्दस्य परां कोटिम् अधिगतवन्तः।

इति पेन्नावंशजेन मधुसूदनेन कृतः

कादम्बरीकथासारः

समाप्तः

***

In Public domain. Digitization Muthulakshmi Research Academy

मुद्गलचरितम्

(हैदराबादत: संस्कृतभारतीपत्रिकायां प्रकाशितम्)

वाणीनाथमुमेशमिन्दुभगिनीनाथञ्च मूर्तित्रयं
प्रत्यूहौघविनाशकं हरसुतं विघ्नेशमादौ भजे ।
गायत्रीं रसराज्यलाभशरणं नत्वा रसानां गुरुं
शान्तं श्रीयुतमुदगलाख्यचरितं चक्षेऽहमीड्यं मुदा ॥१॥

देशेऽस्मिन् श्रुतिधर्मसेवनपरा नैके हि जातास्सदा
वैराग्यं निजजन्मनैव सहजं सम्प्राप्य मुक्ता ध्रुवम् ।
शान्तो विप्रमणिर्जहौ च सकलं स्वर्गादिकं तत्त्वतः
तादृग्धर्मनिधिश्च वेदनिलयो जीयात्सदा मुद्गलः ॥२॥

सूत्रधारः - अये सुगुणे। कुतोऽयं विलम्बः? गुणग्राहिण्यपीयं परिषद् सोत्कण्ठा कियन्तं कालं प्रतीक्षते । तदेहि शीघ्रम् ।

नटी - (सत्वरं प्रविश्य) आगमनविलम्बोऽयं मर्ष्यतां विबुधगणेन।

सूत्रधारः - आगमनविलम्बकारणमभिधीयताम् ।

नटी - अत्रागन्तुमेवाहमात्मानं त्वरयन्ती यदा गृहाद्बहिरागच्छम्, तदा कोऽपि धूलिधूसरितवपुः पृष्ठावसक्तोदरोभिक्षुरूपो मे मार्गं न्यरुणत् ।

सूत्रधारः - (सोद्वेगं) अपि त्वां भर्त्सितवान सः?

नटी - (सकोपं) न हि; न हि अलं परिहास्य । स मां किञ्चिद् भैक्ष्यमयाचत ।

सूत्रधारः -अपि किञ्चित्तस्मै दत्तम् ?

नटी - (सभ्रुकुटीक्षेपं) कथं दास्यामि ? यदि गृहे विद्यमानं सर्वमपि विश्राणन कर्मण्येवमेव व्ययीक्रियते तर्हि भिक्षापात्रमेव नौ हस्ते स्थास्यति । अतोऽहमेव तं भर्त्सयित्वा प्रेषितवती ।

सूत्रधार:- (सक्रोधं) अलमलमेवं कथयित्वा । अपि न जिह्रेषि त्वम् ? सर्वं धर्मेषु शिखरायमाणो नो धर्मस्त्वयाऽद्याधः पातितः । किं न श्रुतं

In Public domain. Digitization Muthulakshmi Research Academy

त्वया 'अतिथिदेवो भव' इति श्रुतिवचनम्। अपि च

देवास्तत्र हि वर्तेरन्नतिथिर्यत्र पूज्यते ।
देवास्सर्वे प्रतिष्ठेरन् यद्ययं त्वपमानितः ।।३।।

नटी - (सपश्चात्तापं) त्वराक्रान्तमनाः सर्वमेतत् न लक्ष्यीकृतवती । सत्वरमिदानीमेव गत्वाऽहं तं सर्वत्रान्विष्य सादरमत्राह्वये।

सूत्रधारः - सुवर्णावकाश एकदैव समुपागच्छति न वारं वारम् । यदैव सोऽतिथिर्नो गृहमागच्छति तदैव सत्कर्तव्यम् । अलं परितप्य। परन्तु आस्माकीनोऽयं धर्मः सर्वथा सर्वैः त्रिकरणैः सेव्यः।

नटीः - अद्यप्रभति न कदाऽपि याचकं कमप्यहमवमंस्ये। आर्य ! कश्चन सन्देहो मे मनस्युदेति ।

सूत्रधारः - कोऽसौ निस्सङ्कोचं पृच्छ ।

नटी - अतिथिर्नाम अस्माकमेव बान्धवः सुहृद् वा भवितुमर्हति । कथं वा याचकः कश्चिदतिथिरूपेण स्वीकार्यः?

सूत्रधारः - (सानुनयं) नैवेयं भावना समीचीना। अतिथिर्नाम न केवलमस्मद्बान्धवः सुहृद्वा । यः कोऽपि त्वत्त उपकारमभिकांक्षति स सर्वोऽपि ते अतिथिरेवास्तु।

नटी - (सहर्षं) इदानीमहं गतसन्देहास्मि तेऽनुग्रहात्। कार्यं किं वा पुरस्कृत्य समाहूताऽहं भवता ?

सूत्रधारः- अतिथिसेवातत्परतायाः प्रथम निदर्शनं, निराडम्बरताया दर्पणं, सनातनधर्मजीवनस्य प्रथमं क्षणञ्च मुद्गलाख्य महर्षेर्महोन्नतं चरितमद्य सहृदयहृदयतर्पणाय रूपयावः। प्रदर्शयिष्यमाणरूपकवस्तुनि मनः संधेहि । अपि सज्जीकृतोऽस्माकं नटवर्गः?

नटी- अथ किम् । (उभौ निष्क्रान्तौ)
(ततः प्रविशति मुद्गलमहर्षिः केदारे व्रीहीन् संचिन्वन्)

मुद्गल - चक्षुषी मे प्रमोदयन्तीयं प्राभातिकी सुषमा नूनं मे मनश्चाह्लादयति ।

In Public domain. Digitization Muthulakshmi Research Academy

तथा हि -

पूर्वाद्रिं भजमान एष भगवान् कारुण्यसिन्धू रविः
पुष्णन्नस्ति गभस्तिवारिनिचयैस्संसारवल्लीमिमाम् ।
तत्तेजोगुणबद्धशुद्धमतयः केचिद् बुधाः प्रत्यहं
सान्ध्यवन्दसन्ध्याहोमनियमैस्तं सर्वदोपासते॥४॥

अपि च –

अनाप्तमात्सर्यमलीमसास्ते खले कपोता युगपत् पतन्ति ।
अचिन्तितोपानतमाप्य भक्ष्यं सदा मुदा ते सकलं सहन्ते ॥ ५ ॥

अतः -

वैराग्यनीवीप्रतिलब्धैनिघ्नं
स्वजीवनं सर्वहिते नियन्तः।
इमे जना स्युर्यदि शान्ततेचत्ताः
नास्त्यन्यदाप्तव्यमतोऽस्ति लोके ॥ 6 ॥

देवपित्रतिथिक्रियार्थमहं व्रीहिकणानत्रावाकीर्णानाचिनोमि।

(इति ब्रीहिसञ्चयं नाटयति)

(पुनः शिर उन्नमय्य स्वान्तिके व्रीहिकणाशया भ्रमन्तमेकं विहङ्गमं दृष्ट्वा करुणाक्रान्तस्वान्तः तमुद्दिश्य वदति)

मुद्गलः - अये पत्रिमित्र ! व्रीडाशिल इव किमर्थं तत्रैव दूरे चरसि ? गृहाण मे हस्तादिमान् व्रीहिकणान् ते चञ्चवा। (इति स्वहस्तात् तस्मै पक्षिणे ददाति व्रीहिकणान्)

(ततः मुद्गलपुत्रः धावन्नागत्य पितरमुपसृत्य वक्ति)

मुद्गलपुत्रः - तात ! अभिवादये । देवपूजायाः समय आसन्न इति विवक्षुर्माता। एतावत् पर्यन्तं सञ्चितैः व्रीहिकणैरेव वयमद्य गृहं निवर्तिष्यामहे। कियल्लब्धमद्य।

मुद्गलः - (स्वसुतमन्तिकमानीय फालाग्रे आघ्राय) देवपूजा निर्वर्तितेति मातरं ब्रूहि।

मुद्गलपुत्रः - तत् कथं ? भवानत्रैवास्ते नु ?

मुद्गलः - (विहस्य, सानुनयं पुत्रस्य शिरसः उपरि दक्षिणकराग्रं निधाय) 'परोक्षप्रिया

In Public domain. Digitization Muthulakshmi Research Academy

इव हि देवाः' । परोक्षरूपेणैवास्माकं वरिवस्यामामोदितवन्तः । वत्स !

देवाः प्रकाशाद् भुवि कीर्त्यमानाःपारोक्ष्यमिच्छन्ति सदेति वेदः ।
अतोऽत्र सर्वेऽपि नरा हि देवाःजीवाश्च देवा इति मे मनीषा ॥७॥

मुद्गलपुत्रः - एष एवास्तु मे जीवनपरिक्रमः जनक ! परिणतवयसक इव चकास्तेऽयं दिनमणिः तथा हि-

प्राचीं गुहामिव हरिर्विजहांत सूर्यः
तूर्णं प्रविश्य गगनं गहनं प्रयाति ।
हिंस्यादयं निजकरैरिति भीतचित्ता
रात्रिर्मृगीव शयनाद्धि पालायतेऽसौ ॥८॥

अपि च - **अयोमयं वस्तु हि लोहकारः यथा प्रताप्यैव मृदुत्वमिच्छेत् ।**
तथा तमोमग्नमिमं हि लोकं पातुं तपत्येष मरीचिमाली ॥९॥

अतो वयं गृहमभियामः ।

मुद्गलः - आम्। विलम्बीकृतोऽद्य मे दैनन्दिनकार्यक्रमः गच्छामः। (उभौ निष्क्रान्तौ)

इति प्रथमं दृश्यम् ।

****

अथ द्वितीयं दृश्यम्

(मुद्गलमहर्षेराश्रमः । तत्र मुद्गलः, तद्धर्मपत्नी, तत्सुतश्च भोजनार्थं सर्वं सज्जीकृत्य तिष्ठन्ति)

मुद्गलः - वत्स ! भोजनवेला तावदुपस्थिता । अतस्त्वं बहिर्गत्वा यः कोऽपि अत्रागच्छतीति वा पश्य। कंचित्कालं प्रतीक्षामहे।

मुद्गलपुत्रः– तथा । (इत्युक्त्वा बहिर्गाच्छति। ततः कश्चन वृद्धभिक्षुकः मुद्गलसुतश्च प्रविशत:)

मुद्गलसती - तात। इत एवागच्छति कश्चन देव: अतिथिरूपेण ।

मुद्गलः - प्रिये ! जलमानय! अमुष्यातिथिदेवस्य पादौ प्रक्षाल्य वयमास्माकीनं

In Public domain. Digitization Muthulakshmi Research Academy

दुरितमपि प्रक्षालयामः ।

मुद्गलसती – जलमिदमानीतम्। (वृद्धभिक्षुकस्य पादौ प्रक्षाल्य वस्त्रेण प्रोंछ्य ताञ्जलबिन्दून् सर्वेऽपि शिरसि धारयन्ति)

मुद्गलः - (अञ्जलिं बद्ध्वा) महात्मन्! भवदागमनेन धन्या वयं सञ्जाताः । अद्यैव जीवनं मे सफलम् । अत्रैवाभ्यवहाराय प्रसीदतु भवान् । यतो हि -

भवत्पदद्वद्वरजोविशेषः पुनाति नस्सर्वमलीमसाच्च ।
रजोगुणाधिक्यमिदं हि चित्रं रजोगुणाधिक्यमपाकरोति ।।१०॥

मुद्गलसती - (सविनयमञ्जलिं बद्ध्वा) महानुभाव! मार्गायासमपनीय समागच्छतु भवान्। अत्र सर्वमपि सज्जीकृतमस्ति।

वृद्धभिक्षुकः -(सहर्ष) महाशयौ भवन्तौ याचकमपि अतिथिरूपेण सम्मानयन्तौ भुवि सदा स्थायुकं नाम लभेयाताम् ।

महोन्नतं नो धनकीर्तिमूलं महर्षिसूक्तं समुपास्य धर्मम् ।
जगद्धितायाऽत्र यतो भवन्तौ प्रवर्तमानावत एव पूज्यौ ।।११

मुद्गलः - यत्किञ्चिद्वस्तुमात्रसत्त्वात् साहसमिवाचरतोऽस्मान् ह्रेपयन्ति भवद्वचांसि। तथा हि –

न पण्डितोऽहं न पुनर्धनाढ्यस्ततो न जाने व्रतदानकीर्तिम् ।
तथाऽपि चार्तस्य पिपासितस्य क्षुधातुरस्यापि सुसेवकोऽहम् ॥१२॥

मुद्गलपत्नी -भोज्यापदार्था इमे कवोष्णास्सन्ति । प्रसीदतु भवान् ।
(वृद्धभिक्षुक उत्थायास्तरणे उपविशति)

मुद्गलः - (हस्ते जलं गृहीत्वा भिक्षुकाय ददद्वदति) सर्वान्तर्यामिने सच्चैतन्यरूपिणे श्रीपरमेश्वराय नमः । (भिक्षुकः तज्जलं गृहीत्वा आचम्य पूर्वापोऽशनं करोति) (मुद्गलस्तु सकुटुम्बः क्षुधार्तस्य तस्य वृद्धभिक्षुकस्य मुखं पश्यन् तस्य आवश्यकतानुसारं पदार्थान् परिवेषयति)

वृद्धभिक्षुकः - (भोजनं परिसमाप्य मुद्गलकुटुम्बमापृच्छमानो वक्ति) धन्यस्त्वम् ते परिवारश्च । बहोः कालादनन्तरमहमुदरं मधुरपदार्थैः पूरितवान् ।

 CC-0. In Public domain. Digitization Muthulakshmi Research Academy

स्वस्तिरस्तु वः । (इत्याशीर्भिरभिनन्द्य ततो गच्छति)

मुद्गलः - अमृतपानपीनमिव मे मानसमद्य । पक्षे एकवारमेवं व्रतं चरतामस्माकं पुण्यपरिपाकवशाल्लभ्यन्ते नन्वेतादृशा अतिथयः।

(स्वसुतमुद्दिश्य) वत्स ! पुनरेकवारं गत्वा कोऽप्यतिथिरागच्छन्नस्ति वेति निर्वर्णय ।

मुद्गलपुत्रः - तथा ! (गत्वा निर्वर्ण्य प्रत्यागच्छति) तात ! न कोऽपि दृश्यते । अपि कञ्चित्कालमधिकं प्रतीक्षेमहि ?

मुद्गलः – आम्। तथा कुर्मः। (इति पञ्चनिमेषपर्यन्तं प्रतीक्षते, कोऽपि आगन्तुरिति निश्चित्य) वत्स इतोऽप्यागन्तुः कोऽप्यस्तीति न मन्ये । वयम् भोजनार्थ-मन्तर्गच्छामः । मात्रे निवेदय ।

(मुद्गलसुतवचनं श्रुत्वा मुद्गलपत्नी सर्वं सज्जीकरोति)

मुद्गलपत्नी - इदानीमागम्यताम् । परिवेषितास्सर्वे पदार्थाः ।

(सर्वेऽपि ते त्रय उपविशन्ति । मुद्गलस्ससुतः आपोऽशनाय उद्युङ्क्ते । ततः कश्चन कण्ठरवः -भवति भिक्षां देहीति' श्रूयते।)

मद्गलः- (सानन्दं)पूर्वमेवोक्तवानहम्। दिष्ट्या समुपगतोऽयमतिथिदेवः अहमेव तं स्वागतव्याहृतिभिः प्रसन्नीकरोमि युवां प्रतीक्षेयाथाम्। (इत्युक्त्वा बहिर्गच्छति)

(ततः प्रविशति कश्चन चण्डाल इव भासमानो मलिनवपुर्दण्डधारी पुरुषः भिक्षां देहीति पुनर्वदन्)

मुद्गलः -(सत्वरं प्राञ्जलिस्तमभिगच्छन्) नमोवाकं प्रशासे मे सांदृष्टिकमतिथिदेवम्। आगच्छतु भवान्मे गृहान्तः प्रसीदतु तावदभ्यवहाराय च ।

पुरुषः - भवतु । नितरां क्षुधापीडितो मे देह इदानीं पतयालुरस्ति । अतः स्नानादिकं किं पादप्रक्षालनमपि नं करोमि। किमेतद् रोचते भवते?

मुद्गलः – प्रसीदतु देवः । भवानेवात्र प्रमाणम् । यदि भवतः पादस्पर्शेण पूता मे गृहभूमिस्तदा धन्याः खलु वयम् । आगच्छतु गृहान्तः ।

(पुरुषः गृहाभ्यान्तरं प्रविशति)

In Public domain. Digitization Muthulakshmi Research Academy

मुद्गलसती - (स्वगतं) यदि बहवः अतिथयः युगपदागच्छेयुः तदा किं करणीयमिति चिन्ताविष्टाऽहमासम् आगतस्त्वेक एव । इदानीं विगतभीरहम् ।

पुरुषः - क्षुधा मां बहु बाधते । अविलम्बमानयतु सर्वपदार्थान् ।

मुद्गलः - वत्स ! शीघ्रं जलमानय ।

पुरुषः - (कदलीपत्रे परिवेषितान् पदार्थान् दृष्ट्वा हृष्टःसन्) अये ! बहोः कालादनन्तरं समुपलब्धं षड्रसोपेतमिदं भोजनम् ।तथा हि –

दृष्ट्वा पदार्थानमितादरेण लालाऽमितं मे वदनात् स्रुताऽद्य ।
भक्ष्यन् सुभोज्यान् मधुरानिमांश्च वह्नाविवाज्यं हविषीकरोमि ॥१३॥

मुद्गलः - किं परिवेषयामि भवन् ! कृपया रुचितं पृच्छतु ।

पुरुषः - यावन्तः पदार्थास्तव समीपे सन्ति तान् सर्वानप्यानय । (मुद्गलस्सर्वमानीय पुरुषस्यान्तिके स्थापयति ।) (खाद्यपदार्थान् दृष्ट्वा स पुरुषः सृक्किणी लिहन् सर्वं खादित्वा उद्गारं करोति । ततः हस्तप्रक्षालनाद्यनन्दरं)

पुरुषः - (स्वोदरं तृप्त्या हस्तेन परामृशन्) तृप्तोऽस्मि । सुखिनः स्यात यूयम् अहं पुनः साधयिष्यामि । (इति ततःनिष्क्रामति । मुद्गलस्तमनुसृत्य किञ्चिद्दूरं प्रत्यागत्य सतीसुतयोर्वदने पश्यति)

मुद्गलः - कथञ्चित् एनमतिथिदेवमतर्पयाम्ज्ञ । नोचेन्महाननर्थो अभविष्यत् । अस्तु, वत्स! कदलीपत्रापाकरणे मातुस्सहायको भव। वयमद्य जलपानेन व्रतसमाप्तिं करिष्यामः। (तत्प्रदेशशुद्ध्यनन्तरं स्वान्तिकमागतां सतीं तदनुसारिणं सुतञ्च करुणया पश्यन् तयोर्भुजयोः स्वकरौ निधाय)

मुद्गलः - **आद्यां सृष्टिमिदं हि पुण्यसलिलं पीत्वा वयं जातु नः**
कुर्मस्तृप्तिमतो न कश्चिदपि नः शिष्टं न वा वाञ्छितम् ।
एकस्यापि यदीह सुष्ठु भविता मोदस्तदा धन्यता
नोचेदीदृशकर्मपाककलिले लोके गताश्चागताः ॥१४॥

(सर्वेऽपि जलपानेनैव तृप्ता भूत्वा व्रतसमापनं कुर्वन्ति। मुद्गलः साञ्जलिर्देवं प्रणमति)

इति द्वितीयं दृश्यम्

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

अथ तृतीयं दृश्यम्

(वृद्धभिक्षुकः अन्यः कोऽपि याचकश्च कस्यचित् वृक्षस्य छायायामुपविश्य भाषेते)

याचकः - अत्रागत्य वयं सुखिनो जीवितं नयामः । एकोऽयं मुद्गलो वितरणशाली जातु सर्वानतिशेते ।

वृद्धभिक्षुकः - तस्य महोन्नतं व्यक्तित्वं प्रशंसितुमहं न शक्तः । तस्य कुटुम्बे सर्वेऽपि सदृशमेव भावमवलम्बमानास्सन्ति। न कमप्यन्यं भावमालम्बन्त इत्याश्चर्यम् ।

त्यक्त्वा समस्तं महनीयमूर्तिः कश्चित् कदाचित् मजतेऽत्र धर्मम् ।
तस्यापि यद्यस्ति कुटुम्बधैर्यं धन्यस्सदा मानवजातिरत्नम् ॥ १५॥

याचकः - त्वत्कृपयाऽहमपि पक्षे एकवारमत्र सुष्ठु भोजनादिकं लभमानो सुखं जीवामि। परन्तु कञ्चन विषयज्ञानुमशक्तोऽस्मि । किमर्थं वैते पक्षे एकवारमेवान्नदानं कुर्वन्ति ? भिक्षुकान् भोजयन्ति ! अपि तज्जानाति भवान् ?

वृद्धभिक्षुकः - (मुद्गलमहर्षिं तदौन्नत्यं स्मरन्निमीलिताक्षः कञ्चित्कालं जीषमुषित्वा चक्षुषी उन्मील्य) धन्यस्य वंशो योऽलङ्कृतोऽस्ति महेच्छस्यास्य जन्मना । किं वा वदामि ? तत् तेषां व्रतम् । अपि च, न केवलं पक्षे एकवारमितरान् भोजयन्ति, स्वयमपि पक्षे एकवारं भुञ्जते ।

याचकः- किमुक्तम् ? पक्षे एकवारमेव त्रयोऽपि भुञ्जते वा, तत्किमर्थम् ?

वृद्धभिक्षुकः -व्रतपालनार्थम्। एषाऽस्ति शिलवृत्तिः । मुद्गलमहाशयः शिलवृत्तिं उञ्छवृत्तिञ्चाश्रित्य स्वस्य कुटुम्बस्योदरं पिपूरयिषुरास्ते। तदित्थम्। मुद्गलः केदारेषु तत्र तत्र विकीर्णान् क्षेत्राजीवैश्च त्यक्तान् व्रीहिकणान् अवचिनोति । पचदशदिनानि यावत् याबन्तो व्रीहिकणास्स-चीयन्तेतावद्भिरेव देवपित्रतिथिसेवां करोति पक्षं एकवारम् । तथा स्वधर्मं पालयन्नस्ति सः ।

याचकः - नितरां विस्मयाविष्टोऽस्मि । कथं को वात्र विश्वसिति लोके?

वृद्धभिक्षुकः - **विश्वासराहित्यमिहास्ति हेतुः सर्वत्र नाशस्य न कोऽपि वेत्ति ।**
धर्मे न कस्यापि कलो युगे तु विश्वास इत्येष महाननर्थः ॥ १६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

अपि च, गतपक्षषट्के कश्चन चण्डालरूपधारीमुद्गलगृहम-विराममागत्य कुटुम्बपोषणार्थं देहधारणार्थञ्च यत्किञ्चिद्भोज्यं शिष्यते तदपि कबलयन्नस्ति। पश्यतु चित्रम्। अवधारयतु परीक्षाम। पक्षे एकवारमेव भुञ्जानानामुदरघातकोऽयम् । उन्मत्त भाति, स्वस्थो न कोऽप्येवं निर्लज्जश्यचेरत् ।

याचकः- किमुक्तं भवता ? गतमासत्रयाबधि न किञ्चिदपि भुक्तं तेन कुटुम्बेनेति महदाश्चर्यमावहति । कथं वा कोऽपि जीवति विनाऽऽहारम् ?

वृद्धभिक्षुकः – प्राकृतानामस्मादृशानाविषये देहधारणार्थम् आहारापेक्षास्ति । न तु तादृशानां विषये ये धर्मं धरन्ति धर्मेण धार्यन्ते च ।

आहारमाश्रित्य जना वसेयु-र्निर्धर्मकाः केवलदेहरूपाः ।
यो धर्ममाश्रित्यं वसेद् य लोके धर्मेण जीवेदिति सत्यमेतत् ॥ १७॥

आहार आधार इतीह लोके
यश्चिन्तयेत्तस्य तथैव नाशः ।
नित्यं तु धर्मं भुवि सेवमानो
नित्यं लभेतात्मपदं सुधीरः ॥ १८ ॥

याचकः - त्वमपि महानुभावोऽसि यस्य मुखादेवं हितकारीणि वचांसि निस्सृतानि; धन्योऽहं त्वत्सङ्गात्या ।

वृद्धभिक्षुकः - धन्या वय मुद्गलसमकालिकतया ये तज्जीवनमेवं साक्षात्कृत्य विस्मयाविष्टाः स्फूर्तिञ्च लभमानाश्शान्ता जीवनं नयामः । अपि च, मुद्गलः सकुटुम्बः पौर्णमास्यामनावस्यायां वा भुङ्क्ते ।

याचकः- श्व एव पूर्णिमादिनम् ।

वृद्धभिक्षुकः -आम् ! प्रातरेव श्वं सहितावावां मुद्गलं द्रक्ष्यावः । न केवलं भिक्षायै, अपि तु तत्पुण्यचरितमेताभ्यां चक्षुर्थ्यां विलोक्यात्मानंपावयितुम् ।

याचकः –अवश्यम्। अहमपि त्वन्मुखाद्विनिःसृतं तत्पुण्यचरितं श्रावं श्रावं केनचिन्मधुरभावेन संपूरितान्तःकरणोऽस्मि । पुनस्तं दिदृक्षे ।

इति तृतीयं दृश्यम्

In Public domain. Digitization Muthulakshmi Research Academy

अथ चतुर्थं दृश्यम्

(मुद्गलगृहम् । वृद्धभिक्षुकः याचकश्च भोजनादिकं परिसामाप्य मुद्गलेन सह भाषमाणौ तत्रैव तिष्ठतः । ततः प्रविशति दण्डधारी पूर्वपरिचितः पुरुषः ।)

वृद्धभिक्षुकः - (याचकं प्रति) स एवास्ति मदुक्तो जाल्मः । पुनरप्यद्य सर्वमपि भोज्यं जठराग्निसात् कर्तुमायाति। गच्छावः, आवामेव तं भर्त्सयित्वा प्रेषयावः। (द्रावणि गन्तुमुद्युञ्जाते)

मुद्गलः - (तयोस्सम्भाषणं श्रुत्वा साकुलं तयोर्हस्तो गृहीत्वा) न, न। महानुभावौ भवन्तावेवं धार्ष्टयं प्रदर्शयितुं नार्हतः । स मे देवः । गृहं मे पावयितुमागच्छति पुञ्जीभूतपुण्यतेजः । मा वदतं किञ्चित । (वृद्धभिक्षुको याचकश्च विरतोद्यमौ तत्र तिष्ठतः। मुद्गलस्तु प्रसन्नवदनः तं चण्डालमभ्येत्य)

मुद्गलः - महाशय ! कऽपया निधीयेतां भवतः पादौ मे कुट्याम्। अपि भवान्मार्गायास-परिश्रान्तः ? तद्विश्रम्यतामिह । वत्स एहि, पाद्यमानय। (इति चण्डालमाहूय अन्तः प्रवेशयति) (पुरुषः प्रविश्य उन्मत्त इवाभिनयन् मुद्गलदर्शितासने उपविशति)

वृद्धभिक्षुकः -(याचकं प्रति) क एष पुरुष उन्मत्त इव चरन्नपि स्वतेजो न निगूहति । तथा हि –

उन्मादं प्रकटीकरोति पुरुषश्चेष्टाभिरेव स्वयं
नेत्रे चामितभक्तिभावभरिते तेजोमयं तन्मुखम् ।
जल्पन् किञ्चिदपीह मन्त्रजपनं किं वा करोत्यन्वहम्
भस्मागूढ इवास्ति वह्नि सदृशो नास्त्येवमुन्मादिता॥ १९॥

याचकः - युक्तमाह भवान् -

यदा कथञ्चिन्नयने विवर्त्य दिदृक्षया तन्मुखपङ्कजस्य ।
व्यापारयाम्युत्तमतेजसं तं द्रष्टुं न शक्ते नयने मदीये ॥२०॥

नेत्रे तदीये नयने मदीये भित्त्वा प्रवेशं हृदये लभेताम् ।
कच्चित् स हावं सहसा च विद्यात् इत्येव भीर्मे हृदयं भिनत्ति ॥२१॥

In Public domain. Digitization Muthulakshmi Research Academy

(पुरुषस्तु किञ्चिदप्यनुक्त्वा भोजनं करोति । तत्समये च मुहुर्मुहुः मुद्गलस्य तत्सतीसुतयोश्च मुखान्येव पश्यन् हसति) (मुद्गलः भोजनानन्तरं पुरुषमुपेत्य हस्तप्रोञ्छं ददाति)

पुरुषः - धन्योऽसि त्व् मुद्गल ! (हस्तप्रोञ्छं गृहीत्वा) धन्यस्ते परिवारश्च। तत्कण्ठध्वनिपरिवर्तनजात(मुद्गलःविस्मयस्तन्मुखमेव पश्यति) (तदा संघटते किञ्चन महाद्भुतम्) (मलदूषितवपुषश्चण्डालस्य स्थाने दृश्यते कश्चन महर्षिः)

वृद्धभिक्षुकः - आः किमेतत् ? कुत्र गतस्स चण्डालः?
(सर्वे सविस्मयं तं महर्षिमुपेत्य साञ्जलयः प्रणमन्ति)

महर्षिः - मुद्गल ! वत्स ! उत्तिष्ठ ! अहमस्मि दुर्वासा इति प्रथितः । तव व्रतदीक्षा-परिपालनपरीक्षाप्रेरितबुद्धिरत्रागताऽस्मि । न अन्यमानवसाध्यमिदं धन्यजीवनम् कीदृशी श्लाघ्या दीक्षा! नितरां प्रसन्नोऽस्मि ते समदाचारेण ।

तथा हि -

धर्मं सेवितुमत्र शुद्धमतयः केचित्प्रयत्नं सदा
कुर्युस्तत्र न मेऽस्ति लोकमहित स्वल्पोऽपि भेदो ध्रुवम् ।
एतादृक् पुरुषस्तु कोपरहितो नास्ति त्रिलोके ध्रुवं
यो नाप्नोति कदापि तं तु मनसि क्षोभं स वै संयमी ॥२२॥

मासत्रयं त्वं व्रतदीक्षया हि क्षुधाग्निदग्धोऽपि कुटुम्बवृत्तिः ।
कदापि नाप्नोषि विकारभावं शान्तस्तु विस्मापयसीह सर्वान् ॥ २३ ॥

अतो वत्स ! त्वद्व्रतदीक्षापरिपालनाक्षुभित्तचित्तत्वाकऽष्टविनोऽहं निवन प्रसन्नः । वरमेकं ते दित्सामि। किं वा अमीप्ससि त्वम् ।

मुद्गलः -(गद्गस्वरः साश्रुनेवः साञ्जलिश्च) महात्मन ! साधारणजनानुजिघृक्षया भवान्मे कुट्यां यदा पादावधात् तदैव सम्पन्नं मे अभीप्सितं पक्वानि च भागधेवानि। प्रसन्नाश्च देवाः । किं वा अन्यदाशंसे येन मे मर्त्यता आविष्क्रियेत । धन्योऽहं भगवन् !

In Public domain. Digitization Muthulakshmi Research Academy

मासत्रयान्मे शुभलोकदायी भवान् भवाब्धेस्तरणिश्शमिच्छन् ।
आतिथ्यमैच्छन्मम पुण्यपाकात् किं वा परं मे जनिनाऽप्यमत्र ॥२४॥

महर्षिः -तथापि, मासत्रयं यावत्ते हस्ताद् भोजनादिकमाप्यनितरामधर्मोऽहम् ।
कमपि वरं याचस्व माम्। भवतु, स्वर्गसुखमपेक्ष्यते वा त्वया ?
दुःखस्य लेशोऽपि न विद्यतेऽत्र प्राप्तं सुखं तत् परिहीयते न ।
दिव्यास्तु नार्यः सुमहाँश्च भोगो नाकं तदेव स्पृहणीयमास्ते ॥२५॥

मुद्गलः - महात्मन् ! जानन्नपि भवान् स्वर्गादिफलं तुष्टुषमाणो माँ मूकीकरोति ।
नाहं काङ्क्षे तादृशं फलम् । (एतस्मिन्नन्तरे दुर्वासमहर्षिसमादेशानुसारं
देवदूताः स्वर्गात्तत्रागच्छन्ति ।)

देवदूतः - महेच्छ मुद्गलमहर्षे ! स्वर्गं नेतुं त्वां देवेन्द्रेणाज्ञप्ता वयमत्रागताः ।
तदागच्छ, देवरथोऽपि भवदानयनाय सज्जीकृतोऽस्ति । रथामारुह

मुद्गलः– (कंचित्कालमालोच्य समन्दहासं) किं वा तत्र सौख्याधिक्यम् ?
महात्मन् ! कृपया वर्ण्यताम् ।

देवदूतः - श्रूयताम् -

यज्ञैर्योगविशेषदार्ढ्यवशतः प्राणान्नियम्यापि वा
दानैर्ज्ञानबलेन घोरतपसा भक्त्या च लिप्सन्ति तम् ।
तत्तत्पुण्यसमूहपाकलबतः सम्प्राप्यमाणस्त्वयं
स्वर्गस्ते गृहमागतः स्वयमहो धन्योऽसि हे मुद्गल ॥२६॥

अपि च मुद्गल !

लोके सदा मुद् गलतीति खेदः स्वर्गे ते नो मुद् गलिता कदापि ।
वार्धक्यबाधा न, न वाऽर्तिगाथा स्वर्गं तमिन्द्रस्य वृणुण्व रम्यम् ॥२७॥

मुद्गलः - (समन्दहासं) वाढम् ! कृपया मे तत्रस्थान् दोषान् अपि वर्णयत ।
(देवदूताः परस्परं मुखान्यवलोकयन्तस्तूष्णीं तिष्ठन्ति)

देवदूतः - (दुर्वासमहर्षिं पश्यन् समन्दहासं) श्रूयन्तां तेऽपि,

In Public domain. Digitization Muthulakshmi Research Academy

सौख्यं तत्तदुपार्जितस्य फलितं पुण्यस्य नाके ध्रुवं
तत्तत्पुण्यबलं हि कारणमहो पुण्यं मनुष्येऽसमम् ।
केचित्पुण्यमुपार्जयन्ति बहुलं केचित्तु दभ्रं तथा
स्वर्गं प्राप्य पुनश्च मत्सरतया क्लिश्नीयुरेते जनाः ॥२८॥

पुण्यं तदाश्रित्य यतोऽस्ति नाकं क्षीणे च पुण्ये पततीन्द्रलोकात् ।
ततस्सदा पुण्यमुपार्जितं हि पुमान् यतेतार्तिविनाशहेतोः ॥२९॥

मास्तु ते चिन्ता । ते गुणा दोषाश्च प्राकृतजनानां कृते गण्यन्ते । भवांस्तु पुण्यनिधिः। नास्ति तत्र च्युतेरवकाशलेशोऽपि ।

मुद्गलः -(साञ्जलिः) भगवन् । विमृश्यमाणे गुणाः दोषाणां भानोः पुरतः इव खद्योता विच्छायतां गच्छन्ति।

श्वो वाऽद्य सौख्यं हिमवद्विशीर्णं भवेदितीयं यदि भीस्ततः किम् ?
नाकेन किं भोगविनाशसत्त्वात् समानमेवात्र तु चर्चणीयम् ॥३०॥

अतो न मे स्वर्गसुखेषु दृष्टि नैं वा भवन्तो न मयाऽद्रियन्ते ।
अहं तु नाकस्य गुणान्न काङ्क्षे दोषाकुलो नाक इतीह सत्यम् ॥३१॥

देवदूतः - (निस्सहाय इव दुर्वासमहर्षिवदनमेव पश्यन्) यदि ते तथा निश्चितम् न कोऽपि निर्बन्धः । परन्तु यदा ते मनस्युदेति स्वर्गजिगमिषा तदा नः आह्वय।

मुद्गलः - (साञ्जलिरेव) महात्मानः ! अप्यस्ति त्रैलोक्ये किञ्चित् स्वर्गादप्यधिकं पुनरावृत्तिरहितं पदं मनुष्यैरपि प्राप्यम् ? यद्यस्ति तन्मे विवृण्वन्तु ।

देवदूतः - अस्मिन् विषये महर्षय एव प्रमाणम् । अत्रस्थ एव महर्षिः। पृच्छाम तम् । (दुर्वासोमहर्षिस्तदा मुद्गलं सप्रेम पश्यन्)

महर्षिः - श्रूयताम् !

वेदान्तेषु विनिश्चितं श्रुतिपदं चैतन्यरूपं महः
सर्वाल्लोकगणान् सृजत्यवति तान् संहृत्य धत्ते पुनः ।
सर्वस्यापि तदस्ति पोषकतया स्थित्वा स्वयं संततं
ज्ञानेनैतदुपागता न हि कदारप्यावृत्तिभाजः पदात् ॥३२॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वर्गादपीदं पदमस्ति वर्यं प्राप्यैतदाप्तव्यमतो न किञ्चित् ।
न मत्सरं तत्र न चास्ति भेदः न वा भयं सौख्यविनाशमूलम् ॥ ३३ ॥

अपि च–

सच्चिन्मोदमयं वपुर्दघदिदं शक्त्यात्मकं भासते
सर्वत्रास्ति च सर्वंग सुनिशितां धत्ते स्थितिं शाश्वतीम् ।
चित्तेकाग्र्यबलेन पुण्यवशतो विन्दन्ति न त्वन्यथा
चैतन्याख्यमिदं तु सत्यमितरन्मिथ्यैव तज्ज्ञायताम् ॥ ३४ ॥

मुद्गलः - (साश्रुनेत्रस्तदाकर्ण्य गद्गदस्वरः) महात्मन् ! विद्वांसोऽपि मां मोहयितुमेव स्वर्गादिफलानि वर्णितवन्तः । क्व चैतन्यपदं क्व चैतन्नाकपदम् ? इदानीमहं विगतसन्देहोऽस्मि शक्तश्च सत्यं ज्ञातुम् । तत्पदप्राप्त्यै प्रयतिष्ये पूर्ववदेवं व्रतं चरन् । (इति वदन् दण्डवत् महर्षेः पादयोः पतति । महर्षिस्तमाशीर्भिरभिनन्द्य तिरोभवति । देवदूताश्चान्तर्हिता भवन्ति । मुद्गलस्य परिवारः, भिक्षुकः अन्यो याचकश्च सविस्मयं पश्यन्ति ।)मुद्गल !

धन्यं ते महनीयजीवितमिदं धन्यास्त्वदीया जनाः
धन्येयं पृथिवी भविष्यति सदा त्वत्पुण्यसङ्कीर्तनात् ।
धर्मार्थं निजजीवनञ्च मनुजास्त्यक्त्वा हि मुक्ता ध्रुवं
तादृग्धर्ममहीघ्रमत्र सततं सेवध्वमन्तः स्थिरम् ॥ ३५ ॥

इति श्रीमधुसूदनपेन्नारचितं
मुद्गलचरितनामकं
रूपकं समाप्तम्

***

In Public domain. Digitization Muthulakshmi Research Academy

काव्यकण्ठो विजयते

(अहमदनगरतः गुञ्जारवपत्रिकायां प्रकाशितं रूपकम्)

वर्णितो विषयः एकोनविंशति विंशतिशताब्दयोर्भारते (१८७८-१९३६) आध्यात्मिकौन्नत्यमितोऽधिमभिवर्धितवत्सु प्रमुखाः श्रीमन्तः वासिष्ठगणपतिमुनि-नामधेयाः आन्ध्रदेशमलञ्चकुः स्वजन्मना तपसा च । स्वजीवनस्य (१९००) द्वाविंशतितमे वर्षे तैर्नवद्वीपपण्डितसभायां पण्डितानामध्यक्षादासादि काव्यकण्ठेति पुरस्कारः। घटनेयं तेलुगुभाषाग्रन्थेषु पूर्वमेव वर्णिता । तेषु ग्रन्थेषु गुन्टूर लक्ष्मीकान्तस्य 'नायन' नामकः एकः, मैत्रावरुणनामकस्य महातपस्वी नामकः अपरः ग्रन्थश्चात्यन्तं प्रसिद्धौ । तावाधारीकृत्य नवद्वीपे घटितायाः घटनायाः संस्कृतरूपमिदं रूपकम् ।)

सूचना - अस्मिन् रूपके नक्षत्रचिन्हाङ्कितश्लोकाः सभायां गणपतिमुनिभिः एवमम्बिकादत्तव्यासैश्च प्रोक्ता इति पारम्परिकतया श्रूयते । तदितरश्लोका एव रूपककर्तुः मधुसूदनस्य ।

काव्यकण्ठो विजयते

(श्रीमतो वासिष्ठमुनेर्जीविते घटितमाधारीकृत्य रचितं रूपकम्)

सच्चिदानन्दरूपां सच्छब्दैकवाहनां पराम्।
सदर्थरूपिणीमहं सत्काव्यरचनाशक्त्यै संस्तुवे ॥१॥

भारतीलास्याङ्गणं मानसं मे भवतु सुविशदम् ।
शब्दार्थवाहनीतो मत्काव्ये रसपुष्यरथो लसतात् ॥२॥

रेणुकातत्त्ववेत्ता रमणमहर्षेः शिष्यो गुरुः ।
काव्यकण्ठो विजयते वासिष्ठो गणपतिस्स मुनिः ॥३॥

सिद्धोत्तमो योगविदां वरिष्ठो गजाननस्याभिनवावतारः ।
उमासहस्रादिकवित्वकर्ता जीयादनूनप्रतिभो वसिष्ठ ॥४॥

क्व जीवनं पूर्णतपः प्रभाविनां क्व चञ्चलं मूढमतीव मे मनः ।
तथापि तेषां चरितेन चोदितः करोमि विज्ञा गुणगानसाहसम् ॥५॥

In Public domain. Digitization Muthulakshmi Research Academy

नाहमस्मि कवितासुबुद्धिमान् शास्त्रवृन्दगतमर्मविन्न वा ।
काव्यमद्य रचयामि केवलं काव्यकण्ठगुणबद्धमानसः ॥६॥

(द्वाविंशतिवर्षीयो गणपतिः प्रविशति)

गणपतिः-

विद्वच्चन्द्रकलापूर्णं सुहृत्ताराधिसेवितम् ।
खलमेघगणापेतं भासतेऽदस्सभानभः ॥७॥

नवद्वीपपण्डितसभेयं सम्पूर्णभारतवर्षे लब्धप्रतिष्ठा। शास्त्रमर्म-जिज्ञासूनां कवितारसपिपासूनां च तृष्णां शमयन्तीयं गीर्वाणवाणी-प्रियाणाममृतायते। आध्यात्मिकशक्तिसम्पन्नानां महोन्नततपः परिपाकेन देशेऽस्मिन् प्रादुर्भूतोऽयं सनातनधर्मः संस्कृतिविषमोहिनीमूर्च्छितानां दास्यभावमजिहासूनाञ्च मूर्खता-हेतोर्वाताहता नौरिव दोलायमानो विषमामेव दशां भजति । तथापि केषाञ्चित् सुमनसामादरेण भारते सनातनसम्प्रदायोऽयं सर्वदा विलसति । अत्र खलु -

विवेकख्यातिशून्यानां जनानां दुःखदर्शनात।
कपिलो जातकारुण्यो व्याचख्यौ साङ्ख्यदर्शनम् ॥ ८ ॥

साङ्ख्यज्ञानमथेप्सूनामुपायं योगदर्शनम् ।
पतञ्जलिः कृपापूर्णो जगाद स्वास्थ्यमुत्तमम् ॥९॥

षोडशानां पदार्थानां तत्त्वज्ञानाद् भवेद् ध्रुवम् ।
निःश्रेयसमिति प्राह गौतमो न्यायदर्शने ॥ १० ॥

द्रव्यादीनां पदार्थानां सप्तानां तत्त्वविज्जनः ।
लभते मोक्षमित्याह कणादः पीलुदर्शने ॥ ११ ॥

वेदार्थं वेदमन्त्राणां विनियोगञ्च कर्मसु ।
जैमिनिः प्राह मीमांसादर्शने स्वर्गसाधनम् ॥१२॥

वेदान्तार्थं परं ब्रह्म निर्णीय बादरायणः।
ब्रह्मज्ञानाद् भवेन्मुक्तिरित्येवं प्रत्यपीपदत् ॥१३॥

भगवान् शङ्कराचार्यः सूत्राणामन्वयक्रमम् ।

In Public domain. Digitization Muthulakshmi Research Academy

परीक्ष्याभिदधे मोक्षो ब्रह्मभाव इति स्फुटम् ॥ १४।।

व्याससूत्रवटस्यैव शाखा जाता ह्यनेकशः।
तेषामेको दृढस्कन्धो विद्यते भुवि शङ्करः ॥ १५॥

जननमरणप्रवाहपतितानां मार्गान्धानां मार्गजिज्ञासूनाञ्च कृते, कृते घोरतपसि महर्षिभिरिहोद्भूतानि षड्दर्शनानि येषामाधारेण सुतरः सुतरां मोहसागरः । अथवा कलिमहाशयस्य प्रभावोऽयं यद् ज्ञाततत्त्वा अपि सन्तः सन्तोऽपि बहवः सन्ति प्रकृतेरेव वशानुगाः। कति वा सन्ति महेच्छा ये तपोबलेन कलिमलं दिधक्षेयुः ? तपो विनाऽहं न किमपि पश्यामि मार्गान्तरम् । तथाहि-

तपो विना दुःखविनाशनार्थं नास्त्येव किञ्चिच्छरणं पृथिव्याम्।
तत्तद् विहायान्यगतीर्भजन्ते नरा इतीयं महती विपत्तिः ॥ १६॥

तपः पूतं मनो यस्य शुद्धं स्यात् स्फटिकोपमम् ।
ज्ञातं सर्वं भवेत्तस्य तपसाऽऽनीतमन्तिकम् ॥ १७॥

विविधविषयतृष्णापूर्णचित्तस्य चित्ते
कलिमलकुलकेलिर्वर्तते व्याकुले वै।
गहनमनिलतत्त्वं वेत्ति योऽभ्यासदार्ढ्यात्
प्रकटयति तनुं स्वां तस्य सत्यं वदामि ॥ १८ ॥

अस्तु - व्यासशुकशौनकादिप्राचीनानां महर्षीणां दिव्यतपसां प्रेष्ठं खल्विदं स्थानं यत्र सत्यमेव सर्वैश्वर्यस्थानमासीत् । यत्र नदीनामपि प्रवाहाः शुभमन्त्रानुच्चार यन्त्यनुदिनम्। येषां गृहेषु तिर्यञ्चोऽपि निगममुदीरयन्ति । येषामाश्रमेषु सर्वेऽपि जन्तवोऽन्तः स्थ-कामादिकालुष्यमुज्झित्वा चरन्ति । पवित्रा खल्वियं भूमिर्यत्र पदे पदे वेदनादः शोश्रूयते पदे पदे देवो बोभूयते । स्थाने चैतादृशी विद्वत्सभा यत्र -

यत्र शास्त्रार्थविज्ञानं परीक्षन्ते विचक्षणाः ।
ऊहापोहेन सत्यस्य व्यञ्जन्तो रूपमुत्तमम् ॥ १९॥

न्यायवेदान्तमीमांसाव्याकरणचतुष्टयम्।
चतुःशास्त्रमिति ख्यातं तत्र ज्ञानं परीक्ष्यते ॥ २०॥

In Public domain. Digitization Muthulakshmi Research Academy

नाट्यशास्त्रस्य सारञ्च चुलुकीकृत्य पण्डिताः ।
साहित्यशास्त्रतत्त्वञ्च समीक्षन्तेऽधुना पुनः ॥२१॥

अमीषां शास्त्रसाहित्यगहनार्थविदां परम् ।
समर्थाः पुरतः स्थातुं सभायां सन्ति वा न वा ॥२२॥

अतोऽहं वादसंवादकेलिलोलानिभैः समान् ।
दिदृक्षे पण्डितानेतान् सभामध्यस्थितांल्लघु ॥२३॥

(इत्युक्त्वा सभामध्यं प्रविविक्षुरग्रे चलति । तावता कोऽपि द्वारपालस्तं निरुणद्धि)

द्वारपालकः - अहो कोऽसि त्वम् ? प्रवेशो अपरिचितशास्त्राणामनभ्यस्त शास्त्रार्थचर्चानामत्र दुर्लभः । रूपेणैव त्वत्पाण्डित्यप्रकर्षः ज्ञायते । अपसर इतो यावदहं त्वामितो न निष्कासयामि ।

गणपतिः - (स्वगतं) अहो कीदृशी वाचालताऽस्य वाराकस्य (अन्तर्विलोक्य) अहो कीदृशी वाग्मिता सभायाम्। किं नु करिष्ये। अस्तु (प्रकाशं) महोदय ! भवादृशानां महदभाग्यं यद् विद्वत्सभानां भवादृशा द्वारपालनं कुर्वन्ति । केनोपायेन प्रवेशो लप्स्यते तदनुगृह्यताम् ।

द्वारपालकः- तत्सर्वमहं न जाने । पराधीनतां पालितानामवेहि। दूरमपसर। (तावता कोऽपि नूलपुरुषः तेनैव मार्गेण गच्छन् गणपतिमुखभानुं विलोकयति । विलोक्य चकितो भवति । समीपमागच्छति ।)

नूलपुरुषः - कुतोऽत्रैव तिष्ठासति भवान् ? सभायां किमर्थं पदं न धत्ते ।

गणपतिः - (समन्दहासं)

सनकादिमहर्षीणां वैकुण्ठगमनं पुरा ।
दैत्यौ न्यरुणतां तद्वदेष मां निरुरुत्सते ॥ २४ ॥

विदुषां निवहे यथा भवेद् गतिरस्यापि विनम्रदेहिनः।
कृपया भवता तथाविधं करणीयं ननु शास्त्रवेदिना ॥ २५ ॥

नूलपुरुषः - आम् ! एवं खलु सभाध्यक्षादयः महान्तो निवेदनीयाः । प्राप्ते काले

In Public domain. Digitization Muthulakshmi Research Academy

स्वयमेष्यति सभा भवन्तं निकषा। (इत्युक्त्वा ततो निष्क्रामति)

द्वारपालकः - श्वो भविता समारम्भस्तावद् भवान् कुत्राऽपि विश्राम्यतु ।

(गणपतिः सशिरश्चालं ततो निष्क्रामति)

(२)

(गणपतिः सहचरद्वयेन सह नगरे परिभ्रम्य कस्यचिद् गृहस्य पुरतस्तिष्ठति)

गणपतिः - नगरे भ्रमणेन श्रान्तौ युवाम् । कुत्रचिद् विश्राम्यताम् ।

प्रथमः सहचरः - कुत्रास्ति भो शितिकण्ठवाचस्पतिः तस्य विद्यालयश्च ?

तमन्विष्यन्तः वयमादिनं वीथीष्वेव भ्रान्ताः श्रान्ताश्च ।

द्वितीय सहचरः - तत्ताथाऽस्तु । परन्तु नगरमेतत् सभाहेतोः शोभायमानाऽस्ति नानाविधैरलङ्करणैः । सर्वत्र तोरणमालाः रचिताः । प्रतिगृहमत्र देववाणीक्वणः सहृदयहृदयतोषं विदधाति । गणपतिः - सत्यमेतत्

प्रतिनरमतुला या शेमुषी भासतेऽत्र
प्रतिगृहमपि सम्यक् श्रूयते देववाणी ।
जयति विमलकीर्तिः पुण्यपूगस्य मूर्तिः
शतमखनगराभा नागरी दिव्यदीप्तिः ॥२६॥

पश्यतम्– **गृहे गृहे संस्कृतभाषिणां यत् सल्लापमाधुर्यमनूनमत्र ।**
कर्णातिथिर्मे युवयोश्च जातं भूयः क्व नो तच्छ्रुतिमूलमायात् ॥२७॥

परन्तु -

अत्र विद्वत्सभाया यो कार्यदर्शी बहुश्रुतः ।
शितिकण्ठः कदा दृष्टेः पथमायाद् विचक्षणः ॥२८॥
वाचस्पतिर्व्याकरणस्य वक्ता गीर्वाणवाण्याः प्रथमोऽस्ति भक्तः ।
अस्यां नगर्यां क्व स मे महेच्छो लभ्येत को वा वदितुं समर्थः। २९

एकः सहचरः - पृष्टोऽपि जनः अत्र न वदत्येव तद्विषये । मम सहनशक्तिस्तु नष्टा ।

नराः पलितकेशा वै पण्डिता इति भावना ।
अत्रस्थानां वृथा स्वान्ते विद्यते मूढचेतसाम् ।।३०।।
शिशुं गणपतिं दृष्ट्वा शिशुत्वेऽस्य विधुर्हसन् ।

 In public domain. Digitization Muthulakshmi Research Academy

अवस्थां कीदृशीं प्राप्तोदित्येषा प्राक्तनी कथा ॥३१॥
तथा गणपतिं दृष्ट्वा वयसा च लघुं गुरुम् ।
संशयाना जनाः कीदृगवस्थां प्राप्नुयुर्वद ॥३२॥

गणपतिः - तथाऽस्तु । युवां क्षुधिताविति भाति । कुत्राप्यासीना वयं पृथूकभक्षणेन वैश्वानरं शमयामः । चलतम् (अग्रे गत्वा) हं - अस्य विशालगृहस्य पुरतो वर्तमाना वितर्दिकैव रात्रावस्यामस्माकं शयनागारः अस्तु (उपविश्य) पृथुकसञ्चीम् उपानयतम् खादामः पृथुकान् । (सर्वे पुथुकान् खादित्वा वितर्दिकामधिशेरते)

गणपतिः - कीदृशोऽयं परमेश्वरीविलासः यदत्र नगरिकायां बहुश्रुतस्य वाचस्पतेः गृहसङ्केतमपि वक्तुमसमर्थाः जनाः । सर्वत्र परीक्ष्यते विधिनाऽयं जनः। अयि जगदम्ब मदम्ब -

देवलोकपूजितांघ्रिरीश्वरस्य भामिनी
मानसाभिधानवारिससम्भवार्पणप्रिया ।
साधुकामदायिनी दुरात्मकामघातिनी
वीरलोकमाननीयमादधातु मामुमा ॥३३ ॥

(एवमुच्चैः परमेश्वरीं संस्तुत्य निद्रातुमुपक्रमते यावत् तावदेकः पुरुषः तस्यैव गृहस्य द्वारमुद्घाट्य सत्वरं बहिरागच्छति)

पुरुषः - को वा भवान् भगवन् ? निमित्तेन केनात्र समायातः? किमर्थं बहिरेव सुषुप्सति। कृपया मामातिथ्यमुररीकृत्यान्तः प्रविशन्तु सर्वे भवन्तः।
(गणपतिः सबहुमानं तं निर्वर्ण्य सहचराभ्यां सहान्तःप्रविश्य तेन पुरुषेण दर्शिते समुचितासने आसीनो भूत्वा सपरामर्शं पुरुषं पश्यति)

पुरुषः - महाशय ! मैथिलीयकुलाभिज्ञनामकोऽहम् । पण्डितसभादिदृक्षया समागच्छाम्यत्र तैर्वासार्थं दर्शितेऽस्मिन् सद्मनि सद्यो निवसामि। भवन्तोऽपि मया सह वस्तुमर्हन्ति। भवतां पाण्डित्यमपि साक्षात्कृतम्मया। अपि कृतं नैशं भोजनम्? नोचेदत्रैव ममातिथ्यं बहु मन्यताम् ।

गणपतिः - भवदीयसौहार्देन पुनरुज्जीविता वयम्। धन्याः। शितिकण्ठवाचस्पति-नामकानामासां सभानां कार्यदर्शिनां दर्शनमभिलष्य नगर्यामादिनं भ्रमित्वा

In Public domain. Digitization Muthulakshmi Research Academy

श्रान्ता वयं विफलीभूतमनोरथाश्च जाताः ।

पुरुषः - किं.... किमुक्तं शितिकण्ठवाचस्पतिरिति । सम्पन्नं भवतां कार्यमिति निःश्वस्यताम्। विदितपूर्वो मे सः विद्वदग्रणीः।अहं दर्शयामि तम् । अलं परितप्य । अधुना जातमर्धरात्रम् । श्वोभूते भविता तद्दर्शनम्। सुखं निद्र्यताम् ।

गणपतिः - धन्याः वयं, शुभरात्रिः ।

(सर्वे शयनायोपक्रमन्ते)

(३)

(सभामण्डपे कुलाभिज्ञः गणपतिः तस्य सहचरौ च प्रविशन्ति)

कुलाभिज्ञः - वाचस्पतिवर्याः अत्रैवागच्छन्ति। मया सहागच्छन्तु परिचयो भविष्यति। अयि भो विद्वद्वर्याः ! कुलाभिज्ञोऽहमभिवादये ।

(वाचस्पतिः दक्षिणपार्श्वे मुखं परावर्त्य कुलाभिज्ञं दृष्ट्वा तत्समीपमागच्छति)

वाचस्पतिः - अहो कुलाभिज्ञः अत्र ! अपि कुशलं भवतः ? काऽपि नवीना निर्मितिः कृता वा साहित्ये भवता ?

कुलाभिज्ञः- सर्वं निवेदयितुकामोऽहं भवतां दर्शनार्थमाजिगमिषुरस्मि सावकाशं सर्वमपि गृहे निवेदयामि । परमत्र मे सुहृदः (इत्यर्धोक्तौ)

वाचस्पतिः - किमर्थमेवमनुभूयते सङ्कोचो भवता । कुत एते महाशयास्समागता? किमप्यस्ति करणीयं मया ? स्फुटं वदतु ।

कुलाभिज्ञः - हाँ, एतोषामेव विषये विवक्षुरस्मि । एष गणपतिनामधेयो भवतो दिदृक्षते। काशीतः अत्रायातः (इति गणपतिं दर्शयति)

(गणपतिः स्वस्यूतादेकं पत्रमुन्नीय वाचस्पतये दर्शयति)

वाचस्पतिः- (पत्रं गृहीत्वा) अहो शिवकुमारपण्डितेन लिखितमेतत् पत्रमिति दर्शनेनैव मोमुद्यते चेतः । किमत्र तदीयमेकमेव दृश्यते वाक्यं भवद्विषये ? किमेतत् देवासुरसमीकेषु बहुशो दृष्टविक्रमः ।

भवद्विषये एतावदेव लिखित्वा सर्वमभिहितं तेन शिवकुमारपण्डितेन

रामायणमहाकाव्ये हनुमानेवमीडितः ।

In Public domain. Digitization Muthulakshmi Research Academy

देवासुरसमीकेषु बहुशो दृष्टविक्रमः ॥३४॥

भवानपि तथा शास्त्रचर्चागोष्ठीषु विक्रमी ।
इत्येवमभिधित्सुर्मे मित्रवर्यो बुधानुगः ॥ ३५ ॥

एकेनैव वाक्येन विदितं भवतामतिशयितवाचस्पत्यं पाण्डित्यम्। अस्तु, भवतां सभाप्रवेशं को वा निवारयितुं प्रभवति मन्दबुद्धिः? अद्यैव हरिसभायां हरितुलितविक्रमाणां भवतामस्तु शेमुषीनिकषः सभासदो निकषा।

(इति वदन्नैव हस्तेन गणपतिमग्रे नयति । कुलाभिज्ञः गणपतिसहचराभ्यां सह तत्रैवोपविश्य)

कुलाभिज्ञः - अद्य हरिसभाया अध्यक्षाः श्रीमन्तः अम्बिकादत्तव्यासाः स्वकाव्यतपसा तोषितव्यासाः आशुकावितावनितावल्लभाः।

अधिसभमधुना ते काव्यमाधुर्यमग्र्यं
बुधजनपरितोषं लक्ष्यमादाय चित्ते ।
विदधति कुसुमानां गद्यपद्यात्मकाना
मनुपममुपहारं भारतीतोषणार्थम् ।।३६।।

(गणपतिः वाचस्पतिना अग्रे चलने मञ्चस्थमम्बिकादत्तं दृष्ट्वा उच्चैः) गणपति : - कोऽसौ महाशयः ?

(सभायां निःशब्दता व्याप्नोति । सर्वे कुतूहलं साश्चर्यं सावहेलनमेतं युवानमीक्षन्ते । किमेतत् साहसम् ? उताहो मूर्खता ? कस्यैतत् वाचामनियन्त्रणम् इत्येतादृशान्भावान् प्रकट्यन्ति तेषां लोचनानि ?

अम्बिकादत्तः- (समन्दहासं) सत्वरकवितासविता गौडोऽहं कश्चिदम्बिकादत्तः (इत्यर्धोक्तौ)

गणपतिः - (शीघ्रं तदादाय)

गणपतिरिति कविकुलपतिरतिदक्षो दाक्षिणात्योऽहम् ॥ (इति पूरयति)

कश्चन सभास्तारः - प्रथमवाक्ये कवितासविता इत्येकत्रैव कश्चनालङ्कारः परन्त्वपरस्मिन् पतिरिति पतिरति दक्षो दाक्षिणोत्येति बहुत्र

In Public domain. Digitization Muthulakshmi Research Academy

शब्दालङ्कारः श्रोतृणां श्रवणानि सुधाधारया पूरयति।
अवधारय (इत्यन्यमुद्दिश्य वदति)

गणपतिः - इदमपि श्रूयतां भोः । भवानम्बिकादत्तः । अहन्तवौरसः पुत्रः (तद्वचनं श्रुत्वा सर्वे सभास्ताराः साभिनन्दम् उच्चैर्हसन्ति। सर्वेषु सोत्कं पश्यत्सु परीक्षा प्रारब्धेति समुद्घोष्यते सभाध्यक्षेण)

अम्बिकादत्तः - एवमत्र भवतः पदवाक्यप्रमाणज्ञानं प्रदर्शनीयमस्ति चेद् भवतु भवतः परीक्षा समस्यापूरणादिषु । इयं दीयते समस्या पूर्यतां सरसं भवता-

स्तनवस्त्रं परित्यज्य वधूः श्वशुरमिच्छति ।

गणपतिः - श्रूयतां

लोकाम्बिकादत्तबलेन जिव्हा ममाद्य लास्यं कुरुतात् सभायाम्।
तेनात्र सभ्याः परितोषमाप्य गीर्वाणवाणीमपि संस्तुवन्तु ॥३७॥

भवतः समस्या मयेत्थं परिष्क्रिष्यते -

हिडिम्बा भीमदयिता निदाघे धर्मपीडिता।
स्तनवस्त्रं परित्यज्य वधूः श्वशुरमिच्छति ।।

सभासदः - साधु.... साधु ..... सरसमिदं पूरणम् (इति करतालध्वनिनाऽभिनन्दन्ति)

अम्बिकादत्तः - पूरितमिदं पद्यम्।परन्तु..... (इत्यर्धोक्तौ)

गणपतिः - अवगच्छामि भवदन्तरङ्गम् । हिडिम्बास्थाने द्रौपदी किमर्थं न वर्णितेति विचारः खलु भवताम् । श्रूयताम् -

क्षत्रिया च पुरन्ध्री सा द्रौपदी धर्मपीडिता।
स्वयं वस्त्रं कथं त्यक्त्वा वायुं सेवेत मानिनी ॥३८॥

हिडिम्बा तु कुलोत्पन्ना राक्षसानां यतस्ततः ।
यथेष्टवर्तने तस्या नास्ति दोषो बुधोत्तम ॥ ३९ ॥

सभासदः सभाध्यक्षश्च - साधु... साधु प्रतिपादितम् ।

अम्बिकादत्तः - इयमपरा परिष्क्रियताम् -

In Public domain. Digitization Muthulakshmi Research Academy

वत्सरस्यैकदा गौरी पतिवक्त्रं न पश्यति ।

(सर्वेऽपि सालोचनालोचना भवन्ति)

गणपतिः - (समन्दहासं) अवधार्यताम् -

चतुर्थ्यां भाद्रशुक्लस्य चन्द्रदर्शनशङ्कया।
वत्सरस्यैकदा गौरी पतिवक्त्रं न पश्यति ॥

(सभासदां करतलध्वनिर्नभस्तलं स्पृशति)

अम्बिकादत्तः - साधु... इयमपि परिष्क्रियताम् –

सूर्यः शशाङ्केन समं विनष्टः ।

गणपतिः - (दीर्घं निःश्वस्य मन्दहासेन)

राहुस्त्रिकोणे च गुरुस्तृतीये कलत्रभावे च धरातनूजः।
लग्ने च कोष्ठे यदि बालकस्य सूर्यः शशाङ्केन समं विनष्टः ॥*

(एकदैव सभासदां करतालध्वनिर्दिक्षु प्रसरति)

एकः सभास्तारः - अहो कीदृशी युवकस्यास्य सद्यः स्फुरणचातुरी। साहित्यगत-समस्यामपि स्वप्रतिभया ज्यौतिषिकविज्ञानेन परिष्करोति । साधु.. साधु..

अम्बिकादत्तः - समस्यापूरणस्य चरमां समस्यामवधारयतु...

पिपीलिका चुम्बति चन्द्रमौलिम् । *

गणपतिः - अवधार्यताम् -

*** सतीवियोगेन विषण्णचेतसः**
प्रभोः शयानस्य हिमालये गिरौ।
शिवस्य चूडाकलितं सुधाशया
पिपीलिका चुम्बति चन्द्रमौलिम् ॥

(सभ्यानां मुखकमलानि हासेन विकसन्ति । सर्वेषां करतालध्वनिः दिगन्ते विश्राम्यति)

अम्बिकादत्तः – साधु व्यापारिता वाणी भवता । अपरममुमवधारय

न मृगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु ।
तमुदयाय न वा नवयौवना प्रियतमा यतमानमुपाहरत् ॥
अमुष्य भावगाम्भीर्यं - अलङ्कारादिकाव्यविशेषमत्राविष्करोतु ।

गणपतिः - रघुवंशे नवमसर्गे दशरथपरिपालनवैशिष्ट्यं वर्णयन् महाकविः कालिदासः दशरथगुणान् श्लाघतेऽस्मिन् श्लोके। पालकेषु अवश्यम्भाविगुणानत्र प्रस्तौति। श्रूयताम् - अभिवृद्ध्यै व्याप्रियमाणं तं दशरथं मृगयाभिरतिः, द्यूतक्रीडा, मधुसेवन नवयौवना चेति दोषचतुष्कं नापाहरदिति भावः । मनुनाप्युक्तं खलु -

पानमक्षाः स्त्रियश्चेति मृगया च यथाक्रमम् ।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गुणे ॥ *

अत्र तु -

यतमा यतमेति वै यतः कविना स्पष्टमिहोक्तमस्ति तत् ।
कवितामधु शब्दसौष्ठवात् स्वयमास्वादपदं हि विन्दते ॥४०॥

अन्यत्रानेनैव भणितमस्ति महाकविना विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः इति ।

आखेटकं द्यूतमधुप्रधानं स्त्रीणां तथा बाहुलतासुबन्धः ।
एतच्चतुष्कं नृपलोकमध्ये साधारणं तत्र न कोऽपि मुक्तः ॥ ४१ ॥
सत्यपि विकारहेतौ विकारो नोत्पद्यत मनसि यस्य ।
मनुष्याणां सहस्रे सुराणामपि स एव पूज्यः ॥४२॥

दोषायामपि विधुस्तु सकलकलापरिपूर्ण एव हि ।
तथा दोषगणमध्ये संयमी त्वेको विराजते ॥ ४३ ॥

अम्बिकादत्तः – परीक्षाया एकोंऽशः सम्पन्नः । अपरोऽयमारभ्यते ।

स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।
सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्
तपः श्रीः कस्यैषा मदननगरि ध्यायसि तु यम् ॥

दत्तेऽस्मिन् श्लोके रसभावमादौ प्रतिपाद्य तदुपरि रसाभासमपि साधयतु ।

 ublic domain. Digitization Muthulakshmi Research Academy

गणपतिः –

जगदम्बाकृपाहेतोर्जिह्वा मे यदि चेष्टते।
वाग्वैखर्या विलासेन तुष्यन्तु विबुधप्रियाः ॥४४॥

काव्यप्रकाशाख्यस्य आलङ्कारिकग्रन्थस्य चतुर्थोल्लासे रस-तदाभासनिरूपणावसरे श्लोकोऽयमागतः। रसनिरूपणमत्र श्रूयताम्

कस्याश्चन युवत्याः मदनक्रीडाः वर्णयन्नयं श्लोकः तस्याः अनुरागपात्रं जनमुद्दिश्य परेणोक्तमपि प्रतिपादयति । हे सुन्दरि ! यं विना त्वं न रमसे स ते धवः स्तुतिपात्रम्। यं त्वं मृगयसे सोऽवश्यं रणरूपयज्ञे प्राणाँस्त्यक्तवान् स्यात् येन त्वादृशं स्वर्गमाप्तवान्। यं त्वमालिङ्गसि बलात् स ते धवः सुलग्ने जात इति नैव सन्देहः । यमनवरतं ध्यायसि तस्य कीदृशं तपःफलमिदं त्वद्रूपेण प्राप्तम् । इति तस्य जनस्य अत्यैश्वर्यसम्पन्नतां चिन्त्यै व्यनक्ति ।आकुलता, उद्विग्नता, आलिङ्गनमित्यादि सञ्चारिभावादिभिः श्रृङ्गारोऽत्र रसो व्यज्यते ।

रसाभासश्च श्रूयताम् -

श्लोकेऽत्र यमिति यच्छब्दस्यासकृदादानहेतोः कान्तायाः भावनैव मनः फलके समवतरन्ती प्रत्यक्षरसानुभूतेः प्रत्यूहायते । अपरञ्च बहुव्यापारोपादानं तस्याः अनेककामुकं विषयाभिलाषमेव व्यनक्ति येन रसाभासो भवति । अपि शब्दानां सर्वासां (इत्यार्धोक्तौ) -

अम्बिकादत्तः - विरम तावत् । कथं सर्वासामिति ?

*** अनवद्ये ननु पद्ये गद्ये हृद्येऽपि ते स्खलति वाणी ।**
तत्किं त्रिभुवनसारा तारा नाऽराधिता भवता ॥ *

गणपतिः - किमेतद् धार्ष्ट्यम् ? एकस्मिन् शब्दे स्खलितमपि तत्पर्वतीकृत्य सभात्यागमेव मामुपदिशति ? उपहसति च भवान् ? परन्तु भवता -

*** सुधां हसन्ती मधु चाक्षिपन्ती यशो हरन्ती दयिताधरस्य।**
न तेऽलमास्यं कविता करोति नोपास्यते किं दयितार्धदेहः ॥ *

यतः शब्दालङ्कारमोहेन विवशीभूतेन त्रिभुवनसारेति प्रयुक्तमासीत् तत् कथं वा साधु ? विचार्यतामत्र भवद्भिरेव ।

In Public domain. Digitization Muthulakshmi Research Academy

अम्बिकादत्त: क्षणं विचार्य ईषत्कुपितो भूत्वा भणति -

*** ज्योतिरिङ्गण किं नु मन्यसे यत्त्वमेव तिमिरेषु लक्ष्यसे ।**

गणपति: - (तदसहमान: कपटकोपेन)

*** किं नु दीप भवने विभाससे । वायुना बहिरहो विधूयसे ।।**

अम्बिकादत्तः - आः धृष्टता–

*** उच्चैः कुञ्जर माकार्षीः बृंहितानि मदोद्धतः ।**

कुम्भिकुम्भामिषाहारी शेते सम्प्रति केसरी ॥ *

गणपतिः - किं ? आमिषाहारीति वा ? किं न पाणिनीयमाकलितम्?

*** समासीनो रसाले चेन्मौनमावह काक रे ।**

लोकः करोतु सत्कारं मत्वा त्वामपि कोकिलम् ॥

पण्डितमण्डित ! अनुप्रासाद्यलङ्कारमोहजालान्तः पतितः रसपुष्टिं तृणीकृत्य शब्दानेवं रिक्तानेव प्रयुङ्क्ते। तथाहि -

वृथा शब्दजालं विहीनं रसेन

प्रयुङ्क्ते कविर्यत् कथं तत् कवित्वम्।

रस: काव्यजातस्य सर्वस्य चात्मा

रसेनैव शब्दस्य माहात्म्यमस्ति ॥४५॥

अपि च -

अपुष्पा चूतलतिका विपन्ना सा सरोजिनी ।

हेमन्ते हन्त रोलम्ब निरालम्बः क्व मोदसे ॥४६।।

अम्बिकादत्तः (सहसा चकितो भूत्वा) किं... किं वदति भवान् ? का...का... सरोजिनी? (स्वगतं) मम द्वितीयपत्न्याः नाम सरोजिनीति सा बालाऽधुनापि अपुष्पितेति कथमेष जानाति? नूनमस्य-उपासनाविपाको महानस्ति। मम सांसारिकावस्थामेषः चक्षुषोः पुरत इव द्रष्टुमीष्टे । कोऽपि सिद्धपुरुषः स्यादयं तरुण: । (प्रकाश) अस्तु... अस्तु... आसीनो भवतु भवान्।

शितिकण्ठः - (समनस्तापमासनादुत्थाय मञ्चं प्रति गत्वा – उभावपि संबोधयन्) भो पण्डिततल्लजाः । विरम्यताम् -

 Public domain. Digitization Muthulakshmi Research Academy

संवादोऽयं विवादोऽभून्मैवं स्याद्विबुधोत्तमाः ।
शास्त्रतत्त्वस्य चर्चा स्याद् न स्याद् वैयक्तिकी कथा ॥४७॥

अम्बिकादत्तः - नाश्रुतोऽयं भाट्टानां व्यवहारः यतः

*भट्टोऽखिलोऽट्टोपरि वारवध्वा निपीय मध्वारभते विहारम् । (इत्यर्धोक्तावेव)

गणपतिः - परं भवन्तः

असुव्ययो वाऽस्तु वसुव्ययो वाऽप्यमी न मीनव्यसनं व्यजन्ति ॥

(अम्बिकादत्तः एतच्छ्रुत्वा बाष्पापूरितनयनः सहसाऽसनादुत्थाय गणपतिमुपगम्य तं परिष्वजते । सभासदां करतालध्वनिर्दिगन्ते विश्राम्यति)

अम्बिकादत्तः - साधु साधुपुरुष ! तरुणस्य भवतो भाग्यमद्य पचेलिमम् । वन्द्यः खलु भवतः शेमुषीविशेषः। सभेयं भवदागमनेनैव पूर्णा-

सभेयं विभान्ती भवच्छेमुषीं तां निपीय स्फुटं स्वादु साहित्यमाध्वीम्।
इदानीं प्रमत्ता भवच्छ्लाघरक्ता समोदं भवन्तं वचोभिस्समीट्टे ॥४८॥

गणपतिः - (साञ्जलिबन्धं) क्षम्यतामस्य जनस्य परुषव्यवहारः। वैयक्तिकदूषणेषु न मादृशाः प्रक्रमन्ते न मे साधोर्वाक् तस्मिन् व्याप्रियते। परमद्य (इत्यर्धोक्तौ)

अम्बिकादत्तः - (समन्दहासं)

अमीनमीनेति पदद्वयेन गौडस्य चित्तं भवता ह्यचोरि ।
भवद्विधानां विषये यदासीत् तत्प्रेम भूयो परिवर्धते मे ॥४९॥
गीर्वाणवाणीचरणाब्जपुष्पं मनो नितान्तं मम फुल्लमद्य ।
सांदृष्टिकंसंविजिताखिलाशो गृह्णातु सौजन्यपताकमेतत् ॥५०॥
नावसिता परीक्षाऽत्र भवद्विद्याऽपि भूयसी ।
अत्रत्यानां समेषां स्यान्मानसं हर्षनिर्भरम् ॥५१॥
अष्टादशसु पद्येषु त्वयाऽष्टादशपर्वणाम् ।
प्रत्येकं तथ्यमादाय वर्ण्यतां भारतं लघु ॥५२॥
परं तु पद्ये तु हि चे ति धीमन् नैव प्रयोज्यं पदबन्धनार्थम् ।
निरर्थकं शब्दमपीह तज्ज्ञाः व्याचक्षते काव्यपरं हि दोषम् ॥५३॥

शिवदत्तः - (पार्श्वस्थं गणपतिसहचरमुद्दिश्य) पश्य ! कुञ्जरायमाणयोः द्वयोरप्यनयोः

In Public domain. Digitization Muthulakshmi Research Academy

कवित्वस्पर्धाम् -

यदोत्तमसंस्कारा विवदन्ते मनीषिणः ।
राराजीति चमत्कारः सज्जनानां मनोहरः ।।५४।।

(गणपतिः स्वस्थचित्तः पद्मासनासीनो देवीं भुवनेश्वरीं मनसा ध्यायति)

गणपतिः –

यस्याः कृपातरङ्गो मूकमपि कुरुते गीष्पतिसमानम् ।
सा मे मानसे लसतु भूतये भुवनेश्वरी परा ॥५५॥

(तदनु गणपतिना गङ्गानिर्झरपातवदाशु विरचितैः पद्यैः सा सभा विवशीकृता सतीतं साधुवादैरभ्यनन्दत्। पुनः करतालध्वनिर्नभस्तलमस्पृशत्।)

अम्बिकादत्तः –

नवद्वीपेऽद्य सञ्जाता सभाऽपूर्वा विलक्षणा ।
भारतीये चरित्रे स्याल्लिखिता हाटकाक्षरैः ॥५६॥
नवद्वीपे दाक्षिणात्याः कदाऽप्येवं परीक्षिताः ।
नाभूवन्नित्यभूद्यत्तत् सभैषा क्षिणुतेऽयशः ॥५७॥
अर्हन्निह भवानद्य सभास्तारैरेककण्ठमभिमतम् ।
काव्यकण्ठोपहारं गीर्वाणवाणीगलपुष्पहारम् ।।५८॥

काव्यमद्य विरचय्य हेलया काव्यतत्त्वयुतमीश्वरेच्छया।
काव्यलोकमधि संविराजतां काव्यकण्ठबिरुदाञ्चितो भवान् ॥५९॥

गणपतिनामकोऽयमद्य काव्यकण्ठबिरुदमलब्धेति सभाध्यक्षेण मयोद्घोष्यते ।

गणपते - **क्षीरोदधेर्यन्महतः प्रयासात् प्राप्तं सुराणाममृतं यथाऽसीत्**
तथा विसारस्य भवाब्धितोऽदः काव्यामृतं प्राप्तमतीव यत्नात् ॥६०॥

भवशतकृतपुण्यं भागधेयं च सुष्ठु
जनयति पुरुषाणां मानसे काव्यशक्तिम् ।
तदनु सुहितयत्नाद् देवतासम्प्रयोगान्
मनसि फलति काव्यं शब्दशक्त्योपदृब्धम् ॥६१।

इदमप्यत्र प्रस्तूयतेऽस्माभिरद्य यत् शकाब्दीय सौर- ज्येष्ठस्य अष्टमदिवसे (२०-६-१९००) काव्यकण्ठपुरस्कारः गणपतिशास्त्रि-नामकेभ्यः प्रदीयते - इति,

In Public domain. Digitization Muthulakshmi Research Academy

प्राचीनैस्तैः कविकुलवरैः कालिदासादिभिर्या
लब्धा कीर्तिर्भवदनुगता सैव भूयादिदानीम् ।
सद्भिर्दत्तो य इह रुचिरः काव्यकण्ठोपहारः
तेन श्रीमानिह भुवि भवानुज्ज्वलश्चापि भूयात् ॥ *

॥ इति शम् ॥

इति श्रीमधुसूदनपेन्नारचितं काव्यकण्ठो विजयते
इति रूपकं समाप्तम्

***

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN : 978-81-969575-5-1

Prof. Penna Madhusudan
Professor & Dean, Faculty of Indian Philosophy and Culture
Director, Research Programs and Publications,
Kalidas Sanskrit University, Ramtek

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2024